कर्मस्थिति—१. ××× सव्वकम्माणं ठिदीओ ण घेप्पंति, किंतु एकस्सेव कम्मट्ठिदी घेप्पदि। कुदो? गुरूवदेसादो। तत्थ वि दंसणमोहणीयस्स चेव सत्तरिसागरोपमकोडाकोडिमेत्ताए गहणं कादव्वं, पाहण्णियादो। कुदो पहाणत्त? संगहिदासेसकम्मट्ठिदीए। (धव. पु. ४, पृ. ४०३); कम्मट्ठिदि त्ति वुत्ते सत्तरिसागरोपमकोडाकोडिमेत्ता (ठिदी) घेत्तव्वा। (धव. पु. ७, पृ. १४५)।

कर्मों में दर्शनमोहनीय की जो सत्तर कोडाकोडि सागरोपम प्रमाण सर्वोत्कृष्ट स्थिति है, उसी का कर्मस्थिति से ग्रहण होता है, अन्य सब कर्मस्थितियों का नहीं।

कर्मस्थित्यनुयोगद्वार—कम्मट्ठिदि त्ति अणियोगद्दारे सव्वकम्माणं सत्तिकम्मट्ठिदिमुक्कड्डणोकड्डुणजणिदट्ठिदिं च परूवेदि। (धव. पु. ९, पृ. २३६); कम्मट्ठिदि त्ति अणियोगद्दारे एत्थ महावाचया अज्जणंदिणो संतकम्मं करेंति, महावाचया ट्ठिदिसंतकम्मं पयासंति। (धव. पु. १६, पृ. ५७७)।

जिस अर्थाधिकार में सब कर्मों की शक्तिस्थिति और उत्कर्षण-अपकर्षणजनित स्थिति की प्ररूपणा की जाती है उसका नाम कर्मस्थिति है। यह महाकर्मप्रकृतिप्राभृत के कृति-वेदनादि २४ अनुयोगद्वारों में से २२वां अनुयोगद्वार है।

कर्महानि—कर्महानिर्मिथ्यात्वादीनां सम्यक्त्वप्रतिबन्धककर्मणां यथासम्भवमुपशमः क्षयोपशमः क्षयो वा। (सा. ध. स्वो. टी. १–६)।

सम्यक्त्व के रोकने वाले मिथ्यात्वादिक कर्मों का जो यथासम्भव उपशम, क्षय अथवा क्षयोपशम होता है; इसका नाम कर्महानि है।

कर्महुङ्कृत—कर्महुङ्कृतः कृतब्रह्महत्यादिमहापातकः। (आ. दि. पृ. ७४)।

ब्रह्महत्या आदि महापापों के करने वाले पुरुष को कर्महुङ्कृत कहते हैं।

कर्मार्य—१. कर्मार्या यजन-याजनाध्ययनाध्यापन-प्रयोग कृषि-लिपि-वाणिज्य-योनिपोषणवृत्तयः। (त. भा. ३–१५)। २. कर्मार्यास्त्रेधा—सावद्यकर्मार्या अल्पसावद्यकर्मार्या असावद्यकर्मार्याश्चेति। सावद्यकर्मार्याः षोढा—असि-मषी-कृषि-विद्या-शिल्प-वणिक्कर्मभेदात्। ××× षड्प्येते अविरतिप्रवणत्वात् सावद्यकर्मार्याः। अल्पसावद्यकर्मार्याः श्रावकाः श्राविकाश्च, विरत्यविरतिपरिणतत्वात्। असावद्यकर्मार्याः संयताः, कर्मक्षयार्थोद्यतविरतिपरिणतत्वात्। (त. वा. ३, ३६, २)। ३. यजनैर्याजनैः शास्त्राध्ययनाध्यापनैरपि। प्रयोगैर्वाप्तयावृत्तिमन्त कर्मार्यकाः स्मृताः॥ (ह. पु. च. २, ३, ६७६)।

१ यजन-याजन, अध्ययन-अध्यापन, प्रयोग, कृषि, लेखन, व्यापार और योनिपोषण कर्मों से आजीविका करने वालों को कर्मार्य कहते हैं। २ सावद्यकर्मार्य, अल्पसावद्यकर्मार्य और असावद्यकर्मार्य के भेद से कर्मार्य तीन प्रकार हैं। सावद्यकर्मार्य—असि-मषी आदि छह कर्मों से आजीविका करने वाले। अल्प सावद्यकर्मार्य—देशविरति के परिपालक श्रावक और श्राविकायें। असावद्य कर्मार्य—सर्व कर्मालय में उद्यत संयत (महाव्रती)।

कर्मेन्द्रिय— ××× कर्मेन्द्रियाणि वागादीनि वचनादिक्रियानिमित्तानि सन्ति ××× उपयोगसाधनेषु होन्द्रियव्यपदेशो युक्तो न क्रियासाधनेषु। (त. वा. २, १५, ५–६)।

जो मात्र वचनादिक्रिया की कारण हैं उन वचन, पाणि, पाद, पायु और उपस्थ को कर्मेन्द्रिय कहा जाता है।

कर्मोपाधिनिरपेक्ष शुद्ध द्रव्यार्थिक—१. कम्माणं मज्झगयं जीवं जो गहइ सिद्धसंकासं। भण्णइ सो सुद्धणओ खलु कम्मोवाहिणिरवेक्खो ॥ (ल. न. च. १८; बृ. न. च. १९१)। २. कर्मोपाधिनिरपेक्षः शुद्धद्रव्यार्थिको यथा संसारी जीवः सिद्धसदृक्शुद्धात्मा। (आलापप. पृ. १५८)।

२ जो द्रव्यार्थिक नय संसारी जीव को कर्मरूप उपाधि से रहित सिद्धसमान शुद्ध ग्रहण करता है वह कर्मोपाधिनिरपेक्ष शुद्धद्रव्यार्थिक नय कहलाता है।

कर्मोपाधिनिरपेक्ष शुद्ध पर्यायार्थिक—१. देहीणं पज्जाया सुद्धा सिद्धाण भणइ सारित्था। जो इह अणिच्च सुद्धो पज्जयगाही हवे स णओ ॥ (ल. न. च. ३१; बृ. न. च. २०४)। २. कर्मोपाधिनिरपेक्षस्वभावो नित्यशुद्धपर्यायार्थिको यथा—सिद्धपर्यायसदृशाः शुद्धाः संसारिणां पर्यायाः। (आलापप. पृ. १५९)।

२ जो पर्यायार्थिक नय संसारी जीवों की अवस्थाओं को सिद्ध अवस्था के समान स्वीकार करता है उसे कर्मोपाधिनिरपेक्ष शुद्ध पर्यायार्थिक नय कहते हैं।

कर्मोपाधिसापेक्ष अशुद्ध द्रव्यार्थिक—१. भावेसु रायवादी सव्वे जीवंमि जो दु जपेदि। सो हु असुद्धो उत्तो कम्माणोवाहिसावेक्खो ॥ (ल. न. च. २१; बृ. न. च. १९४)। २. कर्मोपाधिसापेक्षोऽशुद्धद्रव्यार्थिको यथा—क्रोधादिकर्मजभाव आत्मा। (आलापप. पृ. १५८)।

१ जो जीव में कर्मजनित राग-द्वेषादि भावों को बतलाता है उसे कर्मोपाधिसापेक्ष अशुद्ध द्रव्यार्थिकनय कहते हैं।

कर्मोपाधिसापेक्ष अशुद्ध पर्यायार्थिकनय—१. भणइ अणिच्चा सुद्धा चउगइजीवाण पज्जया जो हु। होइ विभाव अणिच्चो असुद्धओ पज्जयत्थणओ ॥ (ल. न. च. ३२; बृ. न. च. २०५)। २. कर्मोपाधिसापेक्षस्वभावोऽनित्याशुद्धपर्यायार्थिको यथा—संसारिणामुत्पत्ति-मरणे स्तः। (आलापप. पृ. १५९)।

२ जो संसारी जीवों की उत्पत्ति व मरण को स्वीकार करता है उसे कर्मोपाधिसापेक्ष अशुद्ध पर्यायार्थिकनय कहा जाता है।

कर्वट—१. ××× गिरिवेढिवं च कव्वडयं ॥ (ति. प. ४-१३९८)। २. पर्वतावरुद्धं कव्वडं णाम। (धव. पु. १३, पृ. ३३५)। ३. कव्वडणामाणि तहा धरणीधरपरिउड्ढा घणसमिद्धा। (जं. दी. प. ७-५०)। ४. कर्वटं कुनगरम्। (प्रज्ञाव्या. अभय. वृ. १७५; औपपा. अभय. वृ. ३२, पृ. ७४)।

१ पर्वत से वेष्टित ग्राम को कर्वट कहा जाता है। ४ कुत्सित नगर का नाम कर्वट है।

कर्वटकथा—कर्वटं सर्वत्र पर्वतेन वेष्टितो देशः, कथात्र सम्बध्यते कर्वटकथा। (मूला. वृ. ९-८९)।

जो देश सब ओर पर्वत से घिरा हुआ हो उसे कर्वट और उससे सम्बद्ध कथा को कर्वटकथा कहा जाता है।

कर्ष (कंस)—१. अर्धतृतीयधरणानि सुवर्णः, स च कंसः। (त. वा. ३, ३८, ५)। २. अड्ढाइज्जा धरणा य सुवण्णो सो य पुण करिसो ॥ (ज्योतिष्क. १-१८)। ३. अर्धतृतीयानि धरणान्येकः सुवर्णः, स एव चैकः सुवर्णः कर्ष इत्युच्यते। (ज्योतिष्क. मलय. वृ. १-१८)।

अढ़ाई धरण (मापविशेष) प्रमाण एक सुवर्ण होता है। इसको कर्ष भी कहा जाता है।

कर्षक— ××× कर्षकः कर्षणात्तथा। (पद्मच. ६-२०९)।

जो खेत को जोतता व बोता है वह कर्षक (कृषक) कहलाता है।

कलह—परसन्तापजननं कलहः। (धव. पु. १२, पृ. २८५)।

दूसरों को सन्ताप उत्पन्न करने का नाम कलह है।

कलहप्राभृत—कलहणिमित्तगहह-जर-खेटयादिदव्वमुवयारेण कलहो। तस्स विसज्जणं कलहपाहुडं। (जयध. पु. १, पृ. ३२५)।

कलह के कारणभूत गधा, जीर्ण वस्तु और खेट (विष) आदि द्रव्यों को उपचार से कलह और उसके विसर्जन (भेजने) को कलहप्राभृत कहा जाता है।

कलहवाक्—परोप्परविरोहहेदुकलहवाया। (अंग. प. २९२)।

परस्पर विरोध के कारणभूत वचन को कलहवाक् कहा जाता है।

कलहकर—तत्र कलहो वाचिकं भण्डनम्, तत्करणशीलो ऽप्रशस्तक्रोधाद्यौदयिकभाववशतः कलहकरः। (आव. नि. मलय. वृ. १०८६, पृ. ५६७)।

वाचनिक लड़ाई का नाम कलह है, निन्द्य क्रोधादि के वश होकर जो स्वभावतः इस कलह का करने वाला होता है वह कलहकर कहलाता है।

कला—१. त्रिंशत्काष्ठा कला। (धव. पु. ६, पृ. ६३)। २. चित्तकम्म—पत्तच्छेज्जादी कला णाम। (धव. पु. १३, पृ. ३६४)। ३. त्रिंशत्काष्ठाभिः कला। (पंचा. का. ज. वृ. २५)। ४. षोडशाभिः काष्ठाभिः कला। (नि. सा. वृ. ३१)।

१ तीस काष्ठाओं (नेत्रनिमेषों) की एक कला होती है। २ चित्रकर्म और पत्रछेदन आदि को कला कहा जाता है।

कल्क—कल्को नाम प्रसूत्यादिषु रोगेषु क्षारपातनमथवात्मनः शरीरस्य देशतः सर्वतो वा लोध्रादिभिरुद्वर्तनम्। (व्यव. मलय. वृ. ३, पृ. ११७)।

प्रसूति आदि रोगों में भस्म या नमक को गिराना अथवा अपने शरीर के थोड़े से भाग में या पूरे ही शरीर में लोध्र (लोभान) आदि द्रव्यों से उबटन करने को कल्क कहते हैं।

कल्ककुरुक—कवककुरुया य माया नियडीए डंभणं ति जं भणियं। (प्रव. सारो. ११५)।

माया व्यवहार का नाम कल्ककुरुक है। अभिप्राय यह कि शठता से दूसरों को जो ठगा जाता है या धोखा दिया जाता है उसे कल्ककुरुक कहते हैं।

कल्प (स्वर्ग)—१. प्राग्ग्रैवेयकेभ्यः कल्पाः। (त. सू. ४-२४)। २. प्राग् ग्रैवेयकेभ्यः कल्पाः भवन्ति, सौधर्मादय आरणाच्युतपर्यन्ता इत्यर्थः। (त. भा. ४-२४)। ३. इन्द्रादयः प्रकारा वक्ष्यमाणा दश एषु कल्प्यन्ते इति कल्पाः। (त. वा. ४, ३, ३)। ४. इन्द्रादिदशतया कल्पनात् कल्पाः। सौधर्मादयोऽच्युतान्ताः। (त. भा. सिद्ध. वृ. ४-१८); इन्द्रादिदशकल्पनात्मकत्वात् कल्पाः सौधर्मादयोऽच्युतपर्यवसाना इति। (त. भा. सिद्ध. वृ. ४-२४)।

२ ग्रैवेयकों से पहिले, अर्थात् सौधर्म से लेकर अच्युत पर्यन्त, कल्प कहे जाते हैं। ३ इन्द्र-सामानिक आदि दश भेदों की जहाँ तक—सौधर्म से लेकर अच्युत पर्यन्त—कल्पना है वहाँ तक देवविमानों की कल्प संज्ञा है।

कल्प (अनुष्ठेय)—या कुशलेन परिणामेन बाह्यवस्तुप्रतिसेवना सा कल्पः। (व्यव. मलय. वृ. १, ३६, पृ. १६)।

कुशल परिणाम से—विवेकपूर्वक सावधानी के साथ—बाह्य वस्तुओं का जो सेवन किया जाता है, इसका नाम कल्प है।

कल्प (काल)—१. ओसप्पिणि-उस्सप्पिणीओ दो वि मिलिदाओ कप्पो हवदि। (धव. पु. ३, पृ. १३६)। २. उत्सर्पिण्यवसर्पिणीनामकाभ्यां द्वाभ्यां कालाभ्यां कल्पः कथ्यते। (त. वृत्ति श्रुत. ३-२७)।

१ दश कोडाकोडि सागर प्रमाण अवसर्पिणी और उतना ही उत्सर्पिणी, ये दोनों मिलकर कल्प-काल कहे जाते हैं।

कल्पद्रुममह—देखो कल्पवृक्षमह। १. दत्त्वा किमिच्छकं दानं सम्राड्भिर्यः प्रवर्तते। कल्पद्रुममहः सोऽयं जगदाशाप्रपूरणः॥ (म. पु. ३८-३१)। २. कल्पवृक्षोऽर्थिनः प्रार्थितार्थैः संतर्प्य चक्रवर्तिनि [तिभिः] क्रियमाणो महः। (चा. सा. पृ. २१; कार्तिके. टी. ३६१)। ३. किमिच्छकेन दानेन जगदाशाः प्रपूर्यः यः। चक्रिभिः क्रियते सोऽर्हद्यज्ञः कल्पद्रुमो मतः॥ (सा. ध. २-५८)। ४. कल्पद्रुमैरिवाशेषजगदाशा प्रपूर्यते। चक्रिभिर्यत्र पूजायां सा कल्पद्रुमाभिधा॥ (भावसं. वाम. ५५७)। ५. चक्रिभिः क्रियमाणा या कल्पवृक्ष इतीरिता। (धर्मसं. श्रा. ६-३०)।

१ याचकों को किमिच्छक—उनकी इच्छा के अनुसार—दान देकर चक्रवर्तियों के द्वारा जो पूजा की जाती है उसे कल्पद्रुम या कल्पवृक्ष पूजा कहा जाता है।

कल्पना—१. कल्पना हि जाति-द्रव्य-गुण-क्रियापरिभाषाश्रयो वाग्बुद्धिविकल्पः। (त. वा. १, १२, ११)। २. अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना। (सिद्धिवि. वृ. १-८, पृ. ३७ पं. १); अभिलापवती प्रतीतिः कल्पना। (सिद्धिवि. टी. १-८, पृ. ३८ पं. ३)। ३. अन्यत्र प्रसिद्धस्य धर्मस्यान्यत्राध्यारोपः कल्पना। (न्यायकु. १-२, पृ. १५)।

२ शब्द सम्बन्ध के योग्य प्रतिभास से युक्त प्रतीतिका नाम कल्पना है।

कल्पवृक्ष—देखो कल्पद्रुम।

कल्पव्यवहार—देखो कल्प्यव्यवहार। यतीनां योग्यसेवनसूचकमयोग्यसेवनप्रायश्चित्तकथकं कल्पव्यवहारम्। (त. वृत्ति श्रुत. १-२०)।

जो शास्त्र मुनि जनों के लिए योग्य वस्तुओं के सेवन और अयोग्य का सेवन होने पर उसके लिए प्रायश्चित्त का निरूपक है उसका नाम कल्पव्यवहार है।

कल्पाकल्प—देखो कल्प्याकल्प्य। कालमाश्रित्य यति-श्रावकाणां योग्यायोग्यनिरूपकं कल्पाकल्पम्। (त. वृत्ति श्रुत. १-२०)।

जो शास्त्र काल के आश्रय से मुनि और श्रावकों के के लिए योग्य-अयोग्य वस्तुओं की प्ररूपणा करता है वह कल्पाकल्प कहलाता है।

कल्पातीत—१. कल्पानतीताः कल्पातीताः। (त. सि. ४-१७; त. वा. ४-१७)। २. नवग्रैवेयका नवानुदिशाः पञ्चानुत्तराश्च कल्पातीताः, कल्पातीतनामकर्मोदये सति कल्पातीतत्वात् तेषामिन्द्रादिदशतयकल्पनाविरहात् सर्वेषामहमिन्द्रत्वात्। (त. श्लो. ४-१७)। ३. विमानोपपन्नकाः ग्रैवेयकानुत्तरलक्षणविमानोत्पन्नाः, कल्पातीता इत्यर्थः। (स्थाना. अभय. वृ. २, १, ७७)। ४. कल्प आचारः, कल्पमतीताः अतिक्रान्ताः कल्पातीताः अधस्तनाधस्तनग्रैवेयकादिनिवासिनः, ते हि सर्वेऽप्यहमिन्द्राः, ततो भवन्ति कल्पातीताः। (प्रज्ञाप. मलय. वृ. १-३८, पृ. ७०)। ५. तथा यथोक्तरूपात् कल्पादतीता अपेताः कल्पातीताः। (बृहत्सं. वृ. २)। ६. कल्पेभ्योऽतीताः अतिक्रान्ताः उपरितनक्षेत्रवर्तिनः नवग्रैवेयकदेवा नवानुदिशामृताशनाश्च पंचानुत्तरनिवासिनो निर्जराश्च त्रिप्रकारा अपि अहमिन्द्राः कल्पातीताः कथ्यन्ते। (त. वृत्ति श्रुत. ४-१७)।

१ जो कल्पों से अतीत हैं—इन्द्र-सामानिक आदि दस भेदों की कल्पना से रहित हैं—वे कल्पातीत कहलाते हैं। ४ कल्प नाम आचार (व्यवहार) का है। उस कल्प से जो रहित हैं वे कल्पातीत कहलाते हैं। अभिप्राय यह है कि अधस्तन-अधस्तन ग्रैवेयक से लेकर अनुत्तर विमानों तक के देव कल्पातीत माने गये हैं। इसका कारण यह है कि वे सब अहमिन्द्र—इन्द्रादि की कल्पना से रहित हैं।

कल्पिका—१. या कुशलेन—ज्ञानादिरूपेण—परिणामेन बाह्यवस्तुप्रतिसेवना सा कल्पः, पदैकदेशे पदसमुदायोपचारात्। कल्प्यः प्रतिसेवना कल्पिका इति भावः। (व्यव. मलय. वृ. १-३६, पृ. १६)। २. या पुनः कारणे क्रियते सा कल्पिका। (व्यव. मलय. वृ. २ ३८, पृ. १४)।

ज्ञानादिरूप कुशल परिणाम के साथ जो बाह्य वस्तु का सेवन किया जाता है, इसे कल्पिका कहते हैं।

कल्पित—१. कप्पियं नाम जं जस्स असंतेण भावेण दिट्ठंतो कज्जइ। एत्थ गाहा—जह अम्हे तह तुम्हे तुब्भेवि य होहिहा जहा अम्हे। अप्पाहेइ पडंतं पंडुअपत्तं किसलयाणं॥ एयं कप्पियं। (दशवै. चू. पृ. ४०)। २. कल्पितं स्वबुद्धिकल्पनाशिल्पनिर्मितमुच्यते। (दशवै. हरि. वृ. १-५३, पृ. ३४)।

जिस वस्तु का वस्तुतः सद्भाव न हो, किन्तु किसी को समझाने के लिए दृष्टान्त के रूप में कल्पना की गई हो, उसे कल्पित कहते हैं। जैसे—वृक्ष से गिरते हुए जीर्ण धवल पत्र नवजात कोमल पत्तों को सन्देश देते हैं कि जैसे हम हैं वैसे तुम भी हो—तुम भी हमारे समान जीर्ण होकर गिरने वाले हो। (पत्ते आपस में बातचीत नहीं कर सकते, फिर भी अभिमान के निराकरणार्थ किसी को उनका कल्पित दृष्टान्त दिया गया है।)

कल्पोपग—देखो कल्पोपन्न।

कल्पोपपन्न—१. कल्पेषूपपन्नाः कल्पोपपन्नाः। (स. सि. ४-१७)। २. कल्पेषूपपन्नाः। ××× उक्तमेतत्—इन्द्रादिदशतया कल्पनासद्भावात् कल्पा इति। (त. वा. ४-१७)। ३. कल्पोपपन्ना इन्द्रादिदशतयकल्पनासद्भावात् कल्पोपपन्ननामकर्मोदयवशवर्तित्वाच्च। (त. श्लो. ४-१७)। ४. इन्द्रादिदशतया कल्पनात् कल्पाः सौधर्मादयोऽच्युतान्ताः, तेषूपपन्नाः कल्पोपपन्नाः। (त. भा. सिद्ध. वृ. ४-१८)। ५. कल्पोपपन्नकाः सौधर्मादिदेवलोकोत्पन्नाः। (स्थानां. अभय. वृ. २, १, ७७)। ६. कल्पः आचारः, स चेह इन्द्र-सामानिक-त्रायस्त्रिंशादिव्यवहाररूपः, तमुपगाः प्राप्ताः कल्पोपगाः सौधर्मेशानादिदेवलोकनिवासिनः। (प्रज्ञाप. मलय. वृ. १-३८, पृ. ७०)। ७. तत्र कल्पः स्थितिविशेष उच्यते "कल्पः स्थितिर्जीत मर्यादेत्यनर्थान्तरमिति"

वचनप्रामाण्यात् । स्थितिविशेषश्चेहेन्द्र-सामानिक-त्रायस्त्रिंशादिव्यवस्थारूपः प्रतिपत्तव्यः, तं कल्पं स्थितिविशेषरूपम् उपपन्नाः प्रतिपन्ना. कल्पोपपन्नाः । (बृहत्सं. मलय. वृ. २) । ८. कल्पेषु षोडशेषु स्वर्गेषु उपपन्नाः संबद्धाः कल्पोपपन्नाः । (त. वृत्ति श्रुत. ४–१७) ।

१ जो देव कल्पों में उत्पन्न होते हैं वे कल्पोपपन्न कहलाते हैं । २ कल्प का अर्थ है इन्द्र-सामानिक आदि व्यवहाररूप आचार, इस प्रकार के आचार को प्राप्त देव कल्पोपग या कल्पोपपन्न कहलाते हैं ।

कल्पव्यवहार—देखो कल्पव्यवहार । १. कल्पव्यवहारे साहूणं जोग्गमाचरणं अकप्पसेवणाए पायच्छित्तं च वण्णेइ । (धव. पु. १, पृ. ९८); कप्पववहारो साहूणं जं जम्हि काले कप्पदि पिच्छ-कमण्डलु-कवली-पोत्थयादि परूवेदि. अकप्पसेवणाए कप्पस्स असेवणाए च पायच्छित्तं परूवेदि । (धव. पु. ९, पृ. १९०) । २. रिसीणं जो कप्पइ ववहारो तम्हि खलिदे जं पायच्छित्तं तं च भणइ कप्पववहारो । (जयध. पु. १, पृ. १२०) । ३. कल्प्यं योग्यम्, व्यवह्रियते अनुष्ठीयते अस्मिन्नननेनेति वा कल्पव्यवहारः शास्त्रम् । तत् ऋषीणां योग्यमनुष्ठानविधानम् अयोग्यसेवायां प्रायश्चित्तं च वर्णयति । (गो. जी. म. प्र. व जी. प्र. टी. ३६८) । ४. यतीनां कल्प्यं योग्यमाचरणम्, आचरणच्यवने तदुचित्त-प्रायश्चित्तं च प्ररूपयत्कल्प्यव्यवहारम् । (श्रुतभक्ति टी. २५, पृ. १७९–८०) । ५. कप्पववहारो जहिं ववहिज्जइ जोगकप्पमाजोगा । सत्थं अवि इसिजोग्गं आयरणं कहदि सव्वत्थ ।। (अंगप. ३–२७, पृ. ३०९) ।

१ साधुओं के लिए पीछी, कमण्डलु, कवली व पुस्तक आदि जिस जिस उपकरण को जिस काल में आवश्यकता होती है उसको तथा अग्राह्य वस्तु के सेवन और ग्राह्य वस्तु के असेवन से उत्पन्न दोष के प्रायश्चित्त को भी जिसमें प्ररूपणा की जाती है उसका नाम कल्पव्यवहार है ।

कल्प्याकल्प्य—१. कप्पाकप्पियं साहूणं जं कप्पदि जं च ण कप्पदि, तं सव्वं वण्णेदि । (धव. पु. १, पृ. ९८); कप्पाकप्पियं साहूणं जं कप्पदि जं च ण कप्पदि, तं दुविहं पि दव्व-खेत्त-कालमस्सिदूण परूवेदि । (धव. पु. ९, पृ. १९०–९१) । २. साहूणमसाहूणं च जं कप्पइ, जं च ण कप्पइ तं सव्वं दव्व-खेत्त-काल-भावे अस्सिदूण भणइ कप्पाकप्पियं । (जयध. पु. १, पृ. १२१; श्रुतभ. टी. २५; अंगप. ३–२८, पृ. ३०९) । ३. कल्प्यं चाकल्प्यं च कल्प्याकल्प्यं वर्ण्यते अस्मिन्निति कल्प्याकल्प्यम् । तत् द्रव्य-क्षेत्र-काल-भावानामाश्रित्य साधूनामिदं कल्प्यं योग्यम्, इदमकल्प्यम् अयोग्यमिति विभागं वर्णयति । (गो. जी. म. प्र. व जी. प्र. टी. ३६८)। ४. सागार-यतीनां कालविशेषमाश्रित्य योग्यायोग्यविकल्पमाचरणं निरूपयत् कल्प्याकल्प्यं स्तौमि । (श्रुतभ. टी. २५, पृ. १८०) । ५. कप्पाकप्पं तं चिय साहूणं जत्थ कप्पमाकप्पं । वण्णिज्जइ आसिच्चा दव्वं खेत्तं भवं कालं ।। (अंगप. ३–२८, पृ. ३०९) ।

१ जिस शास्त्र में द्रव्य, क्षेत्र और काल की अपेक्षा साधुओं को जो ग्रहण करने योग्य है और जो ग्रहण योग्य नहीं है, इस सब की प्ररूपणा की जाती है उसका नाम कल्प्याकल्प्य है ।

कल्याण—कल्यं सुखमारोग्यं शोभनत्वं वा, तदनतीति कल्याणम्, तदस्यास्तीति कल्याणः । (सूत्रकृ. शी. वृ. २, ५, २७) ।

सुख, आरोग्य व सुन्दरता आदि के प्रगट होने को कल्याण कहते हैं ।

कल्याणनामधेयपूर्व—१. रवि-शशि-ग्रह-नक्षत्र-तारागणानां चारोपपाद-गतिविपर्ययफलानि शकुन-व्याहृतमर्हद्बलदेव-वासुदेव-चक्रधरादीनां गर्भावतरणादिमहाकल्याणानि च यत्रोक्तानि तत्कल्याणनामधेयम् । (त. वा. १, २०, १२; धव. पु. ९, पृ. २२३) । २. कल्लाणामधेयं णाम पुव्वं दसण्हं वत्थूणं १० विसदपाहुडाणं २०० छव्वीसकोडिपदेहि २६०००००० रवि-शशि-ग्रह नक्षत्र-तारागणाणां चारोपपाद-गतिविपर्ययफलानि शकुनव्याहृतमर्हद्-बलदेव-वासुदेव-चक्रधरादीनां गर्भावतरणादिमहा-कल्याणानि च कथयति । (धव. पु. १, पृ १२१, १२२) । ३. कल्लाणपवादो गह-णक्खत्त-चंद-सूर-चारविसेसं अट्ठगमहाणिमित्तं तित्थयर-चक्कवट्टि-बल-नारायणादीणं कल्लाणाणि च वण्णेदि । (जयध. पु. १, पृ. १४५) । ४. षड्विंशतिकोटिपदं अर्हद्-बलदेव-चक्रवर्त्यादीनां कल्याणप्रतिपादकं कल्याण-नामधेयम् । (श्रुतभ. २३, पृ. १७६) । ५. कल्लाण-वादपुव्वं छव्वीससुकोडिपयप्पमाणं तु । तित्थहर-

चक्कवट्टीबलदेवसमद्धचक्कीणं ॥ गब्भावदरणउच्छव तित्थयराणीसु पुण्णहेदु च। सोलहभावणकिरिया-तवाणि वण्णेदि (स)विसेसं ॥ वरचंदसूरगहण-वहणवत्तादिचारसउणाइं। तेसिं च फलाइं पुणो वण्णेदि सुहासुहं अत्थ ॥ (अंगप. २, १०४–६, पृ. २६६–३००)। ६. तीर्थंकर-चक्रवर्ति-बलभद्र-वासुदेवेन्द्रादीनां पुण्यव्याकीर्णं षड्विंशतिकोटिपदप्रमाणं कल्याणपूर्वम्। (त. वृत्ति श्रुत. १–२०)।

१ जिस पूर्वश्रुत में सूर्य, चन्द्र, ग्रह, नक्षत्र और तारागण के संचार, उपपाद एवं विपरीत गति के फल तथा शकुन-अपशकुन के फल व तीर्थंकर, बलदेव, वासुदेव एवं चक्रवर्ती आदि के गर्भादि महाकल्याणकों की प्ररूपणा की जाती है, उसे कल्याणनामधेय पूर्व कहते हैं।

कल्योजकल्योज राशि—जे णं रासी चउक्कएणं अवहारेणं अवहीरमाणे एगपज्जवसिए जे णं तस्स रासिस्स अवहारसमया कलिओगा, से तं कलिओगकलिओगे। (भगवती भा. ४, ३५, १, २, पृ. ३३६)। जिस राशि में चार का भाग देने पर एक संख्या शेष रहे उसे कल्योज-कल्योज कहते हैं। जैसे—१३ (१३÷४=३$\frac{1}{4}$)।

कल्योजकृतयुग्म—जे णं रासी चउक्कएणं अवहारेणं अवहीरमाणे चउपज्जवसिए जे णं तस्स रासिस्स अवहारसमया कलिओगा से तं कलिओगकडजुम्मे। (भगवती ४, ३५, १, २, पृ. ३३६)। जिस राशि में चार का भाग देने पर चार शेष रहें अर्थात् शेष कुछ न रहे उसे कल्योजकृतयुग्म कहते हैं। जैसे १६ (१६÷४=४)।

कल्योज-त्र्योज—जे णं रासी चउक्कएणं अवहारेणं अवहीरमाणे तिपज्जवसिए जे णं तस्स रासिस्स अवहारसमया कलिओगा से तं कलिओगतेयोए। (भगवती ४, ३५, १, २, पृ. ३३६)।

जिस राशि में चार का भाग देने पर तीन शेष रहें, उसे कल्योज-त्र्योज कहते हैं। जैसे—१५ (१५÷४=३$\frac{3}{4}$)।

कल्योजद्वापरयुग्म—जे णं रासी चउक्कएणं अवहारेणं अवहीरमाणे दुपज्जवसिए जे णं तस्स रासिस्स अवहारसमया कलिओगा, से तं कलिओगदावरजुम्मे। (भगवती ४, ३५, १, २, पृ. ३३६)।

जिस राशि में चार का भाग देने पर दो शेष रहें उसे कल्योजद्वापरयुग्म कहते हैं। जैसे—१४ (१४÷४=३$\frac{2}{4}$)।

कवच—१. कवचे यथा कवचस्य शरशतनिपातदुःखनिवारणक्षमता एवमाचार्येण निर्यापकेन धर्मोपदेशदचतुर्गतिपरिभ्रमणे दुःसहानि दुःखानि ननु कर्मपरवशतया भुक्तानि निष्फलानि(?)। इदं पुनर्दुःखसहनं निर्जरार्थं प्रवर्त्यमानं सकलदुःखान्तं सुखमप्यतीन्द्रियमचलमनुपममव्याबाधात्मकं सम्पादयिष्यतीति क्रियमाणो दुःखनिवारणसामान्यात् कवचशब्देनोच्यते। (भ. आ. विजयो. ७०)। २. कवचं धर्मोपदेशेन दुःखनिवारणम्। (अन. ध. स्वो. टी. ७–९८; भ. आ. मूला. टी. ७०)।

१ जिस प्रकार कवच सैकड़ों बाणों के लगने से उत्पन्न होने वाले दुःख के निवारण में समर्थ होता है उसी प्रकार निर्यापक आचार्य के द्वारा किया गया उपदेश चतुर्गति के दुःखों के – जिन्हें कर्म के परवश होकर पूर्व में भोगा है—निवारण में समर्थ होता हुआ अतीन्द्रिय, शाश्वत, अनुपम एवं अव्याबाध सुख को उत्पन्न करने वाला है। इसीलिये दुःख के निवारण में कवच की समानता रखने के कारण आचार्य के द्वारा किये जाने वाले इस धर्मोपदेश को कवच शब्द से कहा जाता है।

कवचमुद्रा—पुनर्मुष्टिबन्धं विधाय कनीयस्यंगुष्टौ प्रसारयेदिति कवचमुद्रा। (निर्वाणक. १६–४)। मुट्ठी बांध करके कनिष्ठा और अंगुष्ठ के फैलाने को कवचमुद्रा कहते हैं।

कवल—किं कवलप्रमाणम्? सालितंदुलसहस्से ट्ठिदे जं कूरपमाणं तं सव्वमेगो कवलो होदि। एसो पयडिपुरिमस्स कवलो परूविदो। (धव. पु. ११, पृ. ५६)।

हजार शालि धान के चावलों के होने पर जो कूर (भात) का प्रमाण होता है वह सब पुरुष का प्राकृतिक एक ग्रास (कौर) माना जाता है।

कव्वाडभूतक—कव्वाडभूतकः क्षितिखानकः ओडादिः, यस्य स्वं कर्मार्प्यते द्विहस्ता त्रिहस्ता वा त्वया भूमिः खनितव्यैतावत्ते धनं दास्यामीति एवं नियम्यतेति। (स्थाना. अभय. वृ. ४, १, २७१, पृ. १६२)।

तुम दो या तीन हाथ भूमि खोदो, मैं तुम्हें इतना धन दूंगा, इस प्रकार ठेका पर भूमि खोदने वाले मनुष्य को कव्वाडभूतक कहा जाता है।

कषशुद्ध—१. विधि-प्रतिषेधौ कष इति। (ध. वि. २-५३)। २. विधिः अविरुद्धकर्तव्यार्थोपदेशकं वाक्यम्—यथा स्वर्ग-केवलार्थिना तपोध्यानादि कर्तव्यं समिति-गुप्तिशुद्धा क्रिया इत्यादि। प्रतिषेधः पुनः 'न हिंस्यात् सर्वभूतानि, नानृतं वदेत्' इत्यादि। ततो विधिश्च प्रतिषेधश्च विधि-प्रतिषेधौ, किमित्याह—'कषः' सुवर्णपरीक्षायामिव कषपट्टके रेखा। इदमुक्तं भवति—यत्र धर्मे उक्तलक्षणो विधिः प्रतिषेधश्च पदे पदे सुपुष्कल उपलभ्यते स धर्मः कषशुद्धः। (ध. वि. मू. वृ. २-३५)।

कर्तव्य कार्य के विधायक—जैसे स्वर्ग या केवलज्ञान के अभिलाषी को तप व ध्यान आदि करना चाहिए—और अकर्तव्य कार्य के निषेधक—जैसे किसी भी प्राणी की हिंसा नहीं करना चाहिए, असत्यभाषण नहीं करना चाहिये आदि—वाक्य कष हैं—धर्म के विषय में कसौटी के समान हैं। अभिप्राय यह है कि जिस धर्म में पूर्वोक्त विधि और प्रतिषेध पद-पद में प्रचुरता से उपलब्ध होते हैं वह धर्म कषशुद्ध कहलाता है।

कषाय—१. कम्मं कसभवो वा कसमाओ सिं जओ कसाया तो। कसमायंति व जओ गमयंति कसं कसायत्ति॥ आओ व उवायाणं तेण कसाया जओ कसस्साया। जीवपरिणामरूवा जेण उ नामाइनियमोऽयं॥ (विशेषा. ३५४५-४६)। २. सुहदुक्खं बहुसस्सं कम्मक्खित्तं कसेइ जीवस्स। संसारगदो मेरं तेण कसाओ त्ति णं विंति॥ (प्रा. पंचसं. १-१०६; धव. पु. १, पृ. १४२ उद्.; गो. जी. २८१)। ३. चारित्रमोहविशेषोदयात् कलुषभावः कषाय औदयिकः। चारित्रमोहस्य कषायवेदनीयस्योदयादात्मनः कालुष्यं क्रोधादिरूपमुत्पद्यमानं कषत्यात्मानं हिनस्तीति कषाय इत्युच्यते। (त. वा. २, ६, २); कषत्यात्मानमिति कषायः। क्रोधादिपरिणामः कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः। (त. वा. ६, ४, २)। ४. 'कष गतौ' इति कषशब्देन कर्माभिधीयते भवो वा, कषस्य आया लाभाः प्राप्तयः कषायाः क्रोधादयः। (आव. हरि. वृ. १०६, पृ. ७७)। ५. कषः संसारः, तस्यायाः प्राप्तयः कषायाः कषायमोहनीयम्। (पंचसं. स्वो. वृ. १-१२३, पृ. ३५)। ६. क्रोधादयोऽप्रीति-गर्व-परवञ्चना-मूर्च्छालक्षणाः कषायाः। (त. भा. सिद्ध. वृ. ६-६)। ७. सुख-दुःखबहुशस्यं कर्मक्षेत्रं कृषन्तीति कषायाः। ××× (धव. पु. १, पृ. १४१; धव. पु. ७, पृ. ७); दुःखशस्यं कर्मक्षेत्रं कृषन्ति फलवत्कुर्वन्तीति कषायाः क्रोध-मान-माया-लोभाः। (धव. पु. ६, पृ. ४१); सुख-दुःखशस्यं कर्मक्षेत्रं कृषन्तीति कषायाः। (धव. पु. १३, पृ. ३५६)। ८. कषन्ति हिंसन्ति आत्मानमिति कषायाः। कषायशब्देन वनस्पतीनां त्वक्-पत्र-मूल-फलरसः उच्यते। स यथा वस्त्रादीनां वर्णमन्यथा संपादयति एवं जीवस्य क्षमामार्दवार्जव-संतोषाख्यगुणान् विनाश्यान्यथा व्यवस्थापयन्तीति क्रोध-मान-माया-लोभाः कषाया इति भण्यन्ते। (भ. आ. विजयो. २७); कषन्ति हिंसन्ति आत्मक्षेत्रमिति कषायाः। अथवा तरूणां वाल्कलरसः कषायः, कषाय इव कषायः। (भ. आ. विजयो. ११५)। ९. कषणादात्मनो घातात् कषायः कुगतिप्रदः। (त. श्लो. ६, ४, २)। १०. ये चारित्रपरीणामं कषन्ति शिवकारणम्। क्रुन्मानवंचनालोभास्ते कषायाश्चतुर्विधाः। (पंचसं. अमित. १-२०३)। ११. क्रोधादिपरिणतेनात्मना कषन्तीति कषायाः। (मूला. वृ. १२-१५६); दुःखशस्यं कर्मक्षेत्रं कृषन्ति फलवत्कुर्वन्तीति कषायाः। (मूला. वृ. १२-१५९)। १२. चारित्रपरिणामानां कषायः कषणान्मतः। (त. सा. २-८२)। १३. × ×× कषायः कर्षतीत्यसौ। (आचा. सा. ५-१५)। १४. कष्यते ऽस्मिन् प्राणी पुनः पुनारावृत्तिमावमनुभवति कषोपलकष्यमाणकनकवदिति कषः संसारः, तस्मिन् आ समन्तादयन्ते गच्छन्त्येभिरसुमन्त इति कषायाः। यद्वा कषाया इव कषायाः, यथा हि तुवरिकादिकषायकलुषिते वाससि मञ्जिष्ठादिरागः श्लिष्यति चिरं चावतिष्ठते तथैतत् कलुषित आत्मनि कर्म सम्बध्यते चिरतरस्थितिकं च जायते तदायत्वात् तत्स्थितेः। (उत्तरा. नि. शा. वृ. १८०, पृ. १९०)। १५. तत्र कृषन्ति - विलिखन्ति कर्मक्षेत्रं सुख-दुःखफलयोग्यं कुर्वन्ति कलुषयन्ति वा जीवमिति निरुक्तिविधिना कषायाः। उक्तं च—सुहदुक्खबहुसइयं कम्मक्खेत्तं कसंति ते जम्हा। कलुसंति जं च जीवं तेण कसायत्ति वुच्चंति॥ अथवा कषति—

हिंसन्ति देहिन इति कषं कर्म भवो वा, तस्यायो लाभहेतुत्वात्, कषं वा आयन्ति गमयन्ति देहिन इति कषायाः। उक्तं च—कम्मं कसं भवो वा कसमाओ सिं जओ कसायाओ। कसमायंति व जओ गमयंति कसं कसायत्ति ॥ (स्थाना. अभय. वृ. ४, ३, २४६)। १६. कष्यन्ते हिंस्यन्ते प्राणिनोऽस्मिन्निति वा कषः संसारः कर्म वा, तस्यायो लाभः प्राप्तय इति कृत्वा, अथवा कषं संसारमयन्त एभिरिति कृत्वा। (योगशा. स्वो. विव. ४–६)। १७. कषन्ति हिंसन्ति शुद्धचिद्विवर्तलक्षणप्राणैर्वियोजयन्त्यात्मानमिति कषायाः, अथवा वनस्पतीनां त्वग्मूलक्षाक्षाभितो रसविशेषः कषायः, कषाय इव कषायः। (भ. आ. मूला. २७)। १८. कषश्चण-शिषेत्यादिदण्डकधातुः हिंसार्थः। कषन्ति कष्यन्ते च परस्परमस्मिन् प्राणिन इति कषः संसारः, 'पुंसि संज्ञायां घः प्रायेण' (पा. ३, ३, १८); इति च प्रायग्रहणात्, अन्यथा हि हलन्तत्वात् 'हलश्च' (पा. ३, ३, १२१) इति घञ् स्यात्। कषमयन्ते गच्छन्ति एभिर्जन्तव इति कषायाः क्रोधादयः। (कर्मस्त. गो. वृ. २, पृ. ५, ७३)। १९. कर्ष[ष]न्ति हिंसन्ति परस्परं प्राणिनोऽस्मिन्निति कषः संसारः, तमयन्ते अन्तर्भूतण्यर्थत्वात् गमयन्ति प्रापयन्ति ये ते कषायाः। (प्रज्ञाप. मलय. १३–१८२, पृ. २८५); 'कृष विलेखने' कृषन्ति—विलिखन्ति कर्मरूपं क्षेत्रं सुख-दुःखशस्योत्पादनायेति कषायाः, ××× यदि वा कलुषयन्ति —शुद्धस्वभावं सन्त कर्ममलिनं कुर्वन्ति जीवमिति कषायाः। ××× उक्तं च—सुहदुक्खबहुस्सइय कम्मक्खेत्तं कसंति ते जम्हा। कलुसंति जं च जीवं तेण कषायत्ति वुच्चंति। (प्रज्ञाप. मलय. वृ. १४, १८६, पृ. २६०)। २०. तत्र कषाया नाम कष्यन्ते हिंस्यन्ते परस्परमस्मिन् प्राणिन इति कषः ससारः, तमयन्ते गच्छन्त्येभिर्जन्तव इति कषायाः क्रोधादयः परिणामविशेषाः। (जीवाजी. मलय. वृ. १–१३, पृ. १५)। २१. सम्मत्त-देस-सयलचरित्तजहक्खादचरणपरिणामे। घादंति वा कसाया ××× ॥ (गो. जी २८२); कषायाः संयमविरुद्धास्तीव्रपरिणामाः कषायाः भावक्रोधादयः। (गो. जी. म. प्र. टी. ३५)। २२. कषन्ति हिंसन्ति संयमगुणमिति कषायाः। (गो. जी. जी. प्र. ३४)। २३. तत्र अन्नाम कालुष्यं कषायाः स्युः स्वलक्षणम्। (पञ्चाध्यायी २–११३५)। २४. कषन्त्यात्मानमेवात्र कषायादिति दर्शिताः। पञ्चविंशतिसंख्याका मोहकर्मोदयोद्भवः ॥ (जम्बूच. १३–१०८)। २५. कालुष्यं स्यात् कषायः ××× (अध्यात्मक. भा. ४–२)। २६. कष्यन्ते हिंस्यन्ते प्राणिनोऽस्मिन्निति कषः संसारस्तस्यायो लाभः कषायाः क्रोधमानमायालोभाः। (संग्रहणी दे. वृ. २७२, पृ. १२४)। २७. 'कषति हिनस्त्यात्मानं दुर्गतिं प्रापयतीति कषायः—अथवा कषायो न्यग्रोधत्वक्-विभीतकहरीतकादिकवस्त्रे मंजिष्ठादिरागश्लेषहेतुर्यथा तथा क्रोध-मान-माया-लोभलक्षणकषायः। (त. वृत्ति श्रुत. ६-४)। कषन्ति हिंसन्ति सम्यक्त्वादीनीति कषायाः। (त. वृत्ति श्रुत. ६–१४); कषन्तीति कषायाः दुर्गतिपातलक्षणस्वभावाः कषायाः। (त. वृत्ति श्रुत. ८–२)।

१ कर्म अथवा संसार को कष कहा जाता है। इस प्रकार के कष अर्थात् कर्म या संसार को जो प्राप्त कराया करते हैं, उनका नाम कषाय है। २ चारित्रमोह के भेदभूत कषायवेदनीय के उदय से आत्मा में जो क्रोधादिरूप कलुषता उत्पन्न होती है वह चूंकि आत्मा का विघात करती है, अतएव उसे कषाय कहा जाता है।

कषाय (रसविशेष) — अन्नरुचिस्तम्भनकर्मा कषायः। (अनुयो. हरि. वृ. पृ. ६०; त. भा. सिद्ध. वृ. ५–२३)।

जिसके सेवन से अन्न के खाने की रुचि बढ़े, और जो स्तम्भक हो, उसे कषायरस कहते हैं।

कषायकुशील—१. वशीकृतान्यकषायोदयः संज्वलनमात्रतंत्राः कषायकुशीलाः। (स. सि. ९–४६; रा. वा. पृ. ४५)। २. येषां तु संयतानां सतां कथञ्चित् संज्वलनकषाया उदीर्यन्ते ते कषायकुशीलाः। (त. भा. ९–४८)। ३. वशीकृतान्यकषायोदयाः संज्वलनमात्रतंत्रत्वात् कषायकुशीलाः। (त. वा. ९, ४६, ३)। ४. कषायैः संज्वलनक्रोधाद्युदयलक्षणैः कुशीलः कषायकुशीलः। (प्रव. सारो. वृ. ७२५)। ५. शमितान्यकषाया ये ससज्वलनमात्रकाः। ते कषायकुशीलाः स्युः ××× ॥ (ह. पु. ६४, ६२)। ६. कषायाः संज्वलनाख्यास्तदुदयात् कुत्सितं शीलमेषामिति कषायकुशीलाः। (त. भा. सिद्ध. वृ. ९–४८)। ७. संज्वलनमात्रोदयः कषायोदयस्तेन

योगात् मूलोत्तरगुणभूतोऽपि × × × कषायकुशीला उच्यन्ते। (त. इलो. ६-४६)। ८. संज्वलनाऽपरकषायोदयरहिताः संज्वलनकषायमात्रवशवर्तिनः कषायकुशीलाः। (त. वृत्ति श्रुत. ६-४६)।

१ अन्य कषायों के उदय पर विजय पाकर भी जो केवल संज्वलन कषाय के वशीभूत होते हैं वे कषायकुशील कहे जाते हैं।

कषायरस नामकर्म—जस्स कम्मस्स उदएण सरीरपोग्गला कसायरसेण परिणमंति तं कषायरसं णाम। (षट. पु. ६, पु. ७५)।

जिस कर्म के उदय से शरीरगत पुद्गल कषाय रस से परिणत होते हैं उसे कषायरस नामकर्म कहते हैं।

कषायलोक—कोधो माणो माया लोभो उदिण्णा जस्स जंतुणो। कषायलोगं वियाणाहि अणंतजिणदेसिदं॥ (मूला. ७-५१)।

जिस जीव के क्रोध, मान, माया और लोभ इन चारों कषायों का उदय पाया जावे उसे कषायलोक जानना चाहिए।

कषायविवेक—द्रव्यतः कषायविवेको नाम कायेन वाचा चेति द्विविधः—भ्रूलतासंकोचनं पाटलेक्षणता अधरावर्मदनं शास्त्रनिकटीकरणम् इत्यादिकायव्यापाराकरणम्, हन्मि ताडयामि शूलमारोपयामि इत्यादिवचनाप्रयोगश्च। परपरिभवादिनिमित्तचित्तकलंकाभावो भावतः क्रोधविवेकः। तथा मानकषायविवेकोऽपि वाक्कायाभ्यां द्विविधः—गात्राणां स्तब्धताकरणं शिरस उन्नमनम् उच्चासनारोहणादिकं च यन्मानसूचनपरं तस्य कायव्यापारस्याकरणम्, मत्तः को वा श्रुतपारगः सुचरितः सुतपोधरश्चेति वचनाप्रयोगश्च। एवमेवंतेभ्योऽहं प्रकृष्ट इति मनसाहंकारवर्जनं भावतो मानकषायविवेकः। वाक्कायाभ्यां मायाविवेको द्विप्रकारः—अन्यं ब्रुवतः इवान्यस्य यद्वचनं तस्य त्यागो मायोपदेशस्य वा, मायां न करोमि न कारयामि नाभ्युपगच्छामि इति वा कथनं वाचा मायाविवेकः, अन्यत् कुर्वत् इवान्यस्य कायेनाकरणं कायतो मायाविवेकः। लोभकषायविवेकोऽपि द्विविधः—यत्रास्य लोभस्तदुद्दिश्य करप्रसारणं द्रव्यदेशानपायिता तदुपादातुकामस्य कायेन निषेधनं हस्तसंज्ञया निवारणं शिरश्चालनया वा, एतस्य कायव्यापारस्य अकरणं कायेन लोभविवेकः शरीरेण वा द्रव्यानुपादानम्, एतन्मदीयं वास्तु-ग्रामादिकं वा अहमस्य स्वामीति वचनानुच्चारणं लोभविवेकः नाहं कस्यचिदीशो न च मम किंचिदिति वचनं वा। ममेदं भावरूपमोहजपरिणामापरिणतिर्भवितो लोभविवेकः। (भ. आ. विजयो. १६८)।

कषायविवेक द्रव्य और भाव की अपेक्षा दो प्रकार का है। उनमें भी प्रत्येक काय और वचन के भेद से दो प्रकार का है। ये सब क्रोधादि के भेद से चार चार प्रकार के हैं। यथा—भृकुटियों को संकोचित करना, नेत्रों का लाल होना, अधरोष्ठ का दबाना और शस्त्र को समीप करना; इत्यादि जो क्रोध की सूचक शरीर की प्रवृत्ति हुआ करती है उसका न करना, यह द्रव्यतः कायिक क्रोधकषायविवेक कहलाता है। मैं मारता हूं या ताडित करता हूं, इत्यादि क्रोध के सूचक वचनों का प्रयोग नहीं करना; इसका नाम वाचनिक क्रोधकषायविवेक है। मन में दूसरों के परिभव आदि का कलुषित विचार न आने देना, इसे भावतः क्रोधविवेक जानना चाहिए। इसी प्रकार से पृथक्-पृथक् मान, माया और लोभ कषायों के सम्बन्ध में समझना चाहिये।

कषायवेदनीयकर्म—१. तत्र क्रोधादिकषायरूपेण यद्वेद्यते तत्कषायवेदनीयम्। (आ. प्र. टी. १६; धर्मसं. मलय. वृ. ६१३; प्रज्ञाप. मलय. वृ. २३, २९३, पृ. ४६८)। २. जस्स कम्मस्स उदएण जीवो कसायं वेदयदि तं कम्मं कसायवेदणीयं णाम। (षट. पु. १३, पु. ३५९)।

२ जिस कर्म के उदय से जीव कषाय का वेदन करता है उसे कषायवेदनीय (चारित्रमोहनीय का भेद) कहते हैं।

कषायसमुद्घात—१. हितमात्मप्रदेशप्रकर्षोत्पादितक्रोधादिकृतः कषायसमुद्घातः। (त. वा. १, २०, १२, पु. ७७)। २. कसायसमुग्घादो णाम कोहभयादीहि सरीरसिणुणविप्पुज्जणं। (षट. पु. ४, पु. २६); कसायतिव्वदाए सरीरादो जीवपदेसाणं तिगुणविप्पुंजणं कसायसमुग्घादो णाम। (षट. पु. ७, पु. २९९)। ३. तीव्रकषायोदयान्मूलशरीरमत्यक्त्वा परस्य घातार्थमात्मप्रदेशानां बहिर्गमनमिति कषायसमुद्घातः। (बृ. द्रव्यसं. १०)। ४. कषायेण कषायोदयेन, समुद्घातः कषायसमुद्घातः, स च कषायचारित्रमोहनीयकर्माश्रयः। × × × सच

समुद्घात इति कः शब्दार्थः ? उच्यते—समिति एकीभावे, उत् प्राबल्ये, एकीभावेन प्राबल्येन घातः समुद्घातः। केन सह एकीभावगमनम् ? इति चेत् उच्यते—अर्थाद् वेदनादिभिः। तथा हि—यदा आत्मा वेदनादिसमुद्घातगतो भवति तदा वेदनाद्यनुभवज्ञानपरिणत एव भवति, नान्यज्ञानपरिणतः। प्राबल्येन घातः कथम् ? इति चेत् उच्यते—इह वेदनादिसमुद्घातपरिणतो बहून् वेदनीयादिकर्मपुद्गलान् कालान्तरानुभवनयोग्यान् उदीरणाकरणेनाकृष्य उदयावलिकायां प्रक्षिप्यानुभूयानुभूय निर्जरयति—आत्मप्रदेशेभ्यः शातयतीति भावः। (जीवाजी. मलय. वृ. १–१३, पृ. १७)। ५. तीव्रकषायोदयाभ्मूलशरीरमत्यक्त्वा परस्य घातार्थमात्मप्रदेशानां बहिर्निर्गमनं संग्रामे सुभटानां रक्ततलोचनादिभिः प्रत्यक्षदृश्यमानमिति कषायसमुद्घातः। (कार्तिके. टी. १७६)।

२. कषाय की तीव्रता से जीवप्रदेश जो शरीर से तिगुने फैल जाते हैं, इसे कषायसमुद्घात कहते हैं। ४ समुद्घात में 'सम्' का अर्थ एकीभाव और उत् का अर्थ प्रबलता है, जीव जब वेदनादिरूप किसी समुद्घात को प्राप्त होता है तब वह एक मात्र वेदना आदि के अनुभवज्ञान से परिणत होता है—अन्य ज्ञान से परिणत नहीं होता, यही वेदनादि के साथ उसका एकीभाव है। साथ ही जब वह उक्त वेदनादिसमुद्घात को प्राप्त होता है तब वह कालान्तर में अनुभवन के योग्य बहुत से वेदनादिरूप कर्मपुद्गलों का उदीरणा करण के द्वारा अपकर्षण करके उन्हें उदयावली में प्रक्षिप्त करता हुआ अनुभवपूर्वक निर्जीर्ण करता है— आत्मप्रदेशों से पृथक् करता है। यही प्रबलता से घात है। इससे यह अभिप्राय हुआ कि कषायोदय से जो पूर्वोक्त प्रकार समुद्घात होता है उसे कषायसमुद्घात समझना चाहिये।

कषायसल्लेखना—१. अज्झवसाणविसुद्धी कसायसल्लेहणा भणिदा। (भ. आ. २५६)। २. सद्ध्यानप्रकरैः कषायविषया सल्लेखना श्रेयसी, (आचा. सा. १०–१०)। ३. कषायाः क्रोध-मान-माया-लोभलक्षणास्तेषां सल्लेखना सन्यासः सर्वथा परिहारः। (आरा. सा. टी. २२)।

१ परिणामों की विशुद्धि का नाम कषायसल्लेखना है। अभिप्राय यह है कि क्रोधादि कषायों के कृश करने को कषायसल्लेखना कहते हैं।

काक-अन्तराय— काक-श्वादिविहुत्सर्गो भोक्तुमन्यत्र यात्यधः। यतौ स्थिते वा काकाद्यो भोजनत्यागकारणम्॥ (अन. ध. ५–४३)।

साधु के भोजन के लिए जाते समय अथवा स्थित होने पर काक व कुत्ता आदि के द्वारा बीट के कर देने पर काक नाम का अन्तराय होता है जो भोजन के परित्याग का कारण है।

काकलेश्या—काएलेस्सिया णाम तदियो वादवलओ। कधं तस्स एसा सण्णा ? कागवण्णत्तादो। सो कागलेस्सिओ णाम। (ध. पु. ११, पृ. १६)।

तीसरा तनुवातवलय चूंकि कौवे के समान वर्णवाला है, अतः उसे काकलेश्या कहा जाता है।

काकादिपिण्डहरण— काकादिपिण्डहरणं काकगृद्धादिना करात्। पिण्डस्य हरणे ××× भ्रश्नतः ×××॥ (अन. ध. ५–४६)।

भोजन करते समय काक व गिद्ध आदि के द्वारा साधु के हाथ से भोजन हर ले जाने पर काकादिपिण्ड-हरण नाम का अन्तराय होता है।

काङ्क्षा—१. ऐहलौकिक-पारलौकिकेषु विषयेष्वाशंसा काङ्क्षा। सोऽतिचारः सम्यग्दृष्टेः। (त. भा. ७–१८)। २. ××× कंखा अन्नन्नदंसणग्गाहो (भा. प्र. ८७)। ३. ××× दर्शनेषु वा (आशंसा)। तथा चागमः—कंखा अण्णण्णदंसणग्गाहो। (त. भा. हरि. व सिद्ध. वृ. ७–१८)। ४. काङ्क्षा गार्द्धयम् आसक्तिः, सा च दर्शनस्य मलम्। ××× दर्शनाद् व्रताद् दानात् देवपूजायास्तपसश्च जातेन पुण्येन ममेदं कुलं रूपं वित्तं स्त्री-पुत्रादिकं शत्रुमर्दनं स्त्रीत्वं पुंस्त्वं वा सातिशयं स्यादिति काङ्क्षा इह गृहीता। एषा अतिचारो दर्शनस्य। (भ. आ. विजयो. ४४); काङ्क्षा गार्द्धयम्। (भ. आ. विजयो. २१३)। ५. कंखा बुद्धाइपणीयदरिसणेसु गाहो अभिलासो। अन्नो भणियं—कंखा अन्नोन्नदंसणग्गाहो। (पंचाशक चू. पृ. ४६)। ६. काङ्क्षा अन्यान्यदर्शनग्रहः। (योगशा. स्वो. विव. २–१७)। ७. या रागात्मनि भङ्गुरे परवधे सन्तापतृष्णारसे, दुःखे दुःखबन्धकारणतया संसारसौख्ये स्पृहा। स्याज्ज्ञानावरणोदयैकजनितभ्रान्तेरिदं दुष्टपोमाहात्म्यादुदियान्ममेत्यतिचरत्येवैव काङ्क्षा

दृश्यम् ॥ (अन. ध. २–७५)। ८. कंखा आकांक्षा। सा च प्रतिनियतविषयैव ग्राह्या, ××× ततो दर्शन-व्रत-दान - देवार्चन-तपोजनितपुण्यमाहात्म्यात् कुलं रूपं वित्तं स्त्री-पुत्रादिकं शत्रूपमर्दनं स्त्रीत्वं पुंस्त्वं सातिशयं मे भूया दित्याशंसनं दर्शनस्य मलः स्यात्। (अ. आ. मूला. ४४)। ९. इह-परलोक-भोगाकाङ्क्षणं काङ्क्षा (त. वृत्ति श्रुत. ७–२३; कार्तिके. टी. २२६)।

१ इस लोक व पर लोक सम्बन्धी विषयों की इच्छा करना, इसका नाम कांक्षा है। ४ कांक्षा का अर्थ गृद्धि (लोलुपता) व आसक्ति होता है। सम्यग्दर्शन, व्रत, दान, देवपूजा और तपश्चरण से उपार्जित पुण्य के द्वारा मुझे कुल, रूप, धन, स्त्री-पुत्रादि, शत्रु का विनाश तथा स्त्री या पुरुष पर्याय विशेषता से संयुक्त प्राप्त हो; ऐसी इच्छा करना, इसका नाम कांक्षा है। यह सम्यग्दर्शन को दूषित करने वाली—उसका अतिचार—है।

कारणकक्रयी—काणकक्रयी बहुमूल्यमपि अल्पमूल्येन चौराहृतं काणकं हीनं कृत्वा क्रीणातीति। (प्रश्न-व्या. अभय. वृ. पृ. १९३)।

जो चोर के द्वारा लाये गये बहुत मूल्य वाले भी कानक को—कनकनिर्मित आभूषणादि को—हीन करके थोड़े से मूल्य में ले लेता है उसे कानकक्रयी कहते हैं।

कानन—सामान्यवृक्षवृन्द नगरासन्नं काननम्। (जीवाजी. मलय. वृ. १४२)।

नगर के समीपवर्ती साधारण वृक्षों के समुदाय को कानन कहते हैं।

कापटिक—परमर्मज्ञः प्रगल्भश्छात्रः कापटिकः। (नीतिवा. १४–९)।

दूसरे के मर्म के जानने वाले प्रगल्भ छात्र को कापटिक कहते हैं।

कापोतलेश्या—१. रूसदि णिंददि अण्णे दूसदि बहुसो य सोयभयबहुलो। असुयदि परिभवदि परं पसंसदि य अप्पय बहुसो ॥ ण य पत्तियइ परं सो अप्पाणमिव परं पि मण्णतो। तूसदि अभित्थुवंतो ण य जाणइ हाणि-वड्ढीओ ॥ मरणं पत्थेइ रणे देदि सुबहुअ हि थुव्वमाणो दु। ण गणइ अकज्ज-कज्जं लक्खणभेदं तु काउस्स ॥ (प्रा. पंचसं. १, १४७–४९; धव. पु. १, पृ. ३८९ उ.; गो. जी. ५११–१३)। २. नील-लोहितवर्णद्वयद्रव्योपश्लेषोद्भवाष्टभात् कापोतलेश्या ××× कापोतलेश्यायाः प्रातिलोम्येनानिष्टपरिणामापेक्षा अनिष्टा अनिष्टतरा अनिष्टतमा चेति। आसां षण्णामपि लेश्यानां जम्बूवृक्षफलभक्षकदृष्टान्तेनागमप्रसिद्धेन ग्रामग्राहक-पुरुषषट्केन च प्रसिद्धिरापाद्या। (त. वा. सिद्ध. वृ. २–३)। ३. कसायाणुभागफद्दयाणमुदयमागदाणं जहण्णफद्दयप्पहुडि जाव उक्कस्सफद्दया त्ति ट्ठइदाणं छब्भागविहत्ताणं चउत्थभागो तिव्वो, तदुदएण आद-कसाओ काउलेस्सा णाम। (धव. पु. ७, पृ. १०४)।

१ दूसरे के ऊपर क्रोध करना, निन्दा करना, दूसरों को दुःख देना, बैर करना, शोक और भय से ग्रस्त रहना, दूसरे के ऐश्वर्यादि को सहन न कर सकना, दूसरे का तिरस्कार करना, अपनी प्रशंसा करना, दूसरे का विश्वास न करना, अपने समान दूसरों को भी बेईमान समझना, अपनी प्रशंसा करने वाले पर प्रसन्न होना, अपनी हानि वृद्धि को न समझना, रण में मरण चाहना, स्तुति करने वाले को बहुत धन देना, कार्य-अकार्य की गणना न करना; इत्यादि प्रकार की मनोवृत्ति या भावों की कलुषता को कापोतलेश्या कहते हैं। २ नील और लाल वर्णयुक्त द्रव्यों के आश्रय से जो परिणति होती है, उसका नाम कापोतलेश्या है।

कापोतलेश्यारस—जह तरुणअंबयरसो तुवर-कविट्ठस्स वावि जारिसओ। इत्तो वि अणंतगुणो रसो उ काऊए नायव्वो ॥ (उत्तरा. ३४–१२)।

कच्चे आम या कच्चे कैथ के खट्टे रस से भी अनन्तगुणा कापोतलेश्या का रस होता है।

कापोतलेश्यावर्ण—अयसीपुप्फसकासा कोइलच्छ-दसन्निभा। पारेवयगीवनिभा काउलेस्सा उ वण्णओ ॥ (उत्तरा. ३४–६)।

वर्ण की अपेक्षा कापोतलेश्या अलसी के फूल, कोकि-लच्छद (एक वनस्पति) और कबूतर के गले के वर्ण के समान होती है।

काम (पुरुषार्थ)—१. आभिमानिकरसानुविद्धा यतः सर्वेन्द्रियप्रीतिः स कामः। (नीति. ३–१; योगशा. स्वो. विव. १–५२)। २. संकल्परमणी-यस्य प्रीतिसंभोगशोभिनो रुचिरस्याभिलाषस्य नाम काम इति स्मृतिरिति वचनात् कामश्च यथेष्टाभि-मानिकरसानुविद्धसर्वेन्द्रियप्रीतिहेतुः कुलाङ्गनासङ्गि-

नां सुप्रतीत:। (सा. ध. स्वो. टी. २-५६)।

१ जिसके आश्रय से अभिमान पूर्ण रस से सम्बद्ध होकर सभी इन्द्रियों को प्रीति उत्पन्न होती है, उसे काम कहते हैं।

काम (अरिषड्वर्गान्तर्गत)—तत्र परपरिगृहीतास्वनूढासु वा स्त्रीषु दुरभिसन्धि: कामः। (योगशा. स्वो. विव. १-५६; ध. बि. मु. वृ. १-१५)।

पर स्त्री अथवा अविवाहित स्त्रियों के विषय में दुष्ट अभिप्राय रखना, इसका नाम काम है। यह अरिषड्वर्ग के अन्तर्गत काम का लक्षण है।

कामकथा—रूवं वग्गो य वेसो दक्खत्तं सिक्खियं च विसएसु। दिट्ठ सुयमणुभूयं च संथवो चेव कामकहा॥ (दशवै. नि. १९२)।

सुन्दर रूप, यौवन अवस्था, आकर्षक वेषभूषा, दाक्षिण्य (चतुरता), विषयों की शिक्षा, दृष्ट, श्रुत, अनुभूत और संस्तव (परिचय); इनके आश्रय से जो चर्चा की जाती है वह कामकथा कहलाती है।

कामतीव्राभिनिवेश—१. कामस्य प्रवृद्ध: परिणाम: कामतीव्राभिनिवेश:। (स. सि. ७-२८, त. वा. ७, २८, ४)। २. कामस्य प्रवृद्ध: परिणाम: अनुपरतवृत्त्यादि: कामतीव्राभिनिवेश: इत्युच्यते। (त. वा. ७, २८, ४; चा. सा. पृ. ७)। ३. कामस्य कन्दर्पस्य तीव्र: प्रवृद्ध: अभिनिवेश अनुपरतप्रवृत्तिपरिणाम: कामतीव्राभिनिवेश:, यस्मिन् काले स्त्रियां प्रवृत्तिरुक्ता तस्मिन्नपि काले कामतीव्राभिनिवेश:। (त. वृत्ति श्रुत. ७-२८)। ४. कामसेवायां प्रचुरतृष्णाबहुला कांक्षा, यस्मिन् काले स्त्रियां प्रवृत्तिरक्ता तस्मिन् काले कामतीव्राभिनिवेश:। (कार्तिके. टी. ३३७-३८)। ५. कामतीव्राभिनिवेशो दोषोऽतीचारसंज्ञक:। दुर्दान्तिवेदनाक्रान्तस्मरसंस्कारपीडित:। (लाटीसंहिता ६-७८)।

१ कामसेवन की बढ़ी हुई परिणति को कामतीव्राभिनिवेश कहते हैं।

कामतीव्राभिलाष—देखो कामतीव्राभिनिवेश। १. कामे तीव्राभिलाषश्चेति सूचनात् काम-भोगतीव्राभिलाष:। कामा: शब्दादय:, भोगा रसादय:, एतेषु तीव्राभिलाष: अत्यन्ततदध्यवसायित्वम्। (श्रा. प्र. टी. २७३)। २. तथा कामे कामोदयजन्ये मैथुने अथवा सूचनात् सूत्रमिति न्यायात् कामेषु काम-भोगेषु तत्र कामौ शब्द-रूपे, भोगा गन्ध-रस-स्पर्शा:, तेषु तीव्राभिलाष: अत्यन्ततदध्यवसायित्वं यतो वाजीकरणादिनाऽनवरतसुरतसुखार्थं मदनमुद्दीपयति। (ध. बि. मु. वृ. ३-२६)।

२ काम से अभिप्राय मैथुन क्रिया का है, तद्विषयक उत्कट इच्छा रखना, इसका नाम कामतीव्राभिलाष है। अथवा शब्द और रूप को काम तथा गन्ध, रस और स्पर्श को भोग कहा जाता है। इन पांचों के विषय में उत्कट इच्छा रखना, यह कामतीव्राभिलाष नामक ब्रह्मचर्याणुव्रत का अतिचार है।

काम-भोगाशंसाप्रयोग— काम-भोगाशंसाप्रयोग: जन्मान्तरे चक्रवर्ती स्यां वासुदेवो महामण्डलिक: सुभगो रूपवानित्यादि, एतद्गर्जयेद् भावयेच्चाशुभं जन्मपरिणामादिरूपं संसारपरिणाममिति। (आ. प्र. टी. ३८५)।

पर भव में मैं चक्रवर्ती, नारायण, महामण्डलीक, सुन्दर व रूपवान् होऊं; इत्यादि प्रकार की इच्छा करने को काम-भोगाशंसाप्रयोग कहते हैं।

कामराग — कामराग: प्रियप्रमदादिविषयसाधनवस्तुगोचर:। (उपदे. मु. वृ. १८९)।

प्यारी स्त्री आदि के विषयों की साधनभूत अभीप्सित वस्तुओं में जो राग होता है उसे कामराग कहते हैं।

कामरूप, कामरूपित्व— १. जुगवं बहुरूवाणि जं विरयदि कामरूवरिद्धी सा॥ (ति. प. ४-१०३२)। २. कामरूपित्वं नानाश्रयानेकरूपधारणं युगपदपि कुर्यात्। तेजोनिसर्गे सामर्थ्यमेतदादि इति इन्द्रियेषु मतिज्ञानविशुद्धिविशेषात् द्वारात् स्पर्शनाऽऽस्वादनघ्राण-दर्शन-श्रवणानि विषयाणां कुर्यात्। (त. भा. १०-७, पृ. ३१६)। ३. युगपदनेकाकाररूपविकरणशक्ति: कामरूपित्वमिति। (त. वा. ३, ३६, ३, पृ. २०३)। ४. युगपदनेकरूपधारणं कामरूपित्वम्। (त. भा. सिद्ध. वृ. १०-७)। ५. इच्छिदरूवग्गहणसत्ती कामरूवित्तं णाम। (धव. पु. ९, पृ. ७६)। ६. युगपदनेकाकाररूपविकरणशक्ति: कामरूपित्वमिति, यथाभिलषितैकमूर्त्याकारं स्वाङ्गस्य मुहुर्मुहु: करणं कामरूपित्वमिति वा। (चा. सा. पृ. ९८)। ७. कामरूपित्वं युगपदेव नानाकाररूपविकरणशक्ति:। (योगशा. स्वो. विव. १-८)। ८. अनेकरूपकरणं मूर्त्ताकारकरणं वा कामरूपित्वम्। (त. वृत्ति श्रुत. ३-३६)।

१ एक साथ अनेक रूपों के रचने की शक्ति को कामरूप ऋद्धि कहते हैं। २ अनेक आश्रय वाले नाना रूपों को एक ही साथ धारण करना, तेजोलेश्या आदि (शीतलेश्या) के छोड़ने का सामर्थ्य प्राप्त होना, तथा इन्द्रियों में मतिज्ञान की विशुद्धिविशेष से रूपादि विषयों का देश व प्रमाण के नियमोल्लंघनपूर्वक ग्रहण करना; इसे कामरूपित्व ऋद्धि कहा जाता है।

कामविनय— शब्दादिविषयसम्पत्तिनिमित्तं यथा तथा प्रवर्तनं कामविनयः। (उत्तरा. नि. शा. वृ. २६, पृ. २४)।

इन्द्रियों के अभीष्ट शब्दादि विषयों की प्राप्ति के लिए जिस किसी भी प्रकार की प्रवृत्ति करने को कामविनय कहते हैं।

काय—१. आत्मप्रवृत्युपचितपुद्गलपिण्डः कायः। (त. वा. ६, ७,७, पृ. ६०३; धव. पु. १, पृ. १३८)। २. अप्पप्पवुत्तिसंचिदपोग्गलपिंडं वियाण काओ त्ति। (प्रा. पंचसं. १–७५; धव. पु. १, पृ. १३६ उद्.)। ३. सप्तानां कायानां सामान्यं कायः। (धव. पु. १. पृ. ३०८); आत्मप्रवृत्युपचितपुद्गलपिण्डः कायः. पृथिवीकायादिनामकर्मजनितपरिणामो वा कार्यकारणोपचारेण कायः, चीयन्ते अस्मिन् जीवा इति व्युत्पत्तेर्वा कायः। (धव. पु. ७, पृ. ६)। ४. जाई अविणाभावी तस-थावर-उदयजो हवे काओ। (गो. जी. १८७)। ५. जीवस्य निवासादि शरीरं कायोऽभिधीयते, चीयते पुद्गलैरवयवसमाधानद्वारेण निर्वर्त्यत इति काय इति भावः। (आव. हरि. वृ. मल. हेम. टि. पृ. ६६)। ६. औदारिकशरीरनामकर्मोदयवशात् पुद्गलैश्चीयते इति कायः। (चा. सा. पृ. ३६)। ७. जातिनामकर्माविनाभावित्रस-स्थावरनामकर्मोदयाज्जातः आत्मनस्त्रसत्वपर्यायः स्थावरत्वपर्यायश्च कायः इति जिनमते सर्वज्ञवीतरागसमये भणितो भवेत्। कायते—त्रस इति स्थावर इति च व्यवहृतुं जनैः शब्द्यते—कथ्यते इति कायः। × × × चीयते पुष्टिं नीयते पुद्गलस्कन्धैरिति कायः औदारिकादिशरीरम्। (गो. जी. म. प्र. टी. १८१)। ८. जातिनामकर्मोदयाविनाभावि-त्रस-स्थावरनामकर्मोदयजनितः आत्मनः त्रसत्व-स्थावरत्वपर्यायः कायो नाम। (गो. जी. जी. प्र. टी. १८१)।

१ अपनी प्रवृत्ति से जो पुद्गलपिण्ड संचित होता है उसे काय कहते हैं। २ पृथिवी काय आदि नामकर्मविशेषके उदय से प्राप्त अवस्थाविशेष को काय कहा जाता है।

कायक्रिया—१. कायस्य सम्बन्धिनी क्रिया कायशब्देनोच्यते, तस्याः कारणभूतात्मनः क्रिया कायक्रिया। (भ. आ. विजयो. ११८८)। २. कायस्य औदारिकादिशरीरस्य सम्बन्धिनी क्रिया परिणामः। उपकरणग्रहण-निक्षेपण-गमनादिकर्मलक्षणा कायक्रिया। (भ. आ. मूला. ११८८)।

१ काय शब्द से यहां (कायक्रिया की निवृत्तिस्वरूप कायगुप्ति के प्रकरण में) शरीर सम्बन्धी क्रिया का अभिप्राय रहा है, उसकी कारणभूत जो आत्मा की क्रिया है उसे कायक्रिया कहा गया है।

कायक्लेश—१. ठाण-सयणासणेहिं य विविहेहिं य उग्गये[हे]हिं बहुएहिं। अणुवीचीपरिताओ कायकिलेसो हवदि एसो॥ (मूला. ५–१५६)। २. अब्भुट्ठणं च रादो अण्हाणमदंतधोवणं चेव। कायकिलेसो एसो सीदुण्हादावणादी य॥ (भ. आ. २२७)। ३. आतपस्थानं वृक्षमूलनिवासो निरावरणशयन बहुविधप्रतिमास्थानमित्येवमादिः कायक्लेशः, तत् षष्ठं तपः। × × × यदृच्छयोपनिपतितपरिषहः, स्वयंकृतः कायक्लेशः। (स. सि. ६–१६)। ४. कायक्लेशो ऽनेकविधः। तद्यथा—स्थानवीरासनोत्कटुकासनैकपार्श्वदण्डायतशयनातापनाप्रावृताद्दीनि। (त. भा. ६–१६)। ५. कायक्लेशः स्थान-मौनातपनादिरनेकधा। प्रतिमास्थानं वाचंयमत्वम् आतपनं वृक्षमूलत्रासः इत्येवमादिना शरीरपरिखेदः कायक्लेश इत्युच्यते। (त. वा. ६, १६, १३)। ६. चीयत इति कायः देहस्तस्य क्लेशः अवनामादिलक्षणः कायक्लेशः। (आव. नि. हरि. वृ. ११०८, पृ. ५१६)। ७. कायः शरीरम्, तस्य क्लेशो बाधनम्। (त. भा. सिद्ध. वृ. ६–१६)। ८. रुक्खमूलब्भोकासादावणजोग-पलियंक-कुक्कुटासण-गोदोहद्ध-पलियंक-वीरासण-मयरमुह-हत्थिसोंडादीहिं जं वीरदमणं सो कायकिलेसो। (धव. पु. १३, पृ. ५८)। ६. कायक्लेशः स्थान-मौनातपनादिः। (त. श्लो. ६–१६)। १०. दुस्सहउवसग्गजई आतावणसीयवायखिण्णो वि। जो णवि खेदं गच्छदि कायकिलेसो तवो तस्स। (कार्तिके. टी. ४५०)। ११. कायसुखाभिलाषत्यजनं कायक्लेशः। (भ. आ. विजयो.

६)। १२. कायस्य निग्रहं प्राहुस्तपः परमदुश्चरम्। (अ. पु. २०–७८)। १३. अनेकप्रतिमास्थानं मौनं शीतसहिष्णुता। आतपस्थानमित्यादि कायक्लेशो मतं तपः॥ (त. सा. ७–१३)। १४. वृक्षमूलाभ्रावकाशाऽऽतपनयोग-वीरासन-कुक्कुटासन-पर्यंकार्द्ध-पर्यंक-गोदोहन-मकरमुख-हस्तिशुण्डा-मृतकशयनैकपार्श्वदण्ड-धनुःशय्यादिभिः शरीरपरिखेदः कायक्लेश इत्युच्यते। (चा. सा. पृ. ६०)। १५. सुखोपलालितः कायो नालं सद्ध्यानसिद्धये। तद्दुःखमनं कायक्लेशः क्लेशैर्मतो चितैः॥ (आचा. सा. ६–१७)। १६. ऊर्ध्वार्काद्यासनैः शवादिशयनैर्वीरासनाद्यासनैः, स्थानैरेकपदाग्रगामिभिरनिष्ठीवाग्रिमाग्रहैः। योगैश्चातपनादिभिः प्रशमिना संतापनं यत्नतोः, कायक्लेशमिदं तपोऽर्त्युपनतौ सद्ध्यानसिद्ध्यै भजेत्॥ (अन. ध. ७–३२)। १७. कायक्लेशः जलौदनभोजनादि। (भावप्रा. टी. ७८)। १८. कायस्य क्लेशो दुःखं कायक्लेशः। उष्णतौ आतपे स्थितिः, वर्षतौ तरुमूलनिवासित्वम्, शीततौ निवारण [निरावरण] स्थाने शयनम्, नानाप्रकारप्रतिमास्थानं चैत्येवमादिकः कायक्लेशः षष्ठं तपः। (त. वृत्ति श्रुत. ९, १९)। १९. आतापनादियोगेन वीर्यं [वीर]चर्यासनेन वा। वपुषः क्लेशकरणं कायक्लेशः प्रकीर्तितः॥ (लाटीसंहिता ७–८०)।

१ स्थान (कायोत्सर्ग), एक पार्श्वभाग से सोना, आसन—उत्कुटिका-वीरासन आदि; इन विविध प्रकार के बहुत से अवग्रहों—धर्मोपकारक हेतुओं—के द्वारा आगमानुसार आतापनयोग आदि से शरीर को क्लेश पहुंचाना; इसका नाम कायक्लेश है। ४ स्थान—ऊर्ध्वस्थित रहना (कायोत्सर्ग करना), वीरासन, उत्कटुकासन, दण्ड के समान शरीर को स्थिर करके एक कर्वट से सोना, आतापन—ग्रीष्म में तीक्ष्ण सूर्य की किरणों के सन्ताप को सहन करते हुए ध्यानावस्थित रहना, और अप्रावृत—शीतकाल में खुले आकाश में आवरण से रहित होकर—ध्यान करना; इत्यादि प्रकार से कायक्लेश तप अनेक प्रकार का है।

कायक्लेश-आतपनातिचार—कायक्लेशस्यातपनस्यातिचारः—उष्णार्दितस्य शीतलद्रव्यसमागमेच्छा, सन्तापायायो मम कथं स्यादिति चिन्ता, पूर्वानुभूतशीतलद्रव्यप्रदेशानां स्मरणम्, कठोरातपद्वेषः, शीतलाद्देशादकृतगात्रप्रमार्जनस्य आतपप्रवेशः, आतपसन्तप्तशरीरस्य वा अप्रमृष्टगात्रस्य छायानुप्रवेशः इत्यादिकः। (भ. आ. विजयो. ४८७)। उष्णता से पीड़ित होने पर शीतल द्रव्यों के समागम की इच्छा करना, यह मेरा सन्ताप कैसे दूर होगा, इस प्रकार का विचार करना, पूर्व अनुभूत शीतल द्रव्य वाले प्रदेशों का स्मरण करना, कठोर आतप के प्रति द्वेषबुद्धि रखना, शीतल स्थान से आकर शरीर के बिना प्रमार्जन किये ही आतप में प्रवेश करना, तथा घाम से संतप्त होने पर बिना शरीर के प्रमार्जन किये ही छाया में प्रवेश करना; इत्यादि आतपन-कायक्लेश के अतिचार हैं।

कायगुप्ति—१. बंधणछेदणमारणआकुंचण तह पसारणादीया। कायकिरियाणियत्ती णिद्दिट्ठा कायगुत्ति त्ति॥ (नि. सा. ६८)। २. कायकिरियाणियत्ती काउस्सग्गो सरीरगे गुत्ती। हिंसादिणियत्ती वा सरीरगुत्ती हवदि एसा॥ (मूला. ५–१३६; भ. आ. ११८८)। ३. तत्र शयनासनादान-निक्षेप-स्थान-चंक्रमणेषु कायचेष्टानियमः कायगुप्तिः। (त. भा. ९–४)। ४. कायस्य गुप्तिः संरक्षणमुन्मार्गगतिरागमतः। (त. भा. हरि. वृ. ९–४)। ५. कायक्रियानिवृत्तिः कायोत्सर्गे शरीरगुप्तिः स्यात्। दोषेभ्यो वा हिंसादिभ्यो विरतिस्तयोर्गुप्तिः॥ (त. भा. सिद्ध. वृ. ९–४ उद्.)। ६. अप्रमत्ततया यदप्रत्यवेक्षिताप्रमार्जितभूभागेऽचंक्रमणं, द्रव्यान्तरादान-निक्षेप-शयनासनक्रियाणामकरणं कायगुप्तिः कायोत्सर्गो वा। ××× प्राणिपीडाकारिण्याः कायक्रियाया निवृत्तिः कायगुप्तिः। (भ. आ. विजयो. ११५); कायस्य सम्बन्धिनी क्रिया कायशब्देनोच्यते, तस्याः कारणभूतात्मनः क्रिया कायक्रिया, तस्या निवृत्तिः कायोत्सर्गः, शरीरस्याशुचितामसारतामापन्निमित्ततां चावेत्य तद्गतममतापरिहारः कायगुप्तिः। (भ. आ. विजयो. ११८८)। ७. सम्यग्दण्डो वपुषः ××× गुप्तीनां त्रितयमवगम्यम्॥ (पु. सि. २०२)। ८. कायावद्यक्रियात्यागः कायगुप्तिर्मताऽथवा। कायोत्सर्गः समुत्सर्गः संगस्य द्विविधस्य यः॥ (आचा. सा. ५–१४०)। ९. स्थिरीकृतशरीरस्य पर्यङ्कसंस्थितस्य वा। परी-

वहूपघातेऽपि कायगुप्तिमंता मुनेः। (ज्ञानार्णव १८, १८)। १०. उपसर्गप्रसंगेऽपि कायोत्सर्गजुषो मुनेः। स्थिरीभावः शरीरस्य कायगुप्तिर्निगद्यते ॥ शयनासन-निक्षेपादान-चंक्रमणेषु च। स्थानेषु चेष्टानियमः कायगुप्तिस्तु सा परा ॥ (योगशा. १–४३, ४४)। ११. ××× कायोत्सर्गस्वभावां विशररतचुरापोहदेहामनीहा-काया वा कायगुप्ति ×× ×॥ (अ. ध. ४–१५६)। १२. शरीरस्याशुचितामसारताम[मा]पन्निमित्ततां भावयतस्तद्गतममत्वपरिहारः कर्मादाननिमित्तसकलकायक्रियानिवृत्तिः कायगोचरममतात्यागपुरोगा कायगुप्तिरित्युभयं तल्लक्षणम्। (भ. आ. मूला. ११८८)।

३ शयन, आसन, आदान-निक्षेप, स्थान (ऊर्ध्वस्थिति) और गमन आदि क्रियाओं के करते समय शरीर की प्रवृत्ति को नियमित रखना – जीवजन्तुओं को देख कर व रजोहरणादि से प्रमार्जित कर सावधानीपूर्वक उक्त कार्यों को करना; इसका नाम कायगुप्ति है।

कायगुप्तिअतिचार — १. असमाहितचित्ततया कायक्रियानिवृत्तिः कायगुप्तेरतिचारः। एकपादादिस्थानं वा जनसंचरणदेशे, अशुभध्यानाभिनिविष्टस्य वा निश्चलता, आप्ताभासप्रतिबिम्बाभिमुखतया वा तदाराधनव्यापृत इवावस्थानम्, सचित्तभूमौ संपतत्सु समन्ततः अशेषेषु महति वा वाते हरितेषु रोषाद्वा दर्पात् तूष्णीमवस्थानम्, निश्चला स्थितिः कायोत्सर्गः, कायगुप्तिरित्यस्मिन् पक्षे शरीरममताया अपरित्यागः कायोत्सर्गदोषो वा कायगुप्तेरतिचारः। (भ. आ. विजयो. १६)। २. कायगुप्तेः (अतिचारः) असमाहितचित्ततया कायक्रियानिवृत्तिर्जनसंचरणदेशे एकपादादिना अवस्थानम्, अशुभध्यानाभिनिविष्टस्य निश्चलत्वम्, आप्ताभासप्रतिबिम्बाभिमुखतया तदाराधनव्यापृतस्येवावस्थानम्, सचित्तभूम्यादौ रोषाद् दर्पाद्वाऽनिश्चला स्थितिः कायोत्सर्गे तद्दोषाः कायममत्वात्यागो वेत्यादिकः। (भ. आ. मूला. टी. १६)।

१ अस्वस्थ मनसे शरीर सम्बन्धी क्रियाओंका परित्याग करना, यह कायगुप्तिका अतिचार है। अथवा जनसंचारके स्थानमें एक पाँव आदिसे स्थित होना, अशुभ ध्यानमें मग्न होकर निश्चलतापूर्वक स्थित होना, आप्ताभासों की प्रतिमाओंके सामने उनके आराधनमें तत्पर के समान अवस्थित रहना; सचित्त भूमिपर चारों ओर हरितके होने पर या प्रबल वायु के वश हरितके आनेपर क्रोधसे या अभिमानसे चुपचाप स्थित होना; निश्चल स्थिति कायोत्सर्ग-कायगुप्ति है, इस पक्षमें शरीरसे ममताका न छोडना, अथवा कायोत्सर्ग में दोष लगाना, यह कायगुप्तिके अतिचार हैं। (मूलमें पाठ कुछ अव्यवस्थितसा दिखता है)।

कायचिकित्सा—कायस्य ज्वरादिरोगग्रस्तशरीरस्य चिकित्सा–रोगप्रतिक्रिया—यत्राभिधीयते तत्कायचिकित्सैव (विपाक. अभय. वृ. ७, पृ. ४६)।

ज्वरादि रोग-ग्रस्त शरीर की चिकित्सा (उपचार) का जहां वर्णन किया जाता है उसे कायचिकित्सा कहते हैं।

कायदुःप्रणिधान—१. दुष्ठु प्रणिधानमन्यथा वा दुःप्रणिधानम्। प्रणिधानं प्रयोगः परिणाम इत्यनर्थान्तरम्। दुष्ठु पापं प्रणिधानं दुःप्रणिधानम्, अन्यथा वा प्रणिधानं दुःप्रणिधानम्। तत्र क्रोधादिपरिणामवशात् दुष्ठु प्रणिधानं शरीरावयवानाम् अनिभृतमवस्थानम्। (त. वा. ७, ३३, २)। २. अनिरिक्खियापमज्जिय थंडिल्ले ठाणमाइ सेवंतो। हिंसाभावे वि न सो कडसामाइओ पमायाओ ॥ (श्रा. प्र. ३१५)। ३. शरीरावयवानामनिभृतावस्थानं कायदुःप्रणिधानम्। (चा. सा. पृ. ११)। ४. तत्र शरीरावयवानां पाणि-पादादीनामनिभृतताऽवस्थापनं कायदुष्प्रणिधानम्। (योगशा. स्वो. विव. ३-११६)। ५. दुष्टप्रणिधानं सावद्ये प्रवर्तनम्, तत्र हस्त-पादादीनामनिश्चयभूतत्वावस्थापनं कायदुष्प्रणिधानम्। (सा. ध. स्वो. टी. ५–३३)। ६. काययोगस्ततोऽन्यत्र हस्तसज्ञादिदर्शने। वर्तते तदतीचारः कायदुष्प्रणिधानकः ॥ (लाटीसं. ६–१९२)।

१ पापपूर्ण प्रयोग अथवा अन्यथा परिणति का नाम दुष्प्रणिधान है। क्रोधादि के वश शरीर के अवयवों को अविनीततापूर्ण रखना, इसे कायदुष्प्रणिधान कहते हैं। २ विना देखे और कोमल वस्त्रादि के द्वारा विना प्रमार्जन किये ही निर्जन्तु स्थान में भी कायोत्सर्ग या उपवेशन (पद्मासन आदि) करना, यह प्रमादयुक्त होने के कारण सामायिक का कायदुष्प्रणिधान नाम का अतिचार है।

कायपरीत—यः प्रत्येकशरीरी स कायपरीतः। (प्रज्ञाप. मलय. वृ. १८–२५३, पृ. ३९४)।

जो जीव प्रत्येकशरीरवाला हो वह कायपरीत कहलाता है।

कायप्रवीचार—कायेन प्रवीचारो मैथुनव्यवहारः सुरतोपसेवनं येषां ते कायप्रवीचाराः। (त. वृत्ति श्रुत. ४–७)।

शरीर से मैथुन सेवन करने वालों को कायप्रवीचार कहते हैं।

कायबल ऋद्धि—१. उक्कस्सखओवसमे पविसेसे विरियविग्घपगडीए। मास-चउमासपमुहे काउस्सग्गे वि समहीणा॥ उच्चट्ठिय तेलोक्कं झत्ति कणिट्ठंगुलीए अण्णत्थं। थविदुं जीए समत्था सा रिद्धी कायबलणामा॥ (ति. प. ४, १०६५–६६)। २. वीर्यान्तरायक्षयोपशमाविर्भूताऽसाधारणकायबलत्वान्मासिक-चातुर्मासिक-सांवत्सरिकादिप्रतिमायोगधारणेऽपि, श्रम-क्लमविरहिताः कायबलिनः। (त. वा. ३, ३६, ३)। ३. तिहुवणं करगुलियाए उद्धरिदूण अण्णत्थ ठवणक्खमो कायबली णाम। (धव. पु. ९, पृ. ९९)। ४. [वीर्यान्तरायक्षयोपशमाविर्भूताऽसाधारणकायबलत्वात् मासिक-चातुर्मासिक-सांवत्सरिकादिप्रतिमायोग] धारणेऽपि श्रमक्लेशविरहितास्त्रिभुवनमपि कनीस्यागुल्योद्धृत्याऽन्यत्र स्थापयितुं समर्थाश्च कायबलिनः। (चा. सा. पृ. ९८)। ५. वीर्यान्तरायक्षयोपशमाविर्भूतासाधारणकायबलत्वात् प्रतिमायावतिष्ठमानाः श्रम-क्लमविरहिता वर्षमात्रप्रतिमाधराः बाहुबलिप्रभृतयः कायबलिनः। (योगशा. स्वो. विव. १–८, पृ. ३९)। ६. मास-चतुर्मास-षण्मास-वर्षपर्यन्तकायोत्सर्गकरणसमर्था अगुल्यग्रेणापि त्रिभुवनमपि उद्धृत्य अन्यत्र स्थापनसमर्थाः ये ते कायबलिनः। (त. वृत्ति श्रुत. ३–३६)।

२ वीर्यान्तराय कर्म के क्षयोपशम से उत्पन्न हुए असाधारण शारीरिक बल से संयुक्त होने के कारण मासिक, चातुर्मासिक और वार्षिक प्रतिमायोग के धारण करने पर भी जो किसी प्रकार के परिश्रम व खेद का अनुभव नहीं करते हैं वे कायबली—कायबल ऋद्धि के धारक—कहे जाते हैं।

कायबली—देखो कायबल ऋद्धि।

कायबलप्राण—१. देहुदये कायाऽऽणा × × ×॥ (गो. जी. १३१)। २. देहोदये शरीरनामकर्मोदये कायचेष्टाजननशक्तिरूपः कायबलप्राणः। (गो. जी. म. प्र. व जी. प्र. टी. १३१)। ३. कायवर्गणावष्टम्भजनितात्मप्रदेशप्रचयशक्तिः कायबलप्राणः। (गो. जी. जी. प्र. टी. १२९)।

शरीरनामकर्म का उदय होने पर जो शरीरचेष्टा को उत्पन्न करने वाली शक्ति उदित होती है उसे कायबलप्राण कहते हैं।

काययोग—१. वीर्यान्तरायक्षयोपशमसद्भावे सति औदारिकादिसप्तविधकायवर्गणान्यतमालम्बनापेक्षया आत्मप्रदेशपरिस्पन्दः काययोगः। (स. सि. ६–१; त. वा. ६, १, १०)। २. कायात्मप्रदेशपरिणामो गमनादिक्रियाहेतुः काययोगः। (त. भा. ६–१)। ३. औदारिकादिशरीरयुक्तस्याऽऽत्मनो वीर्यपरिणतिविशेषः काययोगः। (आव. नि. हरि. वृ. ५८३)। ४. तत्रौदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेषः काययोगः। (नन्दी. हरि. वृ. पृ. ४९)। ५. तत्र कायः शरीरम् आत्मनो वा निवासः पुद्गलद्रव्यघटितः स्थविरस्य दुर्बलस्य वा ऽऽलम्बनयष्टिकादिवद् विषमेषूपग्राहकस्तद्योगाज्जीवस्य वीर्यपरिणामः शक्तिः सामर्थ्यं काययोगः। (त. भा. सिद्ध. वृ. ६–१)। ६. कायक्रियासमुत्पत्त्यर्थः प्रयत्नः काययोगः। (धव. पु. १, पृ. २७९); सप्तानां कायानां सामान्यं कायः, तेन जनितेन वीर्येण जीवप्रदेशपरिस्पन्दलक्षणेन योगः काययोगः। (धव. पु. १, पृ. ३०८); चउव्विहमरीराणि अवलंबिय जीवपदेसाणं संकोच-विकोचो सो कायजोगो णाम। (धव. पु. ७, पृ. ७६); वीरियंतराइयस्स सव्वघादिफद्दयाणं संतोवसमेण देसघादिफद्दयाणमुदयेण जणिदो खओवसमिओ कायजोगो। (धव. पु. ७, पृ. ७८); वादपित्त-सेंभादीहि जणिदपरिस्समेण जादजीवपदेसपरिप्फंदो कायजोगो णाम। (धव. पु. १०, पृ. ४३८)। ७. काययोग्यपुद्गलात्मप्रदेशपरिणामो गमनादिक्रियाहेतुः काययोगः। (योगशा. स्वो. विव. ७, ७४); तत्रौदारिक-वैक्रियाहारक-तैजस-कार्मणशरीरवतो जीवस्य वीर्यपरिणतिविशेषः काययोगः। (योगशा. स्वो. विव. ११–१०)। ८. चीयत इति कायः, शरीरम् इति भावः। (स्थानां. अभय. वृ. १–२१, पृ. १८); औदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेषः काययोगः। (स्थानां. अभय. वृ. १–२१, पृ. २९)। ९. वीर्यान्तरायक्षयोपशमे सति औदारिक-औदारिकमिश्र-वैक्रियिक-वैक्रियिकमिश्राहारकाहारकमिश्र-कार्मणलक्षणसप्तप्रकारशरीरवर्गणा-

नां मध्ये अन्यतमवर्गणालम्बनापेक्षयात्मप्रदेशचलनं परिस्पन्दनं परिस्फुरणं काययोगः। (त. वृत्ति श्रुत. ६-१)।

१ वीर्यान्तराय के क्षयोपशम के सद्भाव में औदारिक व औदारिकमिश्र आदि सात प्रकार की वर्गणाओं में किसी एक का आलम्बन लेकर जो आत्मप्रदेशों का परिस्पन्द हुआ करता है उसे काययोग कहते हैं।

कायवध—××× कायवधे पृथिव्याद्युपमर्दे ××। (आ. प्र. टी. ३४६)।

पृथिवीकायिकादि जीवों के पीड़ित करने को कायवध कहते हैं।

कायविनय—१. नीअं सिज्जं गइं ठाणं नीअं च आसणाणि अ। नीअं च पाये वंदिज्जा नीअं कुज्जा अ अंजलिं॥ (दशवै. ६, २, १७)। २. तत्थ कायविणओ नाम तेसि चेव आयरियादीणं अद्धाणपरिस्संताण वा सीसाउ आरब्भ जाव पादतला ताव परमादरेण विस्सामणं। (दशवै. चू. पृ. २७)।

१ आचार्य आदि की अपेक्षा नीची शय्या पर सोना, उनके पीछे बहुत दूर न रहकर अनुद्धततापूर्वक गमन करना, उनके स्थान की अपेक्षा नीचे स्थान पर स्थित होना, उनकी अनुज्ञापूर्वक हीन आसन पर बैठना, सिर झुकाकर उनके चरणों की वन्दना करना तथा प्रश्न आदि के समय शरीर को नम्रीभूत रखना, इस प्रकार के नम्रतापूर्ण व्यवहार को कायविनय कहा जाता है।

कायव्युत्सर्ग—देखो कायोत्सर्ग।

कायशुद्धि—१. कायशुद्धिर्निरावरणाभरणा निरस्तसंस्कारा यथाजातमलधारिणी निराकृतांगविकारा सर्वत्र प्रयतवृत्तिः प्रशमसुखं मूर्तमिव प्रदर्शयन्तीति तस्यां सत्यां न स्वतोऽन्यस्य भयमुपजायते नाप्यन्यतस्तस्य। (त. वा. ६, ६, १६; त. श्लो. ६-६; आ. सा. पृ. ३४)। २. विश्रम्भोप[त्पा]दिका लोकस्याऽस्तसंस्कारसंहतिः। कायशुद्धिः क्षमामूर्तिभूतेवाऽऽभाति निःस्पृहा॥ विरागता-लतोद्भूतिभूभिर्भीतिविवर्जिता। जातरूपमनोहारिण्येषां भूषा तपःश्रियः॥ (आचा. सा. ८, १०-११)। ३. कायशुद्धिः सर्वत्र संवृताचारतया प्रवर्तनम्। (सा. ध. स्वो. टी. ५, ४५)। ४. हस्त-पाद-शिरःकम्पावष्टम्भादिनं यत्र वै। कायदोषो भवेदेषा कायशुद्धिरिहागमे॥ (धर्मसं. श्रा. ७-५०)।

१ वस्त्र, आभरण और शरीरसंस्कार से रहित; यथाजात मल को धारण करने वाली एवं अंगविकार से रहित जो सर्वत्र यत्नपूर्ण प्रवृत्ति होती है; उसे कायशुद्धि कहते हैं। इसके होते हुए न अपने से किसी अन्य को भय होता है और न स्वयं को किसी अन्य से भय होता है।

कायसंयम—१. कायसंयमो णाम आवस्सगाइजोगे मोत्तुं सुसमाहियपाणि-पादस्स कुम्मो इव गुत्तिंदियस्स चिट्ठमाणस्स संजमो भवई। (दशवै. चू. पृ. २१)। २. कायसंयम इति। धावन-वल्गन-प्लवनादिनिवृत्तिः, शुभक्रियासु च प्रवृत्तिः। (त. भा. सिद्ध. वृ. ६-६, पृ. १६८; योगशा. स्वो. विव. ४-६३)।

१. आवश्यक क्रियाओं को छोड़कर अन्य कार्यों के करने में कछुए के समान इन्द्रियों को संकुचित कर—स्वाधीन करके—हाथ-पांवों को शान्त रखने वाले के संयम को कायसंयम कहा जाता है।

कायस्थिति—१. कायस्थितिरेककायापरित्यागेन नानाभवग्रहणविषया। (त. वा. ३, ३६, ६)। २. तत्र कायस्थितिरिति कः शब्दार्थः? उच्यते—काय इह पर्याय गृह्यते, काय इव काय इत्युपमानात्। स च द्विधा—सामान्यरूपो विशेषरूपश्च। तत्र सामान्यरूपो निर्विशेषणो जीवत्वलक्षणो विशेषरूपो नैरयिकत्वादिलक्षणः, तस्य स्थितिरवस्थानं कायस्थितिः। विमुक्तं भवति? सामान्यरूपेण विशेषरूपेण वा पर्यायेणादिष्टस्य जीवस्य यदव्यवच्छेदेन भवनं सा कायस्थितिः। (प्रज्ञाप. मलय. वृ. १७, २२६, पृ. ३७५)।

१ एक काय को—औदारिक आदि शरीर को—न छोड़ कर उसके रहने तक नाना भवों को ग्रहण करते हुए जितना काल बीतता है, उसका नाम कायस्थिति है। २ काय शब्द से यहां पर्याय का ग्रहण किया गया है। वह दो प्रकार की है—सामान्यरूप और विशेषरूप। नारकादि विशेषण से रहित जीव की जीवत्वरूप पर्याय सामान्य और उक्त विशेषण से सहित नारक आदि रूप विशेष पर्याय है। उक्त दोनों में विवक्षित पर्याय का जब तक विच्छेद नहीं होता है उतने काल का नाम कायस्थिति है।

कायस्वभाव—१. कायस्वभावोऽनित्यता दुःखहेतु-

त्वं निःसारताऽशुचित्वमिति। (त. भा. ७–७)। २. कायस्वभावोऽपि पितृमात्रोरोजःशुक्रमुभयमेकीभूतं गर्भजानां प्राणिनां शरीरतया परिणमत इत्यादिलक्षणः। सम्मूर्च्छनोपपातजन्मनां तूत्पत्तिदेशावगाढ़स्कन्धादाननिर्माणानि वपूंषि भवन्त्यशुभपरिणामभाञ्जि नानाकाराणि परिशटनोपचितिधर्मकत्वात् विनश्वराणीत्येवंलक्षणः कायस्वभावः। (त. भा. सिद्ध. वृ. ७–७)।

१ अनित्यता, दुःखहेतुता, निःसारता और अपवित्रता; यह काय (शरीर) का स्वभाव है।

कायापरीत—कायापरीतोऽनन्तकायिकः। (प्रज्ञाप. मलय. वृ. १८–२५३, पृ. ३९४)।

अनन्तकायिक (साधारणशरीरी) जीव कायापरीत कहलाता है।

कायिक अशुभ योग—तत्राशुभो हिंसा-स्तेयाब्रह्मादीनि कायिकः। (त. भा. ६–१)।

हिंसा, चोरी और कुशील सेवनादिरूप प्रवृत्ति को कायिक अशुभ योग कहते हैं।

कायिक असमीक्ष्याधिकरण—कायिकं च प्रयोजनमन्तरेण गच्छंस्तिष्ठन्नासीनो वा सचित्तेतरपत्र-पुष्प-फल-छेदन-भेदन-कुट्टन-क्षेपणादीनि कुर्यात्, अग्नि-विष-क्षारादिप्रदानं चारभेत इत्येवमादि तत्सर्वमसमीक्ष्याधिकरणम्। (त. वा. ७, ३२, ५; चा. सा. पृ. १०)।

प्रयोजन के बिना चलते हुए, स्थित रहकर या बैठे-बैठे सचित्त या अचित्त पत्र, पुष्प और फल आदि का छेदना, भेदना, कूटना व फेंकना आदि कार्य करना तथा अग्नि, विष व क्षार आदि पदार्थों का देना; इत्यादि प्रकार के कार्यों के करने को कायिक असमीक्ष्याधिकरण कहते हैं।

कायिक द्रव्यक्रोधविवेक—देखो कषायविवेक। भ्रकुटयाद्यकरणं कायिको द्रव्यतः क्रोधविवेकः। (भ. आ. मूला. १६८)।

भृकुटि आदि के नहीं चढ़ाने को द्रव्यतः कायिक क्रोधविवेक कहते हैं।

कायिक द्रव्यमानविवेक—देखो कषायविवेक। गात्रस्तब्धताद्यकरणं कायिको द्रव्यतो मानविवेकः। (भ. आ. मूला. १६८)।

अहंकारयुक्त होकर शरीर की उद्धतता के न करने को द्रव्यतः कायिक मानविवेक कहते हैं।

कायिक द्रव्यमायाविवेक—देखो कषायविवेक। अन्यत्कुर्वत इवान्यस्य कायेनाकरणं कायिकः। (भ. आ. मूला. १६८)।

काय से अन्य कार्य करते हुए के समान अन्य कार्य के न करने को द्रव्यतः मायाविवेक कहते हैं।

कायिक विनय—१. अब्भुट्ठाणं किदिम्मं णवण अंजलीय मुंडाणं। पच्चुग्गच्छणमेत्ते पत्थिदस्सणुसाधणं चेव॥ णीचं ठाणं णीचं गमणं णीचं च आसणं सयणं। आसणदाणं उवगरणदाण ओगासदाणं च॥ पडिरूवकायसंफासणदा य पडिरूवकालकिरिया य। पेसणकरणं संथरकरणं उवकरण पडिलिहणं॥ इच्चेवमादिओ जो उवयारो कीरदे सरीरेण। एसो काइयविणओ जहारिहं साहुवग्गस्स॥ (मूला. ५, १७६ से १७९)। २. किरियं अब्भुट्ठाणं णवणंजलि आसणुवकरणदाणं। एते पच्चुग्गमणं च गच्छमाणे अणुव्वजणं॥ कायाणुरूवमद्दणकरणं कालाणुरूवपडियरणं। संथारभणियकरणं उवयरणाणं च पडिलिहणं॥ इच्चेवमाइ काइयविणओ रिसि-सावयाण कायव्वो। जिणवयणमणुगणंतेण देसविरएण जहजोग्गं॥ (वसु. श्रा. ३२८–३०)।

१ साधुओं के आने पर उठकर खड़े हो जाना, कृतिकर्म करना—सिद्धादि भक्तिपूर्वक कायोत्सर्ग आदि करना, हाथ जोड़कर नमस्कार करना, सम्मुख जाना—अगवानी करना, जाते समय पीछे जाना, स्वयं नीचा स्थान ग्रहण करना, नीचे गमन करना—गुरु के बायें अथवा पीछे चलना, गुरु की अपेक्षा नीचे आसन पर बैठना व सोना, उन्हें आसन प्रदान करना, उपकरण (शास्त्र आदि) देना, वसतिका आदि का देना, शारीरिक शक्ति के अनुसार शरीर का मर्दन करना, प्रतिरूपकालक्रिया—उष्णकाल में शीतक्रिया व शीतकाल में उष्णक्रिया—करना, आज्ञापालन करना, चटाई आदि बिछाना तथा उपकरणों का प्रतिलेखन करना; इत्यादि जो साधुसमूह का शरीर से यथायोग्य उपकार किया जाता है उसका नाम कायिक विनय है।

कायिकी क्रिया—१. प्रदुष्टस्य सतोऽभ्युद्यमः कायिकी क्रिया। (स. सि. ६–५; त. वा. ६, ५, ८)। २. प्रदुष्टस्योद्यमो हन्तुं गदिता कायिकी किया। (त. श्लो. ६, ५, ९)। ३. योऽभ्युद्यमः प्रदुष्टस्य सतः सा कायिकी क्रिया। (ह. पु. ५८,

६६)। ४. दुष्टस्य सतः कायेन वा चलनक्रिया कायिकी। (भ. आ. विजयो. ८०७)। ५. कायेन निर्वृत्ता कायिकी—कायव्यापारः। (स्थानां. अभय. वृ. २–६०, पृ. ३८)। ६ क्रियाः व्यापारविशेषाः, तत्र कायेन निर्वृत्ता कायिकी, कायचेष्टेत्यर्थः। (समवा. अभय. वृ. ५, पृ. १०)। ७. चीयते इति कायः शरीरम्, काये भवा कायेन निर्वृत्ता वा कायिकी। (प्रज्ञाप. मलय. वृ. २२–२७६, पृ. ४३५); कायिकी नाम हस्त-पादादिव्यापारणम्। (प्रज्ञाप. मलय. वृ. २२, २८१, पृ. ४४०)। ८. प्रदुष्टस्य सतः कायाभ्युद्यमः कायिकी क्रिया। (त. वृत्ति श्रुत. ६–५)।

१. दुष्टतापूर्वक उद्यम करने को कायिकी क्रिया कहते हैं।

कायोत्सर्ग—१. कायाईपरदव्वे थिरभावं परिहरत्तु अप्पाणं। तस्स हवे तणुसग्गं जो झाअइ णिव्विअप्पेण॥ (नि. सा. १२१)। २. देवस्सियणियमादिसु जहुत्तमाणेण उत्तकालम्हि। जिणगुणचिंतणजुत्तो काउस्सग्गो तणुविसग्गो॥ (मूला. १–२८); बोसरिदबाहुजुगलो चदुरंगुलअंतरेण समपादो। सव्वंगचलणरहिओ काउस्सग्गो विसुद्धो दु॥ (मूला. ७–१५३)। ३. परिमितकालविषया शरीरे ममत्वनिवृत्तिः कायोत्सर्गः। (त. वा. ६, २४, ११; चा. सा. पृ. २६)। ४. कायः शरीरम्, तस्योत्सर्गः कृताकारस्य स्थान-मौन-ध्यानक्रियाव्यतिरेकेण क्रियान्तराभ्यासमधिकृत्य परित्यागः इत्यर्थः। (ललितवि. पृ. ७७)। ५. एषोऽपि कायोत्सर्गः प्रायश्चित्तं भवति। क्व? अनेषणीयादिषु त्यक्तेषु, तत्रानेषणीयं उद्गमाद्यविशुद्धमन्न-पानमुपकरणं वा प्रतिष्ठाप्य कायोत्सर्गः कार्यः, आदिग्रहणाद् गमनागमनविहार-श्रुतसावद्यस्वप्नदर्शननौसंतरणोच्चारप्रस्रवणावरणपरिग्रहः। (त. भा. हरि. व सिद्ध. वृ. ९–२२)। ६. ट्ठियस्स णिसण्णस्स णिव्वण्णस्स वा साहुस्स कसाएहि सह देहपरिच्चागो काउस्सग्गो णाम। (ध. पु. १३, पृ. ८८)। ७. कायोत्सर्गः काये मितकालं निर्ममत्व तु। (ह. पु. ३४–१४६)। ८. दैवसिकादिषु नियमेषु यथोक्तकाले योऽयं यथोक्तमानेन जिनगुणचिन्तनयुक्तस्तनुविसर्गः स कायोत्सर्ग इति। (मूला. वृ. १–१२)। ९. प्रालम्बितभुजद्वन्द्वः मूर्ध्वस्थस्यासितस्य वा। स्थानं कायनपेक्षं यत् कायोत्सर्गः स कीर्तितः॥ (योगशा. ४–१३३); कायस्य शरीरस्य स्थानमौनध्यानक्रियाव्यतिरेकेणान्यत्रोच्छ्वसितादिभ्यः क्रियान्तराभ्यासमधिकृत्य व उत्सर्गस्त्यागो 'णमो अरहंताणं' इति वचनात् प्राक् स कायोत्सर्गः। (योगशा. स्वो. विव. ३–१३०)। १०. कायं शरीरम् उत्सृजति ममत्वादिपरिणामेन त्यजतीति कायोत्सर्गः तपो भवेत्—व्युत्सर्गाभिधानम् तपोविधानं स्यात्। (कार्तिके. टी. ४६८)। ११. शरीरादिममत्वस्य त्यागो यो ज्ञानदृष्टिभिः। तपःसंज्ञः सुविख्यातो कालोत्सर्गो महर्षिभिः॥ (लाटीसं. ७–८६)। १२. एकमुहूर्तादिषु शरीरव्युत्सर्जनं कायोत्सर्गः। (भावप्रा. श्रुत. टी. ७७)।

२ दैवसिक आदि नियमों में—दिवस सम्बन्धी, रात्रि सम्बन्धी एव पाक्षिक व चातुर्मासिक आदि नियमित अनुष्ठानों में—आगमोक्त कालप्रमाण के अनुसार अपने-अपने नियत समय में जो जिनगुणस्मरणपूर्वक शरीर से ममत्व का त्याग किया जाता है, इसका नाम कायोत्सर्ग है।

कारक—१. कुर्वंत एव कारकत्वम्। यदा न करोति तदा कर्तृत्वस्यायोगात्। (लघीय. स्वो. विवृति ५-४४, पृ. ६३८)। क्रियाविशिष्टं द्रव्य कारकम्। (लघीय. स्वो. विवृति ६-७२, पृ. ७९४)। २. कारकस्य कारकत्वमपि क्रियावेशवशादेव उपपद्यते, 'करोतीति कारकम्' इति व्युत्पत्तेः। इतरथा हि तद् वस्तुमात्र स्यान्न कारकम्, 'क्रियाविशिष्टं द्रव्य कारकम्' इत्यभिधानात्। (न्यायकु. १–३ पृ. ४२); कारकाणां कर्त्रादीनां ×××(न्यायकु. ५–४४, पृ. ६३९); क्रियया आविष्ट युक्त द्रव्य कारकम्, क्रियां कुर्वद् द्रव्य कारकमित्यर्थः। (न्यायकु. ६-७२, पृ. ७९५)।

२ क्रिया से युक्त द्रव्य को कारक कहते हैं।

कारक सम्यक्त्व—१. जं जह भणियं तं तह करेइ सइ जमि कारगं तं तु। (आ. प्र. ४९)। २. कारकं संयमं तपःप्रभृतीनां तु कारकम्। (त्रि. श. पु. च. १, ३, ६१०)।

१ जिस सम्यक्त्वके होने पर जीव आगमोक्त व्रत व तप आदि के अनुष्ठान को तदनुसार ही करता है उसे कारक—अनुष्ठान कराने वाला—सम्यक्त्व कहते हैं।

कारण—१. कारणमुपपत्तिमात्रम्। (आव. नि.

हरि. वृ. ८६, पृ. ८२)। २. यस्मिन् सति भवत्येव मस्य सद्भावस्तद्भावे च न भवत्येव यत् तत् कारणम्। (त. भा. सिद्ध. वृ. ५-२५)। ३. यस्मिन् सत्येव च यद्भावः तत्कार्यमितरत् कारणम्। (सिद्धवि. वृ. ३-१०, पृ. १६३, पं. ७); यस्मिन् सत्येव यद्भाव एव विकारे च विकार तत् कार्यमितरत् कारणम्। (सिद्धवि. वृ. ७-२०, पृ. ४८७, पं. १६)।

३ जिसके होने पर ही जो होता है वह कार्य और इतर—जिसके सद्भाव में कार्य होता है वह—कारण कहलाता है।

कारणदोष (ग्रासैषणादोष)—देखो कारणाभावदोष। वेदनादिकारणमन्तरेण भुञ्जानस्य कारणदोषः। (आचारां. शी. वृ. २, १, ६, २७३, पृ. ३२१)।

वेदनादि कारण के बिना भोजन करने को कारणदोष (ग्रासैषणादोष) कहते हैं।

कारणपरमाणु—१. धाउचउक्कस्स पुणो जं हेऊ कारणं ति तं णेयो। (नि. सा. २५)। २. पृथिव्यप्तेजोवायवो धातवश्चत्वारः, तेषां यो हेतुः स कारणपरमाणुः (नि. सा. वृ. २५)।

१ पृथिवी, अप्, तेज और वायु; इन चार धातुओं के कारणभूत परमाणु द्रव्य को कारणपरमाणु कहते हैं।

कारणपरमात्मा— यस्त्रिकालनिरुपाधिस्वभावत्वात् निवारणज्ञान-दर्शनलक्षणलक्षितः कारणपरमात्मा। (नि. सा. वृ. १०२)।

जो निरावरण (स्वाभाविक) ज्ञान-दर्शन से युक्त हो उसे कारणपरमात्मा कहते हैं।

कारणवन्दनक—१. णाणाइतिगं मोत्तुं कारणमिहलोयसाहयं होइ। पूया-गारवहेउं णाणग्गहणेवि एमेव॥ (प्रव. सारो. १६३)। २. ज्ञान-दर्शन-चारित्रत्रयं मुक्त्वा यत्किमप्यन्यदिहलोकसाधकं वस्त्र-कम्बलादि वन्दनकदानात्साधुरभिलषति तत्कारणं भवतीति प्रतिपत्तव्यम्, तस्माद्वन्दनकं कारणवन्दनकमिति। यदि पूजातिशयेन गौरवातिशयेन वा ज्ञानादिग्रहणेऽपि वन्दते तदपि कारणवन्दनकं भवति। (प्रव. सारो. वृ. १६३)। ३. ज्ञान-दर्शन-चारित्रत्रयं मुक्त्वा यत्किमप्यन्यदिहलोकसाधकं वस्त्रादि वन्दनकदानात् साधुरभिलषति तत्कारणं भवतीति प्रतिपत्तव्यम्। तस्माद्वन्दनकं कारणवन्दनकमिति। (आव. हरि. वृ. मल. हेम. टि. पृ. ८८)। ४. कारणाद् ज्ञानादिव्यतिरिक्तात् वस्त्रादिलाभहेतोर्वन्दनम्, यद्वा ज्ञानादिनिमित्तमपि लोकपूज्योऽन्येभ्यो वा अधिकतरो भवामीत्यभिप्रायतो वन्दनम्, यद्वा वन्दनकमूल्यवशीकृतो मम प्रार्थनाभङ्गं न करिष्यतीति बुद्धया वन्दनम्। (योगशा. स्वो. विव. ३-१३०)।

१ सम्यग्दर्शन, ज्ञान और चारित्र को छोड़कर अन्य लौकिक साधन-सामग्री—जैसे वस्त्र-कम्बलादि—की अभिलाषा से जो वन्दना की जाती है उसे कारणवन्दनक कहा जाता है। यदि साधु पूजा या गुरुता के अभिप्राय से ज्ञानादि को भी ग्रहण करता हुआ वन्दना करता है तो उसे भी कारणवन्दनक ही समझना चाहिए।

कारणाभावदोष—क्षुद्वेदनायाः असहनं क्षामस्य च वैयावृत्त्याकरणमीर्यामितेरविशुद्धिः प्रेक्षोत्प्रेक्षादेः संयमस्य चापालनं क्षुधातुरस्य प्रबलाग्न्युदयात्प्राणप्रहाणशङ्का आर्त-रौद्रपरिहारेण धर्मध्यानस्थिरीकरणं चेति भोजनकारणानि। तदभावे भुञ्जानस्य कारणाभावदोषः। (योगशा. स्वो. विव. १-३८, पृ. १३८)।

भोजन करने के कारणों के अभाव में भोजन करने को कारणाभावदोष कहते हैं। क्षुधा की व्यथा को न सह सकना, कृश होने पर वैयावृत्य को न कर पाना, ईर्यासमिति को विशुद्ध नहीं रख सकना, प्रेक्षोत्प्रेक्षादि संयमका परिपालन न कर सकना, क्षुधा से व्याकुल होने पर प्रबल अग्नि (औदर्य) के उदय से मरने की आशंका होना और आर्त-रौद्र ध्यानों को छोड़कर धर्मध्यान को स्थिर करना; ये भोजन के कारण हैं।

कारित—१. कारिताभिधानं परप्रयोगापेक्षम्। (स. सि. ६-८)। २. कारिताभिधानं परप्रयोगापेक्षम्। परस्य प्रयोगमपेक्ष्य सिद्धिमापद्यमानं कारितमिति कथ्यते। (त. वा. ६, ८, ८)। ३. परस्य प्रयोगमपेक्ष्य सिद्धिमुपयाति यत्तत्कारितम्। (भ. आ. विजयो. टी. ८११)। ४. परस्य प्रयोगमपेक्ष्य सिद्धिमापद्यमानं कारितम्। (चा. सा. पृ. ३६)। ५. स्वप्रयुक्तान्यनिष्पन्नं हिंसनं कारितं मतम्। (आचा. सा. ५-१४)।

१ जो कार्य दूसरे के प्रयोग की अपेक्षा से सिद्ध होता है उसे कारित कहते हैं।

कारितनिमित्तकरण—कारियनिमित्तकरणं नाम पसण्णा हु आयरिया सविसेसं सुत्तत्थ-तदुभयाणि दाहिति त्ति काऊणं तारिसाणि अणुकूलाणि करेइ जेण तेसिं आयरियाण चित्तप्पसाओ जायइ। (दशवै. चू. १, पृ. २८)।

"यदि आचार्य प्रसन्न रहेंगे तो वे सूत्र, अर्थ, अथवा दोनों मुझे विशेष रूप से प्रदान करेंगे" ऐसा विचार करके आचार्य की प्रसन्नता के लिए उनके मनोऽनुकूल कार्य करने को कारितनिमित्तकरण कहते हैं। यह औपचारिक विनय के सात भेदों में तीसरा है।

कारुण्य—देखो करुणा। १. कारुण्यं क्लिश्यमानेषु। कारुण्यमनुकम्पा दीनानुग्रह इत्यनर्थान्तरम्। (त. भा. ७-६)। २. दीनानुग्रहभावः कारुण्यम्। (स. सि. ७-११; त. श्लो. ७-११)। ३. दीनानुग्रहभावः कारुण्यम्। शारीर-मानसदुःखाभ्यर्दितानां दीनानां प्राणिनाम् अनुग्रहात्मकः परिणामः करुणस्य भावः कर्म वा कारुण्यमिति कथ्यते (त. वा. ७, ११, ३)। ४. जन्माम्भोधौ कर्मणा भ्राम्यमाणे जीवग्रामे दुःखितेऽनेकभेदे। चित्तार्द्रत्वं यद्विधत्ते महात्मा तत्कारुण्यं दर्श्यते दर्शनीयैः ॥ (अमित. श्रा. २-८१)। ५. दीनाभ्युद्धरणे बुद्धिः कारुण्यं करुणात्मनाम्। (उपासका. ३३७)। ६. शारीरं मानसं स्वाभाविकं च दुःखमसह्यमाप्नुवतो दृष्ट्वा हा वराका मिथ्यादर्शनेनाविरत्या कषायेणाशुभेन योगेन च समुपार्जिताशुभकर्मपर्यायपुद्गलस्कन्धतदुदयोद्भवा विपदो विवशाः प्राप्नुवन्ति इति करुणा अनुकम्पा। (भ. आ. विजयो. १६९६)। ७. दैन्य-शोकसमुत्त्रासे रोगपीडार्दितात्मसु। वध-बन्धनरुद्धेषु याचमानेषु जीवितम् ॥ क्षुत्तृट्श्रमाभिभूतेषु शीताद्यैर्व्यथितेषु च। अविरुद्धेषु निस्त्रिंशैर्यात्यमानेषु निर्दयम् ॥ मरणार्तेषु जीवेषु यत्प्रतीकारवाञ्छया। अनुग्रहमतिः सेय करुणेति प्रकीर्तिता ॥ (ज्ञानार्णव २७, ८-१०)। ८. दीनेष्वार्तेषु भीतेषु याचमानेषु जीवितम्। प्रतीकारपरा बुद्धिः कारुण्यमभिधीयते ॥ (योगशा. ४-१२०)। ९. स्वामनपेक्ष्य परदुःखप्रहाणेच्छा कारुण्यम्। (प्रमाण. स्याद्वाद. ५-८)। १०. हीन-दीन-कानीनानयनजनानुग्राहकत्वं कारुण्यम्। (त. वृत्ति श्रुत. ७-११)। ११. रोग-शोक-दरिद्राद्यैः पीडिता येऽत्र जन्तवः। तेषां दुःखप्रहाणेच्छा कारुण्यं क्रियतामिति ॥ (धर्मसं. श्रा. १०-१०४)।

२ शारीरिक और मानसिक दुःखों से पीड़ित दीन प्राणियों के प्रति जो अनुग्रहरूप परिणाम होता है, उसका नाम कारुण्य है।

कार्मण—१. सव्वकम्माणं पहाणुप्पादयं सुह-दुक्खाणं बीजमिदि कम्मइयं। (षट्खं. ५, ६, २४१, पु. १४, पृ. ३२८)। २. सर्वशरीरप्ररोहणबीजभूतं कार्मणं शरीरं कर्मेत्युच्यते। (स. सि. २-२५); कर्मणां कार्यं कार्मणम्। (स. सि. २-३६)। ३. कर्मणो विकारः कर्मात्मकं कर्ममयमिति कार्मणम्। (त. भा. २-४९)। ४. कर्मेति सर्वशरीरप्ररोहणसमर्थं कार्मणम्। सर्वाणि शरीराणि यतः प्ररोहन्ति तत् बीजभूतं कार्मणशरीरं कर्मेत्युच्यते। (त. वा. २, २५, ३); कर्मणामिदं कर्मणां समूह इति वा कार्मणम्। कर्मणामिद कार्यं कर्मणां समूह इति वा, कथंचिद्भेदविवक्षोपपत्तेः, कार्मणमिति व्यपदिश्यते। (त. वा. २, ३६, ८)। ५. कर्मनिमित्तं कार्मणम्, अशेषकर्म चास्याधारभूतं कुण्डवद् बदरादीनाम्, अशेषकर्मप्रसवसमर्थं वा, यथा बीजमङ्कुरादीनामिति। (त. भा. हरि. वृ. २-३७); अशेषकर्माधारभूतं समस्तकर्मप्रसवनसमर्थमङ्कुरादीनां बीजमिव कार्मणं शरीरम्। (त. भा हरि. वृ. ८-१२)। ६. कर्मणा निर्वृत्तं कार्मणम्। (आव. हरि. वृ. १४३४, पृष्ठ ७६७)। ७. मिथ्यादर्शनादिभिः क्रियत इति कर्म—ज्ञानावरणीयादि, तेन निर्वृत्तं तन्मयं वा कार्मणम्; शीर्यते इति शरीरम्, कार्मणं च तच्छरीरं चेति विग्रहः। (आव. नि. हरि. वृ. ४३, पृष्ठ ३६)। ८. कर्मणो विकारः कार्मणम्, अष्टविधकर्मनिष्पन्नं सकलशरीरनिबन्धनं च, उक्तं च—×××कम्मविवागो गारो कम्मणमट्ठविह विचित्तकम्मनिप्फण्णं। सव्वेसिं सरीराणं कारणभूतं मुणेयव्वं ॥८॥ (अनुयो. हरि. वृ. ८७)। ९. कर्मणा निर्वृत्तं कार्मणम् अशेषकर्मराशेराधारभूतम् अशेषकर्मप्रसवसमर्थं वा। (त. भा. सिद्ध. वृ. २-३७)। सर्वकर्मप्ररोहबीजं सांसारिकसुख-दुखभाजनं कर्मैव कार्मणशरीरम्, ××× कर्मणि वा भव कार्मणम्। (त. भा. सिद्ध. वृ. ६-३)। १०. कर्मैव कार्मणम् शरीरम्, अष्टकर्मस्कन्ध इति। अथवा कर्मणि भवं

कार्मणं शरीरं नामकर्मावयवस्य कर्मणो ग्रहणम्। तेन योगः कार्मणकाययोगः। केवलेन कर्मणा जनितवीर्येण सह योग इति यावत्। (धव. पु. १, पृ. २९५); कर्माणि प्ररोहन्ति अस्मिन्निति प्ररोहणं कार्मणशरीरम्। कूष्माण्डफलस्य वृन्तवत् सकलकर्माधारं सकलकर्मणामुत्पादकं कार्मणशरीरम्। × × × भविष्यत्सर्वकर्मणाम् प्ररोहकमुत्पादकं त्रिकालगोचराशेषसुख-दुःखानां बीजं चेति अष्टकर्मकलापं कार्मणशरीरम्। कर्मणि भवं वा कार्मणं कर्मैव वा कार्मणम्। (धव. पु. १४, पृ. ३२९)। ११. कर्मैव कार्मणः कायः कर्मणां वा कदम्बकम्। एक-द्वि-त्रिक्षणानेष विग्रहेषु प्रवर्तते ॥ (पंचसं. अमित. १-१७८)। १२. कार्मणशरीरं पुनस्तदुदय (कार्मणशरीरनामोदय) निर्वर्त्यमशेषकर्मणाम् प्ररोहभूमिराधारभूतम्। तथा संसार्यात्मनां गत्यन्तरसंक्रमणे साधकतमं करणीयमित्यन्यत्। ततस्तत्कारणभूतं कार्मणशरीरनामकर्मेति स्थितम्। (कर्मस्त. गो. वृ. १०, पृ. ८५)। १३. अष्टविधकर्मसमुदायनिष्पन्नौदारिकादिशरीरनिबंधनं च भवान्तरानुयायि कर्मणो विकारः कर्मैव वा कार्मणम्। (अनुयो. मल. हेम. वृ. १४२, पृ. १९६)। १४. कर्मणो जातं कर्मजम्। किमुक्तं भवति? कर्मपरमाणव एवात्मप्रदेशैः सह ये क्षीर-नीरवत् अन्योन्यानुगताः सन्तः शरीररूपतया परिणतास्ते कर्मजं शरीरमिति। अत एवैतदन्यत्र कार्मणमित्युक्तम्, कर्मणो विकारः कार्मणमिति। तथा चोक्तम्—कम्मविगारो कम्मणमट्ठविहहविचित्तकम्मनिप्पन्नं। सव्वेसिं सरीराणां कारणभूतं मुणेयव्वं ॥ (प्रज्ञाप. मलय. वृ. २०-२६७, पृ. ४०९; जीवाजी. मलय. वृ. १-१३, पृ. १४)।

२ जो सब शरीरों की उत्पत्ति का बीजभूत शरीर है—उनका कारण है—उसे कार्मण शरीर कहते हैं। ३ कर्म के विकारभूत या कर्मरूप शरीर का नाम कार्मण है।

कार्मणकाययोग—१. कम्मेव य कम्मइयं कम्मभवं तेण जो दु संजोगो। कम्मइयकायजोगो एय-विय-तियगेसु समएसु ॥ (प्रा. पंचसं. १-९९; धव. पु. १, पृ. २९५ उद्.; गो. जी. २४१)। २. तेन (कार्मणशरीरेण) योगः कार्मणकाययोगः। (त. भा. सिद्ध. वृ. ६-१)। ३. सर्वाणि शरीराणि यतः प्ररोहन्ति तद् बीजभूतं कार्मणशरीरं कार्मणकाय इति भण्यते, वाङ्मनःकायवर्गणानिमित्तः आत्मप्रदेशपरिस्पन्दो योगो भवति, कार्मणकायकृतो योगः कार्मणकाययोगः। (धव. पु. १, पृ. २९९)। ४. कर्मैव—अष्टविधकार्मणस्कन्धः एव—कार्मणशरीरम्, वा अथवा कर्मभवं कार्मणशरीरनामकर्मोदयप्रभवं कार्मणशरीरम्, खलु स्फुटं भवति, तेन कार्मणशरीरेण सह वर्तमानो यः संयोगः आत्मनः कर्माकर्षणशक्तिसंगतप्रदेशपरिस्पन्दरूपो योगः स कार्मणकाययोगः। (गो. जी. म. प्र. व जी. प्र. टी. २४१)। ५. विग्रहगतौ औदारिकादिनोकर्मवर्गणानां अनाहरणे सति कार्मणशरीरनामोदयेन कार्मणवर्गणायातपुद्गलस्कन्धानां ज्ञानावरणादिकर्मपर्यायेण जीवप्रदेशेषु बन्धप्रघट्टके उत्पन्नजीवप्रदेशपरिस्पन्दः कार्मणकाययोगः। (गो. जी. जी. प्र. टी. ७०३)। ६. कार्मणकाययोगः अष्टप्रकारकर्मविकाररूपशरीरचेष्टा स्वरूपोऽपान्तरालगतावुपपत्तिप्रथमसमये केवलसमुद्घातावस्थायां च। (षड्शीति मलय. वृ. ५, पृ. १२७)।

३. सब शरीरों के बीजभूत शरीर को कार्मण शरीर कहा जाता है। वचन, मन और काय वर्गणाओं के निमित्तभूत आत्मप्रदेशपरिस्पन्द का नाम योग है। कार्मण शरीर के द्वारा जो योग किया गया है वह कायर्मणकाययोग कहलाता है।

कार्मणबन्धननाम—यदुदयात्कार्मणपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं सम्बन्धस्तत्कार्मणबन्धननाम। (प्रज्ञाप. मलय. वृ. २३, २९३, पृ. ४७०)।

जिस कर्म के उदय से गृहीत एवं गृह्यमाण कर्मपरमाणु परस्पर में सम्बन्ध को प्राप्त होते हैं उसे कार्मणबन्धननामकर्म कहते हैं।

कार्मणशरीरबन्धननाम—जस्स कम्मस्स उदएण कम्मइयसरीरपरमाणू अण्णोण्णेण बंधमागच्छंति तं कम्मइयसरीरबंधणणामं। (धव. पु. ६, पृ. ७०)।

जिस कर्म के उदय से कार्मण शरीरगत परमाणु परस्पर में बन्ध को प्राप्त होते हैं उसे कार्मणशरीरबन्धन नामकर्म कहते हैं।

कार्मणशरीरसंघातनाम—जस्स कम्मस्स उद-

एण कम्मइयसरीरक्खंधाणं सरीरभ वमुवगयाण बंधणणामकम्मोदएण एगबंधणबद्धाणमट्ठत्तं होदि तं कम्मइयसरीरसंघादणामं। (धव. पु. ६, पृ. ७०)। **बन्धन नामकर्म के उदय से एकबन्धनबद्ध होकर शरीररूपता को प्राप्त कार्मणशरीर के स्कन्ध जिस कर्म के उदय से मृष्टता—चिक्कणता या एकरूपता—को प्राप्त होते हैं उसे कार्मणशरीरसंघातनामकर्म कहते हैं।**

कार्मणशरीरनामकर्म—१. जस्स कम्मस्स उदओ कुंभंडफलस्स बेंटो व्व सव्वकम्मासयभूदो तस्स कम्मइयसरीरमिदि सण्णा। (धव. पु. ६, पृ. ६६)। २. यदुदयात्कूष्माण्डफलवृन्ताकफलवृन्तवत्सर्वकर्माश्रयभूत तत्कार्मणशरीरम्। (मूला. वृ. १२-१६३)। ३. यस्य कर्मण उदयात् कार्मणवर्गणापुद्गलान् गृहीत्वा कार्मणशरीरत्वेन परिणमयति तत्कार्मणशरीरनामकर्म, तच्च कार्मणशरीरादन्यत्। (**कर्मस्तव गो. वृ. १०, पृ. १७; प्रव. सारो. वृ. १२६७**)।

२ जिस कर्म का उदय कूष्माण्ड फल के समान समस्त कर्मों का आधारभूत हो वह कार्मणशरीरनामकर्म कहलाता है।

कार्य—देखो कारण।

कार्यपरमाणु—१. खंधाणं अवसाणो णादव्वो कज्जपरमाणू। (नि. सा. २५)। २. गलतां पुद्गलद्रव्याणाम् अन्तोऽवसानस्तस्मिन् स्थितो यः स कार्यपरमाणुः। (नि. सा. टी.) २५।

२ गलने वाले पुद्गलस्कन्ध के अन्त में स्थित (जिसका फिर दूसरा विभाग न हो) परमाणु को कार्यपरमाणु कहते हैं।

कार्या रुचि—तस्मात्कारणात् निसर्गाख्यादुत्पद्यते याऽसौ रुचिः सा कार्याऽऽख्या। तथा योऽसौ बाह्य उपदेशः स त[य]त्र हेतुर्भवति तत उत्पद्यते या रुचिः सा तत्कार्या भवतीत्येवं कार्या रुचिः। कारणं निसर्गोऽधिगमो वेति। (त. भा. सिद्ध. वृ. १–३)।

निसर्ग या अधिगम रूप कारण से उत्पन्न होनेवाली श्रद्धा को कार्यारुचि कहते हैं।

काल—१. वत्तणालक्खणो कालो। (**उत्तरा. २८, १०**)। २. कालस्स वट्टणा × × ×। (**प्रव. सा. २-४२**)। ३. ववगदपणवण्ण-रसो ववगददोगंध अट्ठफासो य। अगुरुलहुगो अमुत्तो वट्टणलक्खो य कालो त्ति॥ (**पंचा. का. २४**)। ४. पासरसगंधवण्णव्वदिरित्तो अगुरुलहुगसंजुत्तो। वत्तणलक्खणकलियं कालसरूवं इमं होदि॥ (**ति. प. ४-२७८**)। ५. कालोऽनन्तसमयो वर्तनादिलक्षणः। (**त. भा. ४–१५**)। ६. सव्वाणं दव्वाणं परिणामं जो करेदि सो कालो। एक्केकासपएसे सो वट्टदि एक्किको चेव॥ (**कार्तिके. २१६**)। ७. कल्पते क्षिप्यते प्रेर्यते येन क्रियावद्द्रव्यं स कालः। (**त. वा. ४, १४, ५**); **तल्लक्षणः कालः**। सा वर्तना लक्षणं यस्य स काल इत्यवसेयः। (**त. वा. ५, २२, ६**); **वर्तनाद्युपकारलिंगः कालः**। उक्ता वर्तनादयः उपकारा यस्यार्थस्य लिंगं स काल इत्यनुमीयते। तथा चोक्तम्— येन मूर्तानामुपचयाश्चापचयाश्च लक्ष्यन्ते स काल इति। (**त. वा. ५, २२, २३**)। ८. वर्तनालक्षणः कालः × × ×। (**वरांग. २६, २७**)। ९. सकलपदार्थानां वृत्तिहेतुत्वं वर्तना। सा लक्षणं यस्यासौ तल्लक्षणः कालः। (**न्यायकु. ६ ७२, पृ. ७६५**)। १०. एवं चेव (ववगदपंचवण्णं ववगदपंचरस ववगददुगंध ववगदअट्ठफासं स-परपरिणामहेऊ अपदेसियं लोगपदेसपरिणाम) कालदव्वं। (**धव. पु. ३, पृ. ३**); ववगददोगंध-पंचरस-ट्ठपास-पंचवण्णो कुंभारचक्कहेट्ठिमिल व्व वत्तणालक्खणो लोगागासपमाणो अत्थो कालो णाम। (**धव. पु. ४, ३१४**); कल्यन्ते संख्यायन्ते कर्म-भवकायायुस्स्थितयोऽनेनेति कालशब्दव्युत्पत्तेः। कालः समयः अद्धा इत्येकोऽर्थः। (**धव. पु. ४, पृ. ३१७, ३१८**); सीदुसण वरिसणेहि उवलक्खियो कालो। (**धव. पु. १४, पृ. ३६**); दव्वाणं परिणमणस्स णिमित्तकारणलक्खणं कालदव्वं। (**धव. १५, पृ. ३३**)। ११. वर्णगन्धरसस्पर्शमुक्तोऽगौरवलाघवः। वर्तनालक्षणः कालः × × ×। (**ह. पु. ७–१**)। १२. अनादिनिधनः कालो वर्तनालक्षणो मतः। लोकमात्रः सुसूक्ष्माणुपरिछिन्नप्रमाणकः॥ सोऽसंख्येयोऽप्यनन्तस्य वस्तुराशेरुपग्रहः। वर्तते स्वगतानन्तसामर्थ्यपरिबृंहितः॥ (**म. पु. ३, १–२**); वर्तनालक्षणः कालो वर्तना स्वपराश्रया। यथास्वं गुणपर्यायैः परिणन्तृत्वयोजना॥ स कालो लोकमात्रैः स्वैरणुभिर्निचितस्थितैः। ज्ञेयोऽन्योन्यमसङ्कीर्णै रत्नानामिव राशिभिः॥ (**म. पु. २४, १३६,१४२**)। १३.

वर्तनालक्षणः कालः बालयुवावृद्धत्वादिभिर्लक्षणैर्लक्ष्यते। (उत्तरा. चू. २८, पृ. २७२)। १४. सूर्यक्रियानिवृत्तः कालः। (अनुयो. हरि. वृ. पृ. ५४)। १५. जं वत्तणादिरूवो कालो दव्वस्स चेव पज्जातो। (धर्मसं. हरि. ३२)। १६. कालो परमनिरुद्धो अविभागी तं विजाण समओ त्ति। सुहमो अमुत्तिअगुरुगलहुवत्तणलक्खणो कालो॥ (जं. दी. प. १३-४)। १७. विशिष्टमर्यादावच्छिन्नोर्ध्वाधोऽर्धतृतीयद्वीपाभ्यन्तरवर्तिजीवादिद्रव्यैः परिणमद्भिः स्वत एव कल्प्यते गम्यते प्रत्यतेऽपेक्ष्यते कारणतयाऽसाविव कालोऽपेक्षाकारणम्। (त. भा. सिद्ध. वृ. पृ. ५-३८)। १८. 'कल सत्त्व-संख्यानयोः' कलनं काल इति भावे प्रत्ययो घञ्, परिच्छेद इत्यर्थः, कल्यते वा परिच्छिद्यते वा यतोऽनेन वस्तु, 'अकर्तरि च कारके संज्ञायां घञ्, 'कलयन्ति वा' परिच्छेदयन्ति वा समयादिपर्यायास्तमिति कालः, तस्मिन् वा स्थितान् कलयन्ति, समयादिकलानां वा समूहः कालः। (विशेषा. को. वृ. पृ. ६०५)। १९. वत्तणगुणजुत्ताण दव्वाणं होइ कारणं कालो। (भावसं. दे. ३०९)। २०. स कालो यन्निमित्ताः स्युः परिणामादिवृत्तयः। वर्तनालक्षणं तस्य कथयन्ति विपश्चितः॥ (त. सा. ३-४०)। २१. वत्तणकिरियासाहणभूदो णियमेण कालो दु। (गो. जी. ६०५)। २२. वर्तनालक्षणः कालः स स्वयं परिणामिनाम्। परिणामोपकारेण पदार्थानां प्रवर्तते॥ (चन्द्र. च. १८-७४)। २३. जीवादीनां पदार्थानां परिणामोपयोगतः। वर्तनालक्षणः कालोऽनशो नित्यश्च निश्चयात्॥ (धर्मश. २१-८८)। २४. वर्तनालक्षणः कालः। (पंचा. का. ज. वृ. ४; भ. आ. मूला. ३६; आरा. सा. टी. ४)। २५. वर्तमानशुद्धपर्यायरूपपरिणतो वर्तमानसमयः कालो भण्यते। (प्रव. सा. ज. वृ. २३)। २६. यदमी परिवर्तन्ते पदार्थाः विश्ववर्तिनः। नवजीर्णादिरूपेण तत्कालस्यैव चेष्टितम्॥ (ज्ञानार्णव ६-३८)। २७. तत्र कल्यते—सङ्ख्यायतेऽसावनेन वा कलनं वा कलासमूहो वेति कालः—वर्तना-परापरत्वादिलक्षणः। (स्थाना. अभय. वृ. २-७४, पृ. ५१)। २८. कालाणवो जगन्मात्राश्चैवं तु मणिराशिवत्। ते प्रत्येकं विवर्ताप्तिहेतवः सर्ववस्तुनः॥ (आचा. सा. ३, २२-२३)। २९. पञ्चानां वर्तनाहेतुः कालः। (नि. सा. वृ. ९)। ३०. द्रव्यं कालाणुमात्रं गुणगणकलितं चाश्रितं शुद्धभावैः, तच्छुद्धं कालसंज्ञं कथयति जिनपो निश्चयाद् द्रव्यनीतेः। द्रव्याणामात्मना सत्परिणमनमिदं वर्तना तत्र हेतुः, कालस्यायं च धर्मः स्वगुणपरिणतिर्धर्मपर्याय एषः॥ (अध्या. क. मा. ३-३८)। ३१. वर्तनालक्षणः कालो वर्तना च पराश्रया। (जम्बू च. ३-३९)।

३. जो पांच वर्ण, पांच रस, दो गन्ध एवं आठ स्पर्शों से रहित और छह प्रकार की हानि-वृद्धि स्वरूप अगुरु-लघु गुण से संयुक्त होकर वर्तना—स्वयं परिणमते हुए द्रव्यों के परिणमन में सहकारिता—लक्षण वाला है उसे काल कहते हैं।

काल-अभिग्रह—काले अभिग्गहो पुण आईमज्झे तहेव अवसाणे। अप्पत्ते सइ काले आई विइओ अ चरिमम्मि। (बृहत्क. १६५०)।

कालविषयक भिक्षा के अभिग्रह (नियम) को काल-अभिग्रह कहते हैं। भिक्षाकाल के न प्राप्त होने पर आदि—प्रथम पौरुषी (प्रहर)—में भिक्षार्थ जाना, इसका नाम आद्यभिक्षाकालविषयक प्रथम अभिग्रह है। भिक्षाकाल के प्राप्त होने पर जाना, यह मध्य भिक्षाकालविषयक द्वितीय अभिग्रह है। अन्त में—भिक्षा-काल के बीत जाने पर—जाना, यह अवसानविषयक अभिग्रह कहलाता है।

कालकायोत्सर्ग — सावद्यकालाचरणद्वारागतदोषपरिहाराय कायोत्सर्गः कायोत्सर्गपरिणतसहितकालो वा कालकायोत्सर्गः। (मूला. वृ. ७-१५१)।

सावद्यकाल में किये गये आचरण के द्वारा लगे हुए दोषों के परिहार के लिए जो कायोत्सर्ग किया जाता है, उसे काल-कायोत्सर्ग कहते हैं। अथवा कायोत्सर्ग से परिणत साधु से सहित काल को कालकायोत्सर्ग कहते हैं।

कालकाल—कालस्य सत्त्वस्य श्वादेः, कालो मरणं कालकालः। (आव. नि. हरि. वृ. ७२८, पृ. २७५)। काल अर्थात् कुत्ता आदि किसी प्राणी का जो काल है—मरण होता है, उसका नाम कालकाल है। यह स्वाध्याय में बाधक होता है।

कालकृत परत्वापरत्व—कालकृते (परत्वापरत्वे) द्विरष्टवर्षाद्विर्षशतिकः परो भवति, वर्षशतिकाद्विरष्टवर्षोऽपरो भवति। (त. भा. ५-२२)।

सोलह वर्ष की आयु वाले से सौ वर्ष की आयु वाला 'पर' और सौ वर्ष की आयु वाले से सोलह वर्ष की आयु वाला 'अपर' कहा जाता है। इस प्रकार काल के आश्रय से जो पर-अपर का व्यवहार होता है, उसे काल-कृत परत्व-अपरत्व कहा जाता है।

कालक्रमोत्तर — कालत एकसमयस्थितेर्द्विसमयस्थितिः ततोऽपि त्रिसमयस्थितिः, एवं यावदसंख्येयसमयस्थितिः। (उत्तरा. नि. बृ. १, पृ. ६)।

काल के क्रम से एक-एक समय की अधिकता से होने वाली स्थितियों को काल-क्रमोत्तर कहते हैं। जैसे—एक समय स्थिति से दो समय स्थिति और दो समय स्थिति से तीन समय स्थिति, इस प्रकार असंख्यात समय स्थिति तक जानना चाहिए।

काल-चतुर्विंशति—कालश्च[लच]तुर्विंशतिश्चतुर्विंशतिः समयादयः, एतत्कालस्थिति वा द्रव्यं कालचतुर्विंशतिः। (आव. भा. मलय. वृ. १६२, पृ. ५६०)।

चौबीस समयों आदि (आवली व मुहूर्त आदि) को अथवा इतने समय स्थित रहने वाले द्रव्य को काल-चतुर्विंशति कहते हैं।

कालचार—कालस्तु यस्मिन् काले चरति यावन्तं वा कालं स कालचारः। (आचारां. शी. वृ. १, ५, २४६; पृ. १८३)।

चार, चर्या और चरण—ये समानार्थक शब्द हैं। जिस काल में या जितने काल आचरण किया जाता है उसे कालचार कहते हैं।

काल जघन्य—कालजहण्णमेगो समओ। (धव. पु. ११, पृ. ८५)।

कालज्ञानाचार—१. साम्प्रत ज्ञानाचारमाह—काल इति। यो यस्याङ्गप्रविष्टादेः श्रुतस्य काल उक्तः तस्य तस्मिन्नेव काले स्वाध्यायः कर्तव्यो नान्यदा। (दशवै. हरि. वृ. ३-८, पृ. १०३)। २. काले—स्वाध्यायवेलायां पठन-परिवर्तन-व्याख्यानादिक क्रियते सम्यक् शास्त्रस्य यत्स कालोऽपि ज्ञानाचार इत्युच्यते, साहचर्यात्कारणे कार्योपचाराद्वा। (मूला. वृ. ५-७२)।

१ अंगप्रविष्ट आदि जिस श्रुत के स्वाध्याय का जो काल कहा गया है उसी में उसका स्वाध्याय करना, अन्य काल में न करना; यह कालज्ञानाचार कहलाता है। २ जिस स्वाध्यायकाल में शास्त्र का पठन, परिवर्तन—विस्मृत न होने देने के लिए पुनः पुनः भावागम का परिशीलन—और व्याख्यान आदि किया जाता है उस काल को भी कारण में कार्य के उपचार से कालज्ञानाचार कहा जाता है।

कालदोष—कालदोषः अतीतकालव्यत्ययः। यथा रामो वनं प्राविशदिति वक्तव्ये विशतीत्याह। (आव. नि. हरि. व मलय. वृ. ८८३)।

अतीत काल के विपरीत प्रयोग को कालदोष कहते हैं। जैसे—'राम वन में प्रविष्ट हुए' इस विवक्षा में 'राम वन में प्रविष्ट होते हैं' ऐसा कहना। यह ३२ सूत्रदोषों में २१वां दोष है।

कालनिधि—१. काले कालण्णाणं भव्व-पुराणं च तिसु वि वंसेसु। सिप्पसयं कम्माणि पयाए हिअकराणि॥ (जम्बूद्वी. ६६, गा. ६, पृ. २५६; प्रव सारो. १२२४)। २. कालनामनि निधौ कालज्ञानम्—सकलज्योतिःशास्त्रानुबन्धि ज्ञानम्—तथा जगति त्रयो वंशाः—वंशः प्रवाहः आवलिका इत्येकार्थाः, तद्यथा—तीर्थंकरवंशश्चक्रवर्तिवंशो बलदेव-वासुदेववंशश्च। तेषु त्रिष्वपि वंशेषु यद् भाव्यं यच्च पुराणमतीतमुपलक्षणमेतद् वर्तमानं शुभाशुभं तत् सर्वमत्रास्ति, इतो महानिधितो ज्ञायत इत्यर्थः। शिल्पशतं घट-लोह-चित्र-वस्त्र-नापितशिल्पानां पञ्चानामपि प्रत्येकं विंशतिभेदत्वात्, कर्माणि च कृषिवाणिज्यादीनि जघन्य-मध्यमोत्कृष्टभेदभिन्नानि त्रीण्येतानि प्रजाया हितकराणि निर्वाहाभ्युदयहेतुत्वात्। एतत्सर्वमत्राभिधीयते। (जम्बूद्वी. शा. वृ. ६६, पृ. २५८)। ३. भविष्यद्भूतयोर्ज्ञानं वत्सरांस्त्रीन् सतोऽपि च। कृष्यादीनि च कर्माणि शिल्पान्यपि च कालतः॥ (त्रि. श. पु. च. १, ४, ५७६)। २ कालनिधि के आश्रय से समस्त ज्योतिष शास्त्र सम्बन्धी ज्ञान तथा तीर्थंकरवंश, चक्रवर्तिवंश और बलदेव-वासुदेववंश ये जो तीन वंश लोक में प्रवर्तमान हैं उनमें भविष्य में जो होने वाला है, भूत में जो हो चुका है एवं वर्तमान में जो शुभाशुभ चल रहा है उसका भी ज्ञान प्राप्त होता है। इसके अतिरिक्त कुम्हार, लुहार, चित्रकार, जुलाहा और नाई इनमेंसे प्रत्येककी २०-२० कलाओं का तथा वाणिज्य आदि कर्मों का कथन भी इसमें किया गया है।

कालपरिक्षेप—वासारत्ते अइपाणियं ति गिम्हे

अपाणियं नच्चा। कालेण परिक्खित्तं तेण तमन्ने परिहरंति ॥ (बृहत्क. भा. ११२४)।

वर्षाकाल में बारिश के पानी से घिर आने वाले तथा ग्रीष्मकाल में जल के अभाववाले ग्राम-नगरादि को कालपरिक्षिप्त कहते हैं। ऐसे कालपरिक्षिप्त नगरादि को जानकर अन्य जन—दूसरे राष्ट्र के राजा आदि—उसे छोड़ देते हैं।

कालपरिवर्तन—१. अवसप्पिणि-उस्सप्पिणि-समयावलियासु णिरवसेसासु। जादो मुदो य बहुसो परिभमदो कालसंसारे ॥ (द्वादशा. २७; स. सि. २–१० उद्.; भ. आ. विजयो. १७७७ उद्.)। २. तक्कालतदाकालसमयेसु जीवो अणंतसो चेव। जादो मदो य सव्वेसु इमो तीदम्मि कालम्मि ॥ (भ. आ. १७७७)। ३. कालपरिवर्तनमुच्यते—उत्सर्पिण्याः प्रथमसमये जातः कश्चिज्जीवः स्वायुषः परिसमाप्तौ मृतः, स एव पुनर्द्वितीयाया उत्सर्पिण्या द्वितीयसमये जातः स्वायुषः क्षयान्मृतः, स एव पुनस्तृतीयाया उत्सर्पिण्यास्तृतीयसमये जातः। एवमनेन क्रमेणोत्सर्पिणी परिसमाप्ता तथा अवसर्पिणी च। एवं जन्मनैरन्तर्यमुक्तं मरणस्यापि तथैव ग्राह्यमेतावत्कालपरिवर्तनम्। (स. सि. २–१०; भ. आ. विजयो. १७७७; मूला. वृ. ८–१४)। ४. उवसप्पिणि-अवसप्पिणिपढमसमयादिचरमसमयंतं। जीवो कमेण जम्मदि मरदि य सव्वेसु कालेसु ॥ (कार्तिके. ६६)। ५. ओसप्पिणि-उस्सप्पिणि-समयावलिया णिरंतरा सव्वा। जादो मुदो य बहुसो हिंडंतो कालसंसारे ॥ (धव. पु. ४, पृ. ३३३ उद्.)। ६. शुद्धात्मानुभूतिरूपनिर्विकल्पसमाधिकालं विहाय प्रत्येकं दशकोटाकोटिसागरेण प्रमितोत्सर्पिण्यवसर्पिण्येकैकसमये नानापरावर्तनकालेनानन्तवारानयं जीवो यत्र न जातो न मृतः स समयो नास्तीति कालसंसारः। (बृ. द्रव्यसं. ३५)। ७. ओसप्पिणीए समया जावइया ते य नियमरणेणं। पुट्ठा कमुक्कमेणं कालपरट्टो भवे थूलो ॥ सुहुमो पुण ओसप्पिणिपढमे समयंमि जइ मओ होइ। पुणरवि तस्साणंतर बीए समयंमि जइ मरइ ॥ एवं तरतमजोएण सव्वसमएसु चेव एएसुं। जइ कुणइ पाणचायं अणुक्कमेण नणु गणिज्जा ॥ (प्रव. सारो. १०४७–४६, पृ. ३०७)। ८. उत्सर्पिण्याः कस्याश्चिदवसर्पिण्याश्च प्रथम-द्वितीयादिसमयेषु पर्यायेण जन्म-मरणाभ्यां वृत्तिः कालसंसारः। (भ. आ. मूला. ४३०)। ६. कश्चिज्जीवः उत्सर्पिणीप्रथमसमये जातः स्वायुःपरिसमाप्तौ मृतः, पुनर्द्वितीयोत्सर्पिणीद्वितीयसमये जातः स्वायुःपरिसमाप्त्या मृतः, पुनः तृतीयोत्सर्पिणीतृतीयसमये जातः तथा मृतः, पुनः चतुर्थोपसर्पिणीचतुर्थसमये जातः; अनेन क्रमेण उत्सर्पिणीं समाप्नोति तथैवावसर्पिणीमपि समाप्नोति। एवं जन्मनैरन्तर्यमुक्तम् मरणस्याप्येवं नैरन्तर्यं ग्राह्यम्। तदेतत्सर्वं कालपरिवर्तनं भवति। (गो. जी. जी. प्र. टी. ५६०)। १०. कालपरिवर्तनं कथ्यते—उत्सर्पिणीकालप्रथमसमये कोऽपि जीव उत्पन्नो निजायुःसमाप्तौ मृतः, स एव जीवः द्वितीयोत्सर्पिणीकालद्वितीयसमये पुनरुत्पन्नो निजायुर्भुक्त्वा पुनर्मृतः, तृतीयोत्सर्पिणीकालतृतीयसमये पुनरुत्पन्नो निजायुर्भुक्त्वा पुनर्मृतः, चतुर्थोपसर्पिणीकालचतुर्थसमये पुनरुत्पन्नो निजायुर्भुक्त्वा पुनर्मृतः; एवं सर्वोत्सर्पिणीसमयेषु जन्म गृह्णाति तथा सर्वोत्सर्पिणीसमयेषु मरणमपि गृह्णाति। यथा सर्वेषूत्सर्पिणीसमयेषु जन्म-मरणानि गृह्णाति तथा सर्वेष्ववसर्पिणीसमयेषु जन्मानि मरणानि च गृह्णाति। एतावता कालेन एकं कालपरिवर्तनं भवति। (त. वृत्ति श्रुत. २–१०)।

३ कोई जीव उत्सर्पिणी के प्रथम समय में उत्पन्न हुआ व आयु के समाप्त होने पर मर गया, फिर वह द्वितीय उत्सर्पिणी के द्वितीय समय में उत्पन्न हुआ और आयु के समाप्त होने पर मर गया, पश्चात् वही तृतीय उत्सर्पिणी के तृतीय समय में उत्पन्न हुआ और आयु के समाप्त होने पर मर गया; इस क्रम से उसने जैसे उत्सर्पिणी को समाप्त किया वैसे ही अवसर्पिणी को भी समाप्त किया। यह जन्म की निरन्तरता हुई। इसी प्रकार मरणकी भी निरन्तरता समझना चाहिए। इतने काल को कालपरिवर्तन कहा जाता है। ७ अवसर्पिणी और उत्सर्पिणी के जितने समय हैं उन सबको जब जीव क्रम अथवा उत्क्रम से अपने मरण से व्याप्त कर लेता है तब उतने काल को एक बादर कालपुद्गलपरावर्तन कहा जाता है। कोई एक जीव अवसर्पिणी के प्रथम समय में मरा, तत्पश्चात् उक्त अवसर्पिणी के द्वितीय समय में वह मरा (यदि आगे पीछे के अन्य समयों में वह मरता है तो उनकी गणना नहीं

की जाती है)। पश्चात् अवसर्पिणी के तृतीय समय में वह मरा, इसी क्रम से उक्त अवसर्पिणी के चतुर्थ आदि अन्य सभी समयों में वह क्रम से मरण को प्राप्त होता है। तत्पश्चात् अवसर्पिणी के समान उत्सर्पिणी के भी समस्त समयों में जब वह यथाक्रम से मरण को प्राप्त होता है तब इतने काल को एक सूक्ष्म कालपुद्गलपरावर्तन कहा जाता है।

कालपुरुष—यो यावन्तं कालं पुरुषवेदवेद्यानि कर्माणि वेदयते स कालपुरुषः। (सूत्रकृ. शी. वृ. ४, १, ५७)।

जो पुरुष जितने काल तक पुरुष वेद के द्वारा वेदन किये जाने वाले कर्मों का अनुभव करता है, उतने समय तक उसे कालपुरुष कहते हैं।

कालपूजा—गर्भादिपञ्चकल्याणमर्हतां यद्दिनेऽभवत्। तथा नन्दीश्वरे रत्नत्रयपर्वणि चार्चनम्॥ स्नपनं क्रियते नानारसैरिक्षुघृतादिभिः। तत्र गीतादिमांगल्य कालपूजा भवेदियम्॥ (धर्मसं. श्रा. ६, ६६–६७)।

तीर्थंकरों के गर्भादि कल्याणकों के दिनों में, नन्दीश्वर (अष्टाह्निक पर्व) में और रत्नत्रय पर्व के समय जो पूजा की जाती है; इक्षु और घृतादि रसों के द्वारा अभिषेक किया जाता है, तथा गीत आदि मंगलकार्य किये जाते हैं; इस सबको कालपूजा कहा जाता है।

कालप्रतिक्रमण—१. रात्रि-संध्यात्रयस्वाध्यायावश्यककालेषु गमनागमनादिव्यापाराकरणात् कालप्रतिक्रमणम्। कालस्य दुष्परिहार्यत्वात्कालाधिकरणव्यापारविशेषाः कालसाहचर्यात् कालशब्देन गृहीताः। (भ. आ. विजयो. ११६); संध्यास्वाध्यायकालादिषु गमनागमनादिपरिहारः कालप्रतिक्रमणम्। (भ. आ. विजयो. ४२१)। २. कालमाश्रितातीचारान्निवृत्तिः कालप्रतिक्रमणम्। (मूला. वृ. ७–११५)।

१ रात्रि में, तीनों संध्याओं में तथा स्वाध्याय और आवश्यकों के काल में गमनागमनादि व्यापार न करना, यह कालप्रतिक्रमण कहलाता है। काल के अपरिहार्य होने से तदाश्रित व्यापारविशेष कालशब्द से ग्रहण किये गये हैं।

कालप्रतिसेवना—१. आवश्यककालादन्यस्मिन् काले आवश्यककरणम्, वर्षाविग्रहातिक्रमः, इत्यादिका कालप्रतिसेवना। (भ. आ. विजयो. ४५०)। २. कालं आवश्यककालवर्षाविग्रहाद्यतिक्रमः सेवा। (भ. आ. मूला. ४५०)।

१ जिस आवश्यक के करने का जो काल नियत है उस काल में उसे न करके अन्य समय में करना तथा वर्षाकाल आदि का अतिक्रमण करना—उसे न करना, इत्यादि को कालप्रतिसेवना कहा जाता है।

कालप्रत्याख्यान—कालस्य दुःपरिहार्यत्वात् कालसाध्यायां क्रियायां परिहृतायां काल एव प्रत्याख्यातो भवतीति ग्राह्यम्। तेन संध्याकालादिषु अध्ययनगमनादिकं न संपादयिष्यामीति चेतः कालप्रत्याख्यानम्। (भ. आ. विजयो. ११६, पृ. २७६)।

काल चूंकि अपरित्याज्य है, अतः विवक्षित काल में सिद्ध होने वाली क्रिया का परित्याग करने पर काल का ही प्रत्याख्यान समझना चाहिए। इससे यह अभिप्राय समझना चाहिए कि संध्याकाल आदि में मैं अध्ययन व गमन आदि न करूँगा इस प्रकार के विचार का नाम ही कालप्रत्याख्यान है।

कालमंगल—१. जस्सि काले केवलणाणादिमंगलं परिणमदि॥ परिणिक्कमणं केवलणाणुब्भवणिव्वुदिपवेसादी। पावमलगालणादो पण्णत्तं कालमंगलं एदं॥ (ति. प. १, २४–२५)। २. तत्थ कालमगलं नाम—जम्हि काले केवलणाणादिपज्जएहि परिणदो कालो पावमलगालणत्तादो मंगलं। तस्योदाहरणं परिनिष्क्रमण-केवलज्ञानोत्पत्ति-परिनिर्वाणदिवसादयः। जिनमहिमसम्बद्धकालोऽपि मगलम्, यथा नन्दीश्वरदिवसादिः। (धव. पु. १, पृ. २६)।

१ जिस काल में तीर्थंकरादि महापुरुषों ने परिनिष्क्रमण (दीक्षा), केवलज्ञान और निर्वाण आदि प्राप्त किया है, उस काल को पापमल का विनाशक होने से कालमंगल कहते हैं।

कालमास—यत्र काले यो मासो वर्ण्यते स कालप्रधानताविवक्षणात्तत्कालमासः। ×××यदि वा स्वलक्षणनिष्पन्नो नाक्षत्रादिकः पंचविधः (नाक्षत्रः, चान्द्रः, ऋतुमासः, आदित्यः, अभिवर्धितः) पंचभेदः कालमासः। (व्यव. भा. मलय. वृ. २–१४)।

जिस काल में जिस मास का वर्णन किया जाता है उसे काल की प्रधानता की विवक्षा से कालमास कहा जाता है। अथवा अपने-अपने लक्षणों से सिद्ध वह कालमास नक्षत्रादि के योग से पांच प्रकार का है—नाक्षत्र, चान्द्र, ऋतुमास, आदित्य और अभिवर्धित।

कालयुति (कालजुडी)—तेसिं चेव जीवादीणं दव्वाणं दिवस-मास-संवच्छरादिकालेहि सह मेलणं कालजुडी णाम। (धव. पु. १३, पृ. ३४६)।

जीवादिक द्रव्यों के दिन, मास और वर्ष आदि काल के साथ संमेलन को कालयुति कहा जाता है।

काललब्धि—१. तत्र काललब्धिस्तावत्– कर्माविष्ट आत्मा भव्यः काले ऽर्धपुद्गलपरिवर्तनाख्येऽवशिष्टे प्रथमसम्यक्त्वग्रहणयोग्यो भवति, नाधिके, इतीयमेका काललब्धिः। अपरा कर्मस्थितिकाललब्धिः—उत्कृष्टस्थितिकेषु कर्मसु जघन्यस्थितिकेषु च प्रथमसम्यक्त्वलाभो न भवति। क्व तर्हि भवति? अन्तःकोटाकोटीसागरोपमस्थितिकेषु कर्मसु बन्धमापद्यमानेषु विशुद्धपरिणामवशात् सत्कर्मसु च ततः संख्येयसागरोपमसहस्रोनायामन्तःकोटाकोटीसागरोपमस्थितौ स्थापितेषु प्रथमसम्यक्त्वयोग्यो भवति। अपरा काललब्धिर्भवापेक्षया। भव्यः पंचेन्द्रियः संज्ञी पर्याप्तकः सर्वविशुद्धः प्रथमसम्यक्त्वमुत्पादयति। (स. सि. २–३; त. वा. २, ३, २)। २. भव्यः कर्माविष्टोऽर्धपुद्गलपरिवर्तनपरिमाणकाले ऽवशिष्टे प्रथमसम्यक्त्वयोग्यो भवतीति काललब्धिः। (पंचसं. अमित. १–२८६; अन. ध. स्वो. टी. २-४६)।

१ कर्माक्रान्त भव्य जीव अर्धपुद्गलपरिवर्तन मात्र काल के शेष रह जाने पर प्रथम सम्यक्त्व के ग्रहण करने योग्य होता है, इससे अधिक काल के शेष रहने पर वह उसके योग्य नहीं होता है। यह एक काललब्धि हुई। दूसरी काललब्धि कर्मस्थिति की अपेक्षा है—कर्मों के उत्कृष्ट स्थितियुक्त और जघन्य स्थितियुक्त बन्ध को प्राप्त होने पर उस प्रथम सम्यक्त्व की प्राप्ति नहीं होती, किन्तु अन्तःकोटाकोटी मात्र स्थिति के साथ उनके बन्ध को प्राप्त होने पर तथा विशुद्ध परिणामों के वश उनके सत्त्व को उससे संख्यात हजार सागरोपम से हीन अन्तःकोटाकोटी प्रमाण स्थिति में स्थापित करने पर उक्त सम्यक्त्व की प्राप्ति होती है। तीसरी काललब्धि भव की अपेक्षा है—भव्य, पंचेन्द्रिय, संज्ञी और पर्याप्तक सर्वविशुद्ध जीव ही उस सम्यक्त्व को उत्पन्न कर सकता है।

काललोक—काललोकः समयावलिकादिः। (स्थानां. अभय. वृ. १–५, पृ. १३)।

समय-आवली आदि काल को काललोक कहते हैं।

कालवर्गणा—१. इह वर्गणाः सामान्यतश्चतुर्विधा भवन्ति। तद्यथा— ××× कालतः एकसमयस्थितीनां यावदसंख्येयसमयस्थितीनाम्। (आव. नि. हरि. वृ. ३६, पृ. ३४)। २. कम्मदव्वं पडुच्च समयाहियावलियापहुडि जाव कम्मट्ठिदि त्ति, णोकम्मदव्वं पडुच्च एगसमयादि जाव असंखेज्जा लोगा त्ति ताव एदाओ कालवग्गणाओ। (धव. पु. १४, पृ. ५२)।

२ कर्मद्रव्य की अपेक्षा एक समय अधिक आवली से लेकर कर्मस्थिति तक तथा नोकर्मद्रव्य की अपेक्षा एक समय से लेकर असंख्यात लोक प्रमाण काल तक ये सब कालवर्गणायें हैं।

कालवाद—१. कालो सव्वं जणयदि कालो सव्वं विणस्सदे भूदं। जागत्ति हि सुत्तेसु वि ण सक्कदे वंचिदुं कालो॥ (गो. क. ८७६)। २. सव्वं कालो जणयदि भूदं सव्वं विणासदे कालो। जागत्ति हि सुत्तेसु वि ण सक्कदे वंचिदु कालो॥ (अंगपण्णत्ती २–१६, पृ. २७७)।

१ काल (समय) ही सबको उत्पन्न करता है और काल ही सबका विनाश करता है, वह सोते हुए प्राणियों के भीतर भी जागता रहता है, उसे कोई धोखा नहीं दे सकता; इस प्रकार काल को महत्त्व देकर कथन करने को कालवाद कहते हैं।

कालविप्रकृष्ट—१. अन्तरिताः कालविप्रकृष्टाः। ×××× कालविप्रकृष्टा लाभालाभ-सुखदुःख-ग्रहोपरागादयः। (आ. मी. वृ. ५)। २: कालविप्रकृष्टा रामादयः। (न्यायदी. पृ. ४१)।

१ जिनमें काल का व्यवधान हो ऐसे लाभ-अलाभ, सुख-दुःख और सूर्य-चन्द्रमादि के ग्रहण आदि को कालविप्रकृष्ट कहते हैं।

कालविमोक्ष—कालविमोक्षस्तु चैत्यमहिमादिकेषु कालेष्वनाघातादिघोषणापादितो यावन्तं कालं मुच्यते, यस्मिन् वा काले व्याख्यायते सोऽभिधीयते इति। (आचारां. नि. शी. वृ. १, ७, ४, २५८, पृ. २३६)।

जिन चैत्यमहिमादि पर्वों के समय अनाघात की (किसी भी जीव को नहीं मारने की) घोषणा जितने काल के लिए की जाती है, उतने काल तक जीवों को वधादि से मुक्ति मिलने के कारण उसे कालविमोक्ष कहते हैं। अथवा जिस काल में विमोक्षण का व्या-

ध्यान किया जाता है उस काल को कालविमोक्ष कहते हैं।

कालापेक्षाव्यतिक्रम—कालापेक्षाव्यतिक्रमः कालापेक्षया कायोत्सर्गस्य विविधमंशभजनम्। (अन. ध. स्वो. टी. ८–१२१)।

काल की अपेक्षा कायोत्सर्ग के विविध अंशों की विराधना करना, यह कालापेक्षाव्यतिक्रम नाम का ३२ दोषों में २९वां दोष है।

कालव्यतिरेक—अपि चैकस्मिन् समये यकाप्यवस्था भवेन्न साऽप्यन्या। भवति च सापि तदन्या द्वितीयसमयेऽपि कालव्यतिरेकः॥ (पंचाध्यायी १–१४९)।

एक समय में जो भी अवस्था होती है वह वही है, दूसरी नहीं हो सकती। और वही दूसरे समय में अन्य होती है—पहली नहीं हो सकती; यही कालव्यतिरेक है।

कालशुद्धदान—कालं शुद्धं तु यत्किंचित्काले पात्राय दीयते। (त्रि. श. पु. च. १, १, १८४)।

दान देने के लिए जो समय निश्चित है, ठीक आगम निरूपित उसी समय पर पात्र के लिए शुद्ध देय वस्तु का दान करने को कालशुद्धदान कहते हैं।

कालशुद्धि—१. दिसदाह उक्कपडणं विज्जुचडुक्कासणिंदधणुगं च। दुग्गंध-संझ-दुद्दिण-चंदग्गह-सूरराहुजुज्झं च॥ कलहादिधूमकेदू धरणीकंपं च अब्भगज्जं च। इच्चेवमाइ बहुया सज्झाए वज्जिदा दोसा॥ (मूला. ५, ७७–७८)। २. विद्युदिन्द्रधनुर्ग्रहोपरागाकालवृष्टयभ्रगर्जन-जीमूतव्रातप्रच्छाद-दिग्दाह-धूमिकापात-संन्यास-महोपवास - नन्दीश्वरजिनमहिमाद्यभावः कालशुद्धिः। (धव. पु. ९, पृ. २५३)। ३. उदयास्तात्प्राक्-पाश्चात्य-त्रि-त्रिनाडीषु यः सुधीः। मध्याह्ने तां च यः कुर्यात कालशुद्धिश्च तस्य सा॥ (धर्मसं. श्रा. ७–४६)।

२ स्वाध्याय के समय में बिजली, इन्द्रधनुष, सूर्य चन्द्र का ग्रहण, अकालवृष्टि, मेघगर्जन, मेघसमूह का आच्छादन (दुर्दिन), दिशादाह, धूमिकापात (कुहरा), संन्यास, महोपवास, नन्दीश्वर (अष्टाह्निकपर्व) और जिनमहिमा आदि के अभाव का नाम कालशुद्धि है।

कालसमवाय—१. उत्सर्पिण्यवसर्पिण्योस्तुल्यदशसागरोपमकोटाकोटीप्रमाणात्कालसमवायनात् कालसमवायः। (त. वा. १, २०, १२; धव. पु. ९, पृ. १९९)। २. कालदो समवाओ—समयो समएण, मुहुत्तो मुहुत्तेण समो। (धव. पु. १, पृ. १०१)। ३. समयावलिय-खण-लव-मुहुत्त-दिवस-पक्ख-मासउडुअयण-संवच्छर-युग-पुव्व-पव्व-पल्ल-सागरोसप्पिणि-उस्सप्पिणीओ सरिसाओ, एसो कालसमवाओ। (जयध. पु. १, पृ. १२५)। ४. एकसमयः एकसमयेन सदृशः, आवलिः आवल्या सदृशी, प्रथमपृथ्वीनारक-भावन-व्यन्तराणां जघन्यायूंषि सदृशानि। सप्तमपृथ्वीनारक-सर्वार्थसिद्धिदेवानामुत्कृष्टायुषी सदृशे इत्यादिः कालसमवायः। (गो. जी. मं. प्र. व जी. प्र. टी. ३५६)।

२ काल की अपेक्षा समय समय के साथ समान है, आवली आवली के साथ समान है; इत्यादि काल की समानता को कालसमवाय कहते हैं।

कालसमाधि—कालसमाधिरपि यस्य यं कालमवाप्य समाधिरुत्पद्यते, यस्य वा यावन्तं कालं समाधिर्भवति. यस्मिन् वा काले समाधिर्व्याख्यायते स कालप्राधान्यात् कालसमाधिरिति। (सूत्रकृ. शी. वृ. १०, १, ४)।

जिसके जिस काल में समाधि उत्पन्न होती है, अथवा जितने काल तक समाधि रहती है, अथवा जिस काल में समाधि का व्याख्यान किया जाता है; उस काल को काल की प्रधानता से कालसमाधि कहते हैं।

कालसंक्रम—कालस्स अपुव्वस्स पादुब्भाओ कालसंकमो। ××× अथवा ××× एगकालम्मि ट्ठिददव्वस्स कालंतरगमणं कालसंकमो। (धव. पु. १६, पृ. ३४०)।

अपूर्व काल की उत्पत्ति को कालप्रादुर्भाव कहा जाता है। अथवा एक काल में स्थित द्रव्य का अन्य काल को प्राप्त होना, इसका नाम कालसंक्रम है।

कालसंयोग—१. से किं तं कालसंजोगे? सुसमसुसमाए सुसमाए सुसमदूसमाए दूसमसुसमाए दूसमाए दूसमदूसमाए, अहवा पावसए वासारत्तए सरदए हेमंतए वसंतए गिम्हए, से तं कालसंजोगे। (अनुयो. सू. १३, पृ. १४४)। २. कालसंयोगपदानि यथा शारदः वासन्तक इत्यादीनि। (धव. पु. १, पृ. ७८); सारओ वासंतओ त्ति कालसंजोगपदणामाणि। (धव. पु. ९, पृ. १३७)।

१. सुषमसुषमादि छह कालों के सम्बन्धसे तथा वर्षा आदि ऋतुओं के सम्बन्ध से जो नाम (पद) निष्पन्न

होते हैं, वे कालसंयोग-नाम कहे जाते हैं। जैसे– सुषमसुषमज, सुषमज, सुषमदुःषमज आदि तथा प्रावृषिक, शारद व हैमन्तक आदि।

कालसंसार—१. तत्र परमार्थकालवर्तितपरिस्पन्देतरपरिणामविकल्पः तत्पूर्वकालव्यपदेशौपचारिककालत्रयवृत्तिः कालसंसारः। (त. वा. ६, ७, ३)। २. कालस्य दिवस-पक्ष-मासर्त्वयन-संवत्सरादिलक्षणस्य संसरणं चक्रन्यायेन भ्रमणं पल्योपमादिकालविशेषविशेषितं वा यत्कस्यापि जीवस्य नरकादिषु स कालसंसारः। (स्थानां. अभय. वृ. ४, १, २६१, पृ. १८८)।

१. निश्चय काल के निमित्त से होने वाले आत्मप्रदेशों में परिस्पन्द और इतर परिणमन को तथा उक्त निश्चय काल के निमित्त से काल इस नाम को प्राप्त तीनों व्यवहार कालों में होने वाले संसरण को कालसंसार कहते हैं। २. दिन, पक्ष, मास, ऋतु, अयन और वर्ष आदिरूप कालका जो चक्र के समान परिभ्रमण होता है, इसका नाम कालसंसार है। अथवा पल्योपमादि कालविशेष से विशेषता को प्राप्त जिस किसी भी जीवका जो नरकादि गतियों में परिभ्रमण होता है उसे कालसंसार जानना चाहिए।

कालसंस्थान— अद्धायाः कालस्याकारोऽद्धाक्षेत्रं मनुष्यक्षेत्रं तदाकृतिर्ज्ञेयः, सूर्यक्रियाभिव्यङ्ग्यो हि कालः किल मनुजक्षेत्र एव वर्तते, अतो य एव तस्याकारः स एव कालस्याप्युपचारतो विज्ञेयः। (आव. हरि. वृ. मल. हे. टि. पृ. ६४)।

कालका क्षेत्र जो मनुष्यलोक है उसे ही कालसंस्थान— काल का आकार—जानना चाहिये। सूर्य के संचार से अभिव्यक्त होनेवाला काल (व्यवहारकाल) चूंकि मनुष्यलोक में ही पाया जाता है, अतः मनुष्यलोक का जो आकार है, उसे ही उपचार से कालसंस्थान समझना चाहिये।

कालसामायिक—१. छ-उदुविसयसंपरायणिरोहो कालसामाइयं। (जयध. १, पृ. ६८) २. प्रावृट्-वर्षा-हेमन्त-शिशिर-वसन्त-निदाधाः षड् ऋतवो रात्रि-दिवस-शुक्लपक्ष-कृष्णपक्षाः कालस्तेषूपरि राग-द्वेषवर्जनं कालसामायिकं नाम। ××× अथवा ××× यस्मिन् काले सामायिकं करोति स कालः पूर्वाह्णादिभेदभिन्नः कालसामायिकम्। (मूला. वृ. ७–१७)। ३. कालसामायिकं वसन्त-ग्रीष्मादिषु ऋतुषु दिन-रात्रिसितासितपक्षादिषु च यथास्वं चार्वचारुषु राग-द्वेषानुद्भवः। ××× कालसामायिकं तु यस्मिन् काले सामायिकस्वरूपेण परिणतो जीवः स कालः पूर्वाह्ण-मध्याह्नापराह्णादिभेदभिन्नः। (अन. ध. स्वो. टी. ८–१६)। ४. वसन्तादिषु ऋतुषु शुक्ल-कृष्णयोः पक्षयोः दिन-वार-नक्षत्रादिषु च इष्टानिष्टेषु कालविशेषेषु राग-द्वेषनिवृत्तिः कालसामायिकम्। (गो. जी. मं. प्र. टी. ३६७)। ५. वसंताइसु उडुसु सुक्क-किण्हाणं पक्खाणं दिण-वार-णक्खत्ताइसु च तेसु कालविसेसेसु तं णिवट्टी कालसामाइयं। (अणप. पृ. ३०६)।

१ वसन्तादि छह ऋतुओं के अनुकूल या प्रतिकूल होने की अवस्था में उन पर राग या द्वेष नहीं करने को कालसामायिक कहते हैं।

कालस्तव— १. स्वर्गावतरण-जन्म-निष्क्रमण-केवलोत्पत्ति-निर्वाणकालानां स्तवनं कालस्तवः। (मूला. वृ. ७–४१)। २. कालस्तवस्तीर्थकृतां स श्रेयो यदनेहसः। तद्गर्भवतराद्युद्धक्रियाद्दप्तस्य कीर्तनम्॥ (अन. ध. ८–४३)।

१ तीर्थंकरों के गर्भादि कल्याणक सम्बन्धी कालों का स्तवन करने को कालस्तव कहते हैं।

कालस्पर्शन—कालदव्वस्स अण्णदव्वेहि जो संजोगो सो कालफोसणं णाम। (धव. पु. ४, पृ. १४४)। काल द्रव्य का अन्य द्रव्यों के साथ जो संयोग होता है उसे कालस्पर्शन कहते हैं।

कालाणु—लोयायासपदेसे इक्केक्के जे ठिया हु एक्केक्का। रयणाणं रासी इव ते कालाणू मुणेयव्वा॥ (धव. पु. ४, पृ. ३१५ उद्.; द्रव्यसं. २२; गो. जी. ५८८)।

एक एक लोकाकाशप्रदेश के ऊपर जो रत्नों की राशि के समान एक एक काल के अणु स्थित हैं वे कालाणु कहलाते हैं।

कालातिक्रम—१. अकाले भोजनं कालातिक्रमः। (स. सि. ७–३६)। २. कालातिक्रम इति कालस्यातिक्रमः कालातिक्रमः उचितो यो भिक्षाकालः साधूनां तमतिक्रम्य उल्लंघ्य भुंक्ते तदा च किं तेन लब्धेनापि, कालातिक्रान्तत्वात्तस्य। (आ. प्र.

(संघा. का. अय. वृ. २५)। ३. निमेषाष्टकैः काष्ठा। (मि. ला. वृ. ३१)।

१ पन्द्रह अक्षि-निमेष (पलक) प्रमाण काल को काष्ठा कहते हैं। ३ आठ निमेषों की एक काष्ठा होती है।

काहलत्व—काहलमव्यक्तवर्णं वचनम्, तद्योगात्पुरुषोऽपि काहलः, तस्य भावः काहलत्वम्। (योगशा. स्वो. विव. २–२३)।

काहल का अर्थ अव्यक्त वर्णवाला वचन होता है। उसके सम्बन्ध से जो व्यक्ति वचन का स्पष्टता से उच्चारण नहीं कर सकता है उसे भी काहल कहा जाता है। मनुष्य का काहल होना असत्य भाषण का परिणाम है।

कांक्षा—१. ऐहलौकिक-पारलौकिकेषु विषयेष्वाशंसा काङ्क्षा। (त. भा. ७–१८)। २. कंखा अन्नन्नदंसणग्गाहो। (आ. प्र. ८७)। ३. कांक्षा अन्योन्यदर्शनग्राहः। (आ. प्र. टी. ५६ व ८७)। ४. काङ्क्षणं कांक्षा, सुगतादिप्रणीतदर्शनेषु ग्राहोऽभिलाष इत्यर्थः। तथा चोक्तम्–कंखा अन्नन्नदंसणग्गाहो। (आव. हरि. वृ. १५६१, पृ. ८१४)। ५. काङ्क्षणं कांक्षा अर्जनमतिपरिणामाविच्छेदः। (त. भा. सिद्ध. वृ. ७–१२); भविष्यत्कालोपादानविषया काङ्क्षा। (त. भा. सिद्ध. वृ. ८–१०)। ६. काङ्क्षा अन्यान्यदर्शनग्रहः। (योगशा. स्वो. विव. २–१७)।

१ इस लोक सम्बन्धी और परलोक सम्बन्धी विषयों की अभिलाषा का नाम काङ्क्षा है। वह सम्यग्दर्शन का एक अतिचार है। २ बौद्धादि विभिन्न दर्शनों के ग्रहण को काङ्क्षा कहा जाता है। ५ अनार्जनादि के विचार का न छोड़ना, यह काङ्क्षा कहलाती है। यह मूर्छा का एक नामान्तर है।

कितव—कितवो द्यूतकारः। (नीतिवा. १४–१३)। जुआ खेलने वाले को कितव कहते हैं।

किन्नर—१. तत्र किन्नराः प्रियंगुश्यामाः सौम्याः सौम्यदर्शना मुखेष्वधिकरूपशोभा मुकुटमौलिभूषणा अशोकवृक्षध्वजा अवदाताः। (त. भा. ४–१२)। २. किन्नरनामकर्मोदयात् किन्नराः। (त. वा. ४, ११, ३)। ३. किन्नराः सौम्यदर्शना मुखेष्वधिकरूपशोभा मुकुटमौलिभूषणाः। (बृहत्सं. वृ. ५८)।

१ जिनकी ध्वजा में अशोक वृक्ष का चिह्न होता है, तथा जो प्रियंगु के समान कृष्णवर्ण, रमणीय, मुखों में अधिक शोभा से सम्पन्न और मुकुट से विभूषित होते हैं उन देवों को किन्नर कहते हैं।

किम्पुरुष—किम्पुरुषा ऊरु-बाहुष्वधिकशोभा मुखेष्वधिकभास्वरा विविधाभरणभूषणाश्चित्रस्रगानुलेपनाश्चम्पकवृक्षध्वजाः। (त. भा. ४–१२; बृहत्सं. मलय. वृ. ५८)।

ऊरु और भुजाओं में अधिक शोभा से सम्पन्न, मुख में अतिशय भास्वर, नाना प्रकार के आभरणों से भूषित, विविध वर्ण के पुष्पों की मालाओं के धारक एवं चम्पक वृक्ष की ध्वजा वाले देवों को किम्पुरुष कहते हैं।

किरात—अल्पाखिलशरीरावयवः किरातः। (नीतिवा. १४–१४)।

शरीर के थोड़े अंगों को ढांकने वाले मनुष्य को किरात कहते हैं।

किलिंकिंचित—१. स्मित-हसित-रुदित-भय-रोष-गर्व-दुःख-अभाभिलाषसंकरः किलिंकिंचितम्। (काव्यानुशासन ७, पृ. ३१२)। २. किलिंकिंचितं रोषभयाभिलाषादिभावानां युगपदसंकृत् करणम्। (रायप. मलय. वृ. पृ. १७)।

२ रोष, भय एवं अभिलाषा आदि भावों के संकर या मिश्रण को किलिंकिंचित कहते हैं।

किल्बिष—देखो किल्बिषिक। किल्बिषाश्चान्त्यजोपमाः। (त्रि. श. पु. च. २, ३, ७७४)।

जो देव अन्त्यज (घृणित, चाण्डाल या अस्पृश्य) आदि के समान हीन होते हैं वे किल्बिष कहे जाते हैं।

किल्बिषकर्मा—किल्बिषाणि—विलष्टतया निकृष्टान्यशुभानुबन्धीनि कर्माणि येषां ते किल्बिषकर्माणः। (उत्तरा. नि. शा. वृ. ५, पृ. १८३)।

पापबन्ध के कारणभूत घृणित कार्य के करने वाले देव किल्बिषकर्मा कहे जाते हैं।

किल्बिषिक—१. किल्बिषं पापं येषामस्ति ते किल्बिषिकाः। (त. सि. ४–४)। २. किल्बिषिका अन्तस्थस्थानीया इति। (त. भा. ४–४)। ३. अन्त्यवासिस्थानीयाः किल्बिषिकाः। किल्बिषं पापम्, तदेतेषामस्तीति किल्बिषिकाः। ते अन्त्यवासिस्थानीया मताः। (त. वा. ४, ४, १०)। ४. किल्बिषं पापम्, तदेषामस्तीति किल्बिषिकाः। (त. श्लो. ४–४)। ५. मताः किल्बिषमस्त्येषामिति किल्बि-

षिकामराः। बाह्याः प्रजा इव स्वर्गे स्वल्पपुण्योदितर्द्धयः॥ (भ. पु. २२–३०)। ६. किल्विषं पापं उदये विद्यते येषां ते किल्विषिकाः। (स्थाना. अभय. वृ. ३, ४, २०१, पृ. १५२)। ७. किल्विषं पापकर्म विद्यते येषां ते किल्विषिका अन्त्यजस्थानीयाः। (त. सुखबो. वृ. ४–४)। ८. किल्विषमशुभं कर्म, तद्वन्तः किल्विषिकाश्चाण्डालप्रायाः। (संग्रहणी दे. वृ. १, पृ. ५)। ९. तथा किल्विषमशुभकर्म, तदेषामस्तीति किल्विषिकाः, ते चाधमाश्चाण्डालप्राया अवगन्तव्याः। (बृहत्सं. मलय. वृ. २)। १०. किल्विषं पापं विद्यते येषां ते किल्विषिकाः। × × × किल्विषिका इति कोऽर्थः? वाहनादिकर्मसु नियुक्ताः दिवाकीर्तिसदृशाः। (त. वृत्ति श्रुत. ४–४)।

३ किल्विष नाम पाप का है, पाप से युक्त देव किल्विषिक कहलाते हैं। वे अन्त्यवासियों (चाण्डालों) के समान होते हैं।

किल्विषिकभावना (खिब्भिसियभावणा)— १. तित्थयराणं पडिणीओ संघस्स य चेइयस्स सुत्तस्स। अविणीदो णियडिल्लो किब्भिसियेसूववज्जेइ॥ (मूला. २–३०, पृ. ७०)। २. णाणस्स केवलीणं धम्मस्साइरियसव्वसाहूणं। माइय अवण्णवादी खिब्भिसियं भावणं कुणइ॥ (भ. आ. १८१; बृहत्क. नि. १३०२)। ३. तीर्थंकराणां प्रत्यनीकः संघस्य चैत्यस्य सूत्रस्य वा, अविनीतः मायावी च यः सः किल्विषकर्मभिः किल्विषिकेषु जायते। (मूला. वृ. २–३०, पृ. ७१)।

२ श्रुतज्ञान, केवली, धर्म, आचार्य और समस्त साधु; इनके विषय में मायायुक्त—यथार्थ भक्ति न होने पर भी बाह्य में विनयादि से संयुक्त—होकर दोष दिखलाना, यह किल्विषिक भावना है।

किष्कु (किक्कू)—१. द्विहस्तः किष्कुः। (त. वा. ३, ३८, ७)। २. × × × तद्-(हस्त-) द्वयं किष्कुरिष्यते॥ (ह. पु. ७–४५)। ३. वेहत्थेहि य किक्कू। (जं. दी. प. १३–३३)।

१ दो हाथ-प्रमाण माप को किष्कु कहते हैं।

कीर्ति—१. कीर्तनं संशब्दनं कीर्तिः। (त. वा. ८, ११, ३८)। २. दान-पुण्यफला कीर्तिः। (आ. प्र. २४; आव. मलय. वृ. १०८७)। ३. कीर्त्यन्ते जीवादयस्तत्त्वार्था यया सा कीर्तिः। (युक्त्यनु. टी. १)। ४. कीर्तिः गुणोत्कीर्तनरूपा। (प्रज्ञाप. मलय. वृ. २९३, पृ. ४७५)। ५. दानपुण्यकृतः साधुवादः कीर्तिः। (धर्मसंग्रहणी मलय. वृ. ६२१, पृ. २३४)।

२ दानजनित पुण्य के प्रभाव से जो अन्य जनों के द्वारा प्रशंसा की जाती है उसे कीर्ति कहते हैं।

३ जिसके द्वारा जीवादि पदार्थों का कीर्तन किया जाता है उसका नाम कीर्ति है।

कीर्तित— कीर्तितम्—भोजनवेलायाममुकं मया प्रत्याख्यातम्, तत् पूर्णमधुना भोक्ष्य इत्युच्चारणेन। (आव. नि. हरि. वृ. ६, १०, १५९३, पृ. ८५१)।

मैंने भोजन के समय अमुक वस्तु का प्रत्याख्यान किया था, वह पूर्ण हो चुका है, अब मैं उसे खाऊंगा; इस प्रकार उच्चारण द्वारा संकेत करने को कीर्तित कहा जाता है।

कीलिकासंहनन (खीलियसरीरसंघडण)— १. तदुभयमन्ते सकीलकं कीलिकासंहननम्। (त. वा. ८, ११, ९)। २. कीलिकानाम विना मर्कटबन्धेनास्थ्नोर्मध्ये कीलिकामात्रम्। (त. भा. सिद्ध. वृ. ८–१२)। ३. जस्स कम्मस्स उदएण अवज्जहड्डाइं खीलियाइं हवंति तं खीलियसरीरसंघडणं णाम। (धव. पु. ६, पृ. ७४); अवज्रकीलैः कीलित कीलितशरीरसंहननम्। (धव. पु. १३, पृ. ३७०)। ४. ऋषभनाराचवजं कीलिकाविद्धास्थिद्वयसंचितं कीलिकाख्यं पञ्चमम्। (कर्मस्त. गो. वृ. १०, पृ. १८)। ५. यस्य कर्मण उदयेन वज्रास्थीनि वज्रवेष्टनेन वेष्टितानि वज्रनाराचेनैव कीलितानि न भवन्ति तत्पञ्चमम् (कीलकसहननम्)। (मूला. वृ. १२–१९४)। ६. यत्रास्थीनि कीलिकामात्रबद्धानि तत्कीलिकाख्यं पञ्चमं सहननम्। (संग्रहणी दे. वृ. ११७, पृ. ५८; जीवाजी. मलय. वृ. १३, पृ. १५)। ७. यत्र त्वस्थीनि कीलिकामात्रबद्धान्येव भवन्ति तत्संहननं कीलिकाख्यम्। (प्रज्ञाप. मलय. वृ. २३–२९३, पृ. ४७२)। ८. यस्योदयाद् वज्रास्थीनि कीलितानि भवन्ति तत्कीलितशरीरसंहननम्। (गो. क. जी. प्र. ३३)। ९. उभयास्थिपर्यन्तकीलकसहितं कीलिकासंहननम्। (त. वृत्ति श्रुत. ८–११)।

१ नाराच और वलयबन्धन का अन्त में कीलों से सहित होना, यह कीलिकासंहनन कहलाता है।

२ मर्कटबन्ध (नाराचबन्ध) के बिना जो हड्डियों के

मध्य में कील मात्र होती हैं, उसे कीलिकासंहनन कहते हैं।

कुक्षि—देखो किष्कु। १. अडयालीसं अंगुलाइं कुच्छी। (व्याख्याप्र. ६-७, पृ. ८२६)। २. दो रयणीओ कुच्छी। (अनुयो. सू. १३३)। ३. रत्निद्वयं कुक्षिः। (अनुयो. सू. मल. हेम. वृ. १३३, पृ. १५८)।

१ अड़तालीस अंगुल अथवा रत्नि प्रमाण कुक्षि (एक क्षेत्रप्रमाण) होती है।

कुगुरु—१. सग्रन्थारम्भहिंसाः संसारावर्तवर्तिनः पाखण्डिनः कुगुरवः। (फलित लक्षण—रत्नक. १४)। २. सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः। अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु॥ (योगशा. २-६)। ३. कुगुरुः कुत्सिताचारः सशल्यः सपरिग्रहः। (लाटीसं. ४-१२३; पञ्चाध्यायी २-६०४)।

१ ग्रन्थ (परिग्रह) और आरम्भ से सहित पाखण्डी—वेषधारी साधु—कुगुरु कहलाते हैं। २ जो सब कुछ चाहते हैं, सब कुछ खाते हैं, परिग्रह से प्रसित रहते हैं, ब्रह्मचर्यविहीन होते हैं, और मिथ्या उपदेश दिया करते हैं; वे गुरु नहीं हो सकते—उन्हें अगुरु या कुगुरु जानना चाहिए।

कुञ्चितदोष—करामर्शोऽथ जान्वन्तः क्षेपः शीर्षस्य कुञ्चितम्। (अन. ध. ८-१०७)।

हाथ से शिर के आमर्श (स्पर्श) करने को कुञ्चित दोष कहते हैं। अथवा दोनों जंघाओं के मध्य में शिर के रखने को कुञ्चित दोष कहते हैं। यह ३२ वन्दनादोषों में २२वां दोष है।

कुड्य— जिणहरचरायदणाणं ठविदओलित्तीओ कुड्डा णाम। (धव. पु. १४, पृ. ४०)।

जिनगृह, घर और आयतन की स्थापित ओलित्तियां (?) कुड्य कहलाती हैं।

कुड्यदोष—१. कुड्यमाश्रित्य कायोत्सर्गेण यस्तिष्ठति तस्य कुड्यदोषः। (मूला. वृ. ७-१७१)। २. कुड्यमवष्टभ्य स्थानं कुड्यदोषः (योगशा. स्वो. विव. ३-१३०)।

१ कुड्य (भित्ति) का आलम्बन लेकर कायोत्सर्ग से स्थित होना, यह कुड्यदोष कहलाता है।

कुतर्क—अन्यथा सम्भवज्ञानं कुतर्को भ्रान्तिकारणम्। (प्रमाणसं. १५)।

अन्य प्रकार होने वाले तथा भ्रम के कारणभूत ज्ञान को कुतर्क कहते हैं।

कुत्सा— परकीयकुल-शीलादिदोषाविष्करणावक्षेपभर्त्सनप्रवणा कुत्सा। (त. वा. ८, ६, ४)।

दूसरे के कुल-शील आदि के विषय में दोष के प्रकट करने तथा उनके कार्य में विघ्न डालने व झिड़कने आदि को कुत्सा कहते हैं।

कुदृष्टि—१. मदि-सुदणाणबलेण दु सच्छंदं बोलए जिणुत्तमिदि। जो सो होइ कुदिट्ठी ×××॥ (रयणसार ३)। २. ××× कुदृष्टिर्यः स सप्तभिर्भयैर्युतः। (लाटीसं. ४-१८)।

१ जो अपने मति-श्रुतज्ञान के दर्प से जिनोक्त कह कर स्वच्छन्द कथन करे, उसे कुदृष्टि कहते हैं।

कुदेव—ये स्त्री-शस्त्राक्षसूत्रादिरागाद्यङ्ककलङ्किताः। निग्रहानुग्रहपरास्ते देवाः स्युर्न मुक्तये॥ (योगशा. २-६)।

जो राग-द्वेष-मोह के चिह्नभूत स्त्री, शस्त्र, अक्षसूत्र (अक्षमाला) और राग-द्वेषादि से कलंकित होकर दूसरों का निग्रह व अनुग्रह करने में तत्पर रहते हैं, वे देव नहीं हो सकते—वे कुदेव हैं—जो मुक्ति के कारण नहीं हो सकते।

कुधर्म—मिथ्यादृष्टिभिराम्नातो हिंसाद्यैः कलुषीकृतः। स धर्म इति वित्तोऽपि भवभ्रमणकारणम्॥ (योगशा. २-१३)।

मिथ्यादृष्टियों से प्रकथित होता हुआ जो हिंसादि पापाचरणों से मलिनता को प्राप्त है, वह मुग्धबुद्धियों में धर्मरूप में प्रसिद्ध होकर भी वस्तुतः धर्म नहीं है—कुधर्म है और वह संसारपरिभ्रमण का ही कारण है।

कुधर्मकांक्षा— रत्तवड-चरग-तावस-परिहत्तादीणमण्णतित्थीणं। धम्मम्हि य महिलासो कुधम्मकंखा हवदि एसा॥ (मूला. ५-५४)।

रक्तपट (वैभाषिक, सौत्रान्तिक, योगाचार और माध्यमिक), चरक (नैयायिक-वैशेषिक), तापस (कन्दमूलाहारी, जटाधारी साधु) और परिव्राजक (सांख्यमतावलम्बी) आदि अन्य तीर्थिकों के धर्म की अभिलाषा करने को कुधर्मकांक्षा कहते हैं।

कुन्थु—कुः पृथ्वी, तस्यां स्थितवानिति निरुक्तात् कुन्थुः, तथा गर्भस्थे जननी रत्नानां कुन्थुं राशिं दृष्टवतीति कुन्थुः। (योगशा. स्वो. विव. ३-१२४)। 'कु' नाम पृथिवी का है, सत्तरहवें तीर्थंकर भगवान्

कुन्थु चूंकि स्वर्ग से आकर उक्त पृथिवी पर स्थित हुए, अतः कुन्थु कहलाये। कुन्थु नाम राशि का भी है। कुन्थुनाथ की जननी ने उनके गर्भ में स्थित होते पर रत्नों की राशि को देखा था, इसलिए भी वे 'कुन्थु' के नाम से प्रसिद्ध हुए।

कुपात्र—१. जं रयणत्तयरहियं मिच्छामयकहिय-धम्मअणुलग्गं। जइ वि हु तवइ सुघोरं तहावि तं कुच्छियं पत्तं ॥ (भावसं. दे. ५३०)। २. चरति यश्चरणं परदुश्चरं विकटघोरकुदर्शनवासितः। निखिलसत्त्वहितोद्यतचेतनो वितथकर्कशवाक्यपराङ्मुखः ॥ धन-कलत्रपरिग्रहनिःस्पृहो नियमसंयमशील-विभूषितः। कृतकषाय-हृषीकविनिर्जयः प्रणिगदन्ति कुपात्रमिमं बुधाः ॥ (अमित. श्रा. १०, ३४-३५)। ३. कुपात्राय सम्यक्त्वरहितव्रत-तपोयुक्ताय ×× ×। (सा. ध. स्वो. टी. २-६७); निर्दर्शनं व्रतनिकाययुतं कुपात्रं ××× ॥ (सा. ध. २-६७ टिप्पण)।

२ जो घोर मिथ्यात्व के वशीभूत होकर दुष्कर तपश्चरण करते हैं; अहिंसा, सत्य, अस्तेय, ब्रह्मचर्य और अपरिग्रह व्रत को धारण करते हैं; नियम, संयम और शील से विभूषित हैं तथा कषायों एवं इन्द्रियों के जीतने वाले हैं; वे कुपात्र कहे जाते हैं।

कुप्य—१. कुप्यं क्षौम-कार्पास-कौशेय-चन्दनादि। (त. सि. ७-२९; त. वा. ७-२९; कार्तिके. टी. ३४०)। २. कुप्यं रूप्य-सुवर्णव्यतिरिक्तं कांस्य-लोह-ताम्र-सीसक-त्रपु-मृद्भाण्ड-त्वचिसार - विकारोदञ्चि-काष्ठमञ्चक-मञ्चिका-मसूरक-रथ-शकट-हलप्रभृति-द्रव्यम्। (योगशा. स्वो. विव. ३-९५)। ३. कुप्य-शब्दो धृताद्यर्थस्तद्भाण्डं भाजनानि वा ॥ (लाटीसं. ६-१०७)।

२ चांदी और सुवर्ण को छोड़कर कांसा, लोहा, तांबा, सीसा, रांगा और मिट्टी के बर्तन कुप्य कहलाते हैं। इसके अतिरिक्त बांस के विकारभूत, उदञ्चि, काष्ठ-मंचक (लकड़ी का मचान), मंचिका, मसूर, रथ, गाड़ी और हल आदि द्रव्यों को भी कुप्य कहा जाता है।

कुप्यप्रमाणातिक्रम—१. तथा कुप्यं आसन-शयनादि-गृहोपस्करः, तस्य यन्मानं तस्य पर्यायान्तरारोपणेनातिक्रमोऽतिचारो भवति। (अ. वि. सू. वृ. ३-२७)। २. कुप्यस्य भावतः संख्यातिक्रमो यथा-कुप्यस्य या संख्या कृता तस्याः कथञ्चिद् द्विगुणत्वे सति व्रतभङ्गभयाद् भावतो द्वयोर्द्वयोर्मीलनेन एकीकरणरूपात् पर्यायान्तरात् स्वाभाविकसंख्यावाधनात् संख्यामात्रपूरणाच्चातिचारः। अथवा भावतोऽभिप्रायादर्थित्वलक्षणाद् विवक्षितकालावधेः परतो ग्रहीष्यामि अतो नान्यस्मै देयमिति पराप्रदेयतया व्यवस्थापयतोऽतिचारः। (योगशा. स्वो. विव. ३-९६)। १ आसन और शय्या (पलंग आदि) आदि घर के उपस्कर (सामग्री) को कुप्य कहा जाता है। परिग्रहपरिमाणव्रत के भीतर गृहीत इस कुप्य के प्रमाण के उल्लंघन करने को कुप्यप्रमाणातिक्रम कहते हैं।

कुप्रावचनिक द्रव्यावश्यक—से किं तं कुप्पावयणिअं दव्वावस्सयं ?, २ जे इमे चरग-चीरिगचम्मखंडिय-भिक्खोंड-पंडुरंग-गोअम-गोव्वतिअ-गिहिधम्म-धम्मचिंतग-अविरुद्ध- विरुद्ध-वुड्ढ - सावगप्पभितओ पासंडत्था कल्लं पाउप्पभायाए रयणीए जाव तेअसा जलंते इंदस्स वा खंदस्स वा रुद्दस्स वा सिवस्स वा वेसमणस्स वा देवस्स वा नागस्स वा जक्खस्स वा भूअस्स वा मुगुंदस्स वा अज्जाए वा दुग्गाए वा कोट्टकिरियाए वा उवलेवण-संमज्जण-आवरिसण-धूव-पुप्फ-गंधमल्लाइआइं दव्वावस्सयाइं करेंति, से त कुप्पावयणिअं दव्वावस्सयं। (अनुयो. सू. २०)।

चरक, चीरिक, चर्मखण्डक, भिक्षोण्ड, पांडुरंग, गोतम, गोव्रतिक, गृहिधर्मा, धर्मचिन्तक, अविरुद्ध (वैनयिक), विरुद्ध (अक्रियावादी) वृद्ध (तापस) और श्रावक (ब्राह्मण) आदि (परिव्राजक आदि) विविध पाखण्डस्थ (व्रतस्थ) जनों के द्वारा प्रभात समय की विविध अवस्थाओं (कल्प, प्रादुःप्रभाता रजनी और सुविमला आदि—सूत्र १९)में जो इन्द्र, स्कन्द (कार्तिकेय), रुद्र, शिव, वैश्रवण, देव, नाग, यक्ष, भूत, मुकुन्द, आर्या, दुर्गा अथवा कोट्टक्रिया की—उनके आयतन की—उपलेपन, सम्मार्जन, आवर्षण, धूप, पुष्प और गन्धमाल्य आदि रूप से सेवा की जाती है; उसे कुप्रावचनिक द्रव्यावश्यक कहते हैं।

कुप्रावचनिक भावावश्यक (कुप्पावयणिअं भावावस्सयं)—से किं तं कुप्पावयणिय भावावस्सयं ?, २ जे इमे चरग-चीरिग जाव पासंडत्था इज्जंजलिहोम-जपोन्दुरुक्क-नमोक्कारमाइआइं भावा-

वस्सयाइं करेंति से तं कुप्पावयणिअं भावावस्सयं। (अनुयो. सू. २६)।

चरक व चीरिक आदि पूर्वोक्त (सू. २०) पाखण्डस्थ जनों के द्वारा जो इज्याञ्जलि—यागविषयक जलाञ्जलि अथवा गायत्री आदि के पाठपूर्वक सन्ध्यार्चन के समय किया जाने वाला नमस्कारादि, होम, जप, उन्दुरुक—मुंह से बैल आदि के समान शब्द करना—और नमस्कार आदि आवश्यक कार्य भावपूर्वक श्रद्धा के साथ किये जाते हैं, इसे कुप्रावचनिक भावावश्यक कहते हैं।

कुब्जकसंस्थान (खुज्जसरीरसंठाण)—१. पृष्ठदेशभाविबहुपुद्गलप्रचयविशेषलक्षणस्य निर्वर्तकं कुब्जकसंस्थाननाम। (त. भा. ८, ११, ८)। २. कुब्जस्य शरीरं कुब्जशरीरम्, तस्य कुब्जशरीरस्य संस्थानमिव संस्थानं यस्य तत्कुब्जशरीरसंस्थानम्। जस्स कम्मस्स-उदएण साहाणं दीहत्तं मज्झस्स रहस्सत्तं च होदि तस्स खुज्जसरीर-संठाणमिदि सण्णा। (धव. पु. ६,पृ. ७१); दीर्घशाखं कुब्जशरीरं, कुब्जशरीरस्य संस्थानं कुब्जशरीरसंस्थानम्। एतस्य यत्कारणं कर्म तस्याप्येतदेव नाम, कारणे कार्योपचारात्।(धव. पु. १३, पृ. ३६८)। ३. कुब्जस्य शरीरं कुब्जशरीरम्, तस्य संस्थानमिव संस्थानं यस्य तत्कुब्जशरीरसंस्थानम्। यस्योदयेन शाखानां दीर्घत्वं भवति तत्कुब्जशरीरसंस्थाननाम। (मूला. वृ. १२, १९३)। ४. तथा यत्र शिरोग्रीवं हस्त-पादादिकं च यथोक्तप्रमाणलक्षणोपेतं उर-उदरादि च मडभं तत् कुब्जकसंस्थानम्। (प्रज्ञाप. मलय. वृ. २१–२६८, पृ. ४१२)। ५. पृष्ठदेशे बहुपुद्गलप्रचयनिर्मापकं कुब्जकसंस्थाननाम। (त. वृत्ति श्रुत. ८–११)।

१ जिस नामकर्म के उदय से शरीर के पृष्ठभाग में बहुत पुद्गलसमूह हो, अर्थात् कुबड़ा शरीर हो, उसे कुब्जकसंस्थान कहते हैं।

कुब्जनाम—१. कुब्जनामस्वरूपं तु पुनः कन्धराया उपरि हस्त-पादं च समचतुरस्रलक्षणयुक्तं संक्षिप्तं विकृतमध्यकोष्ठं च कुब्जम्। (त. भा. हरि. व सिद्ध. वृ. ८–१२)। २. नाभीतः अधः आदिलक्षणयुक्तं संक्षिप्तविकृतमध्यं कुब्जम्, स्कन्धपृष्ठदेशवृद्धमित्यर्थः। (अनुयो. हरि. वृ. पृ. ५७)। ३. सिर-गीव-पाणि-पाए सुलक्खणं तं चउत्थं तु। (संग्रहणी १२१)। ४. यत्र शिरोग्रीवं हस्त-पादादिकं च यथोक्तप्रमाणलक्षणोपेतं उर-उदरादि च मण्डलं तत्कुब्जं संस्थानम्। (जीवाजी. मलय. वृ. १–३८, पृ. ४३)। ५. यत्र तु शिरोग्रीवा-पाणि-पादं विहाय शेषावयवेषु (स) लक्षणं भवति तत् कुब्जम्। (संग्रहणी हे. वृ. १२१)।

२ जिसका उदय होने पर नाभि के नीचे के अवयव लक्षणयुक्त—योग्य प्रमाण से युक्त—होते हैं, किन्तु मध्य का भाग संक्षिप्त व विकृत—पीछे का भाग वृद्धिगत—होता है उसे कुब्जनामकर्म कहते हैं।

कुभाषा—कीर-पारसिय-सिंघल-बब्बरियादीणं विणिग्गयाओ सत्तसयभेदभिण्णाओ कुभासाओ। (धव. पु. १३, पृ. २२२)।

कीर (कश्मीर), पारसी, सिंघल (लंकानिवासी) और बर्बरिक (किसान) आदि की निकली हुई सात सौ भाषायें कुभाषायें कही जाती हैं।

कुमतिज्ञान— मिथ्यादर्शनोदयसहचरितमाभिनिबोधिकज्ञानमेव कुमतिज्ञानम्। (पंचा. का. अमृत. वृ. ४१)।

मिथ्यादर्शन के उदय से संयुक्त आभिनिबोधिक ज्ञान को ही कुमतिज्ञान कहते हैं।

कुमार—१. कुमारवदेते कान्तदर्शनाः असुरकुमाराः [सुकुमाराः] मृदु-मधुर-ललितगतयः शृङ्गाराभिजातरूपविक्रियाः कुमारवच्चोद्धतरूप-वेष-भाषाभरण-प्रहरणावरणपातयानवाहनाः कुमारवच्चोल्वणरागाः क्रीडनपराश्चेत्यतः कुमारा इत्युच्यन्ते। (त. भा. ४–११)। २. कौमारवयोविशेषविक्रियादियोगात् कुमाराः। सर्वेषां देवानामवस्थितवयःस्वभावत्वेऽपि कौमारवयोविशेषस्वभावस्वरूपं विक्रिया च कुमारवदुद्धतवेष-भाषाऽऽभरण-प्रहरणावरण- यान-वाहनत्वं च उल्वणरागक्रीडनप्रियत्वं चेत्येतैर्योगात् कुमारा इति व्यपदिश्यन्ते। (त. वा. ४, १०, ७)।

१ जो देव कुमार (बालक) के समान देखने में सुन्दर, मधुर व मनोहर गमन करने वाले; शृङ्गार-युक्त कुलीन रूप व विक्रिया से सम्पन्न, कुमार के समान उद्धत रूप, वेषभूषा एवं भाषा आदि से सहित; उत्कट राग से परिपूर्ण और स्वभाव से क्रीडा में मग्न रहते हैं; वे कुमार (भवनवासी) कहलाते हैं।

कुमुद— चतुरशीतिकुमुदाङ्गशतसहस्राण्येकं कुमुदम्। (ज्योतिष्क. मलय. वृ. २–६८, पृ. ४०)।

चौरासी लाख कुमुदाङ्गों का एक कुमुद होता है।

कुमुदाङ्ग—चतुरशीतिमहाकमलशतसहस्राण्येकं कुमुदाङ्गम्। (ज्योतिष्क. मलय. वृ. २–६८, पृ. ४०)। चौरासी लाख महाकमलों का एक कुमुदाङ्ग होता है।

कुम्भक—१. निरुणद्धि स्थिरीकृत्य श्वसनं नाभिपङ्कजे। कुम्भवन्निर्भरः सोऽयं कुम्भकः परिकीर्तितः॥ (ज्ञानार्णव २-६५, पृ. २८५)। २. नाभिपद्मे स्थिरीकृत्य रोधनं स तु कुम्भकः। (योगशा. ५–७)। ३. कुम्भवत् कुम्भकं योगी श्वसनं नाभि-पङ्कजे। कुम्भकध्यानयोगेन सुस्थिरं कुरुते क्षणम्॥ (भावसं. वा. ६५८)।

१ वायु को जो नाभि-कमल में स्थिर करके रोका जाता है वह कुम्भ (घट) के समान परिपूर्ण होने से कुम्भक कहलाता है।

कुम्भमुद्रा—किञ्चिदाकुञ्चिताङ्गुलीकस्य वामहस्तो[स्तस्यो]परि शिथिलमुष्टिदक्षिणकरस्थापनेन कुम्भमुद्रा। (निर्वाणकलिका १६, १, २, पृ. ३१)। बायें हाथ की अंगुलियों को कुछ संकुचित करके उसके ऊपर दाहिने हाथ को रखकर ढीली मुट्ठी के बाँधने को कुम्भमुद्रा कहते हैं।

कुरुकुचा—१. ××× कुरुकुचा पादप्रक्षालनाचमनरूपा ×××। (ओघनि. वृ. ३१६)। २. देशतः सर्वतो वा शरीरस्य प्रक्षालनम्। (व्यव. सू. भा. मलय. वृ. पृ. ११७)।

१ पैरों के धोने और आचमन (कुल्ला) करने का नाम कुरुकुचा है।

कुल—१. दीक्षकाचार्यशिष्यसन्ततयः कुलम्। (त. सि. ६–२४)। २. कुलमाचार्यसन्ततिसंस्थितिः। (त. भा. ६–२४)। ३. दीक्षकाचार्यशिष्यसंस्त्यायः कुलम्। दीक्षकस्याचार्यस्य शिष्यसंस्त्यायः कुलव्यपदेशमर्हति। (त. वा. ६, २४, ६)। ४. कुलं पितृसमुत्थम्। (आव. नि. हरि. वृ. ८३१, पृ. ३४१)। ५. अपरे परिभाषन्ते ××× मात्रन्वयः कुलम्। (त. भा. सि. वृ. ३–१५)। ६. पितुरन्वयशुद्धिर्या तत्कुलं परिभाष्यते। (म. पु. ३६–८५)। ७. दीक्षकाचार्यसंस्त्यायः कुलम्। (त. लो. ६–२४)। ८. दीक्षकस्याऽऽचार्यस्य शिक्षस्याऽऽम्नायः कुलम्। (चा. सा. पृ. ६६)। ६. कुलं गच्छसमुदायः। (औपपा. अभय. वृ. २०, पृ. ४३)। १०. कुलं पितृपितामहादिपूर्वपुरुषवंशः। (ध. बि. सु. वृ. १–१२; योगशा. स्वो. विव. १–४७)। ११. कुलानि योनिप्रभवानि। तथा हि—यथैकस्मिन् छगणपिण्डे कृमीणां कीटानां वृश्चिकादीनां च बहूनि कुलानि भवन्ति तथैकस्यामपि योनौ विभिन्नजातीयानि प्रभूतानि कुलानि। (संग्रहणी दे. वृ. २५१–५२ उत्थानिका)। १२. कुलं पैतृकम्। (व्यव. मलय. वृ. ३, पृ. ११७); पितृपक्षः कुलम्। (व्यव. मलय. वृ. गा. १४१, पृ. १६)। १३. पितृसमुत्थं कुलम्। (आव. नि. मलय. वृ. ८३१)। १४. इह यैः नक्षत्रैः प्रायः सदा मासानां परिसमाप्तय उपजायन्ते माससदृशनामानि च तानि नक्षत्राणि कुलानीति प्रसिद्धानि। उक्तं च—मासाणं परिणामा हुंति कुला। (सूर्यप्र. मलय. वृ. १०, ५, ३७, पृ. १११)। १५. दीक्षकाचार्यशिष्यसंघातः कुलम्। (त. वृत्ति श्रुत. ६–२४; भावप्रा. टी. ७८)। १६. दीक्षकाचार्यशिष्यसंघातः कुलं वा स्त्री-पुरुषसंतानः कुलम्। (कार्तिके. टी. ४५६)।

१ दीक्षा देने वाले आचार्य की शिष्यपरम्परा को कुल कहते हैं। ६ पिता की वंशशुद्धि को कुल कहते हैं। ६ गच्छों के समुदाय को कुल कहा जाता है। १४ जिन नक्षत्रों के साथ मासों की समाप्ति होती है ऐसे मासों के समान नाम वाले नक्षत्र 'कुल' नाम से प्रसिद्ध हैं।

कुलकथा—उग्रादिकुलोत्पन्नानामन्यतमाया यत्प्रशंसादि सा कुलकथा। यथा—अहो चौलुक्यपुत्रीणां साहसं जगतोऽधिकम्। पत्युर्मृं(मृ)त्यौ विशन्त्यग्नौ या प्रेमरहिता अपि। (स्थानां. अभय. वृ. ४, २, २८२, पृ. १६६)।

उग्र आदि (हरिवंश, इक्ष्वाकु आदि) कुलों में उत्पन्न हुई स्त्रियों में किसी एक की जो प्रशंसा आदि की जाती है उसे कुलकथा कहते हैं। जैसे—चौलुक्य पुत्रियों का साहस स्तुत्य है, जिसके बल पर वे पति के मर जाने पर अग्नि में प्रवेश करती हैं—सती हो जाती हैं।

कुलकर—१. कुलकरणम्मि य कुसला कुलकरणामेण सुपसिद्धा। (ति. प. ४–५०६)। २. प्रजानां जीवनोपायमननान्मनवो मताः। आर्याणां कुलसं-

स्त्यायकृते: कुलकरा इमे ॥ कुलानां धारणादेते मता कुलधरा इति । युगादिपुरुषा प्रोक्ता युगादौ प्रभविष्णव: ॥ (म. पु. ३, २११-१२; लो. वि. ५, १२०-२१)।

१ कर्मभूमि के प्रारम्भ में जो कुलों की व्यवस्था करने में कुशल होते हैं उन्हें कुलकर कहते हैं। ऐसे कुलकर वर्तमान में प्रतिश्रुति आदि नाभिराय पर्यन्त १४ हुए हैं।

कुलकरगंडिका — इहैकवक्तव्यतार्थाधिकारानुगता गण्डिका उच्यन्ते, तासमनुयोग: अर्थकथनविधि: गण्डिकानुयोग: । तथा चाह—गंडियाणुयोगे णमित्यादि । तत्थ कुलगरगंडियासु कुलगराणं विमलवाहणादीणं पुव्वजम्मणामादि कहिज्जइ । (नन्दी. हरि. वृ. पृ. १०६)।

जो एक वक्तव्यता अर्थाधिकार से अनुगत होती हैं वे गण्डिका कहलाती हैं। उनके अनुयोग—कथन की विधि—को गण्डिकानुयोग कहा जाता है। कुलकरगण्डिकाओं में विमलवाहन आदि कुलकरों के पूर्व जन्म के नाम आदि का निरूपण होता है।

कुलचर्या— लब्धवर्णस्य तस्येति कुलचर्याऽनुकीर्त्यते । सात्विज्यादत्तिवार्तादिलक्षणा प्राक् प्रपञ्चिता ॥ विशुद्धा वृत्तिरस्यार्यषट्कर्मानुप्रवर्तनम् । गृहिणां कुलचर्येष्टा कुलधर्मोऽप्यसौ मत: ॥ (म. पु. ३८, १४२-४३) । आर्यषट्कर्मवृत्ति: स्यात् कुलचर्याऽस्य पुष्कला ॥ (म. पु. ३९-७२) ।

वर्णसंस्कार हो जाने के पश्चात् पूजा करने, दानादि देने तथा अपने कुल के अनुसार असि-मषि आदि छह कर्मों द्वारा आजीविका करने को कुलचर्या कहते हैं। इसे कुलधर्म भी कहा जाता है।

कुलमानवशार्तमरण—कुलेन रूपेण बलेन श्रुतेन ऐश्वर्येण लाभेन प्रज्ञया तपसा वा आत्मानमुत्कर्षयतो मरणमपेक्ष्य विख्याते विशाले उन्नते कुले समुत्पन्नोऽहमिति मन्यमानस्य मृति: कुलमानवशार्तमरणम् । (भ. आ. विजयो. २५, पृ. ८९)।

कुल आदि से अपने को उन्नत करने वाला अपने मरण की अपेक्षा करके 'मैं लोकविख्यात विशाल उन्नत कुल में उत्पन्न हुआ हूं', इस प्रकार की अहंकार भावना के साथ जो मरण को प्राप्त होता है, इसे कुलमानवशार्तमरण कहते हैं।

कुलमाषक्षेत्र—कुल्माषक्षेत्रं नाम यत्र कुलत्थ-मुद्ग-माष-राजमाषादीनि कोषधान्यानि विशेषेण निष्पद्यन्ते । (प्रायश्चित्तस. टी. १३६)।

कुलथी, मूंग, उड़द और बरबटी आदि विदल धान्य जिस क्षेत्र में विशेषरूप से उत्पन्न हों उसे कुल्माषक्षेत्र कहते हैं।

कुव्यापारनिषेधपोषध—कुव्यापारनिषेधपोषधस्तु देशत एकतरस्य कस्यापि कुव्यापारस्याकरणम्, सर्वतस्तु सर्वेषामपि कृषि-सेवा-वाणिज्य-पाशुपाल्य-गृहकर्मादीनामकरणम् । (योगशा. स्वो. विव. ३, ८५, पृ. ५११) ।

कुव्यापारनिषेधपोषध वह है जिसमें एक देशरूप में किसी एक ही कुव्यापार—सावद्यव्यापार—को छोड़ा जाता है; तथा सर्वदेशरूप में कृषि, सेवा वाणिज्य, पशुपालन और गृहकार्य आदि सभी व्यापारों को छोड़ा जाता है।

कुशल—१. कुशलं सुखनिमित्तम् । (आ. भी. वसु. वृ. ८)। २. कुशलं मिलितानां सुख-दु:खतद्वार्ता-प्रश्न: । (प्रश्नव्या. अभय. वृत्ति पृ. १९३) ।

१ सुख के कारणभूत पुण्य कर्म को कुशल कहते हैं। २ मिलने वाले लोगों से परस्पर में सुख-दु:खविषयक समाचार के पूछने को कुशल कहते हैं।

कुशलभाव—कुशलो भावो ज्ञानादिरूप: । (व्यव. मलय. वृ. १-३९, पृ. १६)।

जीव का जो प्रतिसेवकपने का परिणाम होता है उसे भावरूप प्रतिसेवना कहते हैं। यह भाव कुशल और अकुशल (अविरति आदिरूप) के भेद से दो प्रकार का है। उनमें समीचीन ज्ञानादिरूप भाव को कुशलभाव कहते हैं।

कुशलमूलनिर्जरा—परिषहजये कृते कुशलमूला या शुभानुबन्धा निरनुबन्धा चेति । (स. सि. ९-७; त. वा. ९, ७, ७) ।

परीषहों को जीतने पर जो कर्मों की निर्जरा होती है उसे कुशलमूला निर्जरा कहते हैं, क्योंकि वह पूर्वकर्मों की निर्जरा के साथ कुशल अर्थात् पुण्यबन्ध की मूल कारण है तथा बन्ध की निरोधक भी है।

कुशील—१. जाति कुले गणे या कम्मे सिप्पे तवे सुए चेव । सत्तविहं आजीयं उवजीवति जो कुशीलो उ ॥ (व्यव. ३, पृ. ११७)। २. अष्टादशसहस्रभेदं

शीलं तदुत्तरगुणभङ्गेन केनचित् कषायोदयेन वा कुत्सितं येषां ते कुशीलाः। (त. भा. हरि. व सिद्ध. वृ. ६-४८)। ३. कुत्सितशीलः कुशीलः।×××नैवम्, लोकप्रकटकुत्सितशीलः इति विवेकोऽत्र ग्राह्यः। (भ. आ. विजयो. १९५०)। ४. कुशीलः शीलविकलः। (प्रायश्चित्तस वृ. २२६)। ५. क्रोधादिकषायकलुषितात्मा व्रत-गुण-शीलैः परिहीणः संघस्यानयकारी कुशीलः। (आ. सा. पृ. १३)। ६. ×××स्यात्कुशीलकः। संघाहितकरस्तीव्रकषायो व्रतवर्जितः॥ (आचा. सा. ६-५०)। ७. कुशीलो जात्या जीवनादिपरो भिन्नाचारः। (व्यव. मलय. वृ. ३-१६५, पृ. ३५)। ८. मूलोत्तरगुणविराधनात् संज्वलनकषायोदयाद्वा कुत्सितं शीलं चारित्रं यस्य स कुशीलः। (प्रव. सारो. वृ. ७२५, पृ. २११)।

१ जो जातिविषयक, कुलविषयक, गणविषयक, कर्मविषयक, शिल्पविषयक, तपविषयक और श्रुतविषयक; इन सात आजीविकाओं का आश्रय लेता है, उसे कुशील कहते हैं। २ जो अठारह हजार भेदभूत शील को उत्तरगुण की विराधना अथवा किसी कषाय के उदय से मलिन किया करते हैं, वे कुशील कहलाते हैं। ६ जो साधु लोक प्रसिद्ध कुत्सित शील से—संघ के लिए अहितकर कषाय से—सहित हो, उसे कुशील कहते हैं।

कुशीलता—कुशीलता दुःस्वभावता उपस्थसंयमाभावो वा। (योगशा. स्वो. विव. २-८४, पृ. ३५३)।

दुष्टस्वभावता या स्पर्शन इन्द्रियविषयक संयम के अभाव को कुशीलता कहते हैं।

कुशूल—प्रमाणांगुलपरिमितयोजनायामविष्कम्भावगाहानि त्रीणि पल्यानि, कुशूल इत्यर्थः। (त. वा. ३, ३८, ८)।

प्रमाणांगुल से निष्पन्न एक योजन प्रमाण लम्बे व चौड़े और उतने अवगाह वाले पल्यों को (गर्तों को) कुशूल कहते हैं।

कुश्रुतज्ञान—मिथ्यादर्शनोदयसहचरितं श्रुतज्ञानमेव कुश्रुतज्ञानम्। (पंचा. का. अमृत. वृ. ४१)।

मिथ्यादर्शन के उदय से सहचरित श्रुतज्ञान को कुश्रुतज्ञान कहते हैं।

कुहनकुशील—इन्द्रजालादिभियों जनं विस्मापयति सोऽभिधीयते कुहनकुशीलः। (भ. आ. विजयो. टी. १९५०)।

इन्द्रजाल आदि के द्वारा मनुष्यों को विस्मित करने वाले साधु को कुहनकुशील कहते हैं।

कूट—१. कूटयते दह्यते अमुना परः परिणामान्तरेणेति कूटम्, सत्त्वग्रहणं च कूटम्, तद्वत् परिणामः। (त. भा. सिद्ध. वृ. ८-१०, पृ. १४३)। २. काकुंदुरादिधरणट्ठमोद्दिदं कूडं णाम। (धव. पु. १३, पृ. ३४); मेरु-कुलसेल-विंझ-सज्झादिपव्वया कूडाणि णाम। (धव. पु. १४, पृ. ४९५)। ३. मत्स्यकच्छप-मूषकादिग्रहणार्थमवष्टब्धं काष्ठादिमयं कूटम्। (गो. जी. म. प्र. व जी. प्र. टी. ३०३)।

१ जिस परिणाम के द्वारा दूसरा कूटा या जलाया जाता है—उसे कष्ट में डाला जाता है—उसे कूट कहा जाता है। यह माया कषाय का एक नामान्तर है। २ कौवा और चूहा आदि पकड़ने के लिये जो उपकरणविशेष रचा जाता है, उसका नाम कूट है। मेरु-कुलाचल, सह्य और विन्ध्य आदि पर्वतों के ऊपर अवस्थित शिखरविशेष भी कूट कहलाते हैं।

कूटग्राह—कूटेन जीवान् गृह्णातीति कूटग्राहः। (विपाक. अभय. वृ. २, पृ. २२)।

कूट से—पिंजरा आदि उपकरणविशेष से—जीवों को जो पकड़ा करता है उसे कूटग्राह कहते हैं।

कूटतुला-मान—कूटतुला-कूटमाने—तुला प्रतीता, मान कुडवादि, कूटत्वं न्यूनाधिकत्वम्—न्यूनया ददाति अधिकया गृह्णाति। (आ. प्र. टी. २६८)।

तुला (तराजू या कांटा) और नापने के बांटों को हीन-अधिक रखना—हीन से देना और अधिक से लेना, यह कूटतुला-मान नाम का एक अचौर्याणुव्रत का अतिचार है।

कूटयुद्ध—अन्याभिमुखं प्रमाणकमुपक्रम्यान्योपघातकरणं कूटयुद्धम्। (नीतिवा. ३०-१०)।

किसी अन्य शत्रु की ओर आक्रमण के लिए कुछ प्रस्थान करके लौट आना और दूसरे शत्रु का घात करना, इसे कूटयुद्ध कहा जाता है।

कूटलेख—देखो कूटलेखक्रिया। तथा कूटमसद्भूतम्, तस्य लेखो लेखनं कूटलेखः—अन्यस्वरूपाक्षर-मुद्राकरणम्। (योगशा. स्वो. विव. ३-९१)।

बनावटी लेख लिखना—दूसरे के हस्ताक्षर बनाना या मुहर आदि का अंकित करना, इसका नाम कूटलेख है।

कूटलेखकरण—कूटलेखकरणमन्यमुद्राक्षर-बिम्बस्वरूपलेखकरणम्। (आ. प्र. टी. २६३)।

देखो कूटलेख।

कूटलेखक्रिया—देखो कुटलेखकरण। १. अन्येनानुक्तं यत्किंचित् परप्रयोगवशादेवं तेनोक्तमनुष्ठितमिति वंचनानिमित्तं लेखनं कूटलेखक्रिया। (स. सि. ७–२६; चा. सा. पृ. ५; रत्नक. टी. ३–१०; सा. ध. स्वो. टी. ४–४५)। २. परप्रयोगादन्यानुक्तपद्धतिकर्म कूटलेखक्रिया। अन्येनानुक्तं किंचित् परप्रयोगवशात् एवं तेनोक्तं अनुष्ठितमिति वंचनानिमित्तलेखनं कूटलेखक्रिया। (त. वा. ७, २६, ३)। ३. कूटम् असद्भूतम्, लिख्यत इति लेखः, तस्य करणं क्रिया, कूटलेखक्रिया—कूटलेखकरणम्, अन्यमुद्राक्षरबिम्बस्वरूपलेखकरणमित्यर्थः। (आव. नि. हरि. वृ. ३, पृ. ८२१)। ४. कूटलेखक्रियान्येन त्वनुक्तस्य स्वलेखनम्। (ह. पु. ५८–१६७)। ५. परप्रयोगादन्यानुक्तपद्धतिकर्म कूटलेखक्रिया, एवं तेनोक्तमनुष्ठितं चेति वंचनाभिप्रायलेखनवत्। (त. श्लो. ७–२६)।। ६. कूटलेखस्य असद्भूतार्थसूचकाक्षरलेखनस्य करणं कूटलेखक्रिया। (ब. वि. मु. वृ. ३, २४)। ७. कूटलेखक्रिया × × × अन्यसरूपाक्षरमुद्राकरणमित्यन्ये। (सा. ध. स्वो. टी. ४–४५)। ८. केनचित् पुंसा अकथितम् अश्रुतं किंचित्कार्यं द्वेषवशात्परपीडार्थम् एवमनेनोक्तमेवमनेन कृतम्, इति परवंचनार्थं यत् लिख्यते राजादौ दर्श्यते सा कूटलेखक्रिया, पैशुन्यमित्यर्थः। (कार्तिके. टी. ३३३ व ३३४)। ९. कूटलेखक्रिया सा स्यात् वञ्चनार्थं लिपिर्मुषा। (लाटीसं. ६–२०)।

१ दूसरे के द्वारा जो नहीं कहा गया है उसे किसी दूसरे की प्रेरणा से कहना कि उसने ऐसा कहा है या किया है, इसे कूटलेखक्रिया कहते हैं। यह एक सत्याणुव्रत का अतिचार है।

कूटसाक्षिक—कूटसाक्षिकं उत्कोच-मत्सराभिभूतः प्रमाणीकृतः सन् कूटं वक्तीति। (आ. प्र. टी. २६०)।

लांच या मात्सर्यभाव आदि के वश होकर असत्य भाषण करना—जैसे मैं इस विषय में साक्षी हूं, यह कूटसाक्षिक नामक सत्याणुव्रत का अतिचार है।

कूटसाक्ष्य—देखो कूटसाक्षिक। कूटसाक्ष्यं प्रमाणीकृतस्य लञ्चा-मत्सरादिना कूटं वदतः, यथाहमत्र साक्षी। अस्य च परकीयपापसमर्थकत्वलक्षणविशेषमाश्रित्य पूर्वेभ्यो भेदेनोपन्यासः। (योगशा. स्वो. विव. २–५४; सा. ध. स्वो. टी. ४–३९)।

ईर्ष्याभाव से अथवा लांच (रिश्वत) लेकर प्रमाणीकृत व्यक्ति के द्वारा झूठी गवाही देने को कूटसाक्ष्य कहते हैं।

कूर्मोन्नत योनि—१. कुम्मुण्णयजोणीए तित्थयरा दुविहचक्कवट्टी य। रामा वि य जायंते × × ×॥ (मूला. १२–६२; गो. जी. ८२)। २. कुम्मुण्णदजोणीए तित्थयरा चक्कवट्टिणो दुविहा। बलदेवा जायंते × × ×॥ (ति. प. ४–२९५२)। ३. कूर्मोन्नतयोनौ विशिष्टसर्वशुचिप्रदेशे शुद्धपुद्गलप्रचये वा × × ×। (मूला. वृ. १२–६२)। ४. कूर्मपृष्ठमिवोन्नता कूर्मोन्नता। (संग्रहणी. दे. वृ. २५५, पृ. ११५)। ५. कूर्मपृष्ठवदुन्नता योनिः कूर्मोन्नतयोनिः। (गो. जी. म. प्र. टी. ८२)।

१ जिस योनि से तीर्थंकर, नारायण, प्रतिनारायण, चक्रवर्ती और बलदेव उत्पन्न होते हैं वह कूर्मोन्नत योनि कही जाती है। ५ जो योनि कछुए की पीठ के समान उन्नत होती है, उसे कूर्मोन्नता योनि कहते हैं।

कृत—१. जं किंचि तिसु वि कालेसु अण्णत्तो णिप्पण्णं तं कदं णाम। (धव. पु. १३, पृ. ३५०)। २. स्वातंत्र्यविशिष्टेन आत्मना यत् क्रियते प्रक्रियते तत् कृतम्। (भ. आ. विजयो. टी. ८११)। ३. स्वातंत्र्यविशिष्टेनात्मना यः [यत्] प्रादुर्भावितं तत्कृतम्। (चा. सा. पृ. ३९)। ४. × × × स्वेन कृतं कृतम्। (आचा. सा. ५–१४)।

१ तीनों कालों में जो कुछ अन्य से उत्पन्न हुआ है उसका नाम कृत है। २ जो स्वतंत्रता से अपने द्वारा कार्य किया जाता है उसे कृत कहते हैं।

कृतक—देखो कृतकत्व। स्वोत्पत्तौ अपेक्षितव्यापारो हि भावः कृतक उच्यते। (प्रमेयर. ३–३५)।

कृतज्ञ—कृतं परोपकृतं जानाति, न निह्नुते कृतज्ञः। (योगशा. स्वो. विव. १–५५; सा. ध. १–११)।

जो दूसरेके द्वारा किये गये उपकार का स्मरण रखता है—उसे भूलता नहीं है—उसे कृतज्ञ कहा जाता है।

कृतप्रतिकृतिका—१. कयपडिकइया णाम जइवि निज्जरत्थं करेइ ततोऽवि मम एस कारेहिति त्ति

कडं विणयं करेइ। (दशवै. चू. १, पृ. २८)।
२. कृतप्रतिकृतिनाम—प्रसन्ना आचार्याः सूत्रादि दास्यन्ति, न नाम निर्जरेति मन्यमानस्याहारादिदानम्। (समवा. अभय. वृ. ९१)।
२ आचार्य प्रसन्न होकर सूत्र आदि (अर्थ व उभय) देंगे, उससे कुछ निर्जरा होने वाली नहीं है। इस प्रकार मानने वाले का जो आहारादि दान है उसे कृतप्रतिकृति नामक औपचारिकविनय जानना चाहिए।

कृतयुग—जेण य जुगं निविट्ठं पुहईए सयलसत्तसुहजणणं। तेण उ जगम्मि घुट्ठं तं कालं कयजुगं णाम॥ (पउमच. ३–११८)।
ऋषभ जिनेन्द्र के समय में चूंकि समस्त प्राणियों को सुखोत्पादक युग प्रविष्ट हुआ, अतः उस काल को 'कृतयुग' के नाम से घोषित किया गया।

कृतयुग्म— १. चदुहि अवहिरिज्जमाणे जम्हि रासिम्हि चत्तारि ट्ठांति तं कदजुम्मं। (धव. पु. ३, पृ. २४९); जो रासी चदुहि अविहिरिज्जदि सो कदजुम्मो। (धव. पु. १०, पृ. २२); चदुहि अवरिज्जमाणे × × × जत्थ चत्तारि एंति तं कदजुम्मं। (धव. पु. १४, पृ. १४७)।
चार का भाग देने पर जिस संख्या में चार अवस्थित रहें, अर्थात् चार से जो अपहृत हो जाती है व शेष कुछ नहीं रहता, उसे कृतयुग्म राशि कहते हैं।

कृतयुग्मकल्योज—जे णं रासी चउक्कएणं अवहारेणं अवहीरमाणे एगपज्जवसिए जे णं तस्स रासिस्स अवहारसमया कडजुम्मा, से तं कडजुम्मकलिओगे। (भगवती. ४, ३५, १, २)।
जिस राशि को चार से भाजित करने पर एक शेष रहे और अपहार के समय कृतयुग्म हों, वह कृतयुग्मकल्योजराशि कहलाती है। जैसे—१७÷४=४, शेष १)।

कृतयुग्मकृतयुग्म राशि— जे णं रासी चउक्कएणं अवहारेणं अवहीरमाणे चउपज्जवसिए, जे णं तस्स रासिस्स अवहारसमया ते वि कडजुम्मा, से तं कडजुम्मकडजुम्मे। (भगवती ४, ३५, १, २, पृ. ३३८।
जिस राशि को चार भागहार से भाजित करने पर चार शेष रहें और जिसके अपहारसमय कृतयुग्म हों, वह कृतयुग्मकृतयुग्म राशि कहलाती है। जैसे—१६÷४=४.

कृतयुग्मत्र्योज—जे णं रासी चउक्कएणं अवहारेणं अवहीरमाणे तिपज्जवसिए जे णं तस्स रासिस्स अवहारसमया कडजुम्मा, से तं कडजुम्मतेयोए। (भगवती. ४, ३५, १, २, पृ. ३३८)।
जिस राशि को चार भागहार से भाजित करने पर तीन शेष रहें और अपहारसमय कृतयुग्म हों, वह कृतयुग्मत्र्योज राशि कहलाती है। जैसे—१९÷४=४, शेष ३.

कृतयुग्मद्वापरयुग्म—जे णं रासी चउक्कएणं अवहारेणं अवहीरमाणे दुपज्जवसिए जे णं तस्स रासिस्स अवहारसमया कडजुम्मा, से तं कडजुम्मदावरजुम्मे। (भगवती ३५, १, १, पृ. ३३९)।
जिस राशि को चार भागहार से भाजित करने पर दो शेष रहें, और अपहारसमय कृतयुग्म हों, वह कृतयुग्मद्वापरयुग्म राशि कही जाती है। जैसे—१८÷४=४, शेष २।

कृति—१. एष कृतिशब्दः कर्तृवर्जितेषु त्रिकालगोचराशेषकारकेषु वर्तते × × ×। (ध. पु. ९, पृ. २३८); जो रासी वग्गिदो संतो बड्ढदि, सगवग्गादो सगवग्गमूलमवणिय वग्गिज्जमाणो वुड्ढिमल्लियइ, सो कदी णाम। (धव. पु. ९, पृ. २७४); तिण्णि आदिं कादूण जा उक्कस्साणंते त्ति गणणा कदि त्ति भण्णदे। वुत्तं च—एयादीया गणणा दोआदीया विजाण संखेत्ति। तीयादीणं णियमा कदि त्ति सण्णा दु बोद्धव्वा॥ (धव. पु. ९, पृ. २७६)।
२. तीयादीणं णियमा कदि त्ति सण्णा मुणेदव्वा। (त्रि. सा. १६)।
कर्ता को छोड़कर शेष सभी कारकों को कृति कहा जाता है। जो राशि वर्गित होकर वृद्धिंगत होती है और अपने वर्ग में से वर्गमूल को कम करके वर्गित करने पर वृद्धि को प्राप्त होती है वह कृति कहलाती है। इस लक्षण के अनुसार ३ को आदि लेकर आगे की सभी संख्याओं को कृति के अन्तर्गत समझना चाहिए। १ का वर्ग करने पर चूंकि वृद्धि नहीं होती है तथा २ का वर्ग करके व उसमें से वर्गमूल को कम करके पुनः वर्ग करने पर वृद्धि नहीं होती है (२ × २=४; ४–२=२)। अतः १ व २ संख्या को कृति नहीं कहा जा सकता है।

कृतिकर्म—१. किदियम्मं अरहंत-सिद्ध-आइरिय-बहुसुदसाहूणं पूजाविहाणं वण्णेइ। (धव. पु. १,

पु. ९७); किदियम्मं अरहंत-सिद्धाइरिय-उवज्झाय-गणचिंतय-गणवसहाईणं कीरणमाणपूजाविहाणं वण्णेदि। (षव. पु. ९, पृ. १८९)। २. जिणसिद्धायरिय-बहुसुदेसु वंदिज्जमाणेसु जं कीरइ कम्मं तं किदियम्मं णाम। तस्स आदाहीण-तिक्खुत्त-पदाहिण-तिओणद-चदुसिर-बारसावत्तादिलक्खणं विहाणं फलं च किदियम्मं वण्णेदि। (जयध. १, पृ. ११८)। ३. किदिकम्मं—क्रियाकर्म श्रुतभक्त्यादिपूर्वकायोत्सर्गः। (मूला वृ. ५-१८५)। ४. कृतिकर्म साधुविश्रामणारूपं बहुफलं बाहुबलमकार्षीत्। (आव. नि. मलय. वृ. १७४, पृ. १६०)। ५. दीक्षाग्रहणादेः प्रतिपादकं कृतिकर्म। (श्रुतभक्ति टी. २४)। ६. कृतेः क्रियायाः कर्म विधानं अस्मिन् वर्ण्यते इति कृतिकर्म। तत् अर्हत्सिद्धाचार्य-बहुश्रुत-साध्वादीनां नवदेवतानां वन्दनानिमित्तं आत्माधीनता-प्रादक्षिण्य-त्रिवार-त्र्यवनति-चतुःशिरोद्वादशावर्तादिलक्षणनित्य-नैमित्तिकक्रियाविधानं वर्णयति। (गो. जी. जी. प्र. टी.३६७)। ७. दीक्षा-शिक्षादिसत्कर्मप्रकाशकं कृतिकर्म। (त. वृत्ति श्रुत. १-२०)।

२ जिन, सिद्ध, आचार्य और बहुश्रुत (उपाध्याय) की वन्दना करते हुए जो क्रिया की जाती है उसका नाम कृतिकर्म है। इस कृतिकर्म में जो स्वाधीन होकर तीन प्रदक्षिणा, तीन अवनति, चार शिरोनति और बारह आवर्त स्वरूप अनुष्ठान किया जाता है उसके प्ररूपक शास्त्र को भी कृतिकर्म कहा जाता है। ४ साधुजन की विश्रामणा—पादमर्दनादिरूप वैयावृत्य—को कृतिकर्म कहा जाता है।

कृतिकर्म (स्थितिकल्प) — १. चरणस्थेनापि विनयो गुरूणां महत्तरणां शुश्रूषा च कर्तव्येति पंचमः कृतिकर्मसंज्ञितः स्थितिकल्पः। (भ. आ. विजयो. ४२१)। २. कृतिकर्म पंचनमस्काराः षडावश्यकानि निषेधिका चेति त्रयोदशक्रियाः। गुरुविनय-महत्तरशुश्रूषाकरणं वा। (भ. आ. मूला. टी. ४२१)।

१ स्वयं चारित्र का धारक हो करके भी गुरु जनों की विनय और महापुरुषों की शुश्रूषा करना, यह कृतिकर्म नाम का पांचवां स्थितिकल्प है।

कृती—१. ज्ञानविवेकतो विमलीकृतहृदयाः कृतिनः। (गच्छाचि. पृ. २४०)। २. कृती निःशेषहेयोपादेयतत्त्वे विवेकसम्पन्नः। (रत्नक. टी. ७)।

२ समस्त हेय और उपादेय तत्त्व के विषय में जो विवेक रखता है वह कृती कहलाता है।

कृतुपद—१. कृतोद्वाहः कृ(ऋ)तुप्रदाता कृतुपदः। (नीतिवा. ५-१२)। २. यो ब्रह्मचारी कृतोद्वाहः सन् ऋतुकालाभिगामी केवलं सन्तानाय भवति स कृत[तु]पदसंज्ञो भवति। तथा च वर्गः—सन्तानाय न कामाय यः स्त्रियं कामयेदृतौ। कृतुपदः स सर्वेषामुत्तमोत्तमसर्ववित्॥ (नीतिवा. टी. ५-१२)।

जो ब्रह्मचारी विवाह करके भी केवल सन्तानोत्पत्ति के लिए ऋतुकाल में स्त्री का सेवन करता है उसे कृतुपद ब्रह्मचारी कहते हैं।

कृत्रिम मित्र— यद्वृत्तिजीवितहेतोराश्रितं तत्कृत्रिमं मित्रम्। (नीतिवा. २३-४, पृ. २१७)।

जिसकी प्रवृत्ति (व्यवहार) आजीविका के आश्रित हो वह कृत्रिम मित्र कहलाता है।

कृत्रिम शत्रु—१. विरोधो विरोधयिता वा कृत्रिमः शत्रुः। (नीतिवा. २९-३४)। २ कारणेन निर्वृत्तः कृत्रिमः। यः क्षत्रुर्विरोधो भवति यस्य विरोधो क्रियते स विरोध उच्यते, शत्रुर्यः पुनर्विजिगीषोरुपेत्य विरोधं करोति सोऽप्यकृत्रिमः शत्रुः। (नीतिवा. टी. २९-३४, पृ. ३२१)।

विरोध (जिसका विरोध किया जाय) अथवा विरोधयिता (विरोध करने वाले) व्यक्ति को कृत्रिम शत्रु कहते हैं।

कृपा—× × ×सा तु जीवानुकम्पनम्। (क्षत्रचू. ५-३५)।

जीवों के ऊपर दयाभाव रखने—उनकी पीड़ा के दूर करने—को कृपा कहते हैं।

कृमिराग—१. एवं मणुयादिरुहिरं घेत्तुं किणावि जोगेण जुत्तं भायणसंपुडंमि तविज्जति, तत्थ किमी उप्पज्जति, ते वाताभिलासिणो छिद्दनिग्गता इती ततो य आसण्णं भमंति, तेसि णीहारलाला किमिरागपट्टो भण्णति, सो सपरिणामं रंगरंगितो चेव भवति। अण्णे भणंति—जहा रुहिरे उप्पन्ना किमितो तत्थेव मलेत्ता कोसट्ठं उत्तारेत्ता तत्थ रसे किंपि जोगं पक्खिवित्ता वत्थं रयंति सो किमिरागो भण्णति। (अनुयो. चू. पृ. १५)। २ कृमिरागे वृद्धतम्प्रदायोऽयम्—मनुष्यादीनां रुधिरं गृहीत्वा केनापि योगेन युक्तं भाजने स्थाप्यते, ततस्तत्र कृमय उत्पद्यन्ते, ते च वाताभिलाषिणः छिद्रनिर्गता आसन्ना

भ्रमन्तो निर्हारिलाला मुञ्चन्ति ताः कृमिसूत्रं भण्यते। तच्च स्वपरिणामरागरञ्जितमेव भवति। अन्ये भणन्ति—ये रुधिरे कृमय उत्पद्यन्ते तान् तत्रैव मृदित्वा कचवरमुत्तार्य तद्रसे कश्चिद् योगं प्रक्षिप्य पट्टसूत्रं रञ्जयन्ति। स च रसः कृमिरागो भण्यते अनुत्तारीति, तत्र कृमीणां रागो रञ्जकरसः कृमिरागः। (स्थानां. अभय. वृ. ४, २, २९३,)। १ मनुष्य आदि के रुधिर को लेकर और उसे किसी योग से युक्त करके पात्र में तपाया जाता है। तब उसमें कृमि (विशेष जाति के कीड़े) उत्पन्न होते हैं। वे वायुकी अभिलाषा से छिद्रों द्वारा निकलकर इधर उधर पास में घूमते हैं। उनके मल और लार को कृमि-रागपट्ट कहा जाता है। वह अपने परिणाम के अनुसार रंग में रंगा हुआ ही होता है। दूसरे कुछ आचार्य इस प्रकार कहते हैं—उक्त रुधिर में जो कीड़े उत्पन्न होते हैं, उन्हें वहीं मल कर व कोसट्ट उतार कर—कचूमर निकाल कर—उस रस में कुछ योग को मिलाते हुए जो वस्त्र को रंगा जाता है, उसे कृमिराग कहते हैं।

कृमिरागकम्बल—१. कृमिभुक्ताहारवर्णतन्तुभिरुतः कम्बलः कृमिरागकम्बलः। (भ. आ. विजयो. टी. ५६७)। २. कृमिभुक्ताहारवर्णतन्तुभिरुतः कम्बलः कृमिरागकम्बलस्तस्येति संस्कृतटीकायां व्याख्यानम्। टिप्पणके तु कृमि[कृमिभि]रात्यक्तरक्ताहाररंजिततन्तुनिष्पादितकम्बलस्येति। प्राकृतटीकायां पुनरिदमुक्तम्—उत्तरापथे चर्मरंगम्लेच्छविषये म्लेच्छा जलौकाभिर्मानुषरुधिरं गृहीत्वा भंडकेषु स्थापयन्ति ततस्तेन रुधिरेण कतिपयदिवसोत्पन्नविपन्नकृमिकेणोर्णासूत्रं(?)रंजयित्वा कम्बलं वयन्ति, सोऽयं कृमिरागकम्बल इत्युच्यते। (भ. आ. मूला. टी. ५६७)। २ कीड़ों के द्वारा खाये गये भोजन के वर्ण वाले तन्तुओं से जो कम्बल बनाया जाता है, उसे कृमिरागकम्बल कहते हैं। ×××प्राकृत टीका में कहा गया है कि उत्तरापथ में चर्मरंग म्लेच्छदेश में म्लेच्छ जौकों के द्वारा मनुष्यों का रक्त निकाल कर उसे बर्तन में कुछ दिनों तक रखते हैं। जब उसमें रक्त वर्ण के कीड़े पड़ जाते हैं, तब उसके द्वारा सूत को रंग कर जो कम्बल बुना जाता है उसे कृमिरागकम्बल कहते हैं।

कृषिकर्म—कृषिर्भूकर्षणे प्रोक्त×××। (म. पु. १६–१८१)।

भूमि को जोतकर खेती करने को कृषिकर्म कहते हैं।

कृषिकर्मार्य— १. हल-कुलिदन्तालकादिकृष्युपकरणविधानविदः कृषीबलाः कृषिकर्मार्याः। (त. भा. ३, ३६, २)। २. हलेन भूमिकर्षणनिपुणः कृषिकर्मार्यः। (त. वृत्ति श्रुत. ३–३६)।

जो हल, कुलिक (एक विशेष जाति का हल—बरवर) और हंसिया आदि खेती के उपकरणों के विधान को जानते हैं वे कृषिकर्मार्य कहलाते हैं।

कृष्टि (किट्टी)—१. गुणसेढि अणंतगुणा लोभादी कोधपच्छिमपदादो। कम्मस्स य अणुभागे किट्टीए लक्खणं एदं॥ (कसायपा. सु. १६५, पृ. ८०७)। २. किसं कम्मं कदं जम्हा तम्हा किट्टी। एदं लक्खणं। (कसायपा. चूर्णि पृ. ८०८)। ३. पूर्वापूर्वस्पर्धकस्वरूपेणेष्टकापंक्तिसंस्थानसंस्थितं योगमुपसंहृत्य सूक्ष्म-सूक्ष्माणि खण्डानि निवर्तयति, ताओ किट्टीओ णाम वुच्चंति। (जयध. अ. प. १२४१)। ४. कर्शनं कृष्टिः, कर्मपरमाणुशक्तेस्तनूकरणमित्यर्थः। अथवा कृष्यते तनूक्रियते इति कृष्टिः प्रतिसमयं पूर्वस्पर्द्धकजघन्यवर्गणाशक्तेरनन्तगुणहीनशक्तिवर्गणा कृष्टिरिति। (ल. सा. टी. २८४)।

३ पूर्व पूर्व स्पर्द्धक स्वरूप से ईंटों की पंक्ति के आकार में स्थित योग का उपसंहार करके जो सूक्ष्म-सूक्ष्म खण्ड किये जाते हैं उन्हें कृष्टि कहते हैं।

कृष्टिकरणाद्धा— तिस्से कोधवेदगद्धाए तिण्णि भागा—जो तत्थ पढमतिभागो अस्सकरणकरणद्धा, विदियतिभागो किट्टीकरणद्धा। (ध. पु. ६, पृ. ३७४; लब्धि. ४६)।

कोधवेदकाल का द्वितीय त्रिभाग कृष्टिकरणाद्धा कहलाता है।

कृष्टिवेदगद्धा—कोधवेदगद्धाए तदियतिभागो किट्टिवेदगद्धा। (ध. पु. ६, पृ. ३७४)।

कोधवेदन का जितना काल है उसका तृतीय त्रिभाग—तीन भागों में से अन्तिम भाग—कृष्टिवेदन का काल है।

कृष्णपक्ष—कृष्णपक्षो यत्र ध्रुवराहुः स्वविमानेन चन्द्रविमानमावृणोति, तेन योऽन्धकारबहुलः पक्षः स बहुलपक्षः। (जम्बूद्वी. शा. वृ. १५२)।

जिस पखवाड़े में ध्रुवराहु अपने विमान से चन्द्र के विमान को आवृत करता है, उस अन्धकारवाले

पखवाड़े को कृष्ण पक्ष कहते हैं। उसे यहां बहुल पक्ष के नाम से कहा गया है।

कृष्णपाक्षिक—१. जेसिमवड्ढो पुग्गलपरियट्टो सेसओ उ संसारो। ते सुक्कपक्खिआ खलु अहिए पुण किन्हपक्खीया ॥ (आ. प्र. ७२)। २. इतरे दीर्घसंसारभाजिनः कृष्णपाक्षिकाः। (जीवाजी. मलय. वृ. ५६, पृ. ७२)। ३. अधिकतरसंसारभाजिनस्तु कृष्णपाक्षिकाः। उक्तं च—अहिए पुण कण्हपक्खी उ। (प्रज्ञाप. मलय. वृ. ३-५६, पृ. ११७)।

२ दीर्घ काल तक संसार में परिभ्रमण करने वाले जीवों को कृष्णपाक्षिक कहते हैं।

कृष्णलेश्या (द्रव्य)—जीमूयनिद्धसंकासा गवलरिट्ठगसन्निभा। खंजंजणनयणनिभा किण्हलेस्सा उ दण्णओ ॥ (उत्तरा. ३४-४)।

कृष्ण मेघ, भैंस का सींग, कौवा अथवा रीठा (फलविशेष), खंजन पक्षी और (आंख के अंजन) के समान कृष्णलेश्या का वर्ण होता है।

कृष्णलेश्या (भाव)—१. चंडो ण मुयइ वेरं भंडणसीलो य धम्मदयरहिओ। दुट्ठो ण य एइ वसं लक्खणमेयं तु किण्हस्स। (पंचसं. १-१४४; धव. पु. १, पृ. १८८ उद्.; धव. पु. १६, पृ. ४९० उद्.; गो. जी. ५०९)। २. अनुनयानभ्युपगमोपदेशाग्रहण-वैरामोचनातिचण्डत्व-दुर्मुखत्व-निरनुकम्पता-क्लेशन-मारणापरितोषणादि कृष्णलेश्यालक्षणम्। (त. वा. ४, २२, १०, पृ. २३९)। ३. तत्राविशुद्धोत्पन्नमेव कृष्णवर्णस्तत्सम्बद्धद्रव्यावष्टम्भादविशुद्धपरिणाम उपजायमानः कृष्णलेश्येति व्यपदिश्यते। (त. भा. सिद्ध. वृ. २-६)। ४. कसायाणुभागफद्दयाणमुदयमागदाणं जहण्णफद्दयप्पहुडि जाव उक्कस्सफद्दया त्ति ठइदाणं छब्भागविहत्ताणं छट्ठो तिव्वतमो भागो, तस्सुदएण जादकसाओ किण्णलेस्सा णाम। (धव. पु. ७, पृ. १०४); मिच्छत्तासंजम-कसाय-जोगजणिदो तिव्वतमो जीवसंसकारो भावलेस्सा णाम। तत्थ × × × जो तिव्वतमो सा किण्णलेस्सा। (धव. पु. १६, पृ. ४८८); किण्णलेस्साए परिणदजीवो णिद्दयो कलहसीलो रउद्दो अणुवद्धवेरो चोरो चप्पलओ परदारियो महु-मंस-सुरापसत्तो जिणसासणे अदिण्णकण्णो असंजमे मेरु व्व अविचलियसरूवो होदि। (धव. पु. १६, पृ. ४९८)। ५. निर्दयो निरनुक्रोशो मद्य-मांसादिलम्पटः। सर्वदा कदनासक्तः कृष्णलेश्यो मतो जनः ॥ (पंचसं. अमित. १-२७३)।

५ निर्दयी, क्रूरस्वभावी, मद्य-मांसादि का लम्पटी और युद्ध में आसक्त रहना; ये सब कृष्णलेश्या के लक्षण हैं।

कृष्णलेश्यारस—जह कडुयतुंबगरसो निंबरसो कडुयरोहिणिरसो वा। इत्तो वि अणंतगुणो रसो उ कण्हाइ नायव्वो ॥ (उत्तरा. ३४-१०)।

कडुवी तुम्बी, नीम और रोहिणी (औषधिविशेष) के रस से भी अनन्तगुणा रस कृष्णलेश्या का होता है।

कृष्णवर्णनाम—१. जस्स कम्मस्स उदएण सरीरपोग्गलाणं किण्णवण्णो उप्पज्जदि तं किण्णवण्णं णाम। (धव. पु. ६, पृ. ७४)। २. यस्य कर्मण उदयेन शरीरपुद्गलानां कृष्णवर्णता भवति तत्कृष्णवर्णनाम। (मूला. वृ. १२-१९४)।

१ जिस नामकर्म के उदय से शरीरगत पुद्गलपरमाणुओं का वर्ण काला हो, उसे कृष्णवर्ण नामकर्म कहते हैं।

केतुक्षेत्र—केतुक्षेत्रमाकाशोदकपातनिष्पाद्यसस्यम्। (योगशा. स्वो. वृ. ३-९५; सा. ध. स्वो. टी. ४, ६४)।

जिन खेतों में केवल वर्षा के जल से ही अन्न उत्पन्न होता है उन खेतों को केतुक्षेत्र कहते हैं।

केवलज्ञान—१. तं च केवलणाणं सगलं संपुण्णं असवत्तं। (ष. खं. ५, ५, ८१—पु. १३, पृ. ३४५), सइं भयवं उप्पण्णणाण-दरसी सदेवासुर-माणुसस्स लोगस्स आगदिं गदिं चयणोववादं बंधं मोक्खं इड्ढिं ट्ठिदिं जुदिं अणुभागं तक्कं कलं माणो माणसियं भुत्तं कदं पडिसेविदं आदिकम्मं अरहकम्मं सव्वलोए सव्वजीवे सव्वभावे सम्मं समं जाणदि पस्सदि विहरदि त्ति। (ष. खं. ५,५, ८२—पु. १३, पृ. ३४६)। २. असवत्तसयलभावं लोयालोएसु तिमिरपरिचत्तं। केवलमखंडमेदं केवलणाणं भणंति जिणा। (ति. प. ४-९७४)। बाह्येनाभ्यन्तरेण च तपसा यदर्थमर्थिनः मार्गं केवन्ते सेवन्ते तत्केवलम्, असहायमिति वा। (स. सि. १-९)। ४. क्षायिकमनन्तमेकं त्रिकालसर्वार्थयुगपदवभासम्। सकलसुखधाम सततं वन्देऽहं केवलज्ञानम् ॥ (भुतभक्ति २९, पृ. १८१)। ५.

स्याद्वादकेवलज्ञाने सर्वतत्त्वप्रकाशने । (आ. मी. १०५)। ६. सपुण्णं तु समग्गं केवलमसवत्त सव्वभावगयं। लोयालोयविदिमिरं केवलणाणं मुणेदव्वं ॥ (प्रा. पंचसं. १–१२६; धव. पु. १, पृ. ३६० उद्धृ; गो. जी. ४६०)। ७. तद्धि सर्वभावग्राहकं समिल्लोकालोकविषयम्, नातः परं ज्ञानमस्ति । न च केवलज्ञानविषयात् परं किञ्चिदन्यज्ज्ञेयमस्ति । × ×× केवलं परिपूर्णं समग्रमसाधारणं निरपेक्षं विशुद्धं सर्वभावज्ञापकं लोकालोकविषयमनन्तपर्यायमित्यर्थः । (त. भा. १-३०) । ८. केवलणाणावरणक्खयजायं केवलं ××× (सन्मति. २-५, पृ. ६०६); सयलमणावरणमणंतमक्खयं केवलं जम्हा। (सन्मति. २–१७)। ९. सव्वदव्वाण पज्जोगवीससामीससा जहाजोग्गं । परिणामा पज्जाया जम्मविणासादओ सव्वे ॥ तेसिं भावो सत्ता सलक्खणं व विसेसओ तस्स । णाणं विण्णत्तीए कारणं केवलण्णाणं ॥ किं बहुणा सव्वं सव्वओ सया सव्वभावओ नेयं । सव्वावरणाईयं केवलमेगं पयासेइ ॥ पज्जायओ अणंतं सासयमिदं च सदोवओगाओ । अव्वयओऽपडिवाई एगविहं सव्वसुद्धीए ॥ (विसेवा. ८२८–३१)। १०. बाह्याभ्यन्तरक्रियाविशेषान् यदर्थं केवन्ते तत्केवलम् । तपःक्रियाविशेषान् वाङ्मानसकायाश्रयान् बाह्यानाभ्यन्तरांश्च यदर्थमर्थिनः केवन्ते सेवन्ते तत्केवलम् । (त. वा. १, ९, ६)। सकलज्ञानावरणपरिक्षयविजृम्भितं केवलज्ञानं युगपत्सर्वार्थविषयम् । (अष्टश. १०१)। ११. पंकसलिले पसाओ, जह होइ कमेण तह इमो जीवो । आवरणे झिज्जंते, विशुज्झए केवलं जाव ॥ दव्वादिकसिणविसयं केवलमेगं तु केवलन्नाणं । अणिवारियवावारं अणंतभविकप्पियं नियतं ॥ (बृहत्क. ३७–३८) । १२. अह सव्वदव्वपरिणामभावविन्नतिकारणमणंतं । सासयमप्पडिवाइ एगविहं केवलण्णाणं ॥ (आव. नि. ७७; धर्मसं. ८२७)। १३. केवलमित्येकं स्वभेदरहितं, शुद्धं वा सकलावरणशून्यम्, सकलं वा आदित एव सम्पूर्णम्, असाधारणं वा मत्यादिविकलम्, अनन्तं वा सर्वद्रव्यभावपरिच्छेदि ज्ञानं केवलज्ञानम् । (त. भा. हरि. वृ. १–९)। १४. केवलमसहायं मत्यादिज्ञाननिरपेक्षम्, शुद्धं वा केवलं तदावरणकर्ममलकलङ्काङ्कुरहितम्, सकलं वा केवलं तत्प्रथमतयैव अशेषतदावरणाभावतः सम्पूर्णोत्पत्तेः, असाधारणं वा केवलं, यथावस्थिताशेषभूतभवद्-भाविभावस्वभाववभासीति भावना, केवलं च तज्ज्ञानं चेति समासः । (आव. नि. हरि. वृ. १, पृ. ८; नन्दी. हरि. वृ. १–६५) । १५. केवलणाणं णाम सव्वदव्वाणि अदीदाणागद-वट्टमाणाणि सपज्जयाणि पच्चक्खं जाणदि । (धव. पु. १, पृ. ९५); केवलं केवलज्ञानम् । ××× केवलमसहायमिन्द्रियालोकमनस्कारनिरपेक्षम् । (धव. पु. १, पृ. १९१); साक्षात् त्रिकालगोचराशेषपदार्थपरिच्छेदक केवलज्ञानम् । (धव. पु. १, पृ. ३५८); अनन्तत्रिकालगोचरबाह्येऽर्थे प्रवृत्तं केवलज्ञानम् । (धव. पु. १, पृ. ३८५); केवलमसहायमिंदियालोयणिरवेक्खं तिकालगोयराणंतपज्जायसमवेदाणंतवत्थुपरिच्छेदयमसंकुडियमसवत्तं केवलणाणं । (धव. पु. ६, पृ. २९); परावभासः केवलज्ञानम् । (धव. पु. ६, पृ. ३४); वज्झत्थप्पसेसत्थागमो केवलणाणं । (धव. पु. १०, पृ. ३१९); अप्पट्ठसण्णिहाणमेत्तेणुप्पज्जमाणं तिकालगोयरासेसदव्व-पज्जयविसयं करणक्कमववहाणादीदं सयलपमेएण अलद्धत्थाहं पच्चक्खं विणासविवज्जियं केवलणाणं । (धव. पु. १३, पृ. २१३); केवलणावरणक्खएण समुप्पण्णं णाणं केवलणाणं । (धव. पु. १४, पृ. १७) । १६. केवलमसहायं इन्द्रियालोक-मनस्कारनिरपेक्षत्वात् । (जयध. १, पृ. २१); आत्मार्थव्यतिरिक्तसहायनिरपेक्षत्वाद्वा केवलमसहायम्, केवलं च तज्ज्ञानं च केवलज्ञानम् । (जयध. १, पृ. २३); णाहचउक्कक्खएण लद्धप्पसरूवविसईकयतिकालगोयरासेसदव्वपज्जय-करणट्ठम (-णक्कम) ववहाणाईयं खइयसम्मत्ताणंतसुह-विरियविरइ-केवलदंसणाविणाभावि केवलणाणं णाम । (जयध. १, पृ. ४३)। १७. क्षायोपशमिकज्ञानासहायं केवलं मतम् । यदर्थमर्थिनो मार्गं केवन्ते वा तदिष्यते ॥ (त. श्लो. १, ९, ८); केवलं सकलज्ञेयव्यापि स्पष्टं प्रसाधितम् । प्रत्यक्षमक्रमं तस्य निबन्धो विषयेष्विह ॥ बोध्यो द्रव्येषु सर्वेषु पर्यायेषु च तत्त्वतः । प्रक्षीणावरणस्यैव तदाविर्भावनिश्चयात् ॥ (त. श्लो. १, २९, १–२) । १८. सकलमतीन्द्रियप्रत्यक्षं केवलज्ञानम्,सकलमोहक्षयात् सकल-

ज्ञान-दर्शनावरण-वीर्यान्तरायक्षयाच्च समुद्भूतत्वात् सकलवैशद्यसद्भावात् सकलविषयत्वाच्च । (प्रमाण-व. पु. ६६) । १६. सर्वप्रत्यक्षमन्त्यं स्यात् केवलावरणक्षयात् । अक्षयं केवलज्ञानं केवलं विश्वगोचरम् ॥ (हि. पु. १०–१५४) । २०. केवलं सकलज्ञेयग्राहि समस्तज्ञानावरणक्षयप्रभवम् । (त. भा. सिद्ध. वृ. २–४) । २१. असहायं स्वरूपोत्थं निरावरणमक्रमम् ॥ घातिकर्मक्षयोत्पन्नं केवलं सर्वभावगम् । (त. सा. १, ३०–३१) । २२. केवलज्ञान-दर्शनावरणकर्मक्षयाविर्भूतं करणक्रमव्यवधानातिवर्ति-सकललोकाकोकविषयत्रिकालस्वभावपरिणामभेदानन्तपदार्थयुगपत्सामान्य-विशेषसाक्षात्करणप्रवृत्तं केवलज्ञानं केवलदर्शनमिति च व्यपदिश्यते । (सन्मति. अभय. वृ. ३०, पृ. ६२१) । २३. यत्सकलावरणात्यन्तक्षये केवल एव मूर्तामूर्तद्रव्य सकलं विशेषेणावबुध्यते तत्स्वाभाविकं केवलज्ञानम् । (पंचा. का. अमृत. वृ. ४१) । २४. तत्र द्रव्य क्षेत्र-काल-भाव-करणक्रमव्यवधानाभावे युगपदेकस्मिन्नेव समये त्रिकालवर्तिसर्वद्रव्य-गुण-पर्यायावभासक केवलज्ञानम् । (चा. सा., पृ. ६५) । २५. साक्षात्कृताखिलद्रव्य-पर्यायमविपर्ययम् । अनन्तं केवलज्ञान कल्मषक्षयसम्भवम् ॥ (पंचसं. अमित. १–२२६) । २६. तथैव निजशुद्धात्मतत्त्वसम्यक्श्रद्धान-ज्ञानानुचरणलक्षणकाग्र्यध्यानेन केवलज्ञानावरणादिघातिचतुष्टयक्षये सति यत्समुत्पद्यते तदेव समस्तद्रव्य-क्षेत्र-काल-भावग्राहकं सर्वप्रकारोपादेयभूतं केवलज्ञानमिति । (बृ. द्रव्यसं. ५); पूर्वं छद्मस्थावस्थायां भावितस्य निर्विकारस्वसंवेदनज्ञानस्य फलभूतं युगपल्लोकालोक-समस्तवस्तुगतविशेषपरिच्छेदकं केवलज्ञानम् । (बृ. द्रव्यसं. १४) । २७. सकलं तु तत्प्रत्यक्ष प्रक्षीणाशेषघातिमलसमुन्मीलितं सकलवस्तुयाथात्म्यवेदि निरतिशयवैशद्यालकृत केवलज्ञानम् । (प्रमाणनि. पृ. २६) । २८. जगत्त्रय-कालत्रयवर्तिसमस्तपदार्थ-युगपत्प्रत्यक्षप्रतीतिसमर्थमविनश्वरमखण्डैकभासमयं केवलज्ञानम् । (प्रव. सा. जय. वृ. १–२३) । २९. अशेषद्रव्यपर्यायविषयं विश्वलोचनम् । अनन्तमेकमत्यक्षं केवलं कीर्तितं बुधैः ॥ कल्पनातीतमभ्रान्तं स्वपरार्थावभासकम् । जगज्ज्योतिरसंदिग्धमनन्त सर्वदोदितम् ॥ अनन्तानन्तभागेऽपि यस्य लोकश्चराचरः । अलोकश्च स्फुरत्युच्चैस्तज्ज्योतिर्योगिना मतम् ॥ (ज्ञानार्णव ८–१०, पृ. १०५) । ३०. त्रिकालानन्तधर्मात्मानन्तवस्तुप्रकाशकम् । युगपत्केवलं ज्योतिः करणावरणातिगम् ॥ क्षणं प्रत्यक्षरं ज्ञेयैः समं विपरिवर्तते । तदेकमुपमातीतं परमानन्दमन्दिरम् ॥ (आत्मा. सा. ४, ५६-५७) । ३१. जगत्त्रयकालत्रयवर्तिपदार्थयुगपद्विशेषपरिच्छित्तिरूपं केवलज्ञानं भण्यते । (परमात्मप्र. टी. ६१) । ३२. त्रिकालगतानन्तपर्यायपरिणतजीवाजीवद्रव्याणां युगपत् साक्षात्करणं केवलज्ञानं अखिलावरण-वीर्यान्तरायनिरवशेषविश्लेषविजृम्भितम् । (लघी. अभय. वृ. ६–११) । ३३. अशेषद्रव्यपर्यायविषयं विश्वलोचनम् । अनन्तमेकमत्यक्षं केवलज्ञानमुच्यते ॥ (योगशा. स्वो. विव. १–१६, पृ. ११६ उद्.; त्रि. श. पु. च. १, ३, ५८४); घातिक्षये चानन्तमनन्तविषयं निःशेषभावाभावस्वभावावभासक केवलज्ञानम् । (योगशा. स्वो. विव. ३–१२४) । ३४. तथा केवलमेकं मत्यादिज्ञाननिरपेक्षत्वात् "नट्ठमि उ छाउमत्थिए नाणे" इति वचनात् । शुद्धं वा केवलम्, तदावरणमलकलंकविगमात् । सकलं वा केवलम्, प्रथमत एवाशेषतदावरणविगमतः सपूर्णोत्पत्तेः । असाधारणं वा केवलमनन्यसदृशत्वात् । अनन्तं वा केवलम् ज्ञेयानन्तत्वात् । केवलं च तत् ज्ञानम् । (प्रज्ञाप. मलय. वृ. २९-३१२, पृ. ५२७) । ३५. × × × मत्यादिनिरपेक्षं केवलज्ञानं, अथवा शुद्धं केवलं तदावरण-मलकलङ्कस्यानवयवशोऽपगमात्, सकलं वा केवलं प्रथमत एवाशेषतदावरणविगमतः सम्पूर्णोत्पत्तेः, असाधारणं वा केवलमनन्यसदृशत्वात्, अनन्तं वा केवल ज्ञेयानन्तत्वात् । केवलं च तत् ज्ञान च केवलज्ञानम्, यथावस्थिताशेषभूत-भवद्भाविभावस्वभावभासि ज्ञानमिति भावः । (आव.नि. मलय. वृ. १, पृ. १७; धर्मसं. मलय. वृ. ८१६; षडशीति मलय. वृ. १५, पृ. १६; प्रव. सारो. सि. वृ. १२५३) । ३६. केवलज्ञानं तु सकलवस्तुस्तोमपरिच्छेदकं सर्वोत्तमम् । (नन्दी. मलय. वृ. पृ. ७१) । ३७. केवलं सम्पूर्णज्ञेयविषयत्वात्, सम्पूर्णं तच्च तद्ज्ञानं च केवलज्ञानमिति । (अनुयो. मल. हेम. वृ. पृ. २)। ३८. सकलं तु सामग्रीविशेषतः समुद्भूतसमस्तावरणक्षयापेक्षं निखिलद्रव्य-पर्यायसाक्षात्कारिस्वरूपं केवलज्ञानम् । (प्र. न. त. २–२३) । ३९. सामग्री सम्यग्दर्शनादिलक्षणाऽन्तरङ्गा, बहिरङ्गा तु जिनकालिकमनुष्य-

भवादिलक्षणा, ततः सामग्रीविशेषात् प्रकर्षप्राप्त-सामग्रीतः समुद्भूतो यः समस्तावरणक्षयः सकल-घातिसंघातविघातस्तदपेक्षं सकलवस्तुप्रकाशस्वभावं केवलज्ञानं ज्ञातव्यम् । (रत्नाकरा. २-२३, पृ. ७२)। ४०. सकलप्रत्यक्षस्य केवलज्ञानलक्षणस्य सकलद्रव्य-पर्यायसाक्षात्करणं स्वरूपम् । (सप्तभं. पृ. ४७)। ४१. उक्तं च—दव्वसुयादो भावं भावादो होइ सव्वसण्णाणं । संवेयणसंविद्धि केवलणाणं तदो भणिओ ॥ (द्रव्यस्व. पृ. १११ उद्.)। ४२. बाह्येन अभ्यन्तरेण च तपसा मुनयो मार्गं केवन्ते सेवन्ते तत् केवलम्, असहायत्वाद्वा केवलम् । (त. वृत्ति श्रुत. १–६) । ४३. तद्यथा क्षायिकं ज्ञानं सार्थं सर्वार्थ-गोचरम् । शुद्धं स्वजातिमात्रत्वादबद्ध निरुपाधितः ॥ यत्पुनः केवलज्ञानं व्यक्तं सर्वार्थभासकम् । स एव क्षायिको भावः कृत्स्नस्वावरणक्षयात् ॥ (पञ्चाध्यायी २-१२० व ९९५) । ४४. सव्वावरणविमुक्कं लोयालोयप्पयासयं णिच्चं । इंदियकमपरिमुक्कं केवलणाणं णिरावाहं ॥ (अंगप. ३–७५. पृ. २९१)।

६ जो ज्ञान केवल—मतिज्ञानादि से रहित (असहाय), परिपूर्ण, असाधारण (अनुपम), अन्य की अपेक्षा से रहित, विशुद्ध, समस्त पदार्थों का प्रकाशक और अलोक के साथ समस्त लोक का ज्ञाता है; उसे केवलज्ञान कहा जाता है ।

केवलज्ञानावरण—१. एदस्स (केवलणाणस्स) आवरणं केवलणाणावरणीयं । (धव. पु. ६, पृ. ३०); एदस्स (केवलणाणस्स) आवरणं ज कम्मं तं केवलणाणावरणीयं णाम । (धव. पु. १३, पृ. २१३)। २. लोयालोयगएसुं भावेसुं जं गयं महाविमलं । तं आवरियं जेण केवलआवरणयं तं पि ॥ (कर्मवि. ग. १७) ।

२ जो कर्म लोक और अलोकगत सर्व तत्त्वों के प्रत्यक्ष दर्शक और अतिशय निर्मल केवलज्ञान का आवरण करता है उसे केवलज्ञानावरण कहते हैं ।

केवलदर्शन—१. तह दंसणं पि जुज्जइ नियआवरणक्खए संते । (सम्मति. २–५) । २. बहुविह-बहुप्पयारा उज्जोवा परिमियम्मि खेत्तम्मि । लोगा-लोगवितिमिरो सो केवलदंसणुज्जोओ ॥ (प्रा. पंचसं. १–१४१; धव. पु. १, पृ. ३८२ उद्.; गो. जी. ४८६) । ३. स्वावभासः केवलदर्शनम् । (धव. पु. ६, पृ. ३४); किं केवलदंसणं ? तिकालविसय-अणंतपज्जयसहिदसगरूवसंवेयणं । (धव. पु. १०, पृ. ३१९); केवलणाणुप्पत्तिकारणसगसंवेयणं केवल-दंसणं णाम । (धव. पु. १३, पृ. ३५५); केवल-दंसणावरणक्खएण समुप्पण्णं दंसणं केवलदंसणं । (धव. पु. १४, पृ. १७) । ४. दर्शनमपि केवलाख्य-मशेषदर्शनावरणीयक्षयसमुद्भूतमुपात्तम् । (त. भा. सिद्ध. वृ. २–४); केवलदर्शनमपि सामान्योपयोग-लक्षणम् । (त. भा. सिद्ध. वृ. ८–८); अशेषदर्श-नावरणक्षयात् क्षायिकं केवलदर्शनम् । (त. भा. सिद्ध. वृ. १०–४) । ५. यत्सकलावरणात्यन्तक्षये केवल एव मूर्तामूर्तद्रव्यं सकलं सामान्येनावबुध्यते तत्स्वाभाविकं केवलदर्शनमिति स्वरूपाभिधानम् । (पञ्चा. का. अमृत. वृ. ४२) । ६. मूर्तामूर्तपदार्था-नामसौ (प्रकाशः) केवलदर्शनम् । (पंचसं. अमित. १–२५२) । ७. यत्पुनः सहजशुद्धसदानन्दैकरूप-परमात्मतत्त्वसंवित्तिप्राप्तिबलेन केवलदर्शनावरण-क्षये सति मूर्तामूर्तसमस्तवस्तुगतसत्तासामान्यं वि-कल्परहितं सकलप्रत्यक्षरूपेणैकसमये पश्यति तदु-पायभूतं केवलदर्शनं ज्ञातव्यम् । (बृ. द्रव्यसं. टी.४); निर्विकल्पस्वशुद्धात्मसत्तावलोकनरूपं यत्पूर्वं दर्शनं भावितं तस्यैव फलभूतं युगपल्लोकालोकसमस्तवस्तु-गतसामान्यग्राहकं केवलदर्शनम् । (बृ. द्रव्यसं. टी. १४) । ८. तत्रैव (जगत्त्रय-कालत्रयवर्तिपदार्थयुग-पद्) सामान्यपरिच्छित्तिरूपं केवलदर्शनं भण्यते । (परमात्म. टी. १६१) । ९. युगपत्सर्व-द्रव्यपर्याय-सामान्यविशेषप्रकाशकं केवलं केवलं जानाति भावि-केवलदर्शनम् । (मूला. वृ. १२–१८८) । १०. रा-गादिदोषरहितचिदानन्दैकस्वभावनिजशुद्धात्मानुभूति-लक्षणनिर्विकल्पध्यानेन निरवशेषकेवलदर्शनावरण-क्षये सति जगत्त्रय-कालत्रयवर्तिवस्तुगतसत्तासामान्य-मेकसमयेन पश्यति तदनिधनमनन्तविषयं स्वाभावि-कं केवलदर्शनम् । (पंचा. का. जय. वृ. ४३) । ११. केवलमेव (प्रज्ञाप.—भिव) दर्शनं सकल-जगद्भाविवस्तुसामान्यपरिच्छित्तिरूपं केवलदर्शनम् । (जीवाजी. मलय. वृ. १३, पृ. १६; प्रज्ञाप. मलय. वृ. २९–३१२, पृ. ५२७) ।

३ तीनों कालों की विषयभूत अनन्त पर्यायों से संयुक्त निज के स्वरूप का जो संवेदन होता है उसे केवलदर्शन कहते हैं । ५ आवरण का पूर्णतया क्षय हो जाने पर जो बिना किसी अन्य की सहायता के

समस्त मूर्त-अमूर्त द्रव्यों को सामान्य से जानता है वह केवलदर्शन कहलाता है।

केवलदर्शनावरणीय—१. केवलमसपत्नम्, केवलं च दर्शनं च केवलदर्शनम्। तस्स आवरणं केवलदर्शनावरणीयम्। (धव. पु. ६, पृ. ३३); तस्स (केवलदंसणस्स) आवारयं (कम्मं) केवलदंसणावरणीयम्। (धव. पु. १३, पृ. ३५६)। २. केवलमासन्नं जं वरेइ तं केवलस्स भवे। (कर्मवि. ग. २६)। १ जो केवलदर्शन को आच्छादित करता है उसे केवलदर्शनावरणीय कहते हैं।

केवलव्यतिरेकी— पक्षवृत्तिविपक्षव्यावृत्तः सपक्षरहितो हेतुः केवलव्यतिरेकी। (न्यायदी. पृ. ९०)। जो हेतु विपक्ष से व्यावृत्त होकर सपक्ष से रहित होता हुआ केवल पक्ष में रहता है उसे केवलव्यतिरेकी कहते हैं।

केवलान्वयी—पक्ष-सपक्षवृत्तिविपक्षवृत्तिरहितः केवलान्वयी। (न्यायदी. पृ. ८९)।

जो हेतु पक्ष और सपक्ष में तो रहता है, किन्तु विपक्ष में नहीं रहता है उसे केवलान्वयी कहते हैं।

केवलावरण—देखो केवलज्ञानावरण। केवलावरणं हि आदित्यकल्पस्य जीवस्याच्छादकतया सान्द्रमेघवृन्दकल्पमिति। (स्थानां. अभय. वृ. २, ४, १०५)। जो सूर्य के समान जीव को सघन मेघसमूह के समान आच्छादित करता है उसे केवलावरण कहा जाता है।

केवलि-अवर्णवाद— १. कवलाभ्यवहारजीविनः केवलिन इत्येवमादिवचनं केवलिनामवर्णवादः। (स. सि. ६–१३)। २. एगंतरमुप्पाए अन्नोन्नावरणया दुवेण्ह पि। केवलदंसण-णाणाणमेगकाले व एगत्तं॥ (बृहत्क. १३०४)। ३. पिण्डाभ्यवहारजीवनादिवचनं केवलिषु। पिण्डाभ्यवहारजीविनः कम्बलदशानिर्हरणाः अलाबूपात्रपरिग्रहाः कालभेदवृत्तज्ञानदर्शनाः केवलिन इत्यादिवचनं केवलिष्ववर्णवादः। (त. वा. ६, १३, ८)।

२ केवली के ज्ञान और दर्शन ये दोनों उपयोग क्रम से होते हैं या युगपत्? यदि क्रम से होते हैं तो जिस समय को जानता है उसका दर्शन नहीं हो सकता है और जिसको देखता है उसका ज्ञान नहीं हो सकता है। इस प्रकार दोनों की उत्पत्ति के एकान्तरित होने पर केवलज्ञान और केवलदर्शन दोनों में एक दूसरे की आवारकता ठहरती है। कारण कि उनके ज्ञानावरण और दर्शनावरण दोनों ही कर्म विनष्ट हो चुके हैं तथा अन्य कोई आवारक सम्भव नहीं है। तब यदि उन दोनों का युगपत् होना माना जाय तो उन दोनों के एक काल में रहने से अभेद का प्रसंग प्राप्त होता है—समान काल में रहने से केवलज्ञान और केवलदर्शन में कोई भेद नहीं रहेगा। इस प्रकार के कुतर्कपूर्ण विचार का नाम केवलि-अवर्णवाद है। ३ केवली जीवन के लिए कवलाहार का उपभोग करते हैं, कम्बल व तूंबड़ी के पात्रों को ग्रहण करते हैं, तथा उनके ज्ञान और दर्शन भिन्न काल में होते हैं; इत्यादि कथन करना केवलि-अवर्णवाद है।

केवलिमरण— केवलिणं मरणं केवलिमरणम्। (उत्तरा. चू. पृ. १२९)।

केवली के मरण को—निर्वाण प्राप्ति को—केवलिमरण कहते हैं।

केवलि-मायी—१. केवलिणं केवलिष्वादरवानिव यो वर्तते, तदर्चनायां तु मनसा तु न रोचते, स केवलिनां मायावान्। (भ. आ. विजयो. १८१)। २. तथा केवलिष्वादरवानिव यो वर्तते, तत्पूजायां मनसा तु न तां रोचते, असौ केवलिमायी। (भ. आ. मूला. १८१)।

जो केवलियों के विषय में आदरयुक्त के समान रहता है, किन्तु मनसे जिसे उनकी पूजा नहीं रुचती है, वह केवलि-मायी कहलाता है। ऐसा जीव केवली का अवर्णवादी होकर किल्बिषिकभावना वाला होता है।

केवलिसमुद्घात—१. वेदनीयस्य बहुत्वादल्पत्वाच्चायुषोऽनाभोगपूर्वकमायुःसमकरणार्थं द्रव्यस्वभावत्वात् सुराद्रव्यस्य फेनवेगबुद्बुदाविर्भावोपशमनवद्धेहस्थात्मप्रदेशानां बहिःसमुद्घातनं केवलिसमुद्घातः। (त. वा. १, २०, १२)। २. केवलिसमुद्घादो णाम दंड-कवाड-पदर-लोगपूरणभेएण चउव्विहो। (धव. पु. ४, पृ. २८); दंड-कवाड-पदर-लोगपूरणाणि केवलिसमुद्घादो णाम। (धव. पु. ७, पृ. ३००)। ३. उद्गमनमुद्घातः, जीवप्रदेशानां विसर्पणमित्यर्थः, समीचीनः उद्घातः समुद्घातः, केवलिनां समुद्घातः केवलिसमुद्घातः। अघातिकर्मस्थितिसमीकरणार्थं केवलिजीवप्रदेशानां समया-

विरोधेन ऊर्ध्वमधस्तिर्यक् च विसर्पणं केवलिसमुद्घातः। (जयध. अ. प. १२३८)। ४. सप्तमः केवलिनां दण्ड-कपाट-प्रतर-पूर्णः सोऽयं केवलिसमुद्घातः। (बृ. द्रव्यसं. टी. १०)। ५. केवलिनि अन्तर्मुहूर्तभाविपरमपदे समुद्घातः केवलिसमुद्घातः। (जीवाजी. मलय. वृ. १–१३, पृ. १७)। ६. सप्तमः केवलिनां दण्ड-कपाट-मन्थान-प्रतरण-लोकपूरणः सोऽयं केवलिसमुद्घातः। (कार्तिके. टी. १७६)।

१ आयुकर्म की स्थिति अल्प और वेदनीय की स्थिति अधिक होने पर उसे अनाभोगपूर्वक (उपयोग के बिना ही) आयु के समान करने के लिए केवली भगवान् के आत्मप्रदेश मूल शरीर से बाहर निकलते हैं, इसे केवलिसमुद्घात कहते हैं। जैसे—शराब के फेन का वेग बुद्बुद के आविर्भाव से शान्त हो जाता है।

केवली—१. सव्वं (आव.—कसिणं) केवलकप्पं लोगं जाणंति तह य पस्संति। केवलणाण-चरित्ता (आव.—केवलचरित्तणाणी) तम्हा ते केवली होंति॥ (मूला. ७–६७; आव. नि. १०७९)। २. निरावरणज्ञानाः केवलिनः। (स. सि. ६–१३)। ३. तव-नियम-नाणरुक्खं आरूढो केवली अमियनाणी। (आव. नि. ८९)। ४. शेषकर्मफलापेक्षः शुद्धो बुद्धो निरामयः। सर्वज्ञः सर्वदर्शी च जिनो भवति केवली। (त. भा. १०, श्लो. ६, पृ. ३१९)। ५. करणक्रमव्यवधानातिवर्तिज्ञानोपेताः केवलिनः। करणं चक्षुरादि, कालभेदेन वृत्तिः क्रमः, कुड्यादिना अन्तर्धानं व्यवधानम्, एतान्यतीत्य वर्तते। ज्ञानावरणस्यात्यन्तक्षये आविर्भूतमात्मनः स्वाभाविकं ज्ञानम्, तद्वन्तः अर्हन्तो भगवन्तः केवलिनः इति व्यपदिश्यन्ते। (त. वा. ६, १३, १); घातिकर्मक्षयादाविर्भूतज्ञानाद्यतिशयः केवली। घातिकर्मणामत्यन्तक्षयादाविर्भूतस्वभावाचिन्त्यकेवलज्ञानाद्यतिशयविभूतिर्भगवान् केवलीत्यभिलप्यते। (त. वा. ९, १, २३)। ६. केवलमस्यास्तीति केवली, सम्पूर्णज्ञानवानित्यर्थः। (अनुयो. हरि. वृ. पृ. ६२)। ७. केवलि त्ति भणिदे केवलणाणिणो तित्थयरकम्मुदयविरहिदा घेत्तव्वा। (धव. पु. ६, पृ. २४६)। ८. केवलमसहायं ज्ञानम्, इन्द्रियाणि मनः प्रकाशादिकं च नापेक्ष्य युगपदशेषद्रव्य-पर्यायभासनसमर्थं सद्यत्र प्रवर्तते तद्येषामस्ति ते केवलिनः। (भ. आ. विजयो. २७)। ९. केवलानि सम्पूर्णानि शुद्धानि अनन्तानि वा ज्ञानादीनि यस्य सन्ति स केवली। (औपपा. अभय. वृ. १०, पृ. १५)। १०. केवलज्ञानं दर्शनं चास्यास्तीति केवली। (प्रज्ञाप. मलय. वृ. ३१४, पृ. ५३१)। ११. क्षायिकमेकमनन्तं त्रिकालसर्वार्थयुगपदवभासम्। सकलसुखधाम सततं वन्देऽहं केवलज्ञानम्॥ इत्यार्योक्त(क्तं)केवलं ज्ञानम्, आवरणद्वयरहितं ज्ञानं विद्यते येषां ते केवलिनः। (त. वृत्ति श्रुत. ६–१३)।

१ जो केवल सदृश समस्त लोक को जानते व देखते हैं तथा केवलज्ञान व चारित्र से सम्पन्न हैं वे केवली कहलाते हैं।

केशवाणिज्य—१. नवनीत-वसा-क्षौद्र-मद्यप्रभृतिविक्रयः। द्विपाच्चतुष्पाद्विक्रयो वाणिज्यं रसकेशयोः॥ (योगशा. ३–१०९; त्रि. श. पु. च. ९, ३, ३४३)। २. केशवाणिज्यं द्विपदादिविक्रयः। तत्र च दोषः—तेषां पारवश्य-वध-बन्धनादयः क्षुत्पिपासापीडा चेति। (सा. ध. ५–२२)।

१ केश वाले द्विपद (मनुष्य) और चतुष्पद (पशु) आदि जीवों के बेचने को केशवाणिज्य कहते हैं।

केशवाप—केशवापस्तु केशानां शुभेऽह्नि व्यपरोपणम्। क्षौरेण कर्मणा देव-गुरुपूजापुरस्सरम्॥ गन्धोदकार्द्रितान् कृत्वा केशान् शेषाक्षतोचितान्। मौण्ड्यमस्य विधेयं स्यात् सचूलं वा ऽन्वयोचितम्॥ स्नपनोदकधौताङ्गमनुलिप्तं सभूषणम्। प्रणमय्य मुनीन् पश्चाद्योजयेद् बन्धुनाशिषा॥ चौलाख्यया प्रतीतेयं कृतपुण्याहमङ्गला। क्रियास्यामादृतो लोको यतते परया मुदा॥ (म. पु. ३८, ९८–१०१)।

किसी शुभ दिन में देव व गुरु की पूजा करके बालक के बालों को गन्धोदक से भिगो कर व शेषाक्षतों से उचित करके क्षौरक्रिया से—उस्तरे के द्वारा—उनके निकलवाने को केशवाप कहते हैं। केशवाप के पश्चात् नहला कर उससे मुनियों को नमस्कार कराना चाहिए।

केशसंस्कार—१. केशसंस्कारो हस्तघर्षणेन मसृणतासम्पादनम्। (भ. आ. विजयो. ९३)। २. हस्तघर्षणेन मसृणताकरणं केशसंस्कारः। (भ. आ. मूला. ९३)।

हाथों की रगड़ से केशों के चिकने करने को केश-संस्कार कहते हैं।

कैवल्य—केवलस्य कर्मविकलस्य आत्मनो भावः कैवल्यम्। (सिद्धिवि. टी. ७-२१, पृ. ४६१)

केवल अर्थात् कर्मरहित आत्मा की अवस्था को कैवल्य कहते हैं।

कोटी— ××× शताहतां तां (लक्ष्यां) च वदन्ति कोटीम्। (वरांगच. २७-८)।

सौ से गुणित लक्ष को (१०००००×१००) कोटी कहते हैं।

कोश—थो विपदि सम्पदि च स्वामिनस्तंत्राभ्युदयं कोशतीति कोशः। (नीतिवा. २१-१)।

जो सम्पत्ति और विपत्ति के समय स्वामी की सेना व अर्थ की वृद्धि करे उसे कोश कहते हैं।

कोष्ठबुद्धि— १. उक्करिसधारणाए जुत्तो पुरिसो गुरूवएसेणं। णाणाविहगंथेसुं वित्थारे लिंगसद्दबीजाणि ॥ गहिऊण णियमदीए मिस्सेण विणा धरेदि मदि-कोट्ठे। जो कोइ तस्स बुद्धी णिद्दिट्ठा कोट्ठबुद्धि त्ति ॥ (ति. प. ४, ९७८-९७९)। २. कोट्ठय-धन्नसुनिग्गलसुत्तत्था कोट्ठबुद्धीया। (विशेषा. ८०२; प्रव. सारो. १५०२)। ३. कोष्ठागारिकस्थापितानामसंकीर्णानामविनष्टानां भूयसा धान्यबीजानां यथा कोष्ठेऽवस्थानं तथा परोपदेशादवधारितानां अर्थ-ग्रन्थ-बीजानां भूयसामव्यतिकीर्णानां बुद्धावस्थानं कोष्ठबुद्धिः। (त. वा. ३, ३६, ३; चा. सा. पृ. ९६)। ४. कोष्ठयः शालि-व्रीहि-यव-गोधूमादीनामाधारभूतः कुस्थली पल्यादिः। सा चासेसदव्व-पज्जायधारणगुणेण कोट्ठसमाणा बुद्धी कोट्ठा, कोट्ठा च सा बुद्धी च कोट्ठबुद्धी। ××× बुद्धिमंताणं पि कोट्ठबुद्धी सण्णा। (धव. पु. ९, पृ. ५३, ५४)। ५. कोष्ठबुद्धित्वं यत्किंचित् पद-वाक्यादिगृहीतं तन्न कदाचिन्नश्यतीति कोष्ठक्षिप्तधान्यवत्। (त. भा. सिद्ध. वृ. १०-७, पृ. ३१६-१७)। ६. कोष्ठागारे संकर-व्यतिकररहितानि नानाप्रकाराणि बीजानि बहुकालेनापि न विनश्यन्ति न संकीर्यन्ते च यथा तथा येषां श्रुतानि पद-वर्ण-वाक्यादीनि बहुकाले गते तेनैव प्रकारेणाविनष्टार्थान्यन्यूनाधिकानि सम्पूर्णानि संतिष्ठन्ते ते कोष्ठबुद्धयः। (मूला. वृ. ९-६६)। ७. तत्र कोष्ठे कोष्ठागारिकधृतभूरिबीजानामविनष्टान्यतिकीर्णानामवस्थानं यथा तथैवावस्थानमवधारितग्रन्थार्थानां यत्र बुद्धौ सा कोष्ठबुद्धिः। (श्रुतभक्ति टी. ३)। ८. परोपदेशादवधारितानां श्रोतानामर्थ-ग्रन्थबीजानां भूयसामनुस्मरणमन्तरेणाविनष्टानामवस्थानात् कोष्ठबुद्धयः। (योगशा. स्वो. विव. १-८)। ९. कोट्ठबुद्धि त्ति कोष्ठवत् कुशूल इव सूत्रार्थधान्यस्य यथाप्राप्तस्याविनष्टस्याऽऽजन्मधरणाद् बुद्धिर्मतिर्येषां ते तथा। (औपपा. अभय. वृ. १५, पृ. २८)। १०. या बुद्धिराचार्यमुखाद्विनिर्गतौ तदवस्थानौ च सूत्रार्थौ धारयति, न किमपि तयोः कालान्तरेण गलति, सा कोष्ठबुद्धिः। (नन्दी. मलय. वृ. सू. १३, पृ. १०६; प्रज्ञाप. मलय. वृ. २१-२७३, पृ. ४२४)। ११. तथा कोष्ठ इव धान्यं येषां बुद्धिराचार्यमुखाद्विनिर्गतौ तदगस्थावेव सूत्रार्थौ धारयति, न किमपि तयोः कालान्तरेऽपि गलति, ते कोष्ठबुद्धयः, कोष्ठ इव बुद्धिर्येषां ते कोष्ठबुद्धय इति व्युत्पत्तेः। उक्तं च—कोट्ठयधन्नसुनिग्गलसुत्तत्था कोट्ठबुद्धीया ॥ (आव. नि. मलय. वृ. ७५, पृ. ८०)। १२. कोष्ठनिक्षिप्तधान्यानीव सुनिर्गला अविस्मृतत्वाच्चिरस्थायिनः सूत्रार्था येषां ते कोष्ठकधान्यसुनिर्गलसूत्रार्थाः कोष्ठबुद्धयः। कोष्ठे इव धान्यं या बुद्धिराचार्यमुखाद्विनिर्गतौ तदवस्थावेव सूत्रार्थौ धारयति, न किमपि तयोः सूत्रार्थयोः कालान्तरेऽपि गलति सा कोष्ठबुद्धिलब्धिरिति भावः। (प्रव. सारो. वृ. १५०२)। १३. कोष्ठागारे संगृहीतविविधाकारधान्यवत् यस्यां बुद्धौ वर्णादीनि श्रुतानि बहुकालेऽपि न विनश्यन्ति सा कोष्ठबुद्धिः। (त. वृत्ति श्रुत. ३-३६)।

उत्कृष्ट धारणा से युक्त जो पुरुष गुरु के उपदेश से अनेक प्रकार के ग्रन्थों में से विस्तारपूर्वक लिंग-युक्त शब्दरूप बीजों को अपनी बुद्धि से ग्रहण कर मिश्रण के बिना—पृथक् पृथक्—उन्हें अपने बुद्धि-रूप कोठे में स्थापित करता है, उसकी उस बुद्धि को कोष्ठबुद्धि कहा जाता है।

कोष्ठा—कोष्ठा इव कोष्ठा। कोष्ठा नाम कुस्थली, तद्वन्निर्णीतार्थं धारयतीति कोष्ठा। (धव. पु. १३, पृ. २४३)।

कोष्ठा नाम कुस्थली (धान्य रखने का एक मिट्टी का बड़ा पात्र—कुठिया) है। उसके समान निर्णीत अर्थ को जो बुद्धि धारण करती है वह भी कोष्ठ (कोठा) के समान होने से कोष्ठा कहलाती है।

यह धारणा का नामान्तर है।

कौकुच्य—देखो कौत्कुच्य।

कौतुक—१. विण्हवण-होम-सिरपरिरयाइ खारदहणाइं धूवे य। असरिसवेसग्गहणं अवयासण-उत्थुवण-बंधा॥ (बृहत्क. भा. १३-६)। २. सोहग्गाइनिमित्तं परेसि ण्हवणाइ कोउयं भणियं। (प्रव. सारो. ११२)। ३. सौभाग्यनिमित्तमपत्यादिनिमित्तं च योषिदादीनां त्रिक-चतुष्क-चत्वरादिषु स्नानादि यत्क्रियते तत्कौतुकं भणितम्। (आव. ह. वृ. मल. हेम. टि. पृ ८२)। ४. कौतुकं नाम आश्चर्यम्, यथा मायाकारको मुखे गोलकान् प्रक्षिप्य कर्णेन निष्कासयति नासिकया वा मुखादग्निं निष्कासयतीत्यादि। अथवा परेषां सौभाग्यादिनिमित्तं यत् स्नपनादि क्रियते एतत्कौतुकम्। (व्यव. मलय. वृ. ३, पृ. ११७)।

१ विशेष स्नान, होम, शिरःपरिरय (करभ्रमणाभिमंत्रणा) आदि, खारदहन (रोग शान्ति के लिये नमक आदि का जलाना), उसी प्रकार की धूप का समर्पण, असमान वेश का ग्रहण, वृक्षादि का आलिंगन कराना, अवस्तोमन—अनिष्ट की उपशान्ति के लिये थूक द्वारा थू-थू करना और बन्ध; यह सब कौतुक कहलाता है।

कौतुककुशील—कश्चित् कौतुकशीलः औषधविलेपन-विद्याप्रयोगेणैव सौभाग्यकरणं राजद्वारि कौतुकमादर्शयति यः कौतुककुशीलः। (भ. आ. विजयो. १९५०)।

जो औषधि-विलेपन और विद्या-मंत्रादि के प्रयोग द्वारा राजद्वार में चमत्कार दिखावे व दूसरों के सौभाग्य की वृद्धि करे, ऐसे साधु को कौतुककुशील कहते हैं।

कौत्कुच्य—१. तदेवोभयं परत्र दुष्टकायकर्मप्रयुक्तं कौत्कुच्यम्। (स. सि. ७-३२)। २. कौत्कुच्यं नाम एतत् (रागसंयुक्तोऽसभ्यो वाक्प्रयोगः हास्यं च) एवोभयं दुष्टकायप्रचारसंयुक्तम्। (त. भा. ७-२७)। ३. भुम-नयण-वयण-दसणच्छदेहिं करपाद-कण्णमाईहिं। तं तं करेइ जह हस्सए परो अत्तणा अहसं॥ वायाकोक्कुइओ पुण तं जंपइ जेण हस्सए अन्नो। नाणाविहजीवरुए कुव्वइ मुहतूरए चेव॥ (बृहत्क. १२९७-९८)। ४. तदेवोभयं परत्र दुष्टकायकर्मयुक्तं कौत्कुच्यम्। रागस्य समावेशाद्धास्यवचनम् अशिष्टवचनं इत्येतदुभयं परत्र दुष्टेन कायकर्मणा युक्तं कौत्कुच्यम्। (त. वा. ७, ३२, २)। ५. कौकुच्यम्—कुत्सितसंकोचनादिक्रियायुक्तः कुकुचः, तद्भावः कौकुच्यम्, अनेकप्रकारा मुख-नयनौष्ठ-कर-चरण-भ्रूविकारपूर्विका परिहासादिजनिका भाण्डादीनामिव विडम्बनक्रियेत्यर्थः। (आव. हरि. वृ. अ. ६, पृ. ८३०)। ६. कौत्कुच्यं कुत्सितसंकोचनादिक्रियायुक्तः कुत्कुचः, तद्भावः कौत्कुच्यम्, अनेकप्रकारमुख-नयनौष्ठ-कर-चरण-भ्रूविकारपूर्विका परिहासादिजनिका भांडादीनामिव विडम्बनक्रियेत्यर्थः। (आ. प्र. टी. २९१; अ. चि. मु. वृ. ३-३०)। ७. कौत्कुच्यं कुत्सितसंकोचनादिक्रियायुक्तः कुत्कुचः, तद्भावः कौत्कुच्यम्— अनेकप्रकारा भाण्डादिविडम्बनाक्रियाः। कुदिति कुत्सायां निपातो निपातानामानन्त्यात्। अन्ये पठन्ति—कौकुच्यमिति, तेषां कुत्सितः कुचः संकोचनादिक्रियाभाक्, तद्भावः कौकुच्यम्। (त. भा. सिद्ध. वृ. ७-२७)। ८. तदेवोभयं परत्र दुष्टकायकर्मयुक्तं कौत्कुच्यम्। (त. श्लो. ७-३२)। ९. रागस्य समावेशाद्धास्यवचनमशिष्टवचनमित्येतदुभयं परस्मिन् दुष्टेन कायकर्मणा युक्तं कौत्कुच्यम्। (चा. सा. पृ. १०)। १०. प्रहासो भण्डिमावचनं भण्डिमोपेतकायव्यापारप्रयुक्तं कौत्कुच्यम्। (रत्नक. टी. ३-३५)। ११. रागातिशयवतो हसतः परमुद्दिश्याशिष्टकायप्रयोगः कौत्कुच्यम्। (भ. आ. विजयो. १८०)। १२. तथा कुदिति कुत्सायां निपातः, निपातानामानन्त्यात्। कुत् कुत्सितं कुचति भ्रू-नयनौष्ठ-नासा-कर-चरण-मुखविकारैः संकुचतीति कुत्कुचस्तस्य भावः कौत्कुच्यम्, अनेकप्रकारा भण्डादिविडम्बनक्रिया इत्यर्थः। अथवा कौकुच्यमिति पाठः, तत्र कुत्सितः कुचः कुकुचः संकोचनादिक्रियाभाक्, तद्भावः कौकुच्यम्। (योगशा. स्वो. विव. ३-११५)। १३. रागातिशयवतो हसतः परमुद्दिश्यैवं तव मातरं करोमि इति अशिष्टकायं प्रकुरुकुचायितं कौत्कुचमिति यावत्। अव्यक्तकण्ठस्वरकरणमवशिष्टांगावयवचालनं वेति केचित्। (भ. आ. मूला. १८०)। १४. कौत्कुच्यं कुदिति कुत्सायां निपातो निपातानामानन्त्यात्। कुतः[कुत्]कुत्सितं कुचति भ्रू-नयनौष्ठ-नासा-कर-चरण-मुखविकारैः संकुचतीति कुत्कुचः संकोचनादि-

क्रियाभाक्, तद्भावः कौत्कुच्यम्। (सा. ध. स्वो. टी. ५–१२)। १५. प्रहासवागशिष्टवाक्प्रयोगौ पूर्वोक्तौ द्वावपि तृतीयेन दुष्टेन कायकर्मणा संयुक्तौ कौत्कुच्यम्। (त. वृत्ति श्रुत. ७–३२)। १६. दोषः कौत्कुच्यसंज्ञोऽस्ति दुष्टकायक्रियादियुक्। पराङ्गस्पर्शनं स्वाङ्गैरर्थादन्याङ्गनादिषु ॥ (लाटीसं ६, १४२)।

१ भ्रू, नेत्र, मुख, ओठ, हाथ, पांव और कान आदि के द्वारा इस प्रकार की चेष्टा करना कि जिसे देख कर अन्य जन हंसने लग जावें, पर स्वयं न हंसे, यह कायकौत्कुच्य है। इसी प्रकार वचन के द्वारा ऐसा सम्भाषण करना कि जिसे सुन कर अन्य जन हास्य को प्राप्त हों, इसके अतिरिक्त मुख से मोर, बिल्ली और कोयल आदि अनेक जीवों के शब्द का अनुकरण करना व बाजे आदि की ध्वनि को करना; यह वाचनिक कौत्कुच्य कहलाता है। इस प्रकार की कौत्कुच्य क्रिया में निरत व्यक्ति कौत्कुच्यवान् कहा जाता है।

कौमार—कौमारं बालवैद्यं मासिक-सांवत्सरिकादिग्रहत्रासनहेतुः शास्त्रम्। × × × एवमष्टप्रकारेण चिकित्साशास्त्रेणोपकारं कृत्वाहारादिकं गृह्णाति, तदानीं तस्याष्टप्रकारश्चिकित्सादोषो भवत्येव। (मूला. वृ. ५–३३)।

कौमार अर्थात् बालवैद्य सम्बन्धी तथा मासिक व वार्षिक आदि ग्रहों के त्रास के कारणभूत चिकित्सा शास्त्र के आश्रय से उपकार करके यदि आहार ग्रहण करता है तो यह कौमार नाम का चिकित्सादोष होता है।

क्रमभाव-अविनाभाव— पूर्वोत्तरचारिणोः कार्यकारणयोश्च क्रमभावः। (परीक्षा. ३–१३)।

पूर्वचर और उत्तरचर पदार्थों में—जैसे कृत्तिका और शकट नक्षत्रों में—तथा कार्य-कारण में जो अविनाभाव सम्बन्ध है, उसे क्रमभाव नियम अविनाभाव कहते हैं।

क्रमभिन्न— क्रमभिन्नं यत्र यथासंख्यमनुदेशो न क्रियते। यथा 'स्पर्शन-रसन-घ्राण-चक्षुः-श्रोत्राणामर्थाः स्पर्श-रस-गन्ध-वर्ण-शब्दाः इति वक्तव्ये स्पर्श-रूप-शब्द-गन्ध-रसाः इति ब्रूयात्। (आव. नि. हरि. वृ. ८८२, पृ. ३७५)।

संख्याक्रम के अनुसार उल्लेख नहीं करना, यह क्रमभिन्न नाम का सूत्रदोष है। जैसे—स्पर्शन, रसन, घ्राण, चक्षु और कर्ण के स्पर्श, रस, गन्ध, वर्ण और शब्द विषय हैं; ऐसा न कह कर उनके स्पर्श, रूप, शब्द, गन्ध और रस विषय हैं; इस प्रकार संख्याक्रम को भंग करके कहना।

क्रमवर्तित्व— क्रमवर्तित्वं नाम व्यतिरेकपुरस्सरं विशिष्टं च। स भवति भवति न सोऽयं भवति तथाऽथ च तथा न भवतीति ॥ (पंचाध्यायी १, १७५)।

यह वह है' किन्तु वह नहीं है; अथवा 'यह वैसा है' किन्तु वैसा नहीं है; इस प्रकार व्यतिरेकपूर्वक विशिष्टता को क्रमवर्तित्व कहते हैं।

क्रमवर्ती—अस्त्यत्र यः प्रसिद्धः क्रम इति धातुरत्र पादविक्षेपे। क्रमति क्रम इति रूपस्तस्य स्वार्थानतिक्रमादेषः ॥ वर्तन्ते तेन यतो भवितुं शीलास्तथा स्वरूपेण। यदि वा स एव वर्ती येषां क्रमवर्तिनस्त एवार्थात् ॥ अयमर्थः प्रागेकं जातं उच्छिद्य जायते चैकः। अथ नष्टे सति तस्मिन्नन्योऽप्युत्पद्यते यथा देशम् ॥ (पंचाध्यायी १, १६७–६९)।

'क्रम' धातु पादविक्षेप अर्थ में प्रसिद्ध है। 'क्रमति इति क्रमः' इस निरुक्ति के अनुसार उससे निष्पन्न क्रम शब्द का अर्थ पद्धति के अनुसार एक-एक के अनन्तर होने वाली पर्यायें होता है। जिससे (जैसे मिट्टी से) जो अवस्था में (स्थास, कोश, कुशूल आदि) स्वभावतः उत्पन्न होने वाली हैं, वे अथवा जिनका स्थास, कोश, कुशूलादि का वह (मिट्टी) अनुसरण करता है वे (स्थासादि) क्रमवर्ती कही जाती हैं। कारण यह कि पहिले एक अवस्था (स्थास) होती है, फिर उसके नष्ट होने पर दूसरी (कोस) अवस्था होती है, तत्पश्चात् उसके भी विनष्ट होने पर अन्य (कुशूल) अवस्था होती है। इस प्रकार ऐसी अवस्थाओं की 'क्रमवर्ती' यह सार्थक संज्ञा है।

क्रमानेकान्त — मुक्त-इतराऽनेककमिथर्मापेक्षया क्रमानेकान्तः, आयुगपदेव तत्सम्भवात्। (न्यायकु. २–७, पृ. ३७२)।

मुक्त और अमुक्त (संसारी) रूप अनेक क्रमिक धर्मों की अपेक्षा से क्रमानेकान्त होता है। कारण कि मुक्तत्व-अमुक्तत्व आदि धर्म एक साथ सम्भव नहीं हैं—ऐसे परस्पर विरोधी धर्म क्रम से ही उप-

लब्ध होते हैं। अभिप्राय यह कि जो पूर्व काल में अमुक्त (संसारी) होता है, वही उत्तर काल में मुक्त होता है। इस प्रकार परस्पर विरोधी क्षणिक धर्मों में क्रमानेकान्त घटित होता है।

क्रिया—१. उभयनिमित्तवशादुत्पद्यमानः पर्यायो द्रव्यस्य देशान्तरप्राप्तिहेतुः क्रिया। (त. सि. ५, ७)। २. क्रिया गतिः, सा त्रिविधा—प्रयोगगतिः, विस्रसागतिः, मिश्रिकेति। (त. भा. ५–२२)। ३. जीवादितत्त्वे नयभेदविकल्पितस्वरूपे या प्रतिपत्तिः सा क्रिया। (अनुयो. चू. पृ. ८६)। ४. उभयनिमित्तापेक्षः पर्यायविशेषो द्रव्यस्य देशान्तरप्राप्तिहेतुः क्रिया। अभ्यन्तरं क्रियापरिणामशक्तियुक्तं द्रव्यम्, बाह्यं च नोदनाभिघाताद्यपेक्ष्योत्पद्यमानः पर्यायविशेषः द्रव्यस्य देशान्तरप्राप्तिहेतुः क्रियेत्युपदिश्यते। (त. वा. ५, ७,१)। ५. क्रिया परिस्पन्दनलक्षणा। (आव. नि. हरि. वृ. ११३२, पृ. ५२५)। ६. क्रिया देशान्तरप्राप्तिलक्षणा। (विशेषा. को. वृ. २५२३, पृ. ६०५)। ७. किरिया णाम परिप्फंदणरूवा। (धव. पु. १, पृ. १८)। ८. करणं क्रिया द्रव्यपरिणामः। (त. भा. सिद्ध. वृ. ५–२२)। ९. उभयनिमित्तापेक्षः पर्यायविशेषो द्रव्यस्य देशान्तरप्राप्तिहेतुः क्रिया। (त. श्लो. ५, ७)। १०. परिस्पन्दलक्षणा क्रिया। (प्र. सा. अमृत. वृ. २–३७)। ११. प्रदेशान्तरप्राप्तिहेतुः परिस्पन्दनरूपपर्यायः क्रिया। (पंचा. का. अमृत. वृ. ९८)। १२. प्रयोग-विस्रसाभ्यां या निमित्ताभ्यां प्रजायते। द्रव्यस्य सा परिज्ञेया परिस्पन्दात्मिका क्रिया॥ (त. सा. ३–४७)। १३. या परिणतिः क्रिया सा × × ×॥ (नाटकस. क. ३–६)। १४. क्षेत्रात् क्षेत्रान्तरगमनरूपा परिस्पन्दवती चलनवती क्रिया। (बृ. द्रव्यसं. २७)। १५. क्रिया पदार्थपरिस्थितिः। × × × क्रिया वाक्काय-मनोव्यापारः। (समाधि-त. टी. ६७)। १६. तत्र क्रिया प्रदेशानां परिस्पन्दचलात्मकः। (पञ्चाध्यायी २–२६)। १७. बाह्याभ्यन्तरकारणवशात् संजायमानो द्रव्यस्य पर्यायः देशान्तरप्राप्तिहेतुः क्रिया। (त. वृत्ति श्रुत. ५–७); परिस्पदात्मिकः चलनरूपः पर्यायः क्रिया। (त. वृत्ति श्रुत. ५–२२)।

१ बाह्य और अभ्यन्तर कारण के वश से उत्पन्न होने वाली द्रव्य की जो पर्याय देशान्तरप्राप्ति का कारण होती है उसे क्रिया कहते हैं। २ क्रिया नाम गति का है जो प्रयोगगति, विस्रसागति और मिश्रिकागति के भेद से तीन प्रकार की है। ३ नयभेद से भेद को प्राप्त होने वाले स्वरूप से युक्त जीवादि तत्त्वों के विषय में जो प्रतिपत्ति होती है वह क्रिया कहलाती है।

क्रियानय—यः उपदेशः क्रियाप्राधान्यख्यापनपरः स नयो नाम, क्रियानय इत्यर्थः। (दशवै. नि. हरि. वृ. १४९ व ३७१, पृ. ८१ व २८६; अनु. हरि. वृ., पृ. १२०; विशेषा. को. वृ. ४३३५, पृ. ९७९; आव. नि. मलय. वृ. २६६, पृ. ५८८)।

क्रिया की प्रधानता के प्रकट करने वाले उपदेश को क्रियानय कहते हैं।

क्रियारुचि—१. दंसण-णाण-चरित्ते तव-विणए समिइ-गुत्तीसु। जो किरियाभावरुई सो खलु किरियारुई नाम॥(उत्तरा. २–२५; प्रज्ञाप. गा. १२८)। २. नाणे दंसण-चरणे तव-विणए सच्च-समिइ-गुत्तीसु। जो किरिया भावरुई सो खलु किरियारुई नाम॥ (प्रव. सारो. ९५८)। ३. यस्य भावतो ज्ञानाद्याचारानुष्ठाने रुचिरस्ति स खलु क्रियारुचिर्नाम। (प्रव. सारो. वृ. ९५८)।

१ सम्यग्दर्शन, ज्ञान, चारित्र, तप, विनय, समिति और गुप्ति के अनुष्ठान में जिसकी भावपूर्वक रुचि होती है उसे क्रियारुचि कहते हैं।

क्रियावादी १. ते एवमक्खंति अबुज्झमाणा विरूवरूवाणि अकिरियवाई। जे मायइत्ता बहवे मणूसा भमन्ति संसारमणोवदग्गं॥ णाइच्चो उएइ ण अत्थमेति न चंदिमा वड्ढति हायती वा। सलिला न संदंति ण वंति वाया वंझो णियता कसिणे हु लोए॥ जहाहि अन्धे सह जोतिणावि रूवाइ णो पस्सइ हीणणेत्ते। संतं पि ते एवमकिरियवाई किरियं ण पस्संति निरुद्धपन्ना॥(सूत्रकृ. सू. १, १२, ६–८; पृ. २१९)। २. अस्तीति किरियवादी वयंति × × ×। (सूत्रकृ. नि. १२, ११८)। ३. तत्र न कर्तारं विना क्रियासम्भव इति तामात्मसमवायिनीं वदन्ति, तच्छीलाश्च ये ते क्रियावादिनः। ते पुनरात्मास्तित्वप्रतिपत्तिलक्षणाः अमुनोपायेनाशीत्यधिकशतसंख्या विज्ञेयाः। जीवाजीवाश्रव-बन्ध-संवर-

निर्जरा,-पुण्य-पाप-मोक्षाख्यान् नव पदार्थान् विरचय्य परिपाट्या जीवपदार्थस्याद्यः स्व-परभेदावुपन्यसनीयौ, तयोरधो नित्यानित्यभेदौ, तयोरप्यधः कालेश्वरात्म-नियति-स्वभावभेदाः पञ्च न्यसनीया। पुनश्चैवं विकल्पाः कर्तव्याः—अस्ति जीवः स्वतो नित्यः कालतः इत्येको विकल्पः। विकल्पार्थश्चायम्—विद्यते खलु आत्मा स्वेन रूपेण नित्यश्च कालवादिनः। उक्तेनैवाभिलापेन द्वितीयो विकल्प ईश्वरकारणिनः, तृतीयो विकल्प आत्मवादिनः 'पुरुष एवेदं सर्वम्' इत्यादि, नियतिवादिन. चतुर्थविकल्पः, पञ्चमविकल्पः स्वभाववादिनः। एवं स्वत इत्यजहता लब्धाः पञ्च विकल्पाः। [एवं परतोऽपि पञ्चविकल्पा लब्धव्याः, एवं नित्यत्वेन दश विकविकल्पाः।] एवमनित्यत्वेनापि दशैव, एते विंशतिजीवपदार्थेन लब्धाः। अजीवादिष्वप्यष्टस्वेवमेव प्रतिपदं विंशतिर्विकल्पानाम्। अतो विंशतिर्नवगुणा शतमशीत्युत्तरं क्रियावादिनामिति। (नन्दी. हरि. वृ. पृ. १००)। ४. क्रियां जीवादिपदार्थोऽस्तीत्यादिकां वदितुं शीलं येषां ते क्रियावादिनः। (सूत्रकृ. नि. शी. वृ. ११७, पृ. २१२); क्रियाम् अस्तीत्यादिकां वदितुं शीलं येषां ते क्रियावादिनः। (सूत्रकृ. सू. शी. वृ. १, १२–१, पृ. २१५)।

३ कर्ता के बिना क्रिया सम्भव नहीं है, इसीलिए उसका समवाय आत्मा में है; ऐसा कहने वाले क्रियावादी कहे जाते हैं। इसी उपाय से वे आत्मा आदि के अस्तित्व को जानते हैं।

क्रियाविशाल—१. लेखादिकाः कला द्वासप्ततिः, गुणाश्च चतुःषष्टिः स्त्रैणाः, शिल्पानि काव्यगुणदोष-क्रिया-छन्दोविचितिक्रिया- क्रियाफलोपभोक्तारश्च यत्र व्याख्यातास्तत्क्रियाविशालम्। (त. वा. १, २०, १२; धव. पु. ९, पृ. २२४)। २. किरियाविशालं णाम पुव्वं दसण्हं वत्थूणं १०, विसदपाहुडाणं २०० णवकोडिपदेहि ९००००००० लेखादिकाः द्वासप्ततिकलाः स्त्रैणांश्चतुःषष्टिगुणान् शिल्पानि काव्यगुणदोषक्रियां छन्दोविचितिक्रियां च कथयति। (धव. पु. १, पृ. १२२)। ३. किरियाविसालो णट्ट-गेय-नक्खण छंदालकार-संढ-त्थी-पुरिसलक्खणादीणं वण्णणं कुणई। (जयध. १, पृ. १४८)। ४. नवकोटिपदं द्वासप्ततिकलानां छन्दोऽलंकारादीनां च प्रतिपादकं क्रियाविशालम्। (श्रुतभ. टी. १३)। ५. क्रियाविशालं त्रयोदशम्, तत्र कायिक्यादयः क्रिया, विशालत्ति सभेदाः संयमक्रिया छन्दक्रिया विधानानि च वर्ण्यन्ते, इति क्रियाविशालम्। तत्पदपरिमाणं नवपदकोटयः। (समवा. अभय. वृ. सू. १४७, पृ. १२१)। ६. छन्दोऽलंकार-व्याकरणकलानिरूपकं नवकोटिपदप्रमाणं क्रियाविशालपूर्वम्। (त. वृत्ति श्रुत. १–२०)। ७. किरियाविसालपुव्वं णवकोडिपदेहिं संजुत्तं॥ संगीदसत्थछेदालंकारादी कला बहत्तरी य। चउसट्ठी इत्थिगुणा चउसीदी जत्थ सिप्पाणं॥ विण्णाणाणि सुगब्भाधाणादी अउसयं च पणवग्गं। सम्मद्दंसणकिरिया वण्णिज्जंते जिणिंदेहिं॥ (अंगप. २, ११०–१२, पृ. ३०१)।

१ लेखन आदि ७२ कलाओं, ६४ स्त्री सम्बन्धी गुणों, शिल्पों, काव्य सम्बन्धी गुण-दोषस्वरूप, छन्द का चुनाव और क्रियाफल के उपभोक्ताओं का जहां व्याख्यान किया जाता है उसे क्रियाविशालपूर्व कहते हैं। ५ तेरहवां पूर्व क्रियाविशाल है। जिसमें कायिकी आदि क्रियाओं का विशाल है, अर्थात् जहां संयमक्रिया, छन्दक्रिया और विधानों का सभेद वर्णन किया जाता है, उसे क्रियाविशालपूर्व कहते हैं।

क्रीडनधात्री (उत्पादनदोष)—तथा बालं स्वयं क्रीडयति क्रीडानिमित्तं च क्रियोपदिशति(?) यस्मै दात्रे स दाता दानाय प्रवर्तते, तद्दानं गृह्णाति साधुस्तस्य क्रीडनधात्री नामोत्पादनदोषः। (मूला. वृ. ६–२८)।

साधु दाता के बच्चे को स्वयं खिलाता है तथा खिलाने की विधि का जिस दाता को उपदेश देता है, वह दाता उससे दान में प्रवृत्त होता है। इस प्रकार दाता के दान में प्रवृत्त होने पर यदि साधु उसके दान को ग्रहण करता है, तो वह क्रीडनधात्री नामक उत्पादन दोष का भागी होता है।

क्रीतदोष—१. द्रव्यादिविनिमयेन स्वीकृतं क्रीतम्। (आचा. शी. वृ. २, १, पृ. ३१७)। २. संयते भिक्षायां प्रविष्टे स्वकीयं परकीयं वा सचित्तादिद्रव्यं दत्त्वाहारं प्रगृह्य ददाति तथा स्वमंत्रं वा स्वविद्यां परविद्यां वा दत्त्वाहार प्रगृह्य ददाति यत् स क्रीतदोषः। (मूला. वृ. ६–१६)। ३. यत् साध्वर्थं मूल्येन क्रीयते तत्क्रीतम्। (योगशा. स्वो. विव. १–३८)। ४. ××× स्वान्यगोऽर्थविद्याद्यैः क्रीतमाहृतम्।

(अन. ध. ५–१३); स्वस्यात्मनः सचित्तद्रव्यैर्वृषभादिभिरचित्तद्रव्यैर्वा सुवर्णादिभिर्भावैर्वा प्रज्ञप्त्यादिविद्या-चेटकादिमंत्रलक्षणैः अन्यस्य वा परस्य तैरुभयैर्द्रव्यभावैर्यथासम्भवमाहृतं संयते भिक्षायां प्रविष्टे तान् दत्त्वानीतं यद् भोज्यद्रव्यं तत्क्रीतमिति दोषः। (अन. ध. स्वो. टी. ५–१३)। ५. गवादिना वा सचित्तेन गुडादिना वा अचित्तेन द्रव्येण विद्या-मंत्रादिदानेन वा भावेन क्रीतं कीदमित्युच्यते। (भ. आ. मूला. २३०)। ६. विद्यया क्रीतं द्रव्यवस्त्र-भाजनादिना वा यत्क्रीतं तत्क्रीतं कथ्यते। (भावप्रा. टी. ६६)।

२ साधु के भिक्षार्थ घर में प्रवेश करने पर अपने अथवा अन्य के सचित्त या अचित्त द्रव्य को अथवा अपने या अन्य के मंत्रादिक दूसरे को देकर और उससे बदले में भोज्य द्रव्य लेकर दान करने को क्रीतदोष कहते हैं।

क्रीतकारित—क्रीतेन कारितमुत्पादितं क्रीतकारितम्। (व्यव. भा. ३. पृ. ३५)।

मूल्य देकर जो साधु के लिए उत्पन्न कराया जाता है, उसे क्रीतकारित कहते हैं।

क्रीतकृत— क्रयणं क्रीतम्, भावे निष्ठाप्रत्ययः, साध्वादिनिमित्तमिति गम्यते, तेन कृतं निर्वर्तितं क्रीतकृतम्। (दशवै. हरि. वृ. सू. ३-२, पृ. ११६)।

जो साधु के निमित्त मूल्य देकर किया जाता है उसे क्रीतकृत कहते हैं।

क्रूर—बन्धुषु निःस्नेहाः क्रूराः। (नीतिवा. १४, ३६)।

बन्धुजनों में स्नेह-रहित व्यवहार करने वाले (अवसर्प) को क्रूर कहते हैं।

क्रोध— १. स्व-परोपघात-निरनुग्रहाहितक्रौर्यपरिणामोऽमर्षः क्रोधः। (त. वा. ८, ६, ५)। २. क्रोधः कषायविशेषो मोहकर्मोदयनिष्पन्नोऽप्रीतिलक्षणः प्रद्वेषप्रायः। (त. भा. हरि. व सिद्ध. वृ. ७–३)। ३. तत्रामर्षोऽप्रीतिर्मन्युलक्षणः क्रोधः। (त. भा. हरि. वृ. ८–२)। ४. कः क्रोधकषायः? रोष आमर्षः संरम्भः क्रोधः। (धव. पु. १, पृ. ३४६); क्रोधः रोषः संरम्भः इत्यनर्थान्तरम्। (धव. पु. ६, पृ. ४१); हृदयदाहाङ्गकम्पाक्षिरागेन्द्रियापाटवादिनिमित्तजीवपरिणामः क्रोधः। (धव. पु. १२, पृ. २८३)। ५. तत्रामर्षोऽप्रीतिर्मन्युलक्षणः क्रोधः, स्वगुणपरिकल्पनानिमित्तत्वात्। (त. भा. सिद्ध. वृ. ८–२)। ६. स्व-परात्मनोरप्रीतिलक्षणः क्रोधः। (सूत्रकृ. शी. वृ. २, ५, २०)। ७. अविचार्य परस्यात्मनो वापायहेतुः क्रोधः। (नीतिवा. ४–३)। ८. तत्र क्रोधनं क्रुध्यति वा येन सा क्रोधः—क्रोधमोहनीयोदयसम्पाद्यो जीवस्य परिणतिविशेषः—क्रोधमोहनीयकर्मैव वेति। (स्थानां. अभय. वृ. ४, १, २४६)। ९. अविचार्य परस्यात्मनो वाऽपायहेतुः क्रोधः। (धर्मबि. मु. वृ. १–१५)। १०. क्रोधोऽङ्गकम्पदाहाक्षिरागवैवर्ण्यलक्षणः। (आचा. सा. ५–१६)। ११. परस्यात्मनो वा अपायमविचार्य कोपकरणं क्रोधः। (योगशा. स्वो. विव. १–५६)। १२. क्रोधोऽक्षान्तिपरिणतिलक्षणः। (कर्मस्त. गो. वृ. १०, पृ. ८३)। १३. क्रोधः अप्रीतिपरिणामः। (जीवाजी. मलय. वृ. १–१३)।

१ अपने व पर के उपघात और अनुपकार के विचार से जो क्रूरतारूप परिणाम उत्पन्न होता है, उसका नाम क्रोध है। २ मोहनीय कर्म के उदय से जो अप्रीतिरूप द्वेषमय परिणाम उत्पन्न होता है वह क्रोध कहलाता है।

क्रोध (उत्पादनदोष)—१. क्रोधं कृत्वा भिक्षामुत्पादयति आत्मनो यदि तदा क्रोधो नामोत्पादनदोषः। (मूला. वृ. ६–३४)। २. क्रोधादन्नार्जनं क्रोधचतुष्कं × × ×। (आचा. सा. ८–४२)। ३. तत्र हस्तिकल्पनगरे क्रोधवलेन भुक्तवतो मुनेः क्रोधाख्यो दोषः सम्पन्नः। (अन. ध. स्वो. टी. ५, २३)। ४. क्रोधं प्रयुज्योत्पादिता क्रोधदुष्टा। (भ. आ. मूला. टी. २३०)। ५. क्रोधं कृत्वा अन्नोपार्जनं क्रोधः। (भावप्रा. टी. ६६)।

१ दाता के ऊपर क्रोध प्रगट करके अपने लिए भिक्षा उत्पादन करने को क्रोध नामक उत्पादन दोष कहते हैं।

क्रोधकृतकायसंरम्भ—क्रोधनिमित्तं स्वतंत्रस्य [स्वपरस्य] हिंसाविषयः प्रयत्नावेशः क्रोधकृतकायसंरम्भः। (भ. आ. विजयो. ८११)।

क्रोध के वश अपने या अन्य के घातविषयक प्रयत्न को क्रोधकृतकायसंरम्भ कहलाता है।

क्रोधपिण्ड—१. विज्जा-तवप्पभावं रायकुले वाऽवि वल्लभत्तं से। नाउं ओरस्सबलं जो लब्भइ कोधपिंडो सो॥ अन्नेसि दिज्जमाणे जायंतो वा अल-

द्धिओ कुप्पे। कोहफलम्मिइवि दिट्ठे जो लब्भइ कोहपिंडो सो। (पिंडनि. ४६२-६३)। २. विद्या-तपःप्रभावज्ञापनं राजपूजादिख्यापनं क्रोधफलदर्शनं वा भिक्षार्थं कुर्वतः क्रोधपिण्डः। (योगशा. स्वो. विव. १-३८)।

१ अपनी विद्या (उच्चाटन-मारणादि) व तप के प्रभाव को तथा राजकुल में प्राप्त स्नेहभाजनता रूप आभ्यन्तर सामर्थ्य को जतला कर जो आहार प्राप्त किया जाता है वह क्रोधपिण्ड कहलाता है। अथवा अन्य के लिए दिये जाने पर याचना करते हुए भी यदि प्राप्त नहीं होता है तो साधु कुपित होता है। पर साधु का कुपित होना ठीक नहीं, ऐसा जानकर अथवा क्रोध के फलस्वरूप मरण या शाप आदि के निर्दिष्ट करने पर दाता के द्वारा जो आहार दिया जाता है उसे क्रोधपिण्ड जानना चाहिए।

क्रोधवशार्तमरण—अनुबन्धरोषो य आत्मनि परत्र उभयत्र वा मारणवशोऽपि मरणवशो भवति। तस्य क्रोधवशार्तमरणं भवति। (भ. आ. विजयो. २५, पृ. ८६)।

क्रोध के वश होकर अपने, अन्य के अथवा दोनों के ही घात में प्रवृत्त होने पर जो स्वयं मृत्यु के वश होता है उसके इस मरण को क्रोधवशार्तमरण कहा जाता है।

क्रोधादिपिण्ड—क्रोध-मान-माया-लोभैरवाप्तः क्रोधादिपिण्डः। (आचा. सू. शी. वृ. २, १, २७३, पृ. ३२०)।

क्रोध, मान, माया, और लोभ के द्वारा प्राप्त किये जाने वाले आहार को क्रोधादिपिण्ड कहते हैं। यह सोलह उत्पादन दोषों में क्रोधादि के क्रम से ७, ८, ९ और १०वाँ दोष है।

क्रोश—देखो गव्यूत, गव्यूति। १. ×××दोदंडसहस्सयं कोसं। (ति. प. १-११५)। २. धणुदुसहस्सकोसो ××××। (संग्रहणी सू. २४७)। ३. द्वौ धनुःसहस्रौ गव्यूतम्। (संग्रहणी दे. वृ. २४५)।

१ दो हजार धनुष का एक कोश होता है।

क्लिश्यमान—१. असद्वेद्योदयापादितक्लेशाः क्लिश्यमानाः। (स. सि. ७-११)। २. असद्वेद्योदयापादितक्लेशाः क्लिश्यमानाः। असद्वेद्योदयापादितशारीर-मानसदुःखसन्तापात् क्लिश्यन्त इति क्लिश्यमानाः। (त. वा. ७, ११, ७)।

१ असातावेदनीय के उदयजनित पीड़ा के अनुभव से दुखी हुए जीवों को क्लिश्यमान कहते हैं।

क्लीब—देखो नपुंसक। क्लीबः यः स्त्रियाभ्यर्थितः कामाभिलाषासहः, स क्लीबः यस्य स्त्रीदर्शनाद् बीजं क्षरति। (आ. वि. पृ. ७४)।

जो स्त्री से प्रार्थित होकर काम की अभिलाषा को नहीं सह सकता है, अथवा स्त्री के दर्शनमात्र से जिसका वीर्य क्षरित हो जाता है उसे क्लीब कहते हैं। ऐसा व्यक्ति दीक्षा के योग्य नहीं होता।

क्लेशवणिज्या—१. अस्मिन् देशे दासा दास्यश्च सुलभास्तानमुं देशं नीत्वा विक्रये कृते महानर्थलाभो भवतीति क्लेशवणिज्या। (त. वा. ७, २१, २१; चा. सा. पृ. ६)। २. अस्मात् पूर्वादिदेशात् दासी-दासान् अल्पमूल्यसुलभान् आदाय अन्यस्मिन् गुर्जरादिदेशे तद्विक्रयो यदि क्रियते तदा महान् धनलाभो भवेदिति क्लेशवणिज्या कथ्यते। (त. वृत्ति श्रुत. ७-२१)।

१ इस प्रदेश में दासी-दास सुलभ हैं—अल्प मूल्य में उपलब्ध होते हैं, इन्हें अमुक देश में ले जाकर बेचने पर भारी धनलाभ होगा, इस प्रकार के व्यापार को क्लेशवणिज्या कहते हैं।

क्षण—१. परिमाणोत्प्रदन्तर-(परमाणोस्तदन्तर-)व्यतिक्रमकालः क्षणः। (सिद्धिवि. टी. ५, १६, पृ. ३४६, पं. २७)। २. थोवो खणो नाम। सो च संखेज्जावलियमेत्तो होदि। कुदो? संखेज्जावलियाहि एगो उस्सासो, सत्तुस्सासेहि एगो थोवो होदि त्ति परियम्मवयणादो। (धव. पु. १३, पृ. २९९)।

१ एक परमाणु का दूसरे परमाणु के अतिक्रमण का जो काल है, उसे क्षण (समय) कहते हैं। २ स्तोक का नाम क्षण है और वह स्तोक सात उच्छ्वास प्रमाण होता है।

क्षणलवप्रतिबोधनता (क्षणलवपडिबुज्झणदा)—खण-लवा णाम कालविसेसा। सम्मद्दंसण-णाण-वद-सीलगुणाणमुज्जालणं कलंकपक्खालणं संधुक्खणं वा पडिबुज्झणं णाम, तस्स भावो पडिबुज्झणदा। खण-लवं पडि पडिबुज्झणदा खण-लवपडिबुज्झणदा। (धव. पु. ८, पृ. ८५)।

क्षण और लव ये काल के भेद हैं। सम्यग्दर्शन,

ज्ञान, व्रत, शील और गुणों का निर्मल करना, अथवा कलंक—कर्ममल—का धोना या भस्म कर देना, इसका नाम प्रतिबोधनता है। प्रत्येक क्षण या लव में इस प्रकार की प्रतिबोधनता का रहना, इसे क्षण-लवप्रतिबोधनता कहते हैं। वह तीर्थंकर प्रकृति की बन्धक षोडशकारणभावनाओं में से एक है।

क्षत्रिय—१. रक्खणकरणनिउत्ता जे तेण नरा महन्तदंडसत्ता। ते खत्तिया ××× ॥ (पउमच. ३–११५)। २. क्षत्रियः क्षततस्त्राणात् ×××। (पद्मपु. ६–२०९)। ३. क्षत्रियाः क्षतितस्त्राणात् ×××। (ह. पु. ९–३९)। ४. क्षत्रियाः शस्त्रजीवित्वमनुभूय तदाऽभवन्। (म. पु. १६–१८४); क्षतत्राणे नियुक्ता हि क्षत्रियाः शस्त्रपाणयः। (म. पु. १६–२४३); ××× क्षत्रियाः शस्त्रधारणात्। (म. पु. ३८–४६)। ५. 'क्षण हिंसायां' क्षणनानि क्षतानि, तेभ्यस्त्रायत इति क्षत्रियः राजा भवति। (उत्तरा. शा. वृ. ३–४, पृ. १८२)।

१ अतिशय बलशाली जो मनुष्य भगवान् आदिनाथ के द्वारा रक्षणकार्य में नियुक्त किये गये वे क्षत्रिय कहलाये।

क्षपक—१. चारित्रमोहक्षपणकारिणः क्षपकाः। (धव. पु. १, पृ. १८२)। २. मोहक्खयं कुणंतो उत्तो खवओ जिणिंदेहिं। (भावसं. दे. ६६०)। ३. तपस्वी क्षपकः। (स्थाना. अभय. वृ. ३, ४, २०८)। ४. क्षपकः क्षपकश्रेणिः। (व्यव. भा. मलय. वृ. ६९९, पृ. ९१)।

१ चारित्रमोहनीय कर्म के क्षय करने वाले साधुओं को क्षपक कहते हैं।

क्षपकश्रेणी—देखो क्षायिकी श्रेणी। यत्र तत् (मोहनीयकर्म) क्षयमुपगमयन्नुद्गच्छति सा क्षपकश्रेणी। (त. वा. ९, १, १८)।

मोहनीय कर्म का क्षय करता हुआ आत्मा जिस श्रेणी—अपूर्वकरण, अनिवृत्तिकरण, सूक्ष्मसाम्पराय और क्षीणमोह इन चार गुणस्थानों रूप नसैनी—पर आरूढ़ होता है उसे क्षपकश्रेणी कहते हैं।

क्षपण—१. खवणं णाम किं? अट्ठण्हं कम्माणं मूलुत्तरभेयभिण्णपयडि-ट्ठिदि-अणुभाग-पदेसाणं जीवादो जो णिस्सेसविणासो तं खवणं णाम। (धव. पु. १, पृ. २१५–१६)। २. मान-माया-मदामर्षक्षपणात्क्षपणः स्मृतः। (उपासका. ८५९)।

१ आठों कर्मों की मूल व उत्तर भेदभूत प्रकृतियों के प्रकृति, स्थिति, अनुभाग और प्रदेश बन्धों का जो जीव के निर्मूल विनाश—पृथग्भाव—होता है, इसका नाम क्षपण है। २ क्रोध, मान, माया और मद का क्षय करने वाले जीव को क्षपण कहा जाता है। यह उसकी सार्थक संज्ञा है।

क्षपितकर्मांशिक—१. पल्लासंखियभागेणकम्मट्ठिइमच्छिओ णिगोएसु। सुहुमेसुऽभवियजोग्गं जहन्नयं कट्टु णिग्गम्म ॥ जोग्गेसुऽसंखवारे सम्मत्तं लभिय देसविरइं च। अट्ठक्खुत्तो विरइं संजोयणहा तइयवारे ॥ चउरुवसमित्तु मोहं लहुं खवेंतो भवे खवियकम्मो। पाएण तहिं पगयं पडुच्च काओ वि सविसेसं ॥ (कर्मप्र. २, ९४–९६, पृ. १२६)। २. जो जीवो सुहुमणिगोदजीवेसु पलिदोवमस्स असंखेज्जदिभागेण ऊणियं कम्मट्ठिदिमच्छिदो। तत्थ य संसरमाणस्स बहुवा अपज्जत्तभवा, थोवा पज्जत्तभवा। दीहाओ अपज्जत्तद्धाओ, रहस्साओ पज्जत्तद्धाओ। ××× एवं णाणाभवग्गहणेहि अट्ठसंजमकंडयाणि अणुपालइत्ता चदुक्खुत्तो कसाए उवसामइत्ता पलिदोवमस्स असंखेज्जदिभागमेत्ताणि संजमासंजमकंडयाणि सम्मत्तकंडयाणि च अणुपालइत्ता एवं संसरिदूण अपच्छिमे भवग्गहणे पुणरवि पुव्वकोडाउएसु मणुसेसु उववण्णो। सव्वलहुं जोणिणिक्खमणजम्मणेण जादो अट्ठवस्सिओ। संजमं पडिवण्णो। तत्थ य भवट्ठिदिं पुव्वकोडिं देसूणं संजममणुपालइत्ता थोवावसेसे जीविदव्वए त्ति य खवणाए अब्भुट्ठिदो। चरिमसमयछदुमत्थो जादो। तस्स चरिमसमयछदुमत्थस्स णाणावरणीयवेदणा दव्वदो जहण्णा। (ष. खं. ४, २, ४, ४९-७५—पु. १०, पृ. २६८–९६)। २ जो जीव पल्योपम के असंख्यातवें भाग से हीन कर्मस्थितिकाल (७० कोड़ाकोड़ि सा.) तक सूक्ष्म निगोद जीवों में रहकर अपर्याप्त व पर्याप्त भवों को यथाक्रम से अधिक व अल्प ग्रहण करता रहा है। इस प्रकार से परिभ्रमण करता हुआ वहां से निकलकर क्रम से बादर पृथिवीकायिक पर्याप्त, पूर्वकोटि प्रमाण आयु वाले मनुष्य, दस हजार वर्ष की आयु वाले देव, बादर पृथिवीकायिक पर्याप्त, सूक्ष्मनिगोद जीव पर्याप्त और बादर पृथिवीकायिक पर्याप्त; इन जीवों में उत्पन्न होकर यथायोग्य सम्यक्त्व व मिथ्यात्व आदि को प्राप्त होता रहा।

इस प्रकार नाना भवों में परिभ्रमण करता हुआ आठ संयमकांडकों का पालन कर, बार बार कषायों को उपशमा कर, और पल्योपम के असंख्यातवें भाग मात्र संयमासंयमकाण्डक व सम्यक्त्वकाण्डकों का परिपालन कर अन्त में फिर से भी जो पूर्वकोटि आयु वाले मनुष्यों में उत्पन्न हुआ व वहां सबसे अल्प काल में योनिनिष्क्रमणरूप जन्म से आठ वर्ष का होकर संयम को प्राप्त हुआ। वहां कुछ कम पूर्वकोटि मात्र भवस्थिति तक संयम का परिपालन करते हुए जो थोड़ी सी आयु के शेष रह जाने पर क्षपणा में उद्यत होकर अन्तिम समयवर्ती छद्मस्थ—क्षीणकषाय गुणस्थान के अन्तिम समय को प्राप्त हुआ है; वह क्षपितकर्मांशिक कहलाता है। ज्ञानावरणीय, दर्शनावरणीय और अन्तराय कर्मों की जघन्य द्रव्यवेदना इसी क्षपितकर्मांशिक के होती है।

क्षमण—१. खमणं स्वस्यान्यभूतापराधक्षमा। (भ. आ. विजयो. ७०)। २. क्षमणं स्वस्यान्यकृतापराधक्षमा। (अन. ध. स्वो. टी. ७–९८)।

दूसरों के द्वारा किये गये अपराधों के स्वय क्षमा करने को क्षमण कहते हैं। यह अर्हं-लिंगादि (अन. ध. पृ. ५३२) में से एक है।

क्षमा—१. कोहुप्पत्तिस्स पुणो वहिरंगं जदि हवेदि सक्खादं। ण कुणदि किंचि वि कोहं तस्स खमा होदि धम्मो त्ति॥ (द्वादशानु. ७१)। २. शरीरस्थितिहेतुमार्गणार्थं परकुलान्युपगच्छतो भिक्षोर्दुष्टजनाक्रोश-प्रहसनावज्ञा-ताडन - शरीरव्यापादनादीनां सन्निधाने कालुष्यानुत्पत्तिः क्षमा। (स. सि. ९, ६)। ३. क्षमागुणांश्चानायासादीननुस्मृत्य क्षमितव्यमेवेति क्षमाधर्मः। (त. भा. ९–६, पृ. १९१)। ४. कोहेण जो ण तप्पदि सुर-णर-तिरिएहिं कीरमाणेऽवि। उवसग्गे वि रउद्दे तस्स खिमा णिम्मला होदि॥ (कार्तिके. ३९४)। ५. क्रोधोत्पत्तिनिमित्ताविष्वाक्रोशादिसंभवे कालुष्योपरमः क्षमा। शरीरस्थितिहेतुमार्गणार्थं परकुलान्युपगच्छतो भिक्षोर्दुष्टजनाक्रोशोत्प्रहसनावज्ञान-ताडन- शरीरव्यापादनादीनां क्रोधोत्पत्तिनिमित्तानां सन्निधाने कालुष्याभावः क्षमेत्युच्यते। (त. वा. ९, ६, २)। ६. क्षमा क्रोधनिग्रहः। (आव. हरि. वृ. ४, पृ. ६६०)। ७. क्षमणं सहनपरिणामः आत्मनः शक्तिमतः अशक्तस्य वा प्रतीकारानुष्ठाने। (त. भा. हरि. वृ. ९–६)। ८. क्षमा सहनम्। (त. भा. सिद्ध. वृ. ६–१३); क्षमणं सहनं आत्मनः शक्तिमतः। (त. भा. सिद्ध. वृ. ९–६)। ९. क्रोधोत्पत्तिनिमित्ताविसह्याक्रोशादिसंभवे कालुष्याभावः क्षमा। (त. श्लो. ९–६)। १०. क्रोधादिनिमित्तसान्निध्येऽपि कालुष्याभावः क्षमा स्नेहकार्याद्यनपेक्षः। (भ. आ. विजयो. ४६)। ११. तत्थ खमा आकुट्ठस्स वा तालियस्स वा अहियासेंतस्स कम्मक्खओ भवइ, अणहियासेंतस्स कम्मबंधो भवइ, तम्हा कोहस्स निग्गहो कायव्वो, उदयपत्तस्स व विफलीकरणं, एस खमत्ति वा तितिक्खत्ति वा कोधनिग्गहे त्ति वा एगट्ठा। (दशवै. चू. पृ. १८)। १२. क्रोधोत्पत्तिनिमित्तानामत्यन्तं सति संभवे। आक्रोश-ताडनादीनां कालुष्योपरमः क्षमा॥ (त. सा. ६–१४)। १३. तपोबृंहणकारणशरीरस्थितिनिमित्तं निरवद्याहारान्वेषणार्थं परगृहाण्युपसर्पतो भिक्षोर्दुष्टजनाक्रोशनोत्प्रहसनाऽवज्ञानुताडनशरीरव्यापादनादीनां क्रोधोत्पत्तिनिमित्तानां सन्निधाने कालुष्याभावः क्षमा। (चा. सा. पृ. २४)। १४. शरीरस्थितिहेतुमार्गणार्थं परकुलान्युपयतस्तीर्थयात्राद्यर्थं वा पर्यटतो यतेर्दुष्टजनाक्रोशोत्प्रहसनाऽवज्ञा-ताडन-भर्त्सन-शरीरव्यापादनादीनां सन्निधाने स्वान्त कालुष्यानुत्पत्तिः क्षान्तिः। (मूला. वृ. ११–५)। १५. क्षमा-अनभिव्यक्तक्रोध-मानस्वरूपस्य द्वेषसंज्ञितस्याप्रीतिमात्रस्याभावः, अथवा क्रोध-मानयोरुदयनिरोधः। (समवा. अभय. वृ. २७, पृ. ४५)। १६. क्रोधस्यानुत्पाद उत्पन्नस्य वा विफलीकरणम्। (योगशा. स्वो. विव. ३–१६)। १७. क्रोधोत्पत्तिनिमित्तानां सन्निधानेऽपि कालुष्योपरमः क्षमा। (अन. ध. स्वो. टी. ६–२)। १८. क्षमा दुर्निवारकालुष्यकारणोत्पत्ताविप कोपाभावः। (सा. ध. स्वो. टी. ५–४७)। १९. कायस्थितिकारणविष्वाणाद्यन्वेषणाय परगृहान् पर्यटतो मुनेर्दुष्टपापिष्टपंचजनानामसह्यगालिप्रदानबर्करवचनाबलेहनपीडाजननकायकायविनाशनादीनां समुत्पत्तौ मनोऽनच्छतानुत्पादः क्षमा कथ्यते। (त. वृत्ति श्रुत. ९–६)। २०. तपोबृंहणकारणशरीरस्थितिनिमित्तं निरवद्याहारान्वेषणार्थं परगृहाणि गच्छतो भिक्षोर्भ्रमतः दुष्टमिथ्यादृग्जनाक्रोशनात् प्रहसनाऽवज्ञानुताडन-यष्टि-मुष्टिप्रहार-शरीरव्यापा-

दनानीनां क्रोधोत्पत्तिनिमित्तानां सन्निधाने कालुष्याभावः क्षमा प्रोच्यते। (कार्तिके. टी. ३९३)।

१ क्रोध की उत्पत्ति के निमित्तभूत बाह्य कारण के प्रत्यक्ष में होने पर भी जरा भी क्रोध नहीं करना, इसका नाम क्षमा है।

क्षमापण— १. खामणं आचार्यादीनां क्षमाग्रहणम्। (भ. आ. विजयो. व मूला. ७०)। २. क्षमापणमाचार्यादीनां क्षमाग्राहणम्। (अन. ध. स्वो. टी. ७, ९८)।

१ आचार्य आदि गुरु जनों से क्षमा मांगने को क्षमापण कहते हैं। यह अर्हल्लिंगादि में से एक है।

क्षय—१. क्षयः आत्यन्तिकी निवृत्तिः। (स. सि. २-१)। २. क्षयो निवृत्तिरात्यन्तिकी। यथा तस्यैवाम्भसोऽधःप्रापितपङ्कस्य शुचिभाजनान्तरसंक्रान्तस्य प्रसादः आत्यन्तिकः, तथा आत्मनोऽपि कर्मणोऽत्यन्तविनिवृत्तौ विशुद्धिरात्यन्तिको क्षय इत्युच्यते। (त. वा. २, १, २)। ३. सव्वघादणसत्तीए अभावो खओ उच्चदि। (धव. पु. ५, पृ. १९८); कम्माणं णिम्मूलक्खयणुप्पण्णपरिणामो खओ णाम। (धव. पु. ७, पृ. ६०); खओ णाम अभावो। (धव. पु. ७, पृ. ९०)। ४. तेषां (कर्मणां) आत्यन्तिकी हानिः क्षयः ×××। (त. श्लो. २, १, ३)। ५. (कर्मणाम्) अत्यन्तविश्लेषः क्षयः। (पंचा. का. अमृत. वृ. ५६)। ६. क्षय आत्यन्तिकी निवृत्तिः। (अन. ध. स्वो. टी. २-४६)।

१ कर्मों की आत्यन्तिक निवृत्ति को—सर्वथा अभाव को—क्षय कहते हैं।

क्षयोपशम—१. सव्वघादिफद्दयाणि अणंतगुणहीणाणि होदूण देसघादिफद्दयत्तणेण परिणमिय उदयमागच्छंति, तेसिमणंतगुणहीणत्तं खओ णाम, देसघादिफद्दयसरूवेणवट्ठाणमुवसमो, तेहिं खओवसमेहिं संजुत्तोदओ खओवसमो णाम। (धव. पु. ७, पृ. ९२)। २. ××× तदुभयात्मकः। क्षयोपशम उद्गीतः क्षीणाक्षीणबलत्वतः। (त. श्लो. २, १, ३)। ३. सर्वप्रकारेणात्मगुणप्रच्छादिकाः कर्मशक्तयः सर्वघातिस्पर्द्धकानि भण्यन्ते, विवक्षितैकदेशेनात्मगुणप्रच्छादिकाः शक्तयो देशघातिस्पर्द्धकानि भण्यन्ते। सर्वघातिस्पर्द्धकानामुदयाभाव एव क्षयस्तेषामेवास्तित्वमुपशम उच्यते, सर्वघात्युदयाभावलक्षणक्षयेण सहित उपशमः तेषामेकदेशघातिस्पर्द्धकानामुदयश्चेति समुदायेन क्षयोपशमो भण्यते। (बृ. द्रव्यसं. टी. ३४; अन. ध. स्वो. टी. २-४६)।

१ सर्वघाति स्पर्द्धक अनन्तगुणहीन होकर देशघाति स्पर्द्धक स्वरूप से परिणत होते हुए उदय को प्राप्त होते हैं, उनकी अनन्तगुणहीनता का नाम क्षय है; उन्हींका देशघाति रूप में अवस्थित रहना, यह उपशम है, इस प्रकार के क्षय और उपशम के साथ जो उदय हुआ करता है, इसे क्षयोपशम कहते हैं।

क्षयोपशमनिमित्त अवधि—१. अवधिज्ञानावरणस्य देशघातिस्पर्द्धकानामुदये सति सर्वघातिस्पर्द्धकानामुदयाभावः क्षयः, तेषामेवानुदयप्राप्तानां सदवस्था उपशमः, तौ निमित्तमस्येति क्षयोपशमनिमित्तः। (स. सि. १-२२; त. वा. १-२२)। २. गुणपडिवन्न इत्यादि, उत्तरुत्तरचरणगुणविसुज्झमाणवेक्खातो अवधिणाण-दंसणावरणाण खओवसमो भवति, तक्खयोवसमेण अवधि उप्पज्जइ। (नन्दी. चू. पृ. १३)। ३. तथा गुणप्रत्ययाः क्षयोपशमनिर्वृत्ताः क्षायोपशमिकाः काश्चन (अवधिज्ञानस्य प्रकृतयः), ताश्च तिर्यङ्नराणाम्। (आव. नि. हरि. वृ. २५)। ४. क्षयनिमित्तोऽवधिः शेषाणामुपशमनिमित्तः। क्षयोपशम निमित्त इति वाक्यभेदात् क्षायिकौपशमिकक्षायोपशमिकसंयमगुणनिमित्तस्यावधिरवगम्यते। कार्ये कारणोपचारात् क्षयादीनां क्षायिकसंयमादिषूपचारः, तथाभिधानोपपत्तेः। (त. श्लो. १-२२, पृ. २४४)। ५. काश्चन पुनरन्यतमा 'गुणप्रत्ययाः' क्षयोपशमेन निर्वृत्ताः क्षायोपशमिकाः, ताश्च तिर्यङ्मनुष्याणाम्। (आव. नि. मलय. वृ. २५)। ६. संप्रति क्षायोपशमिकस्वरूपं प्रतिपादयति ××× अत्र निर्वचनमभिधातुकाम आह— क्षायोपशमिकं येन कारणेन तदावरणीयानाम्— अवधिज्ञानावरणीयानाम्— कर्मणामुदीर्णानां क्षयेण, अनुदीर्णानाम्— उदयावलिकामप्राप्तानाम् उपशमेन विपाकोदयलक्षणेनावधिज्ञानमुत्पद्यते तेन कारणेन क्षायोपशमिकमित्युच्यते। (नन्दी. सू. मलय. वृ. ८, पृ. ७७)। ७. अवधिज्ञानावरणस्य देशघातिस्पर्द्धकानामुदयाभावः क्षयः, तेषामेव सर्वघातिस्पर्द्धकानामुदयप्राप्तानां सदवस्था उपशमः, क्षयश्च उपशमश्च क्षयोपशमौ, तौ निमित्तं कारणं यस्यावधेः स क्षयोपशमनिमित्तः। (त. वृत्ति श्रुत. १-२२)।

१ अवधिज्ञानावरणकर्म के सर्वघाति स्पर्द्धकों का उदयाभावीक्षय, अनुदयप्राप्त उन्हीं का सदवस्थारूप उपशम और देशघाति स्पर्द्धकों का उदय होने पर जो अवधिज्ञान उत्पन्न होता है उसे क्षयोपशमनिमित्तक अवधि कहते हैं। इसे गुणप्रत्यय अवधि भी कहा जाता है।

क्षयोपशमलब्धि—१. पुव्वसंचिदकम्ममलपडलस्स अणुभागफद्दयाणि जदा विसोहीए पडिसमयमणंतगुणहीणाणि होदूणुदीरिज्जंति तदा खओवसमलद्धी होदि। (अव. पु. ६, पृ. २०४)। २. कम्ममलपडलसत्ती पडिसमयमणंतगुणविहीणकमा। होदूणुदीरदि जदा तदा खओवसमलद्धी दु॥ (ल. सा. ४)। ३. देशघातिस्पर्द्धकानामुत्कृष्टानुभागानन्तैकभागमात्राणामुदये सत्यपि सर्वघातिस्पर्द्धकानामुत्कृष्टानुभागानन्तबहुभागप्रमाणानामुदयाभावः क्षयः, तेषामेवानुदयप्राप्तानां कर्मस्वभावेन सदवस्था उपशमः, तयोर्लब्धिः क्षयोपशमलब्धिः। (ल. सा. टी. ४)।

१ पूर्वसंचित कर्मों के अनुभागस्पर्द्धक जब विशुद्धि के वश प्रतिसमय अनंतगुणे हीन होकर उदीरणा को प्राप्त होते हैं तब क्षयोपशमलब्धि होती है।

क्षयोपशम सम्यक्त्व— देखो क्षायोपशमिक। १. मिच्छत्तं जमुदिन्नं तं खीणं अणुइयं च उवसंतं। मीसीभावपरिणयं वेयिज्जंतं खओवसमं। (आ. प्र. ४४)। २. क्षयो मिथ्यात्वमोहनीयस्यानन्तानुबन्धिनां च उदितानां देशतो निर्मूलनाशः, अनुदितानां चोपशमः, क्षयेण युक्त उपशमः, स प्रयोजनमस्य क्षायोपशमिकम्। तच्च सत्कर्मवेदनाद्वेदकमप्युच्यते। (योगशा. स्वो. विव. २–२)।

१ जो मिथ्यात्व उदय को प्राप्त हुआ है वह क्षीण और जो उदय को अप्राप्त है वह उपशान्त है, इस प्रकार क्षय के साथ उपशमरूप मिश्र अवस्था को प्राप्त होना, इसका नाम क्षयोपशम है। इस प्रकार के क्षयोपशम से उत्पन्न होने वाले तत्त्वार्थश्रद्धान को क्षयोपशम या क्षायोपशमिक सम्यक्त्व कहा जाता है।

क्षान्ति—देखो क्षमा। १. क्रोधादिनिवृत्तिः क्षान्तिः। (त. सि. ६–१२)। २. धर्मप्रणिधानात् क्रोधादिनिवृत्तिः क्षान्तिः। क्रोधादेः कषायस्य शुभपरिणामभावनापूर्विकानिवृत्तिः क्षान्तिरित्युच्यते। (त. वा. ६, १२, ६)। ३. क्षान्तिश्च आक्रोशादिश्रवणेऽपि क्रोधत्यागश्च। (दशवै. नि. हरि. वृ. १४६)। ४. धर्मप्रणिधानात् क्रोधनिवृत्तिर्मनोवाक्कायैः क्षान्तिः। (त. भा. सिद्ध. वृ. ६–१२)। ५. धर्मप्रणिधानात् क्रोधादिनिवृत्तिः क्षान्तिः। (त. श्लो. ६–१२)। ६. क्षान्तिः क्रोधोदयनिग्रहः। (औपपा. अभय. वृ. १६, पृ. ३३)। ७. क्षान्तिः क्षमा शक्तस्याशक्तस्य वा सहनपरिणामः। (योगशा. स्वो. विव. ४३)। ८. क्षान्तिर्गणक्षमापणा। (अन. ध. स्वो. टी. ७–९८)।

१ क्रोध आदि के अभाव को क्षान्ति कहते हैं।

क्षायिक-अनन्त-उपभोग—१. निरवशेषस्योपभोगान्तरायस्य प्रलयात् प्रादुर्भूतोऽनन्त उपभोगः क्षायिकः, यतः सिंहासन-चामर-छत्रत्रयादयो विभूतयः। (त. सि. २–४)। २. निरवशेषोपभोगान्तरायप्रलयादनन्तोपभोगः क्षायिकः। निरवशेषस्योपभोगान्तरायकर्मणः प्रलयात् प्रादुर्भूतोऽनन्त उपभोगः क्षायिको यत्कृताः सिंहासन-बालव्यजनाशोकपादपछत्रत्रय - प्रभामण्डल-गम्भीरस्निग्धस्वरपरिणामदेवदुन्दुभिप्रभृतयो भावाः। (त. वा. २, ४, ५)। ३. उपभोगान्तरायक्षयात् क्षायिकोऽनन्त उपभोगः। कोऽसौ उपभोगः? सिंहासन-चामर-छत्रत्रयादिकः। (त. वृत्ति श्रुत. २–४)।

१ निःशेष उपभोगान्तराय कर्म के क्षय से केवली को जो सिंहासन, चामर और छत्रत्रय आदिरूप विभूतियाँ प्राप्त होती हैं उन्हें क्षायिक अनन्त उपभोग कहते हैं।

क्षायिक-अनन्तभोग—१. कृत्स्नस्य भोगान्तरायस्य तिरोभावादाविर्भूतो अतिशयवाननन्तो भोगः क्षायिकः, यतः कुसुमवृष्ट्यादयो विशेषाः प्रादुर्भवन्ति। (त. सि. २–४)। २. कृत्स्नभोगान्तरायतिरोभावात् परमप्रकृष्टो भोगः। कृत्स्नस्य भोगान्तरायस्य तिरोभावादाविर्भूतोऽतिशयवाननन्तो भोगः क्षायिकः, यत्कृताः पञ्चवर्णसुरभिकुसुमवृष्टिविविधदिव्यगन्ध-चरणनिक्षेपस्थानसप्तपद्मपंक्तिसुगन्धिधूप-सुखशीतमारुतादयो भावाः। (त. वा. २, ४, ४)।

१ सम्पूर्ण भोगान्तराय कर्म के विनाश से जो पुष्पवृष्टि आदि रूप अतिशयवान् अनन्त भोगसामग्री प्राप्त होती है उसे क्षायिक अनन्त भोग कहते हैं।

क्षायिक-अनन्तवीर्य—१. वीर्यान्तरायस्य कर्मणोऽत्यन्तक्षयादाविर्भूतमनन्तवीर्यं क्षायिकम्। (त. सि.

२–४)। २. वीर्यान्तरायस्यात्यन्तसंक्षयादनन्तवीर्यम्। आत्मनः सामर्थ्यस्य प्रतिबन्धिनो वीर्यान्तरायकर्मणोऽत्यन्तसंक्षयादुद्भूतवृत्तिः क्षायिकमनन्तवीर्यम्। (त. वा. २, ४, ६)। ३. वीर्यान्तरायक्षयात् क्षायिकमनन्तवीर्यम्। किं तत् क्षायिकं वीर्यम्? यद्बलात् केवलज्ञानेन केवलदर्शनेन च कृत्वा सर्वद्रव्याणि सर्वपर्यायांश्च ज्ञातुं दृष्टुं च केवली शक्नोति। (त. वृत्ति श्रुत. २–४)।

१ वीर्यान्तराय कर्म का सर्वथा क्षय हो जाने से केवली के जो अनन्त शक्ति प्रगट होती है उसे क्षायिक अनन्तवीर्य कहते हैं।

क्षायिक अभयदान—१. दानान्तरायस्यात्यन्तक्षयादनन्तप्राणिगणानुग्रहकरं क्षायिकमभयदानम्। (त. सि. २–४)। २. अनन्तप्राणिगणानुग्रहकरं सकलदानान्तरायक्षयाद्भवत्यभयदानम्। दानान्तरायस्य कर्मणोऽत्यन्तसंक्षयादाविर्भूतं त्रिकालगोचरानन्तप्राणिगणानुग्रहकरं क्षायिकमभयदानम्। (त. वा. २, ४, २)। ३. दानान्तरायक्षयात् क्षायिकमनन्तप्राणिगणानुग्रहकरमभयदानम्। (त. वृत्ति श्रुत. २–४)।

१ दानान्तरायकर्म के निःशेष विनाश से त्रिकालवर्ती अनन्त प्राणियों का अनुग्रह करने वाला क्षायिक अभयदान प्रगट होता है।

क्षायिक उपभोग—१. उपभोगः क्षायिकः, सोऽप्युचितोपभोगसाधनावाप्त्यबन्धहेतुरेव। ×××पुनरुपभुज्यत इत्युपभोगः। (त. भा. हरि. वृ. २–४)। २. विषयसम्पदि सत्यां तथोत्तरगुणप्रकर्षात् तदनुभव उपभोगः, पुनः पुनरुपभोगाद् वा वस्त्र-पात्रादिरुपभोगः। स च निरवशेषउपभोगान्तरायकर्मणि क्षीणे यथेष्टमुपतिष्ठते। (त. भा. सिद्ध. वृ. २–४)।

१ उपभोगान्तराय कर्म के पूर्णतया विनष्ट हो जाने पर यथेष्ट जो उपभोग के साधन उपस्थित रहते हैं, इस का नाम क्षायिक उपभोग है।

क्षायिक चारित्र—१. चारित्रमपि तथा (पञ्चविंशतिविकल्पस्य चारित्रमोहनीयस्य निरवशेषक्षयात् क्षायिकं चारित्रम्)। (त. सि. २–४)। २ पूर्वोक्तमोहप्रकृतिनिरवशेषक्षयात् सम्यक्त्व-चारित्रे। पूर्वोक्तस्य दर्शनमोहत्रिकस्य चारित्रस्य च पञ्चविंशतिविकल्पस्य निरवशेषक्षयात् क्षायिके सम्यक्त्वचारित्रे भवतः (त. वा. २, ४, ७)। ३. चारित्तमोहक्खएण समुप्पण्णं खइयं चारित्तं। (ध. पु. १४, पृ. १६)। ४. चरचरणं उवसमदो खयदो दुचरित्तमोहस्स। (ल. सा. ६०६)। ५. षोडशकषायनवनोकषायक्षयात् क्षायिकं चारित्रम्। (त. वृत्ति श्रुत. २–४)।

१ पच्चीस प्रकार के समस्त चारित्रमोहनीय के क्षय से उत्पन्न होनेवाले चारित्र (यथाख्यातचारित्र) को क्षायिक चारित्र कहते हैं।

क्षायिक ज्ञान—१. जं तक्कालियमिदरं जाणदि जुगवं समंतदो सव्वं। अत्थं विचित्तविसमं तं णाणं खाइयं भणियं॥ (प्रव. सा. १–४७)। २. ज्ञानावरणस्यात्यन्तक्षयात् केवलज्ञानं क्षायिकम्। (त. सि. २–४)। ३. ज्ञानावरणक्षयात् क्षायिकज्ञानं केवलम्। (त. श्लो. २–४)।

१ जो ज्ञान तात्कालिक (वर्तमान) और इतर—अतीत व अनागत—तीनों काल सम्बन्धी अनेक भेदरूप सभी पदार्थों को एक साथ जानता है, उसे क्षायिक ज्ञान (केवलज्ञान) कहा जाता है।

क्षायिक दान—देखो क्षायिक अभयदान। १. प्रयच्छनाविघातकारि दानं क्षायिकम्। (त. भा. हरि वृ. २–४)। २. तच्च सकलदानान्तरायक्षयादेकस्मादपि तृणाग्रात् त्रिभुवनविस्मयकरं यथेप्सितमर्थिनो न जातुचित् प्रतिहन्यते प्रयच्छत इति। (त. भा. सिद्ध. वृ. २–४)।

१ क्षायिक दान वह कहलाता है जिसके प्रभाव से देते समय किसी प्रकार की बाधा उपस्थित नहीं हो सकती।

क्षायिक भाव—१. क्षयः कर्मणोऽत्यन्तविनाशः, स एव क्षायिकस्तत्र भवस्तेन वा निर्वृत्त इति। (अनुयो. हरि. वृ. पृ. ३७)। तथा (क्षयः) तदत्यन्तापचयः प्रयोजनमस्येति तेन वा निर्वृत्त इति। (त. भा. हरि. वृ. २–१)। २. ज्ञानादिघातिनां पुद्गलानां य आत्यन्तिकोऽत्ययः सः क्षयः, तेन निर्वृत्तोऽध्यवसायः क्षायिक उच्यते। (त. भा. सिद्ध. वृ. १–५ पृ. ४८); तथा तदत्यन्तात्ययात् स क्षयः, स प्रयोजनमस्य तेन वा निर्वृत्त इति क्षायिकः, भवन भावः, तेन पर्यायेण आत्मलाभः, ××× तथा क्षायिकशब्देन त एव दर्शनादिपर्यायाः श्रद्धानादिलक्षणाः क्षीणाशेष-

स्वविघातिकर्मांशाः प्रतिपाद्यन्त आत्मनः स्वरूपतयेति । (त. भा. सिद्ध. वृ. २-१) । ३. आत्यन्तिकी निवृत्तिः क्षयः, क्षयः प्रयोजनमस्येति क्षायिकम् । (आरा. सा. टी. ४) । ४. कर्मक्षयस्वभावः पुनः शुभः सर्वः क्षायिकः । (आव. भा. मलय. वृ. १८६, पृ. ५७८) । ५. कर्मणः क्षयेण क्षयः, यथा पंकात् पृथग्भूतस्य शुचिभाजनान्तरसंक्रान्तस्य अम्बुनः अत्यन्तस्वच्छता भवति, तथा जीवस्य कर्मणः आत्यन्तिकी निवृत्तिः क्षयः, क्षयः प्रयोजनं यस्य भावस्य स क्षायिकः । (त. वृत्ति. श्रुत. २-१) । ६. यथास्वं प्रत्यनीकानां कर्मणां सर्वतः क्षयात् । अतो यः क्षायिको भावः शुद्धः स्वाभाविकोऽस्य सः ॥ (पंचाध्या. २-९७३) ।

२ ज्ञानादि के विघातक पुद्गलों—ज्ञानावरणादि कर्मस्कन्धों—के अत्यन्त विनाश से जो अध्यवसाय—आत्मपरिणाम—होता है, वह क्षायिक भाव कहलाता है ।

क्षायिक भावलोक—कर्मणः क्षयेण निर्वृत्तः क्षायिकः । (आव. भा. मलय. वृत्ति २०२, पृ. ५९३) ।

कर्म के क्षय से जो उत्पन्न होता है उसे क्षायिक भावलोक कहते हैं ।

क्षायिक भावसिद्ध—जत्थेणं ति यर्यमाणेन सम्यग्दर्शनज्ञानचारित्ररूपेण सर्वथा क्षपयित्वा साधितवान् यद् यस्मात् क्षायिकं भावं ततोऽसौ क्षायिकभावसिद्धः । (सिद्धप्रा. टी. गा. ५) ।

१ पैर के अंगूठे से लेकर शिर के बालों तक जितना ऊंचाई का प्रमाण हो उतना ही प्रमाण दोनों भुजाओं के फैलाने पर तिरछा भी हो, इसे चतुरस्र कहा जाता है। जिस कर्म का उदय होने पर इस प्रकार के आकार वाला जीव का शरीर होता है उसे चतुरस्र नामकर्म कहते हैं।

चतुरिन्द्रियजातिनाम—१. जस्स कम्मस्स उदएण जीवाणं चउरिंदियभावेण समाणत्तं होदि तं कम्मं चउरिंदियजादिणामं। (धव. पु. ६ पृ. ६८)। २. चतुर्णां स्पर्शन-रसना-घ्राण-चक्षुर्ज्ञानानामावरणक्षयोपशमात् चतुर्विज्ञानभावः चतुरिन्द्रियाः। ××× चतुरिन्द्रियाणां जातिनाम चतुरिन्द्रियजातिनाम। (कर्मस्त. गो. वृ. १०, पृ. १७)। ३. यदुदयाज्जन्मी चतुरिन्द्रिय इत्यभिधीयते तच्चतुरिन्द्रियजातिनाम। (त. वृत्ति श्रुत. ८-११)।

१ जिस कर्म के उदय से जीवों के चतुरिन्द्रियरूप से समानता होती है उसे चतुरिन्द्रिय जातिनामकर्म कहते हैं। २ स्पर्शनादि चार इन्द्रियों से होने वाले चार ज्ञानों के आवरण के क्षयोपशम से जो जीव चार ज्ञानों से युक्त होते हैं वे चतुरिन्द्रिय कहे जाते हैं। चतुरिन्द्रियों का जातिनामकर्म चतुरिन्द्रिय जातिनामकर्म कहलाता है।

चतुरिन्द्रिय जीव—१. फासिंदियादिचउहिं इंदिएहिं जुत्तो जीवो चतुरिंदिओ णाम। (धव. पु. ७, पृ. ६५)। २. एते स्पर्शन-रसना-घ्राण-चक्षुरिन्द्रियावरणक्षयोपशमात् श्रोत्रेन्द्रियावरणोदये नोइन्द्रियावरणोदये च सति स्पर्श-रस-गन्ध-वर्णानां परिच्छेत्तारश्चतुरिन्द्रिया अमनसो भवन्तीति। (पंचा. का. अमृत. वृ. ११६)।

१ स्पर्शन आदि चार इन्द्रियों से युक्त जीव चतुरिन्द्रिय कहलाता है। २ स्पर्शन, रसना, घ्राण और चक्षुइन्द्रियावरणकर्म के क्षयोपशम से तथा श्रोत्रेन्द्रियावरण और नोइन्द्रियावरण कर्म का उदय होने पर स्पर्श, रस, गन्ध और वर्ण के जानने वाले जीवों को चतुरिन्द्रिय कहते हैं। वे मन से रहित होते हैं।

चतुरिन्द्रियलब्धि— जिब्भा-फास-घाण-चक्खिंदियावरणाणं खओवसमेण समुप्पण्णा सत्ती चउरिंदियलद्धी। (धव. पु. १४, पृ. २०)।

जिह्वा, स्पर्श, घ्राण और चक्षु इन्द्रियावरणों के क्षयोपशम से जो शक्ति उत्पन्न होती है उसका नाम चतुरिन्द्रियलब्धि है।

चतुर्गतिनिगोद—जे देव-णेरइय-तिरिक्ख-मणुस्सेसुप्पज्जियूण पुणो णिगोदेसु पविसिय अच्छंति ते चदुगइणिगोदा भण्णंति। (धव. पु. १४, पृ. २३६)।

जो निगोद जीव देव, नारकी, तिर्यंच और मनुष्यों में उत्पन्न होकर पुनः निगोद जीवों में प्रविष्ट होते हैं वे चतुर्गतिनिगोद कहलाते हैं।

चतुर्थ असत्य—देखो असत्य (चतुर्थ)। गर्हितमवद्यसंयुतमप्रियमपि भवति वचनरूपं यत्। सामा-

ग्येन त्रेधा मतमिदमनृतं तुरीयं तु ॥ (पु. सि. ९५)। गर्हित, सावद्य और अप्रिय वचनों के बोलने को असत्य कहते हैं। यह असत्य का चौथा भेद है।

चतुर्थ मूलगुण—दिव्वादिमेहुणस्स य विवज्जणं सव्वहा चउत्थो उ। (धर्मसं. हरि. ८६०)। देवी आदि (मानुषी आदि) के साथ मैथुनकर्म का सर्वथा परित्याग कर देना, यह साधु का चौथा मूल गुण है।

चतुर्थी प्रतिमा—चतुरो मासांश्चतुष्पर्व्यां पूर्वप्रतिमानुष्ठानसहिताऽखण्डितपोषधं पालयतीति चतुर्थी। (योगशा. स्वो. विव. ३-१४८)। चार मास पर्यन्त चारों पर्वों में पूर्व प्रतिमाओं के अनुष्ठान के साथ अखण्ड पौषधव्रत का पालन करना, यह श्रावक की ग्यारह प्रतिमाओं में चौथी प्रतिमा है।

चतुर्दशपूर्वित्व—१. सयलागमपारगया सुदकेवलिणामसुप्पसिद्धा जे। एदाण बुद्धिरिद्धी चोद्दसपुव्वित्ति णामेण ॥ (ति. प. ४-१००१)। २. सम्पूर्णश्रुतकेवलिता चतुर्दशपूर्वित्वम्। (त. वा. ३, ३६, ३)। ३. सयलसुदणाणधारिणो चोद्दसपुव्विणो। (धव. पु. ९, पृ. ७०)। १ सम्पूर्ण श्रुत—चौदह पूर्वों—के पारगामी होकर जो श्रुतकेवली के नाम से प्रसिद्ध हैं, उनकी बुद्धि ऋद्धि को चतुर्दशपूर्वित्व कहते हैं।

चतुर्मुख — चतुर्मुखं यस्माच्चतसृष्वपि दिक्षु पन्थानो निस्सरन्ति। (जीवाजी. मलय. वृ. ३, २, १४२, पृ. २५८)। जिस स्थान से चारों दिशाओं को मार्ग जाते हैं उसे चतुर्मुख या चौराहा कहते हैं।

चतुर्मुखमह—१. चतुर्मुखं मुकुटबद्धैः क्रियमाणा पूजा, सैव महामहः सर्वतोभद्रः। (चा. सा. पृ. २१)। २. भक्त्या मुकुटबद्धैर्या जिनपूजा विधीयते। तदाख्या सर्वतोभद्र-चतुर्मुख-महामहाः ॥ (सा. ध. २, २७); तत्र सर्वत्र प्राणिवृन्दे कल्याणकरणात् सर्वतोभद्रः, चतुर्मुखमण्डपे विधीयमानत्वाच्चतुर्मुखः, अष्टाह्निकापेक्षया गुरुत्वान्महामहः। (सा. ध. स्वो. टी. २-२७)। ३. पूजा मुकुटबद्धैर्या क्रियते सा चतुर्मुखः ॥ (धर्मसं. श्रा. ९-३०)। ४. नृपैर्मुकुटबद्धाद्यैः सन्मण्डपे चतुर्मुखे। विधीयते महापूजा स स्याच्चतुर्मुखो महः ॥ (भावसं. वाम. ५५६)। ५. चतुर्मुखं मुकुटबद्धैः क्रियमाणा पूजा, सैव महामहः। (कार्तिके. टी. ३९१)। १ मुकुटबद्ध राजाओं के द्वारा जो जिनपूजा की जाती है उसे चतुर्मुखमह कहते हैं। २ प्राणी मात्र के प्रति कल्याणकारक होने से उसी को सर्वतोभद्र और अष्टाह्निक पूजन से बड़ी होने के कारण महामह भी कहते हैं।

चतुर्विंशतिस्तव—१. उसहादिजिणवराणं णामणिरुत्ति गुणाणुकित्ति च। काऊण अच्चिदूण य तिसुद्धिपणमो थवो णेओ ॥ (मूला. १-२४)। २. चतुर्विंशतिस्तवः तीर्थकराणामनुकीर्तनम्। (त. वा. ६, २४, ११)। ३. चतुर्विंशतीनां तीर्थकृतामन्येषां च स्तवाभिधायी चतुर्विंशतिस्तवः। (त. भा. हरि. वृ. १-२०)। ४. चउवीसत्थओ चउवीसण्हं तित्थयराणं वंदणविहाणं तण्णाम-संठाणुस्सेह-पंचमहाकल्लाण-चोत्तीसअइसयसरूवं तित्थयरवंदणाए सहलत्तं च वण्णेदि। (धव. पु. १, पृ. ९६); चदुवीसत्थओ उसहादिजिणिंदाणं तच्चेइय-चेइयहराणं च कट्टिमाकट्टिमाणं दव्व खेत्त-काल-भावपमाणादिवण्णणं कुणदि। (धव. पु. ९, पृ. १८८)। ५. चउवीसतित्थयरविसयदुण्णये णिराकरिय चउवीसं पि तित्थयराणं थवणविहाणं णाम-ट्ठवणा-दव्व-भाव-भेएण भिण्णं तप्फलं च चउवीसत्थओ परूवेदि। (जयध. १, पृ. १०८)। ६. सावद्ययोगविरहं सामायिकमेकभावगं चित्तम्। गुणकीर्तिस्तीर्थकृतां चतुरादेर्विंशतिस्तयकः ॥ (ह. पु. ३४, १४३)। ७. चतुर्विंशतीनां पूरणस्यारादुपकारिणो यत्र स्तवः शेषाणां च तीर्थकृतां वर्ण्यते स चतुर्विंशतिस्तवः। (त. भा. सिद्ध. वृ. १-२०)। ८. चतुर्विंशतिस्तवस्तीर्थकरपुण्यगुणानुकीर्तनमिति। (चा. सा. पृ. २६)। ९. वृषभादीनां चतुस्त्रिंशदतिशयप्रातिहार्य-लाञ्छन-वर्णादिव्यावर्णं कंचतुर्विंशतिस्तवम्। (श्रुतभ. टी. २४, पृ. १७९)। १०. चतुर्विंशतेस्तीर्थकराणां नामोत्कीर्तनपूर्वकं स्तवो गुणकीर्तनम्, तस्य च कायोत्सर्गे मनसाऽनुध्यानं शेषकालं व्यक्तवर्णपाठः। (योगशा. स्वो. विव. ३-१३०)। ११. तत्तत्कालसम्बन्धिनां चतुर्विंशतेस्तीर्थंकराणां नामस्थापना-द्रव्य-भावानाश्रित्य पञ्चमहाकल्याण-चतुस्त्रिंशदतिशयाष्टप्रातिहार्य-परमौदारिकदिव्यदेह-समवसरणसभा-धर्मोपदेशनादि-तीर्थंकरत्वमहिमस्तुतिश्च-

तुर्विंशतिस्तवः, तत्प्रतिपादकं शास्त्रमपि चतुर्विंशतिस्तव इत्युच्यते। (गो. जी. म. प्र. व जी. प्र. टी. ३६७)।

१ नामनिर्देश के साथ वृषभादि चौबीस तीर्थंकरों के गुणों का कीर्तन करते हुए मन, वचन, काय की शुद्धिपूर्वक पूजा व प्रणाम करने को चतुर्विंशतिस्तव कहते हैं।

चतुश्शरीरी जीव—चत्तारि सरीराणि जेसिं ते चदुसरीरा। के ते? ओरालिय-वेउव्विय तेजा-कम्मइयसरीरेहि ओरालिय-आहार-तेजा-कम्मइयसरीरेहि वा वट्टमाणा। (धव. पु. १४, २३८)।

औदारिक, वैक्रियिक, तैजस और कार्मण अथवा औदारिक, आहारक, तैजस और कार्मण इन चार शरीरों के साथ वर्तमान जीव चतुःशरीरी कहलाते हैं।

चतुश्शिरःक्रियाकर्म—सव्वकिरियाकम्मं चदुसिरं होदि। तं जहा—सामाइयस्स आदीए जं जिणिंदं पडि सीसणमणं तमेगं सिरं। तस्सेव अवसाणे जं सीसणमणं तं विदियं सीसं। थोस्सामिदंडयस्स आदीए जं सीसणमणं तं तदियं सिरं। तस्सेव अवसाणे जं णमणं तं चउत्थं सिरं। एवमेगं किरियाकम्मं चदुसिरं होदि। × × × अथवा सव्वं पि किरियाकम्मं चदुसिरं चदुप्पहाणं होदि, अरहंत-सिद्ध-साहु-धम्मे चेव पहाणभूदे कादूण सव्वकिरियाकम्माणं पउत्तिदंसणादो। (धव. पु. १३, पृ. ८९–९०)।

सब क्रियाकर्म चतुःशिर होता है। यथा—सामायिक के आदि में जो जिनेन्द्र देव को सिर नमाया जाता है यह एक सिर है। उसी के अन्त में सिर नमाना, यह दूसरा सिर है। 'थोस्सामि' दण्डक के आदि में सिर नमाना, यह तीसरा सिर है। तथा उसी के अन्त में नमस्कार करना, यह चौथा सिर है। इस प्रकार एक क्रियाकर्म चतुःशिर होता है। × × × अथवा सभी क्रियाकर्म चतुःशिर अर्थात् चतुःप्रधान होता है; क्योंकि अरहन्त, सिद्ध, साधु और धर्म को प्रधान करके सब क्रियाकर्मों की प्रवृत्ति देखी जाती है।

चतुष्क—चतुष्कं चतुष्पथयुक्तम्। (जीवाजी. मलय. वृ. ३, २, १४२, पृ. २५८)।

चार मार्गों से संयुक्त स्थान को चतुष्क कहते हैं।

चतुष्पदसंचित्तप्रधानोत्तर—चतुष्पदमनन्यसाधारणशौर्य-धैर्यादियोगतः सिंहः। (उत्तरा. नि. शा. वृ. १–१, पृ. ४)।

अनुपम शौर्य एवं धीरता आदि से संयुक्त सिंह चतुष्पदसंचित्तप्रधानोत्तर माना जाता है।

चत्वर—चत्वरं बहुरथ्यापातस्थानम्। (जीवाजी. मलय. वृ. ३, २, ४२, पृ. २५८)।

जहां पर बहुत गलियां आकर मिलती हैं, उस स्थान को चत्वर कहते हैं।

चन्द्रप्रज्ञप्ति—१. चंदपण्णत्ती णाम छत्तीसलक्खपंचपदसहस्सेहि ३६०५००० चंदायु-परिवारिद्धि-गइ-बिंबुस्सेहवण्णणं कुणइ। (धव. पु. १, पृ. १०९); चन्द्रप्रज्ञप्तौ पंचसहस्राधिकषट्त्रिंशत्शतसहस्रपदायां चन्द्रबिम्ब-तन्मार्गायुःपरिवारप्रमाणं चन्द्रलोकः तद्गतिविशेषः तस्मादुत्पद्यमानचन्द्रदिनप्रमाणं राहुचन्द्रबिम्बयोः प्रच्छाद्य-प्रच्छादकविधानं तन्नोत्पत्तेः कारणं च निरूप्यते। (धव. पु. ९, पृ. २०६)। २. चंदपण्णत्ती चंदविमाणाउ-परिवारिद्धि-गमणहाणि-वड्ढि-सयलद्ध-चउत्थभागग्गहणादीणि वण्णेदि। (जयध. १, पृ. १३२)। ३. चन्द्रायुर्गतिवैभवादिप्रतिपादिका पंचसहस्रषट्त्रिंशत्लक्षपदपरिमाणा चन्द्रप्रज्ञप्तिः। (श्रुतभ. वृ. २, पृ. १७४)। ४. तत्र चन्द्रप्रज्ञप्तिः चन्द्रस्य विमानायुःपरिवार-ऋद्धि-गमन वृद्धि-हानि-सकलार्द्ध-चतुर्भागग्रहणाद्दीनि वर्णयति। (गो. जी. म. प्र. व जी. प्र. टी. ३६१)। ५. पंचसहस्राधिकषट्त्रिंशत्लक्षपदप्रमाणा चन्द्रायुर्गतिविभवप्ररूपिका चन्द्रप्रज्ञप्तिः। (त. वृत्ति श्रुत. १–२०)। ६. चंदस्सायुविमाणे परिया रिद्धी च अयण गमणं च। सयलद्धपायगहणं वण्णेदि वि चंदपण्णत्ती॥ (अंगप्र. २–२, पृ. २७४)।

१ चन्द्रमा के विमान, आयु-प्रमाण, परिवार, ऋद्धि का गमनविशेष, उससे उत्पन्न होने वाले दिन-रात्रि का प्रमाण, राहु व चन्द्र बिम्बों में प्रच्छाद्य-प्रच्छादकभाव और वहां उत्पन्न होने का कारण; इन सबकी जिसमें प्ररूपणा की जाती है वह चन्द्रप्रज्ञप्ति कहलाती है।

चन्द्रप्रभ—चन्द्रस्येव प्रभा ज्योत्स्ना सौम्यलेश्याविशेषोऽस्येति चन्द्रप्रभः, तथा देव्याश्चन्द्रपानदोहदोऽभूत्, चन्द्रसमवर्णश्च भगवानिति चन्द्रप्रभः।

(जोगसा. स्वो. विव. ३-१२४)।

जिनकी प्रभा—सौम्य लेश्याविशेष—चन्द्रमा की ज्योत्स्ना (चांदनी) के सदृश थी, जिनकी माता को चन्द्रपान का दोहद उत्पन्न हुआ था, तथा जो चन्द्र के समान वर्णवाले थे; वे भगवान 'चन्द्रप्रभ' इस सार्थक नाम से प्रसिद्ध हुए।

चन्द्रमास—एकोनत्रिंशद् दिनानि द्वात्रिंशच्च द्विषष्टिभागा २९$\frac{३२}{६२}$ दिवसस्य चन्द्रमासः। (त. भा. सिद्ध. वृ. ४-१५)।

उनतीस दिन और एक दिन के बासठ भागों में से बत्तीस भाग (२९$\frac{३२}{६२}$) प्रमाण काल को चन्द्रमास कहते हैं।

चन्द्रसंवत्सर—पुण्णिमपरियट्टा पुण बारस संवच्छरो हवइ चंदो। (ज्योतिष्क. २-३५)।

बारह पूर्णिमाओं के परिवर्तन काल को चन्द्रसंवत्सर कहते हैं।

चयन — १. सोधम्मिंदादिदेवाणं सगसंपयादो विरहो चयणं णाम। (धव. पु. १३, पृ. ३४६)। २. चयनं कषायपरिणतस्य कर्मपुद्गलोपादानमात्रम्। (स्थाना. अभय. वृ. ४, १, २५०, पृ. १८४)।

१ सौधर्म इन्द्र आदि देवों का अपनी सम्पत्ति से जो वियोग होता है वह चयन कहलाता है।

चयनलब्धि—णामं—चयणविहिं लद्धिविहिं च वण्णेदि, तेण चयणलद्धि त्ति गुणणामं। (धव. पु. १, पृ. १२४)।

चयनविधि और लब्धिविधि का वर्णन करने वाले वस्तु नामक अर्थाधिकार को चयनलब्धि कहते हैं। यह अग्रायणीय पूर्व का सार्थक नाम वाला पांचवां अधिकार है।

चरणकुशील—१. कोउयभूतिकम्मे पसिणापसिणे निमित्तमाजीवी। कक्ककुरुयाइ लक्खणमुवजीवति विज्ज-मंतादी॥ (व्यव. भा. १, पृ. ११७; प्रव. सारो. १११)। २. एतानि (कौतुकादीनि) य उपजीवति स चरणकुशीलः। (व्यव. भा. मलय. व. १, पृ. ११७)। ३. कौतुक-भूतिकर्मणी प्रश्नाप्रश्नौ निमित्तं आजीविकां कल्ककुरुकां चः समुच्चये, लक्षणं विद्या-मंत्रादिकं च य उपजीवति स चरणकुशीलः। (प्रव. सारो. वृ. १११, पृ. २६)।

१ जो कौतुक, भूतिकर्म, प्रश्नाप्रश्न, निमित्त आजीविका, कल्ककुरुका, लक्षण और विद्या-मंत्रादि; इनका आश्रय लेता है वह चरणकुशील कहलाता है। (कौतुक आदि के लक्षण प्रव. सारो. गा. ११२-१५ में देखे जा सकते हैं।)

चरणपुलाक—१. मूलोत्तरगुणप्रतिसेवनातश्चरणपुलाकः। (त. भा. सिद्ध. वृ. ९-४९)। २. मूलोत्तरगुणप्रतिषेवणया चारित्रविराधनतश्चरणपुलाकः। (प्रव. सारो. वृ. ७२३, पृ. २१०)।

२ मूलगुणों और उत्तरगुणों की प्रतिसेवना के साथ चारित्र की विराधना करने वाले साधुओं को चरणपुलाक कहते हैं।

चरणविनय—देखो चारित्रविनय।

चरणानुयोग— १. गृहमेध्यनगाराणां चारित्रोत्पत्ति-वृद्धि-रक्षाङ्गम्। चरणानुयोगसमयं सम्यग्ज्ञानं विजानाति॥ (रत्नक. ४५)। २. चरणादिस्तृतीयः स्यादनुयोगो जिनोदितः। यत्र चर्याविधानस्य परा शुद्धिरुदाहृता॥ (म. पु. २-१००)। ३. ममेदं स्यादनुष्ठानं तस्यायं रक्षणक्रमः। इत्यमात्मचरित्रार्थोऽनुयोगश्चरणाश्रितः॥ (उपासका. ९१८)। ४. उपासकाध्ययनादौ श्रावकधर्मम्, आचाराराधनादौ यतिधर्मं च यत्र मुख्यत्वेन कथयति स चरणानुयोगो भण्यते। (बृ. द्रव्यसं. ४२)। ५. सकलेतरचारित्रजन्मरक्षाविवृद्धिकृत्। विचारणीयश्चरणानुयोगश्चरणादृतैः॥ (अन. ध. ३-११)।

१. गृहस्थ और मुनियों के चारित्र की उत्पत्ति, वृद्धि और रक्षा के विधान करने वाले अनुयोग को चरणानुयोग कहते हैं।

चरमशरीर—चरमं संसारान्तर्वर्ति तद्भवमोक्षकारणरत्नत्रयाराधकजीवसम्बन्धिशरीरं वज्रवृषभनाराचसंहननयुक्तं यस्यासौ चरमशरीरः। (गो. जी. मं. प्र. व जी. प्र. टी. ३७४)।

संसार के अन्त में वर्तमान तथा तद्भव मोक्ष के कारणभूत रत्नत्रय की आराधना करने वाले जीव से सम्बद्ध ऐसे वज्रवृषभनाराचसंहनन युक्त शरीर के धारक को चरमशरीर या चरमशरीरी कहा जाता है।

चरमसमयसयोगिभवस्थकेवलज्ञान—यत्सयोगित्वावस्थायाश्चरमसमये वर्तमानं तत् चरमसमयसयोगिभवस्थकेवलज्ञानम्। (आव. मलय. वृ. गा. ७८, पृ. ८३)।

सयोगिकेवली अवस्था के अन्तिम समय में वर्तमान केवली के ज्ञान को चरमसमयसयोगिभवस्थकेवलज्ञान कहते हैं।

चरिका—चरिका अष्टहस्तप्रमाणो नगर-प्राकारान्तरालमार्गः। (जीवाजी. मलय. वृ. ३, २, १४२, पृ. २५८)।

नगर और उसके कोट के मध्यवर्ती आठ हाथ चौड़े मार्ग को चरिका कहते हैं।

चरित—१. चरियं नाम जं सव्वं सद्भूतं वत्तं तेण जस्स दिट्ठंतो कीरइ तं चरियं। (दशवै. चू. १, पृ. ४०)। २. तत्र चरितमभिधीयते यद् वृत्तम्, तेन कस्यचिद् दार्ष्टान्तिकार्थप्रतिपत्तिर्जन्यते। तद्यथा—दुःखाय निदानम्, यथा ब्रह्मदत्तस्य। (दशवै. नि. हरि. वृ. १–५३, पृ. ३४)। ३. एकपुरुषाश्रिता कथा चरितम्। (रत्नक. टी. २–२)।

२ जो वृत्त घटित हुआ है, उसका जब किसी के लिए उदाहरण दिया जाता है तब वह चरित कहलाता है। जैसे—निदान ब्रह्मदत्त के समान दुःखदायक होता है।

चर्या—१. आचारादिसूत्रप्रपञ्चितविचित्रयतिवृत्तसमस्तसमुदयरूपे तपसि चेष्टा चर्या। (पंचा. का. अमृत. वृ. १६०)। २. चरणं चर्या ग्रामानुग्रामं विहरणात्मिका, सैव परीषहः चर्यापरीषहः। (उत्तरा. नि. शा. वृ. ८६, पृ. ८३)। ३. चर्या ग्रामादिष्वनियतविहारित्वम्। (समवा. अभय. वृ. २२, पृ. ३९)। ४. चर्या परे गणे अन्यस्मिन् संघे गमनम्। (अन. ध. स्वो. टी. ७–९८)।

१ आचारांग आदि श्रुत में विस्तार से वर्णित साधु के अनेक प्रकार के आचरण के समुदाय स्वरूप तप में जो प्रवृत्ति होती है, उसे चर्या (चारित्र) कहा जाता है। २ गांव-गांव में विहार करना, इसका नाम चर्या है, यह २२ परीषहों के अन्तर्गत है। ४ अन्य संघ में जाने को चर्या कहते हैं।

चर्यापरीषहजय—१. दीर्घकालमुषितगुरुकुलब्रह्मचर्यस्याधिगतबन्ध-मोक्षपदार्थतत्त्वस्य-संयमायतनादिभक्तिहेतोर्देशान्तरातिथेर्गुरुणाऽभ्यनुज्ञातस्य पवनवन्निःसङ्गतामङ्गीकुर्वतो बहुशोऽनशनावमौदर्य-वृत्ति-परिसंख्यान-रसपरित्यागादिबाधापरिक्लान्तकायस्य देश-कालप्रमाणोपेतमध्वगमन सयमविरोधि परिहरतो निराकृतपादावरणस्य परुष-शर्करा-कण्टकादिव्यथनजातचरणखेदस्यापि सतः पूर्वोचितयान-वाहनादिगमनमस्मरतो यथाकालमावश्यकापरिहाणिमास्कन्दतश्चर्यापरिषहसहनमवसेयम्। (त. वृ. ९–९)। २. व्रज्यादोषनिग्रहश्चर्याविजयः। (त. वा. ९, ९, १४; त. श्लो. ९–९); दीर्घकालाभ्यस्तगुरुकुलब्रह्मचर्यस्याधिगतबन्ध-मोक्षपदार्थतत्त्वस्य कषायनिग्रहपरस्य भावनापितमतेः संयमायतनादिभक्तिहेतोर्देशान्तरातिथेः गुरुणाभ्यनुज्ञातस्य नानाजनपदव्याहार-व्यवहाराभिज्ञस्य ग्रामे एकरात्रं नगरे पंचरात्रं प्रकर्षेणावस्थातव्यमित्येवं संयतस्य वायोरिव निःसंगतामुपगतस्य देश-कालप्रमाणोपेतमध्वगमनक्षमस्य क्लेशक्षमस्य भीमाटवीप्रदेशेषु निर्भयत्वाद् सिंहस्येव सहायकृत्यमनपेक्षमाणस्य, परुषशर्करा-कण्टकादिव्यथनजातपादवेदस्यापि सतः पूर्वोचितयान-वाहनादिगमनमस्मरतः सम्यक् व्रज्यादोषं परिहरतः चर्यापरीषहजयो वेदितव्यः। (त. वा. ९, ९, १४; चा. सा. पृ. ५२)। ३. वर्जितालस्यः ग्राम-नयन-(गर-) वसतिनिर्ममत्वः प्रतिमासं चर्यामाचरेदित्येव चर्यापरीषहजयः कार्यः। (त. भा. हरि. वृ. ९–९)। ४. ग्रामाजनियतस्थायी सदा वाऽनियतलयः। विविधाभिग्रहैर्युक्तश्चर्यामेकोऽप्यधिश्रयेत्॥ (आव. नि. हरि. वृ. ९१८, पृ. ४०३ उद्.)। ५. तर्जितालस्यो ग्राम-नगर-कुलादिष्वनियतवसतिनिर्ममत्वः प्रतिमासं चर्यामाचरेदित्येवं चर्यापरीषहजयः। (त. भा. सिद्ध. वृ. ९–९)। ६. चर्या आवश्यकाद्यनुष्ठानपरस्यातिश्रान्तस्याप्युपानत्कादिरहितस्यापि मार्गयानम्। (मूला. वृ. ५–५७)। ७. शार्दूलैर्मिलितेच्छमल्लभुजगाऽऽभोगे भयैकास्पदे, गन्धान्धद्विरदोत्करे करिरिपुक्रीडैकनीडे वने। स्वैरं कण्टक-कर्कशादिषु रुषेऽप्यज्ञाणपादश्चरन्नेकः सिंह इवार्तिभीतिविजयी व्रज्यातिथिर्संयमी॥ (आचा. सा. ७–९)। ८. विभ्यद्भवाच्चिरमुपास्य गुरूक्तिरूढं ब्रह्मव्रत-श्रुत-शमस्तदनुज्ञयैकः। क्षोणीमटन् गुणरसादपि कण्टकादि-कष्टे सहस्यनधियन् शिविकादि चर्याम्॥ (अन. ध. ६–९७)। ९. यो मुनिः चिरकालसेवितगुरुकुलब्रह्मचर्यो भवति, बन्ध-मोक्षपदार्थमर्मं जानाति, संयमायतनयतिजनविनयभक्त्यर्थं गुरुजनेनानुज्ञातो देशान्तरं गच्छति, नभस्वानिव निस्सङ्गो भवति, उपवास-सामिभोजन-गृहवस्तुसंख्याधृतादिरसपरिहरणादिकायक्लेशसहनशीलकायो भवति,

देश-कालानुसारेण संयमाविरोधि गमनं करोति, चरणावरणरहितः कठिनशर्करोपलकण्टकमृत्खण्डपीडनसंजातपादबाधोऽपि बाधां न मन्यते, गृहस्थावस्थोचितवाहनयानादिकानां न स्मरति, कालानुसारेण षडावश्यकानां परिहाणिं न करोति, तस्य मुनेरीर्यापहीवहजयो वेदितव्यः। (त. वृत्ति श्रुत. ७–६)।

१ जो साधु दीर्घ काल तक ब्रह्मचर्यपूर्वक गुरुकुल में रहा है, जिसने बन्ध-मोक्षादि पदार्थों के रहस्यों को जान लिया है; संयमपरिपालन और आयतन (धर्मस्थान) की भक्ति के कारण जो गुरु की अनुज्ञापूर्वक देशान्तर का अतिथि होता है—अन्य देश में जाता है, जो वायु के समान निःसंग—परिग्रह से रहित (निर्ममत्व) होता है, बहुत प्रकार के अनशनादि तपों के कारण कृश शरीर को धारण करता है, देश व काल के प्रमाण के अनुसार जो मार्ग में गमन करता है, संयमविरोधी मार्गगमन का परित्याग करता है, पादावरण—पादुका—आदि से रहित होकर कठोर कंकड़ व कांटे आदि की व्यथा से पादपीड़ा के होने पर भी पूर्वानुभूत रथादि के आश्रित होने वाले गमन का स्मरण नहीं करता है, तथा समयानुसार आवश्यकों का परिपालन करता है; ऐसा साधु चर्यापरीषह का विजेता होता है।

चलदोष—१. लसत्कल्लोलमालासु जलमेकमिव स्थितम्। नानात्मीयविशेषेषु चलतीति चलं यथा॥ (अन. ध. २–६०)। २. चलं नानात्मीयविशेषेषु चलतीति चलम्। तद्यथा—सर्वेषामर्हतामनन्तशक्तित्वे समानेऽपि अयं देवः शान्तिनाथः अस्मै शान्तिकर्मणे समर्थः, एष पार्श्वनाथ अस्मै विघ्नविनाशकर्मणे समर्थः इत्याद्याप्तश्रद्धानादिश्चलत्वम्। (गो. जी. म. प्र. टी. २५)। ३. तत्र चलत्वं यथा—नानात्मीयविशेषेषु चलतीति चलं स्मृतम्। लसत्कल्लोलमालासु जलमेकमवस्थितम्॥ नानात्मीयविशेषेषु आप्तागम-पदार्थश्रद्धानविकल्पेषु चलतीति चलं स्मृतम्॥ तद्यथा—स्वकारितेऽर्हच्चैत्यादौ देवोऽयं मेऽन्यकारिते। अन्यस्यायमिति भ्राम्यन् मोहाच्छ्राद्धोऽपि चेष्टते॥ × × × अत्र दृष्टान्तमाह—नानाकल्लोलमालासु जलमेकमवस्थितम्, तथापि नानारूपेण चलति, तथा मोहात् सम्यक्त्वप्रकृत्युदयात् श्रद्धानं भ्रमणं चेष्टते। (गो. जी. जी. प्र. टी. २५)। ४. चलम् आप्तागम-पदार्थश्रद्धानविकल्पेषु नानारूपेण चलतीति चलम्। यथा—स्वकारितेऽर्हच्चैत्यादौ देवोऽयं मे, अन्यकारिते अन्यस्यायमिति तथा सम्यक्त्वप्रकृतेरुदयात् चलम्। (कार्तिके. टी. ३०८)।

२ जो श्रद्धान आत्मीय अनेक विशेषों में चंचलता को प्राप्त होता है वह चल दोष से दूषित होता है। जैसे—सभी अरहन्त अनन्त शक्ति सहित होते हैं—हीनाधिक शक्ति वाले नहीं होते, फिर भी भगवान् शान्तिनाथ इस शान्तिकार्य के लिए समर्थ हैं, अथवा भगवान् पार्श्वनाथ इस विघ्न-विनाशनरूप कार्य के लिए समर्थ हैं, इत्यादि प्रकार का श्रद्धान।

चाण्डालिक—देखो चण्डालीक।

चातुर्य—१. तच्चातुर्यं यत्परप्रीत्या स्वकार्यसाधनम्। (नीतिवा. २७–५२)।

दूसरे को प्रसन्न करके जो अपना कार्य सिद्ध किया जाता है, इसे चातुर्य कहते हैं।

चान्द्रमास—१. एकश्च पूर्णमासीपरावर्त एकश्चान्द्रमासः, तस्मिंश्च चान्द्रमासे रात्रिंदिवपरिमाणचिन्तायामेकोनत्रिंशदहोरात्रा द्वात्रिंशद् द्वाषष्टिभागा रात्रिंदिवस्य। (सूर्यप्र. मलय. वृ. १, २०, ५६); एकस्मिंश्चान्द्रमासे अहोरात्रा एकोनत्रिंशद् भवन्ति द्वात्रिंशच्च द्वाषष्टिभागा अहोरात्रस्य। (सूर्यप्र. मलय. वृ. १०, २, ५६)। २. चंदो एगुणतीसं विसट्ठिभागा य बत्तीसं। (सूर्यप्र. मलय. वृ. १०, २०, ५७ उद्.)। ३. चन्द्रे भवश्चान्द्रः, युगादौ श्रावणे मासे बहुलपक्षप्रतिपदमारभ्य यावत्पौर्णमासीपरिसमाप्तिस्तावत्कालप्रमाणश्चान्द्रो मासः, एकपौर्णमासीपरावर्तश्चान्द्रो मास इति यावत्। अथवा चन्द्रचारनिष्पन्नत्वादुपचारतो मासोऽपि चन्द्रः। (ज्यो. भा. मलय. वृ. २–१५, पृ. ६)।

३ युग के प्रारम्भ में श्रावण मास सम्बन्धी कृष्ण पक्ष की प्रतिपदा से लेकर पौर्णमासी तक के कालप्रमाण को एक चान्द्र मास कहा जाता है। इसका अभिप्राय यह है कि एक पौर्णमासी के परिवर्तन को चान्द्र मास कहते हैं। अथवा चन्द्र के संचार से उत्पन्न होने के कारण मास को भी चान्द्र मास कहा जाता है।

चान्द्रसंवत्सर—१. एवंप्रकारेण मासेन द्वादश-

मासपरिमाणश्चान्द्रः संवत्सरः। स चायं त्रीणि शतान्यष्टौ चतुष्पंचाशदुत्तराणि द्वादशद्विषष्टिभागा (३५४$\frac{12}{62}$) इति। (त. भा. सिद्ध. वृ. ४–१५)। २. उक्तं च—पुण्णिमपरियट्टा पुण चारस संवच्छरो हवइ चंदो। तीणि सतानि चतुप्पंचासदधिकानि रात्रिदिवानां द्वादश च द्वाषष्टिभागा रात्रिदिवस्य एवंपरिमाणश्चान्द्रः संवत्सरः। द्वादशपूर्णमासीपरावर्ता यावता कालेन परिसमाप्तिमुपयान्ति तावान् कालविशेषश्चान्द्रः संवत्सरः। (सूर्यप्र. मलय. वृ. १०, २०, ५६); तिन्नि अहोरत्तसया चउपन्ना नियमसो हवइ चंदो। भागो य बारसेव य बावट्ठिकएण छेएण॥ (सूर्यप्र. ५६, पृ. १५४); चन्द्रसंवत्सरस्य परिमाणं त्रीण्यहोरात्रशतानि चतुष्पञ्चाशदधिकानि द्वादश च द्वाषष्टिभागा अहोरात्रस्य। (सूर्यप्र. मलय. वृ. १०, २०, ५६, पृ. १५४); ससिसमग पुन्निमासिं जोइंता विसमचारिनक्खत्ता। कहुओ बहुउदवओ य तमाहुसंवच्छरं चंदं। (सूर्यप्र. ५८, पृ. १७२); यस्मिन् संवत्सरे नक्षत्राणि विषमचारीणि, मासविसदृशनामानीत्यर्थः, शशिना समकं योगमुपगतानि तां तां पौर्णमासीं युञ्जन्ति—परिसमापयन्ति, यश्च कटुकः शीतातपरोगादिदोषबहुलतया परिणामदारुणो बहूदकश्च तमाहुर्महर्षयः संवत्सरं चान्द्रं चन्द्रसम्बन्धिनम्। (सूर्यप्र. मलय. वृ. ५८, पृ. १७२)।

२ पौर्णमासी के १२ परिवर्तनों को चान्द्र संवत्सर कहा जाता है। इसमें तीन सौ चौवन दिन-रात और एक दिन-रात के बासठ भागों में बारह भाग होते हैं (३५४$\frac{12}{62}$ दिन-रात)।

चारक—चारको बन्धनगृहम्। (आव. भा. हरि. वृ. ३, पृ. ११४)।

बन्धनगृह या बन्दीगृह को चारक कहते हैं। यह भरत चक्रवर्ती की परिभाषणा, मण्डलीबन्ध, चारक और छविछेद इन चार दण्डनीतियों में तीसरी है।

चारण—देखो आकाशचारण। १. चारणाः जलजंघा-तन्तु-पुष्प-पत्र-श्रेण्यग्निशिखाद्यालम्बनगमनाः। (त. वा. ३, ३६, ३)। २. अतिशयचरणाच्चारणाः अतिशयगमनादित्यर्थः। तत्सम्पन्नलब्धिरित्यर्थः। (योगशा. स्वो. विव. १-६)। ३. तत्र चरणं गमनम्, तद्विद्यते येषां ते चारणाः। ××× । तत्र गमनमन्येषामपि मुनीनां विद्यते। ततो विशेषणान्यथानुपपत्त्या चरणमिह विशिष्टं गमनमभिगृह्यते। ×× ×× ततोऽयमर्थः—अतिशायिचरणसमर्थाश्चारणाः। आह च भाष्यकृत् स्वकृतभाष्यटीकायाम्—अतिशयचरणाच्चारणाः, अतिशयगमनादित्यर्थः। (प्रज्ञाप. मलय. वृ. २१–२७३, पृ. ४२४; आव. मलय. वृ. ७०, पृ. ७८)।

१ जल, जंघा, तन्तु (धागा), पुष्प, पत्र, श्रेणि (आकाशप्रदेशपंक्ति) और अग्नि की शिखा आदि के आलम्बन से गमन में समर्थ साधु चारण—चारण नामक ऋद्धि के धारक—होते हैं। २ जिसके प्रभाव से साधु अतिशय युक्त गमन में समर्थ होते हैं, ऐसी चारणऋद्धि से सम्पन्न साधुओं को चारण कहते हैं।

चारित्र—१. चारित्तं खलु धम्मो धम्मो जो सो समो त्ति णिद्दिट्ठो। मोहक्खोहविहीणो परिणामो अप्पणो हु समो। (प्रव. सा. १–७)। २. तं चारित्तं भणियं परिहारो पुण्णपावाणं॥ (मोक्षप्रा. ३७)। ३. इच्चेसिं छण्हं जीवनिकायाणं नेव सयं दंडं समारंभिज्जा, नेवन्नेहिं दंडं समारंभाविज्जा, दंडं समारंभंतेऽवि अन्ने न समणुजाणामि, जावज्जीवाए तिविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोस्सरामि। (दशवै. सू. ४–२, पृ. १४३)। ४. जत्थ अहिंसा सच्चं अदत्तपरिवज्जणं बम्भं च। दुविहपरिग्गहविरई तं हवइ सया सुचारित्तं॥ (पउमच. १०२–१८३)। ५. हिंसानृतचौर्येभ्यो मैथुनसेवापरिग्रहाभ्यां च। पापप्रणालिकाभ्यो विरतिः संज्ञस्य चारित्रम्। (रत्नक. ४९)। ६. संसारकारणनिवृत्ति प्रत्यागूर्णस्य ज्ञानवतः कर्मादाननिमित्तक्रियोपरमः सम्यक्चारित्रम्। (स. सि. १; त. वा. १, १, ३)। ७. दर्शनज्ञानपर्यायेष्वुत्तरोत्तरभाविषु। स्थिरमालम्बनं यद्वा माध्यस्थ्यं सुखदुःखयोः॥ ज्ञाता दृष्टाऽहमेकोऽहं सुखे दुःखे न चापरः। इतीदं भावनादाढर्यं चारित्रं ××× ॥ (स्वरूपसं. १३–१४)। ८. चारित्रं विरतिलक्षणम्। (आव. नि. हरि. वृ. ८२२)। ९. चरन्त्यनिन्दितमनेनेति चरित्रं क्षयोपशमरूपम्, तस्य भावश्चारित्रम्, अशेषकर्मक्षयाय चेष्टा इत्यर्थः। (अनुयो. हरि. वृ. पृ. १०३)। १०. वृत्तं चारित्रं खल्वसदारम्भविनिवृत्ति-

मत् तच्च । सदनुष्ठानं प्रोक्तं कार्ये हेतूपचारेण ॥ (षोडश. १–७) । ११. चारित्रमोहनीयक्षय-क्षयोपशमोपशमसमुत्था तु सदसत्क्रियाप्रवृत्ति-निवृत्तिलक्षणा विरतिः चारित्रम् । (त. भा. हरि. वृ. १–१) । १२. पापक्रियानिवृत्तिश्चारित्रम् । (अन. ध्रु. ६, पृ. ४०); रागाभावो चारित्तं । (अन. ध्रु. १३, पृ. ३५८); राग-दोसा बज्झब्भालंबणा, तेसिं णिरोहो चारित्तं । (अन. ध्रु. १५, पृ. १२) । १३. सदसत्क्रियाप्रवृत्ति-निवृत्तिलक्षणं चारित्रम् । (त. भा. सिद्ध. वृ. २–३) । १४. चारित्रं सकलविरतियोगः । (भ. आ. विजयो. ६); कर्तव्याकर्तव्यपरिज्ञानं पूर्वम्, तदुत्तरकाले अकर्तव्यतापरिहरणं यत्तच्चारित्रम् ॥ × × × मनसा वाचा कायेन कर्तव्यस्य च संवरहेतोरुपादानं गुप्ति-समिति-धर्मानुपेक्षा-परिषहजयानामुपादानं चारित्रम् (भ. आ. विजयो. ६); दुस्त्यजशरीरममत्वनिवृत्तिर्ममेदं शरीरं न भवति, नाहमस्येति भावना, सा च परिग्रहपरित्यागोपयोग एवेति चारित्रम् । (भ. आ. विजयो. १०); समता चारित्रम् । (भ. आ. विजयो. १५८); कर्मादाननिमित्तक्रियोपरमो हि चारित्रम् । (भ. आ. विजयो. ३००) । १५. चारित्रं भवति यतः समस्तसावद्ययोगपरिहरणात् । सकलकषायविमुक्तं विशदमुदासीनमात्मरूपं तत् ॥ (पु. सि. ३९) । १६. स्वरूपे चरणं चारित्रं स्वसमयप्रवृत्तिः । (प्रव. सा. अमृत. वृ. १–७) । १७. आचारादिसूत्रप्रपञ्चितविचित्रयतिवृत्तसमस्तसमुदयरूपे तपसि चेष्टा चर्या । (पंचा. का. अमृत. वृ. १६०) । १८. अप्पसरूवं वत्थुं चत्तं रायादिएहिं दोसेहिं । सज्झाणम्मि णिलीणं तं जाणसु उत्तमं चरणं ॥ (कार्तिके. ९९) । १९. पापारम्भपरित्यागश्चारित्रमिति कथ्यते । (अन. ध. १८–१२४) । २०. पापारम्भनिवृत्तिस्तु चारित्रं वर्ण्यते जिनैः । (धर्मश. २१–१६२) । २१. सर्वासां हि क्रियाणामुपरतिमसमां प्राहुरेतच्चरित्रम् × × × । (अध्यात्मत. ३४)। २२. कर्मादाननिमित्तायाः क्रियाया परमं शमम् । चारित्रोचितचातुर्यश्चारुचारित्रमूचिरे । (उपासका. ६); अधर्मकर्मनिर्मुक्तिर्धर्मकर्मविनिर्मितिः । चारित्रं तच्च सागारानगारयतिसंश्रयम् ॥ (उपासका. २६२) । २३. शुद्धोपयोगलक्षणनिश्चयरत्नत्रयपरिणते स्वशुद्धात्मस्वरूपे चरणमवस्थानं चारित्रम् । (बृ. द्रव्यसं. ३५); अशुभान्निवृत्तिः शुभे प्रवृत्तिश्चापि जानीहि चारित्रम् । (बृ. द्रव्यसं. ४५) । २४. चारित्रं पापक्रियानिवृत्तिः । (मूला. वृ. ५-२)। २५. चरणं हिंसादिनिवृत्तिलक्षणं चारित्रम् । (रत्नक. टी. ३–१) । २६. शुद्धचित्स्वरूपे चरणं चारित्रम् । (प्रव. सा. अव. वृ. ८) । २७. सर्वसावद्ययोगानां त्यागश्चारित्रमिष्यते । (जि. ज्ञा. प्र. अ. १, ३, ६२०) । २८. सर्वसावद्ययोगानां त्यागश्चारित्रमिष्यते । कीर्तितं तदहिंसादिव्रतभेदेन पञ्चधा ॥ (योगशा. स्वो. १–१८) । २९. चारित्रं सावद्येतरयोगनिवृत्ति - प्रवृत्तिलिङ्गमात्मपरिणामरूपम् । (धर्मसं. मलय. वृ. ६१२) । ३०. चारित्रमाश्रवनिरोधः । (व्यव. सू. भा. मलय. वृ. १, गा. २२७, पृ. १११) । ३१. चरन्ति गच्छन्त्यनिन्दितमनेनेति चरित्रं × × × चरित्रमेव चारित्रम्, × × × अन्यजन्मोपात्ताष्टविधकर्मसंचयापचयाय चरणं सर्वसावद्ययोगनिवृत्तिरूपं चारित्रम् । (आव. नि. मलय. वृ. ११०, पृ. ११७) । ३२. कर्मादाननिदानानां भावानां च निरोधतः । चारित्रं × × × ॥ (जम्बू. च. ३–१८) । ३३. कर्मादानक्रियारोधः स्वरूपाचरणं च यत् । धर्मः शुद्धोपयोगः स्यात् सैष चारित्रसंज्ञकः ॥ (पञ्चाध्या. २–७६३) ।

१ चारित्र नाम समतारूप धर्म का है । २ पुण्य और पाप इन दोनों के परित्याग को चारित्र कहा जाता है । ३ छह जीवनिकायों—पांच प्रकार के स्थावर और त्रस जीवों—के वध (पीड़न) में मैं न तो स्वयं प्रवृत्त होऊंगा, न दूसरों को प्रवृत्त कराऊंगा, और न प्रवृत्त होते हुए अन्य किन्हीं की अनुमोदना भी करूंगा । जीवन पर्यन्त मैं उपर्युक्त प्राणिपीडन को तीन प्रकार से—मन, वचन व काय से—न करूंगा, न कराऊंगा और न करते हुए अन्य का अनुमोदन करूंगा; इस प्रकार से असत्य आदि का भी त्याग करना चारित्र है । २३ शुभ कर्म में प्रवृत्ति और अशुभकर्म से निवृत्ति इसका नाम चारित्र है ।

चारित्रधर्म—चारित्रधर्मः प्राणातिपातादिनिवृत्तिरूपः । (दशवै. नि. हरि. वृ. २१६) ।

हिंसा आदि की निवृत्ति का नाम चारित्रधर्म है ।

चारित्रपण्डित—१. सामायिक-छेदोपस्थापना-परिहारविशुद्धि-सूक्ष्मसाम्पराय-यथाख्यातचारित्रेषु कस्मिंश्चित्प्रवृत्तश्चारित्रपण्डितः । (भ. आ. विजयो.

२५)। २. पञ्चविधचारित्राण्यतमचारित्रपरिणतश्चारित्रपण्डितः। (भावप्रा. टी. ३२)।

१ सामायिक, छेदोपस्थापना, परिहारविशुद्धि, सूक्ष्मसाम्परायऔर यथाख्यात; इनमें से जो किसी एक चारित्र में प्रवृत्त है वह चारित्रपण्डित कहलाता है।

चारित्रबाल—१. अचारित्राः प्राणभृतश्चारित्रबालाः। (भ. आ. विजयो. २५)। २. अचारित्राश्चारित्रबालाः। (भावप्रा. टी. ३२)।

१ चारित्र से रहित प्राणियों को चारित्रबाल कहा जाता है।

चारित्रमोहनीय—१. चारित्रं मोहयति मोहनं वा चारित्रमोहः। (त. वा. ६, १४, ३)। २. चारित्रं विरतिरूपम्, तन्मोहयतीति चारित्रमोहनीयम्। (श्रा. प्र. टी. १५)। ३. पापक्रियानिवृत्तिश्चारित्रम्, आदिकम्माणि पावं, तेसिं किरिया मिच्छत्तासंजमकसाया, तेसिमभावो चारित्तं, तं मोहेइ आवारेदि त्ति चारित्तमोहणीयं। (धव. पु. ६, पृ. ४०); रागाभावो चारित्तं, तस्स मोहयं तप्पडिवक्खभावुप्पाययं चारित्तमोहणीयं। (धव. पु. १३, पृ. ३५८)। ४. प्राणातिपातादिविरतिश्चारित्रम्, तन्मोहनाच्चारित्रमोहनीयम्। (त. भा. सिद्ध. वृ. ८–१०)। ५. तथा चारित्रं सावद्ययोगविरतिलक्षणो जीवपरिणामः, तन्मोहयतीति चारित्रमोहनीयम्। (कर्मस्त. गो. वृ. १०, पृ. १५)। ६. चारित्रं सावद्येतरयोगनिवृत्ति - प्रवृत्तिलिङ्गमात्मपरिणामरूपम्, तन्मोहयतीति चारित्रमोहनीयम्। (प्रव. सारो. वृ. १२५६–५७, पृ. ३५८)। ७. चारित्रमोहनीयं तु विरतिप्रतिषेधकम्। (त्रि. श. पु. च. २, ३, ४७१)। ८. एवं जीवस्य चारित्रं गुणोऽस्त्येकः प्रमाणसात्। तन्मोहयति यत्कर्म तत्स्याच्चारित्रमोहनम्॥ (पंचाध्या. २–१००६)।

१ जो बाह्य और अभ्यन्तर क्रियाओं की निवृत्तिरूप चारित्र को मोहित करता है—उसे विकृत करता है—उसे चारित्रमोहनीय कहते हैं।

चारित्रविनय—१. इंदिय-कसायपणिहाणं पि य गुत्तीओ चेव समिदीओ। एसो चरित्तविणओ समासदो होइ णायव्वो॥ (मूला. ५–१७२)। २. तद्वतश्चारित्रे समाहितचित्तता चारित्रविनयः। (त. सि. ६–२३; त. वा. ६, २३, ४; त. श्लो. ६, २३)। ३. पणिहाणजोगजुत्तो पंचहिं समिदीहिं तिहि य गुत्तीहिं। एस उ चरित्तविणओ अट्ठविहो होइ णायव्वो॥ (व्यव. भा. १–६५)। ४. इदाणिं चरितविणओ कहिज्जइ सो पंचविधो भवइ। तं जहा—सामाइयचरित्तविणओ, छेदोवट्ठावणियचरित्तविणओ, परिहारविसुद्धियचरित्तविणओ, सुहुमसंपरामचरित्तविणओ, अहक्खायचरित्तविणओ त्ति। एतेसिं पंचण्ह चरित्ताणं को विणओ? भण्णति—पंचविहस्स वा सद्दहणा वा सद्दहियस्स वा काएण पासणया भव्वाणं च पुरओ पल्लवणया चरित्तविणओ वण्णिओ। (दशवै. चू. १, पृ. २७)। ५. सामाइयाइचरणस्स सद्दहाणं तहेव काएणं। संफासणं पल्लवणमह पुरओ भव्वसत्ताणं॥ मण-वइ-काइयविणओ आयरियाईण सव्वकालंपि। अकुसलमणोनिरोहो कुसलाण उदीरणं तह य॥ (दशवै. नि. हरि. वृ. ४८, पृ. ३१ उद्.)। ६. चरित्तविणओ णाम सीलवदेसु णिरदिचारदा आवासएसु अपरिहीणदा जहाथामे तहा तवो च। (धव. पु. ८, पृ. ८१)। ७. चरणविनयः समिति-गुप्तिप्रधानः। (त. भा. सिद्ध. वृ. ६–२३); सामायिकादिस्वरूपश्रद्धानपूर्वकं चानुष्ठानविधिना च प्ररूपणमित्येष चारित्रविनयः। (त. भा. सिद्ध. वृ. ६–२३)। ८. नवकोटिपरिशुद्धा भिक्षा क्व लप्स्यते क्वेषु कृतज्ञता वेति मनसोऽप्यप्रणिधानं चारित्रविनयः। (भ. आ. विजयो. ११६); कर्मपरिग्रहनिमित्तानां क्रियाणां परिवर्जनं चारित्रविनयः। (भ. आ. विजयो. ३००)। ९. दर्शन-ज्ञानयुक्तस्य या समाहितचित्तता। चारित्रं प्रति आवेत चारित्रविनयो हि सः॥ (त. सा. ७, ३३)। १०. ज्ञान दर्शन-चारित्र-तपोवीर्यवतो दुश्चरचरणश्रमणानन्तरमुद्भिन्नरोमांचाभिव्यज्यमानान्तर्भक्तेः परं प्रसादमस्तकाञ्जलिकरणादिभिर्भावयतश्चानुष्ठातृत्वं, चारित्रविनयः। (आ. सा. पृ. ६५)। ११. संयमे संयमाधारे संयमप्रतिपादिनि। आदरं कुर्वतो ज्ञेयश्चारित्रविनयः परः॥ (अमित. आ. १३–१२)। १२. पंचविहं चारित्तं अहियारा जे य वण्णिया तस्स। जं तेसिं बहुमाणं वियाण चरित्तविणओ सो॥ (वसु. श्रा. ३२३)। १३. भक्तिश्चारित्रवस्त्व[वस्त्व]न्यवृत्ताऽनिन्दनमुद्यमः। परीषहजयादी च चारित्रविनयो मुनेः॥ (आचा. सा. ६–७६)। १४. चारित्रवतश्चारित्रे समाहितचित्तता चारित्रविनयः। (योगशा. स्वो. विव. ४–९०)।

१५. पञ्चभिः समितिभिस्तिसृभिश्च गुप्तिभिर्यः प्रधानयोगयुक्त एष चारित्रविनयः। (ज्ञाव. आ. मलय. वृ. १–६५)। १६. रुच्यारुच्यहृषीकगोचररति-द्वेषोज्झनेनोच्छलत्-क्रोधादिच्छिदयाऽसकृत्समितिषूद्योगेन गुप्त्यास्थया। सामान्येतरभावनापरिचयेनापि व्रतान्युद्धरन्, धन्यः साधयते चरित्रविनयं श्रेयःश्रियः पारयम्॥ (अन. ध. ७–६६)। १७. ज्ञान-दर्शनवतः पुरुषस्य दुश्चरचरित्रे विदिते सति तस्मिन् पुरुषे भावतोऽतीव भक्तिविधानं भवति, स्वयं चारित्रानुष्ठानं च चारित्रविनयः भवति। (त. वृत्ति श्रुत. ६–२३)। १८. ज्ञान-दर्शनवतो दुश्चरचरणे तद्वति च ज्ञातेऽतिभक्तिर्भावतश्चरणानुष्ठानं चरणविनयः। (भावप्रा. ७८, पृ. २२४)। १९. चारित्रे व्रत-समिति-गुप्तिलक्षणे त्रयोदशप्रकारे सामायिकादिपंचप्रकारे वा तदाचरणं तल्लक्षणोपायेन यत्नः चारित्रे विनयः। तथा इन्द्रिय-कषायाणां प्रसरनिवारणं इन्द्रियकषायव्यापारनिरोधनम् इति चारित्रविनयः। (कार्तिके. टी. ४५६); चारित्रे त्रयोदशप्रकारे सर्वातिचाररहित्येन पंचपंचभावनायुक्तत्वेन वा प्रवृत्तिः स्व-स्वरूपानुभवनं वा चारित्रविनयः। (कार्तिके. टी. ४५७)।

१ इन्द्रियों और कषायों के प्रसार को रोकना तथा गुप्तियों व समितियों के परिपालन में प्रयत्नशील रहना, यह चारित्रविनय कहलाता है। ४ सामायिक आदि पांच प्रकार के चारित्र का श्रद्धान करना, श्रद्धा का विषय बन जाने पर फिर काय से स्पर्श करना —उसका परिपालन करना—और तत्पश्चात् भव्य जीवों के आगे उसका प्ररूपण करना; इसे चारित्रविनय कहा जाता है।

चारित्रसंवर—मणवयणकायगुत्तिंदियस्स समिदीसु अप्पमत्तस्स। आसवदारणिरोहे णवकम्मरयासवो ण हवे॥ (मूला. ८–५१)।

मन, वचन और काय के द्वारा इन्द्रियों का संरक्षण करने वाले—तीन गुप्तियों के परिपालक—और समितियों में अप्रमत्त—सदा सावधान रहने वाले —चारित्रवान् साधु के आस्रवों का निरोध हो जाने पर जो नवीन कर्मों का आस्रव रुकता है, इसका नाम चारित्रसंवर है।

चारित्राचार—१. पणिहाणजोगजुत्तो पंचहिं समिईहिं तिहिं य गुत्तीहिं। एस चरित्तायारो अट्ठविहो होइ नायव्वो॥ (दशवै. नि. १८५)। २. प्रणिधानं —चेतःस्वास्थ्यम्, तत्प्रधाना योगा व्यापारास्तैर्युक्तः समन्वितः प्रणिधानयोगयुक्तः, अयं चौघतोऽविरतसम्यग्दृष्टिरपि भवत्यत आह—पञ्चभिः समितिभिस्तिसृभिश्च गुप्तिभिर्यः प्रणिधानयोगयुक्तः, एतद्योगयुक्त एतद्योगवानेव, अथवा पञ्चसु समितिसु तिसृषु गुप्तिष्वस्मिन् विषये एता आश्रित्य प्रणिधानयोगयुक्तो य एष चारित्राचारः। (दशवै. नि. हरि. वृ. ३ १८७, पृ. १०६)। ३. पापक्रियानिवृत्तिपरिणतिश्चारित्राचारः। (भ. आ. विजयो. टी. ४६); हिंसादिनिवृत्तिपरिणतिश्चारित्राचारः। (भ. आ. विजयो. टी. ४१६)। ४. तत्रैव शुभाशुभसंकल्पविकल्परहितत्वेन नित्यानन्दमयसुखरसास्वादस्थिरानुभवनं च सम्यक्चारित्रम्, तत्राचरणं परिणमनं चारित्राचारः। (परमा. टी. १–७)। ५. प्राणिवधपरिहारेन्द्रियसंयमनप्रवृत्तिश्चारित्राचारः। (मूला. वृ. ५–२)। ६. चारित्राचारः चारित्रिणां समित्यादिपालनात्मको व्यवहारः। (समवा. अभय. वृ. सू. १३६, पृ. १०८)। ७. हिंसादिनिवृत्तिपरिणतिश्चारित्राचारः। (भ. आ. मूला. टी. ४१६)।

१ पांच समितियों और तीन गुप्तियों के साथ मन के स्वास्थ्य के अनुरूप प्रवृत्ति करना, इसका नाम चारित्राचार है। ३ पापक्रिया की निवृत्ति रूप परिणति को चारित्राचार कहा जाता है।

चारित्राराधना—१. तेरहविहस्स चरणं चारित्तस्सेह भावसुद्धीए। दुविहग्गसंजमचाओ चारित्ताराहणा एसा॥ (आ. सा. ६)। २. त्रयोदशविधस्य चारित्रस्य इह भावशुद्धया चरणं द्विविधासंयमत्याग एषा चारित्राराधना भवति। (आ. सा. टी. ६)।

पांच महाव्रत, पांच समिति और तीन गुप्तिरूप तेरह प्रकार के चारित्र का भावशुद्धिपूर्वक आचरण करने तथा इन्द्रियासंयम और प्राणि-असंयम के परित्याग को चारित्राराधना कहते हैं।

चालनीसमान शिष्य—चालनी लोकप्रसिद्धा यया कणिक्कादि चाल्यते, तत्र यथा चालन्यामुदकं प्रक्षिप्यमाणं तत्क्षणादेव गच्छति, न पुनः कियन्तमपि कालमवतिष्ठते, तथा यस्य सूत्रार्थः प्रदीयमानो यदैव कर्णे प्रविशति तदैव विस्मृतिपथमुपैति स

चालनीसमानः। (आव. मलय. वृ. १३६, पृ. १४३)।

जिस प्रकार चलनी (आटा छानने का उपकरण) में जल के डालने पर वह उसी क्षण निकल जाता है, थोड़े समय भी उसमें स्थित नहीं रहता, इसी प्रकार जिस शिष्य के लिए दिया गया सूत्रार्थ कानों में प्रविष्ट होने के साथ ही विस्मृत हो जाता है वह शिष्य चलनी के समान माना गया है।

चिकित्सादोष—१. कोमार-तणुतिगिछा-रसायण-विस-भूद-खारतंतं च। सालंकियं च सल्लं तिगिछदोसो दु अट्ठविहो॥ (मूला. ६-३३)। २. अष्टविधया चिकित्सया लब्धा [वसतिः] चिकित्सोत्पादिता। (भ. आ. विजयो. २३०)। ३. वैद्यकर्मणा दुष्टा चिकित्सादुष्टा। (भ. आ. मूला. २३०)। ४. चिकित्सा रुक्प्रतीकारात् ×××। ××× अशनतः॥ (अन. ध. ५-२५)।

१ कौमारचिकित्सा, तनुचिकित्सा, रसायन, विष, भूत, क्षारतंत्र, शालाकिक या शालाक्य और शल्य; इस आठ प्रकार की चिकित्सा के द्वारा आहार के प्राप्त करने पर चिकित्सा नाम का उत्पादन दोष होता है। २ आठ प्रकार की चिकित्सा द्वारा वसतिका के प्राप्त करने पर वसतिका सम्बन्धी चिकित्सा नाम का उत्पादन दोष होता है।

चिकित्सापिण्ड— १. सूक्ष्मेतरचिकित्सयाऽवाप्तश्चिकित्सापिण्डः। (आचारा. शी. वृ. २, १, २७३, पृ. ३२०)। २. वमन-विरेचन-वस्तिकर्मादि कारयतो वैद्यभैषज्यादि सूचयतो वा पिण्डार्थं चिकित्सापिण्डः। (योगशा. स्वो. विव. १-३८, पृ. १३५)।

१ सूक्ष्म अथवा स्थूल चिकित्सा—रोग के उपचार—द्वारा प्राप्त किया गया आहार चिकित्सापिण्ड नामक दोष से दूषित होता है।

चिकुराग्र—देखो बालाग्र। अष्टभिः रथरेणुभिः पिण्डिताभिरेकं चिकुराग्रमुच्यते। (त. वृत्ति श्रुत. ३-३८)।

आठ रथरेणुओं के समुदाय को एक चिकुराग्र (बालाग्र) कहते हैं।

चित्त—देखो चेतना।

चित्त—१. चित्तं त्रिकालविसयं। (दशवै. भा. १६, पृ. १२५)। २. चित्तं त्रिकालविषयम्—ओघतोऽती-तानागतवर्तमानग्राहि। (दशवै. भा. हरि. व ४-१६, पृ. १२५)। ३. आत्मनः परिणामविशेषविशिष्टम्। आत्मनश्चैतन्यपरिणामविशेषश्चित्तम्। (त. भा. २, ३२, १)। ४. यत्पुनरनवस्थितं तच्चित्तम्। (ध्यानश.—आव. हरि. वृ. अ. ४, पृ. ५८३)।

१ जो भूत, भविष्यत् और वर्तमान तीनों कालों को सामान्य से विषय करता है वह चित्त कहलाता है। ३ आत्मा के चैतन्य परिणामविशेष को चित्त कहते हैं।

चित्तप्रसाद परिणाम—१. तस्यैव (मोहस्यैव) मन्दोदये विशुद्धपरिणामता चित्तप्रसादपरिणामः। (पंचा. का. अमृत. वृ. १३१)। २. तस्यैव मोहस्य मन्दोदये सति चित्तस्य विशुद्धिश्चित्तप्रसादो भण्यते। (पंचा. जय. वृ. १३१)।

१ मोहकर्म का मन्द उदय होने पर जो परिणामों की विशुद्धि होती है उसे चित्तप्रसाद परिणाम कहते हैं।

चित्तविप्लव—चित्तविप्लवः प्रशमसौख्यविपर्यासः। (योगशा. स्वो. विव. १२४)।

धनादि के न होने पर भी मूर्च्छा के कारण जो प्रशमसुख का अभाव—मानसिक क्लेश—होता है उसका नाम चित्तविप्लव है।

चित्रकर्म—पड-कुड्ड-फलहियादीसु णच्चणादिकिरियावावददेव-णेरइय-तिरिक्ख-मणुस्साणं पडिमाओ चित्तकम्मं, चित्रेण क्रियन्त इति व्युत्पत्तेः। (धव. पु. ६, पृ. २४६); एदाओ चेव चउव्विहाओ (दुवय-चउप्पय-अपाद-पादसंकुलाओ) पडिमाओ कुड्ड-पड-त्थंभादिसु रायवट्टादिवण्णविसेसेहि चित्तियाओ चित्तकम्माणि णाम। (धव. पु. १३, पृ. ६); कुड्ड-कट्ठ सिला-थंभादिसु विविहवण्णविसेसेहि लिहिदपडिमाओ चित्तकम्माणि णाम। (धव. पु. १३, पृ. २०२); चित्तारेहिंतो वण्णविसेसेहि णिप्फण्णाणि चित्तकम्माणि णाम। (धव. पु. १४, पृ. ५)।

नर्तन आदि क्रिया में प्रवृत्त हुए देव, नारकी, तिर्यंञ्च और मनुष्यों की प्रतिमाओं को जो वस्त्र भित्ति और पटिया आदि के ऊपर अंकित किया जाता है, यह चित्रकर्म कहलाता है।

चिन्नान्तरगण्डिका—चिन्ना: अनेकार्थी अन्तरे—ऋषभाजिततीर्थंकरान्तरे—गण्डिका एकवक्तव्यताधिकारानुगता:। एतदुक्तं भवति—ऋषभाजिततीर्थंकरान्तरे तद्वंशजभूपतीनां शेषगतिगमनव्युदासेन शिवगतिगमनानुत्तरोपपातप्राप्तिप्रतिपादिकाश्चित्रान्तरगण्डिका इति। (नन्दी. हरि. वृ. पृ. १०६)।

ऋषभ और अजित तीर्थंकरों के अन्तराल में उनके वंश में उत्पन्न हुए राजाओं की शेष गतियों सम्बन्धी गमन को छोड़कर मोक्षगति एवं अनुत्तर विमानों में उपपात (जन्म) की प्राप्ति का जहां प्रतिपादन किया जाता है वे चित्रान्तरगण्डिका कहलाती हैं।

चिदात्मा—अस्ति पुरुषश्चिदात्मा विवर्जित: स्पर्शगन्ध-रस-वर्णै:। गुण-पर्ययसमवेत: समाहित: समुदय-व्यय-ध्रौव्यै: ॥ (पु. सि. ६)।

रूप, रस, गन्ध व स्पर्श से रहित; गुण-पर्यायों से समवेत—उनसे तादात्म्य रखने वाला—तथा उत्पाद, व्यय एवं ध्रौव्य से सहित आत्मा को चिदात्मा (पुरुष) कहते हैं।

चिन्ता—१. चिन्तनं चिन्ता।(स. सि. १-१३; त. वा. १, १३, ५)। २. चिन्ता अन्त:करणवृत्ति:। अन्त:करणस्य वृत्तिरर्थेषु चिन्तेत्युच्यते। (त. वा. ६, २७, ४)। ३. ततो मुहुर्मुहु: क्षयोपशमविशेषत: स्वधर्मानुगतसद्भूतार्थविशेषचिन्तनं चिन्ता। (नन्दी. हरि. वृ. पृ. ६५); तथा चिन्ता अन्वयधर्मपरिज्ञानाभिमुखा चेष्टा। यथा मधुरस्वादयस्त्वेवभूता इति। (नन्दी. हरि. वृ. पृ. ७८)। ४. वर्तमानत्वविषयमतिज्ञानेन विशेषितजीवो चिंता णाम। (धव. पु. १३, पृ. ३३६)। ५. अग्निना विना क्वचित् कदाचिद् धूमो न भवत्यात्मना विना शरीरे व्यापार-वचनादिकं न भवतीत्यादितर्कणमूहश्चिन्ता। (अन. ध. स्वो. टी. ३-४)। ६. चिन्तनं चिन्ता—देशान्तरे कालान्तरे च यावान् कश्चिद्धूम: स सर्वोऽप्यग्निजन्मा, अनग्निजन्मा वा न भवतीति व्याप्तिग्रहणमूहाख्यं सम्यग्ज्ञानं कथ्यते। (त. सुखबो. १-१३)। ७. यथा अग्निं विना धूमो न स्यात्, तथा आत्मानं विना शरीरव्यापार-वचनादिकं न स्यादिति वितर्कणमूहनं चिन्ता अभिधीयते। (त. वृत्ति श्रुत. १-१३)।

१ पदार्थों के विषय में जो अन्त:करण की प्रवृत्ति—मन से चिन्तन—होता है उसे चिन्ता कहते हैं। २ विशिष्ट क्षयोपशम के वश अपने अपने अर्थ से अन्वित सद्भूत अर्थविशेष का जो बार बार चिन्तन होता है, उसका नाम चिन्ता है। ४ वर्तमान अर्थ को विषय करने वाले मतिज्ञान से विशेषित जीव को चिन्ता कहा जाता है, जो मन:पर्ययज्ञान का विषय है। ५ अग्नि के बिना कहीं व कभी भी धूम नहीं होता तथा आत्मा के बिना शरीर में व्यापार व वचन आदि नहीं होते, इत्यादि विचार का नाम चिन्ता है। इसे ऊहा भी कहा जाता है।

चिन्ताज्ञान—चिन्ताज्ञानमागामिनो वस्तुन एवं निष्पत्तिर्भवति अन्यथा नेति, यथैवं ज्ञानादित्रयसमन्विते तत्रैव परमसुखावाप्तिरन्यथा नेत्येतच्चिन्ताज्ञानं मनोज्ञानमेव। (त. भा. सिद्ध. वृ. १-१३)। आगामी वस्तु की निष्पत्ति (सिद्धि) इस प्रकार से होती है, अन्य प्रकार से नहीं; इस प्रकार के ज्ञान को चिन्ताज्ञान कहा जाता है। जैसे—ज्ञानादि तीन (रत्नत्रय) से युक्त होने पर ही परम सुख की प्राप्ति होती है, अन्य प्रकार से नहीं होती।

चिह्नलोक—जं दिट्ठं संठाणं दव्वाण गुणाण पज्जयाणं च। चिह्नलोगं वियाणाहि अणंतजिणदेसिदं। (मूला. ७-५०)।

द्रव्य, गुण और पर्यायों के संस्थान या आकार को चिह्नलोक कहते हैं। यह नाम-स्थापनादि नौ लोकभेदों में से एक है।

चीनांशुकपट्ट—चीणविसयुप्पण्णो चीणांशुयपट्टो। (अनुयो. चू. पृ. १५)।

चीन देश में उत्पन्न वस्त्र को चीनांशुकपट्ट कहा जाता है।

चुडली—देखो चुरुलित दोष। चुडली उल्मुकम्, यथोल्मुकं गृह्यते तथा रजोहरणं गृहीत्वा वन्दनम्, यद्वा यत्र दीर्घहस्तं प्रसार्य वन्दे इति भणतो वन्दनम्, अथवा हस्तं भ्रामयित्वा सर्वान् वन्दे इति वदतो वन्दनम्। (योगशा. स्वो. विव. ३-१३०)।

चुडली का अर्थ उल्मुक या अलात होता है। जिस प्रकार उल्मुक को ग्रहण किया जाता है, उसी प्रकार रजोहरण को ग्रहण कर वन्दना करना, यह चुडली दोष होता है। अथवा लम्बा हाथ फैलाकर 'वन्दे' कहते हुए वन्दना करना या हाथ को घुमाकर 'सर्वान् वन्दे' ऐसा कहते हुए वन्दना करना, इसे वन्दना का चुडली दोष समझना चाहिये।

चुलित दोष—एकस्मिन् प्रदेशे स्थित्वा करमुकुलं संभ्राम्य सर्वेषां यो वन्दनां करोत्यथवा पंचमादिस्वरेण यो वन्दनां करोति, तस्य चुलितदोषो भवति। (मूला. वृ. ७-१०)।

एक स्थान में खड़े होकर और जुड़े हुए हाथों को घुमाकर सब साधुओं की एक साथ वन्दना करना अथवा पंचमादि स्वर के साथ वन्दना करना, यह कृतिकर्म का चुलित नाम का ३२वां दोष है।

चूडा—देखो चूलिका। चूडा इव चूडा, इह दृष्टिवादपरिकर्म-सूत्र-पूर्वगतानुयोगोक्तानुक्तार्थसंग्रहपरा ग्रन्थपद्धतयश्चूडा। (समवा. अभय. वृ. १४७, पृ. १२२)।

दृष्टिवाद के परिकर्म, सूत्र, पूर्वगत और अनुयोग में उनसे सम्बद्ध जिन विषयों का निरूपण नहीं किया गया है उनका संग्रह करके निरूपण करने वाली ग्रन्थपद्धति को चूडा, चूला या चूलिका कहते हैं।

चूर्ण—१. चूर्णो यव-गोधूमादीनां सक्तुकणिकादिः। (त. सि. ५-२४; त. वा. ५, २४, १४; कार्तिके. टी. २०६)। २. पिट्ठ-पिट्ठियाकाणिकादिदव्वं चुण्णणक्किरियाणिप्फण्णं चुण्णं णाम। (धव. पु ६, पृ. २७३)। ३. यव-गोधूम-चणकादीनां सक्तुकणिकादिकरणं चूर्णम्। (त. वृत्ति श्रुत. ५-२४)।

१ गेहूं और जौ आदि के सक्तु (सतुआ) रूप कणों आदि को चूर्ण कहते हैं।

चूर्णदोष—१. णेत्तस्संजणचुण्णं भूसणचुण्णं च गत्तसोभयरं। चुण्णं तेणुप्पादो चुण्णयदोसो हवदि एसो। (मूला. ६-४१)। २. पाठसिद्धादिमंत्राणामक्षुण्णोच्चारकारिणः। चूर्णदिर्देशने स्यातां मंत्रचूर्णोपजीवने। (आचा. सा. ८-४४)। ३. दोषो भोजनजननं भूषाञ्जनचूर्णयोजनाच्चूर्णः। (अन. ध. ५, २७)। ४. चूर्णादेरुपदेशनं चूर्णोपजीवनम्। (भाव. प्रा. टी. ६६)।

१ नेत्रों के अंजन चूर्ण (कज्जल), आभूषणों के चूर्ण (सोरादि द्रव्य) और शरीर के चूर्ण (पाउडर आदि) के आश्रय से आहार के उत्पादन करने को चूर्णदोष कहते हैं।

चूर्णपिण्ड—१. वशीकरणार्थं द्रव्यचूर्णादिवाप्तपिण्डचूर्णपिण्डः। (आचारा. शी. वृ. २, १, ३७१, पृ. ३२०)। २. चूर्णानि नयनाञ्जनादीनि अन्तर्धानादिफलानि (सिद्धार्थं चूर्णं प्रयुञ्जानस्य चूर्णपिण्डः)। (ओघनि. स्वो. सिद्ध. १-३८)।

१ वशीकरण आदि के लिए द्रव्यचूर्ण के प्रयोग से भोज्य वस्तु को प्राप्त करना, यह चूर्णपिण्ड नाम का उत्पादन दोष है।

चूर्णिका—१. चूर्णिका श्लक्ष्ण-मृदुकणादीनाम्। (त. सि. ५-२४; त. वा. ५, २४, १४; कार्तिके. टी. २०६)। २. अतिसूक्ष्मातिस्थूलवर्जितं मृदु श्लक्ष्णराजमाष-हरिमंथकादीनां दलनं चूर्णिका। (त. वा. टी. ५-२४)।

२ उड़द और मूंग आदि के दलने से जो अतिशय सूक्ष्मता और अतिशय स्थूलतासे रहित कण उत्पन्न होते हैं उन्हें चूर्णिका कहा जाता है।

चूलिका—देखो चूडा। १. ××× एक्केण दोहि सव्वेहि वा अणिओगद्दारेहि सूइदत्थाणं विसेसपरूवणा चूलिया णाम। (धव. पु. ७, पृ. ५७५); सुत्तसुइदत्थपयासणं चूलिया णाम। (धव. पु. १०, पृ. ३६५); जाए अत्थपरूवणाए कदाए पुव्वपरूविदत्थम्मि सिस्साणं णिच्छओ उप्पज्जदि सा चूलिया त्ति भणिदं होदि। (धव. पु. ११, पृ. १४०)। २. चतुरशीतिपदचूलिकाशतसहस्राणि एका चूलिका। (जीवाजी. मलय. वृ. ३, २, १७८, पृ. ३४५)।

१ पूर्वनिरूपित अनुयोगद्वारों में एक, दो अथवा सभी अनुयोगद्वारों से सूचित अर्थों की विशेष प्ररूपणा जिस ग्रन्थ के द्वारा की जाती है उसका नाम चूलिका है। २ चौरासी लाख चूलिकाओं की एक चूलिका (गणनाभेद) होती है।

चूलिकाशत—चतुरशीतिर्नयुतशतसहस्राणि एकं चूलिकाशतम्। (जीवाजी. मलय. वृ. ३, २, १७८, पृ. ३४५)।

चौरासी लाख नयुतों का एक चूलिकाशत (गणनाभेद) होता है।

चेटिका—देव-शयन-मुख्य नरा अन्युत्पन्नस्त्रियश्चेटिकम्। पत्नी पाणिगृहीता स्यात्सदन्या चेटिका मता॥ (अमरको. २-१७८)।

विवाहित पत्नी के अतिरिक्त रखी हुई अन्य स्त्री चेटिका कहलाती है।

चेतनत्व—चेतनत्वं चैतन्यवत्त्वम्। (अष्टसह. कु. चं. पृ. २५)।

चैतन्य से युक्त होने का नाम चेतनत्व है।

चेतना— १. ××× चेयण पच्चक्ख सण्णमणुसरणं। (धवला. भा. १६)। २. चेतनं चेतना, सा प्रत्यक्षवर्तमानार्थग्राहिणी। (बृहद्र. हरि. वृ. ४-१६, पृ. १२५)। ३. अन्वितमहमहमिकया प्रतिनियतार्थावभासिबोधेषु। प्रतिमासमानमखिलैर्यद्रूपं वेद्यते सदा सा चित्॥ (अन. ध. २-३४)।

१ प्रत्यक्षरूप से वर्तमान पदार्थ के ग्रहण का नाम चेतना है। ३ प्रतिनियत पदार्थों को प्रतिभासित करने वाले ज्ञानों में 'अहम् अहम्' रूप से—जिस मैंने पूर्व में घट को देखा था वही मैं अब पट को देख रहा हूं, इत्यादि स्वरूप से—जो आकार प्रतिभासित होता है उसे चित् या चेतना कहा जाता है।

चैतन्य—देसो चेतना। त्रिकालगोचरानन्तपर्यायात्मकस्य जीवस्वरूपस्य स्वक्षयोपशमवशेन संवेदनं चैतन्यम्। (धव. पु. १, पृ. १४५)।

तीनों कालों को विषय करने वाली अनन्त पर्याय स्वरूप जीव के स्वरूप का जो अपने क्षयोपशम के अनुसार संवेदन होता है उसका नाम चैतन्य है।

चैत्य—चितेः लेप्यादिचयनस्य भावः कर्म वा चैत्यम्, तच्च संज्ञाशब्दत्वाद् देवताप्रतिबिम्बे प्रसिद्धम्, तत्स्तदाश्रयभूत यद्देवतायाः गृहं तदप्युपचाराच्चैत्यमुच्यते। (जम्बूद्वी. शा. १, पृ. १४; सूर्यप्र. मलय. वृ. पृ. २)।

भित्ति आदि के चिनने रूप क्रिया से जो निर्मित होता है उसे चैत्य कहा जाता है, यह मुख्यरूप से देवता के प्रतिबिम्बरूप अर्थ में प्रसिद्ध है, पर उपचार से उस चैत्य के आश्रयभूत देवालय को भी चैत्य कहा जाता है।

चैत्यवर्णजनन—१. यथा वीतराग-द्वेषास्त्रिलोकचूलामणयोऽर्हदादयो भव्यानां शुभोपयोगकारणतामुपयन्ति तद्वदेतान्यपि तदीयानि प्रतिबिम्बानि। अर्हद्द्रव्यावलम्बनो हि शुभोऽशुभो वा परिणामो जायते। यथा—आत्मनि मनोज्ञामनोज्ञविषयसान्निध्याद् रागद्वेषौ, स्वपुत्रमदृशदर्शनं पुत्रस्मृतेरालम्बनम्, एवमर्हदादिगुणानुस्मरणनिबन्धनं प्रतिबिम्बम्। तथानुस्मरणम् अभिनवाशुभप्रकृतेः संवरणं, प्रत्यग्रशुभकर्मादाने, गृहीतशुभप्रकृत्यनुभवस्फारीकरणे, पूर्वोपात्ताशुभप्रकृतिपटलरसापहासे च क्षममिति सकलाभिमतपुरुषार्थसिद्धिहेतुतया उपासनीयानीति चैत्यमहत्ताप्रकाशनं चैत्यवर्णजननमिति। (भ. आ. विजयो. ४७)। २. अर्हदादीनां शान्तरूपत्व-वीतरागत्वादिगुणानुस्मरणात् पूर्वपापनिरोधोऽभिनवपुण्यास्रवणं पुण्योदयस्फारीभावः पापोदयापकर्षश्च ×× ×। (भ. आ. मूला. ४७)।

१ वर्ण शब्द का अर्थ यहां प्रशंसा अभीष्ट है। तदनुसार जिस प्रकार साक्षात् अरहन्त आदि भव्य जीवों के लिए शुभोपयोग के कारणभूत हैं उसी प्रकार उनके प्रतिबिम्ब भी शुभोपयोग के कारणभूत हैं, क्योंकि बाह्य द्रव्य के आश्रय से जीवों के शुभ व अशुभ परिणाम हुआ करते हैं। प्रकृत में प्रतिबिम्ब अरहन्त आदि के गुणों के स्मरण का कारण है। इस गुणानुस्मरण से नवीन पाप प्रकृतियों के आस्रव के निरोधरूप संवर और पुण्य प्रकृतियों का आगमन होता है। साथ ही पूर्वबद्ध शुभ प्रकृतियों के अनुभाग में वृद्धि और अशुभ प्रकृतियों के अनुभाग में हानि भी हुआ करती है। इससे जिनप्रतिबिम्बों की उपासना करना योग्य है। इस प्रकार जिनप्रतिबिम्बों के महत्त्व को प्रगट करना, यह चैत्यवर्णजनन कहलाता है।

चैत्यवृक्ष (चइत्तरुक्ख)—१. तेषां (चैत्यवृक्षपीठानां) मध्ये सिद्धार्थनामकाः चैत्यवृक्षाः सिद्धार्थतीर्थंकरप्रतिकृतिपवित्रीकृताः षोडशयोजनोच्छ्राय-चतुर्योजनोत्सेध-योजनविष्कम्भस्कन्धाः द्वादशयोजनोच्छ्राय-तावद्बाहल्यविटपाः। (त. वा. ३, १०, १३, पृ. १७८)। २. चउपासट्ठियजिणिंद-यंदपडिबिम्बसंबंधेण पत्तच्चणचइत्तरुक्खएहि ×× ×। (धव. पु. ६, पृ. ११०)।

१ सिद्धार्थ (कृतकृत्य) तीर्थंकर की प्रतिमाओं से पवित्र किये गये—उनसे अधिष्ठित—व नियमित ऊंचाई आदि से सहित जो सिद्धार्थ नामक वृक्ष होते हैं वे चैत्यवृक्ष कहलाते हैं।

चैत्यावर्णवाद—१. स्वकल्पनाभिरयमर्हन्नेव सिद्धः इत्यचेतनस्य व्यवस्थापनायामपि दारिकाणां कृत्रिमपुत्रकव्यवहृतिरिव न मुख्यवस्तूपसेवनोद्भवं फलं लभ्यते। न प्रतिबिम्बादिस्था अर्हदादयः, तद्गुणवैकल्यात्र प्रतिबिम्बानामर्हदादित्वमिति चैत्यावर्णवादः। (भ. आ. विजयो. १-४७)। २. सोऽयमर्हन्नित्यादिस्वकल्पनया पाषाणादावचेतने तद्व्यव-

स्थायामपि कन्यकानां कृत्रिमपुत्रकव्यवहृताविव न मुख्यवस्तूपसेवनोद्भूतं फलमुपलभ्यते इति, न प्रतिमादिषु संक्रान्ता अर्हदादयो नापि प्रतिमादीनामर्हदादित्वमस्ति तद्गुणशून्यत्वात्ततोऽन्यपाषाणादिवन्न तेषामाराधने किञ्चित्फलमस्ति, इत्यादिश्चैत्यानाम्(अवर्णवादः)। (भ. आ. मूला. ४७)।

१ अपनी कल्पना से 'यह अरहन्त या सिद्ध हैं' इस प्रकार अचेतन पाषाण में उनकी स्थापना करने पर प्रत्यक्ष में उनकी आराधना से कुछ फल प्राप्त होता है यह असम्भव है। जैसे—कन्यायें कृत्रिम पुत्र (प्रतिकृतिरूप) में जब पुत्र का व्यवहार करती हैं तब यथार्थ पुत्र का फल उन्हें कभी प्राप्त नहीं होता, वैसे ही अरहंत आदि की प्रतिमाओं की पूजा आदि से वह फल नहीं प्राप्त हो सकता। कारण यह कि न तो प्रतिमाओं में अरहन्त आदि स्थित होते हैं और न उनके गुणों से शून्य होने के कारण वे प्रतिमायें स्वयं अरहन्त आदि हो सकती हैं। इस प्रकार से कुयुक्तिपूर्वक प्रतिमाओं की निन्दा करने को चैत्यावर्णवाद कहा जाता है।

चोरप्रयोग—देखो चौरप्रयोग।

चौरकथा— १. स चौरो निपुणः खातकुशलः, स च वर्त्मनि ग्रहणसमर्थः, पश्यतां गृहीत्वा गच्छति तेन सर्वं आक्रान्ता इत्येवमादिकथनं चौरकथा। (मूला. वृ. ६-८६)। २. चोराणां चौरप्रयोगकथनं चौरकथाविधानम्। (नि. सा. वृ. ६७)।

१ वह चोर सेंध लगाने में बड़ा निपुण है, मार्ग में चलते हुए लोगों को देखते-देखते लूट कर चला जाता है, वह सभी पर आक्रमण करने वाला है; इत्यादि प्रकार से चोरों की चर्चा करने को चौरकथा कहते हैं।

चौरप्रयोग – १. चोरप्रयोगः चोरयतः स्वयमेवान्येन वा प्रेरणं प्रेरितस्य वाऽन्येनानुमोदनम्। (रत्नक. टी. ३-१२)। २. चोरप्रयोगः—चोरयतः स्वयमन्येन वा चोरय त्वमिति चोरणक्रियायां प्रेरणम्, प्रेरितस्य वा साधु करोषीत्यनुमननम्। कुशिका-कर्तरिका-घर्घरिकादिचौरापकरणानां वा समर्पणं विक्रयणं वा। (सा. ध. स्वो. टी. ४-५०)।

१ चोरी करने वाले को चोरी के लिए स्वयं प्रेरित करना, अन्य से प्रेरणा करना या उसकी अनुमोदना करना, इसे चौरप्रयोग कहते हैं। यह अचौर्याणुव्रत का एक अतिचार है।

चौरार्थादान—१. चौरार्थादानं च अप्रेरितेनाननुमतेन च चोरेणानीतस्यार्थस्य ग्रहणम्। (रत्नक. टी. ३-१२)। २. चौराहृतग्रहः—अप्रेरितेनाननुमतेन च चौरेणानीतस्य कनक-वस्त्रादेरादानं मूल्येन मुद्रिकया वा। (सा. ध. स्वो. टी. ४-५०)।

१ जिसे चोरी के लिए प्रेरणा व अनुमोदना नहीं की गई है, ऐसे चोर के द्वारा लाये हुए अर्थ (सुवर्णादि) के लेने को चौरार्थादान कहते हैं। यह अचौर्याणुव्रत का एक अतिचार है।

चौराहृतग्रह—देखो चौरार्थादान।

चौर्य—१. अदत्तस्य स्वयं ग्राहो वस्तुनः चौर्यमीर्यते। संक्लेशपरिणामेन प्रवृत्तियंत्र तत्र तत्। (ह. पु. ५८, १३१)। २. स्तैन्यं परद्रव्यापहरणाभिप्रायः। (मूला. वृ. ५-१९९)। ३. अदत्तस्य यदादानं चौर्यमित्युच्यते बुधैः। (लाटीसं. ६-३३)।

१ संक्लेश परिणामपूर्वक बिना दी हुई वस्तु के ग्रहण करने को चौर्य या चोरी कहते हैं।

चौर्यानन्द—१. तह तिव्वकोह-लोहाउलस्स भूओवघायणमणज्जं। परदव्वहरणचित्तं परलोयावायनिरवेक्खं॥ (ध्यानश. २१)। २. चौर्योपदेशबाहुल्यं चातुर्यं चौर्यकर्मणि। यच्चौर्यैकपरं चेतस्तच्चौर्यानन्द इष्यते॥ यच्चौर्याय शरीरिणामहरहश्चिन्ता समुत्पद्यते, कृत्वा चौर्यमपि प्रमोदमतुलं कुर्वन्ति यत्सन्ततम्। चौर्येणापि हृते परैः परधने यज्जायते संभ्रमस्तच्चौर्यप्रभवं वदन्ति निपुणा रौद्रं सुनिन्दास्पदम्॥ (ज्ञाना. २५-२६, पृ. २६६-६७)। ३. परद्रव्यहरणे तत्परता प्रथमं रौद्रम्। (मूला. वृ. ५-१९९।

१ तीव्र क्रोध व लोभ से अभिभूत प्राणी का चित्त जो दूसरे के द्रव्य के अपहरण में संलग्न रहता है, यह चौर्यानन्द या स्तेयानुबन्धी रौद्र ध्यान कहलाता है। २ चोरी करने का उपदेश देना, चोरी करने में चातुर्य रखना, चित्त को सदा चोरी में लगाये रखना, निरन्तर चोरी का चिन्तन करना, चोरी करके हर्षित होना; इत्यादि प्रवृत्ति को चौर्यानन्द नाम का रौद्रध्यान कहा जाता है।

च्यवन—१. च्युतिः च्यवनम्, वैमानिक-ज्योतिष्कायां मरणम्। (स्थाना. अभय. वृ. १-२७, पृ. १६)।

२. च्यवनमुद्वर्तनं मरणमिति पर्यायः। (संग्रहणी दे. बृ. २, पृ. १)।

१ वैमानिक और ज्योतिषी देवों के मरण को च्यवन या च्युति शब्द से कहा जाता है। २ च्यवन, उद्वर्तन और मरण ये समानार्थक शब्द हैं।

च्यावित—१. च्यावितं तेभ्यः (देवादिभ्यः) एवायुःक्षयेण भ्रंशितम्। ×××उक्तं च वृद्धैः—×××चइयंमि चावितं व जह कप्पा संगमो सुरिंदेणं। तह चावियमिति जीवा पलिएणाउक्खएणं ति॥ (अनुयो. हरि. वृ. उद्., पृ. १४)। २. चइदं णाम कदलीघादेण छिण्णायुक्खयपदिदशरीरं। उक्तं च—विस-वेयण-रत्तक्खय-सत्थग्गहण-संकिलेसेहिं। आहारोस्सासाणं णिरोहदो छिज्जदे आऊ। (धव. पु. १, पृ. २२); कयलीघादेण मरणकंखाए जीवियासाए जीविय-मरणसाहि विणा वा पदिदसरीरं चइदं। (धव. पु. १, पृ. २५); उवसग्गेण पदिदसरीरो ×××चइददेहो णाम। (धव. पु. ६, पु. २६६)। ३. चेतनस्योपसर्गबलाद्वा च्यावितशब्देनोच्यते। (भ. आ. विजयो. ७५३)। ४. च्यावितं कदलीघातपतितं त्यागवर्जितम्। (आचा. सा. ६–१२)। ५. कदलीघातेत पतितं च्यावितम्। (अन. ध. स्वो. टी. ८–१६)।

१ आयु के क्षय से देवता आदि से भ्रष्ट कराये गये शरीर को च्यावित कहते हैं। २ कदलीघात—विषभक्षण, वेदना व रक्तक्षय आदि—से खण्डित हुई आयु के क्षय से नष्ट हुए शरीर का नाम च्यावितशरीर है।

१ सूत्र में चरमपने का निर्देश मनुष्यशरीर की अपेक्षा से किया गया है। उसका अभिप्राय यह है कि विजयादिक विमानों से च्युत होकर सम्यक्त्व को न छोड़ते हुए जो मनुष्यों में उत्पन्न होते हैं और वहां संयम का परिपालन करके फिर से विजयादि विमानों में उत्पन्न होते हैं, पश्चात् वहां से च्युत होकर पुनः मनुष्य होते हुए मुक्ति को प्राप्त होते हैं उनके दो मनुष्यभवों की अपेक्षा द्विचरमता सिद्ध है। २ जो विजयादि विमानों से च्युत होते हुए दो बार मनुष्य जन्म लेकर मुक्ति को प्राप्त करते हैं वे द्विचरम कहलाते हैं।

द्विज—द्विजः द्विर्जातो मातुर्गर्भे जिनसमयज्ञानगर्भे चोत्पादात् द्विजः ब्राह्मण-क्षत्रिय-विशामन्यतमः। (सा. ध. स्वो. टी. २–१९)।
माता के गर्भ से और जैनागम के ज्ञानरूप गर्भ से जो दो बार जन्म लेते हैं ऐसे ब्राह्मण, क्षत्रिय और वैश्यों में किसी को भी द्विज कहा जाता है।

द्विद्राज्यलङ्घन—देखो विरुद्धराज्यातिक्रम। तथा द्वयोर्विरुद्धयोः राज्ञोरिति शेषः, राज्यं नियमिता भूमिः कटकं वा, तस्य लङ्घनं व्यवस्थातिक्रमः। व्यवस्था च परस्परविरुद्धराजकृतैव, तल्लङ्घनं चान्यतरराज्यनिवासिनः इतरराज्ये प्रवेशः ××× । (योगशा. स्वो. विव. ३–९२)।
अनुरूपक दो राजाओं के राज्य—भूमि अथवा कटक—का उल्लंघन करना, यह द्विद्राज्यलंघन नामक तीसरे अचौर्याणुव्रत का एक अतिचार है।

द्वितीय मूलगुण—कोहादिएगारेहिं एवं विय मोसविरमणं विदियो। (भगंसं. ८५९)।
प्रथम अहिंसाव्रत के समान क्रोध व लोभ आदि किसी भी कारण से असत्य वचन नहीं बोलना, यह साधु का दूसरा (असत्यविरमण) व्रत है।

द्वितीया प्रतिमा—दो मासो यावदखण्डितान्यविराधितानि च पूर्वप्रतिमानुष्ठानसहितानि द्वादशापि व्रतानि पालयतीति द्वितीया। (योगशा. स्वो. विव. ३–१४८)।
दो माह तक पूर्व (प्रथम) प्रतिमा के अनुष्ठान सहित अखण्डित बारह व्रतों का परिपालन करना व उनकी विराधना न होने देना, यह दूसरी प्रतिमा है।

द्वितीयोपशमसम्यक्त्व—तथोपशान्तमोहस्योपशमश्रेणियोगतः। मोहोपशमजमौपशमिकं तु द्वितीयकम्॥ (त्रि. पु. च. १, ३, ६०१)।
उपशमश्रेणि के योग से जिसका मोह (दर्शनमोह) उपशान्त हो चुका है उसके जो मोह के उपशम से सम्यक्त्व उत्पन्न होता है वह द्वितीयोपशम सम्यक्त्व कहलाता है।

द्विदल—द्विदलं मुद्ग-माषादिधान्यम्। (सा. ध. स्वो. टी. ५–१८)।
मूंग व उड़द आदि जिस धान्य के दो भाग हो जाया करते हैं उसे द्विदल कहा जाता है। इसे कच्चे दूध, दही या छांछ के साथ मिलाने पर वह जीवाश्रित हो जाने के कारण अभक्ष्य—खाने के लिए अयोग्य—होता है।

द्विपद-सचित्त-प्रधानोत्तर — द्विपदमनुत्तरपुण्यप्रकृतितीर्थंकरनामाद्यनुभवनतः तीर्थंकरः। (उत्तरा. नि. शा. वृ. १–१, पृ. ४)।
अनुपम पुण्य प्रकृतिरूप तीर्थंकर नामकर्म का अनुभव करने वाले तीर्थंकर द्विपद-सचित्त-प्रधानोत्तर कहे जाते हैं।

द्वीन्द्रियजातिनाम—१. जस्स कम्मस्स उदएण जीवाणं बीइंदियत्तेण समाणत्तं होदि तं कम्मं

बीइंदियणामं। (धव. पु. ६, पृ. ६८); बेइंदियभाव-णिव्वत्तयं जं कम्मं तं बीइंदियजादिणामं। (धव. पु. १३, पृ. ३६३)। २. यदुदयादात्मा द्वीन्द्रिय इत्यभिधीयते तद् द्वीन्द्रियजातिनाम। (त. वृत्ति श्रुत. ८-११)।

१ जिस कर्म के उदय से जीवों के द्वीन्द्रिय रूप से समानता होती है उसे द्वीन्द्रियनामकर्म कहते हैं।

द्वीन्द्रिय जीव—१. संबुक्क-मादुवाहा संखा सिप्पी अपादगो य किमी। जाणंति रसं फासं जे ते बेइंदिया जीवा॥ (पंचा. का. ११४)। २. खुल्ला वराड संखा अक्खुणह अरिट्ठगा य गंडोला। कुक्खिकिमि सिप्पिआई णेया बेइंदिया जीवा॥ (प्रा. पंचसं. १-७०)। ३. द्वे इन्द्रिये येषां ते द्वीन्द्रि-याः। के ते? शंख-शुक्ति-कृम्यादयः। उक्तं च— कुक्खि-किमि-सिप्पि-संखा गंडोलारिट्ठ अक्खखुल्ला य। तह य वराडय जीवा णेया बीइंदिया एदे॥ (धव. पु. १, पृ. २४१); द्वीन्द्रियजातिनामकर्मो-दयाद् द्वीन्द्रियः। (धव. पु १, पृ. २४८ व २६४); फासिंदियावरणसव्वघादिफद्दयाणमुदयक्खएण तेसिं चेव संतोवसमेण अणुदओवसमेण वा देसघादिफद्द-याणमुदएण जिब्भिंदियावरणस्स सव्वघादिफद्द-याणमुदयक्खएण तेसिं चेव संतोवसमेण अणुदओव-समेण वा देसघादिफद्दयाणमुदएण चक्खु-सोद-घाणि-न्दियावरणाणं देसघादिफद्दयाणमुदयक्खएण तेसिं चेव संतोवसमेण अणुदओवसमेण वा सव्वघादिफद्द-याणमुदएण खओवसमियं जिब्भिंदियं समुप्पज्जदि। फासिंदियाविणाभावेण तं चेव जिब्भिंदियं बीइंदियं ति भण्णदि, बीइंदियजादिणामकम्मोदयाविणाभावा-दो वा। तेण वेइंदिएण वेइंदिएहि वा जुत्तो जेण बीइंदिओ णाम तेण खओवसमियाए लद्धीए बीइंदि-ओ त्ति सुत्ते भणिदं। (धव. पु. ७, पृ. ६४)। ४. स्पर्शन-रसनेन्द्रियावरणक्षयोपशमात् शेषेन्द्रिया-वरणोदये नोइन्द्रियावरणोदये च सति स्पर्श-रसयोः परिच्छेत्तारो द्वीन्द्रिया अमनसो भवन्तीति। (पंचा. का. अमृत. वृ. ११४)। ५. अनेनैवाभिलापेन द्वयोः स्पर्शन-रसनज्ञानयोः (आवरणक्षयोपशमाद् द्वि-विज्ञानभाजः द्वीन्द्रियाः)। (कर्मस्त. गो. वृ. १, पृ. १७)।

१ शम्बूक (एक जलजन्तु), मातृवाह (एक क्षुद्र कीड़ा), शंख, सीप और पैरों से रहित कृमि आदि जो जीव स्पर्श और रस को ही जानते हैं वे द्वी-न्द्रिय कहलाते हैं। ५ स्पर्शन और रसना ज्ञाना-वरण के क्षयोपशम से जो जीव स्पर्श और रस विषयक ज्ञान से युक्त होते हैं उन्हें द्वीन्द्रिय कहते हैं।

द्वीपकुमार—१. उरःस्कन्ध-बाहूग्रहस्तेष्वधिकप्रति-रूपाः श्यामावदाताः सिंहचिह्ना द्वीपकुमाराः। (त. भा. ४-११)। २. द्वीपकुमारा भूषणनियुक्तसिंह-रूपचिह्नधराः। (जीवाजी. मलय. वृ. ११७, पृ. १६१)। ३. द्वीपकुमाराः स्कन्ध-वक्षःस्थल-बाहाग्र-हस्तेष्वधिकशोभाः उत्तप्तहेमप्रभाः। (संग्रहणी वे. वृ. ३७)। ४. द्वीपक्रीडायोगात् विविधदोऽपि द्वीपाः। ×××द्वीपाश्च ते कुमाराः द्वीप-कुमाराः। (त. वृत्ति श्रुत. ४-१०)।

१ जो भवनवासी देव कन्धों, बाहुओं के अग्रभागों और हाथों में अधिक सुन्दर, वर्ण से श्याम तथा सिंह के चिह्न से युक्त होते हैं वे द्वीपकुमार कह-लाते हैं। ४ जो द्वीपों में क्रीडा किया करते हैं उन्हें द्वीपकुमार कहते हैं।

द्वीप-सागरप्रज्ञप्ति—१. दीव-सायरपण्णत्ती णाम-पण्णत्तरि-छत्तीसपदसहस्सेहि (५२३६०००) उद्धार-पल्लपमाणेण दीव सायरपमाणं अण्णं पि दीव-साय-रंतब्भूदत्थं बहुभेयं वण्णेदि। (धव. पु. १, पृ. ११०); द्वीप-सागरप्रज्ञप्तौ षट्त्रिंशत्सहस्राधिक-द्वापञ्चाशच्छतसहस्रपदायां (५२३६०००) द्वीप-सागराणामियत्ता तत्संस्थानं तद्विस्तृतिः तत्रस्थ-जिनालयाः व्यन्तरावासाः समुद्राणामुदकविशेषाश्च निरूप्यन्ते। (धव. पु. ९, पृ. २०६)। २. जा दीव सागरपण्णत्ती सा दीव-सायराणं तत्थट्ठिय-जोयिस-वण-भवणावासाणं आवासं पडि सट्ठि-अकट्टिम-जिणभवणाणं च वण्णणं कुणइ। (जयध. १, पृ. १३३)। ३. षट्त्रिंशत्सहस्रद्विपंचाशल्ल-क्षपदपरिमाणा असंख्यातद्वीप-समुद्रस्वरूपप्ररूपिका द्वीप-सागरप्रज्ञप्तिः। (श्रुतभ. टी. ९, पृ. १७४)। ४. द्वीप-सागरप्रज्ञप्तिः असंख्यातद्वीप-सागराणां स्वरूपस्य तत्रस्थितज्योतिर्वनि-भावनावासानाम् आवासं प्रति विद्यमाना कृत्रिमजिनभवनादीनां च वर्णनं करोति। (गो. जी. म. प्र. व जी. प्र. टी. ३६१)। ५. तियलुण्ण पणवग्गतियलक्खा दीव-जल-हिपण्णत्ती। अट्ठाइ(आ) उद्धारसायरमिददीव-

जलहिस्स ।। (अंगप. २–८, पृ. २७५)। ६. सर्वद्वीप-सागरस्वरूपनिरूपिका षट्त्रिंशत्सहस्राधिकद्वापञ्चाशल्लक्षपदप्रमाणा द्वीप-सागरप्रज्ञप्तिः । (त. वृत्ति श्रुत. १–२०)।

१ जिसमें बावन लाख छत्तीस हजार पदों के द्वारा द्वीप-समुद्रों के प्रमाण और उनके अन्तर्गत अन्य पदार्थों की भी प्ररूपणा की जाती है उसे द्वीप-सागरप्रज्ञप्ति कहते हैं।

द्वेष—१. तत्रैवाग्निज्वालाकल्पमात्सर्यापादनाद् द्वेष इति। (त. वि. ८–१०)। २. तत्र द्विष्यतेऽनेनेति द्वेषः द्वेषवेदनीयं कर्म, आत्मनः क्वचिदप्रीतिपरिणामापादनात्। द्वेषणं द्वेषः द्वेषवेदनीयकर्मापादितो भावोऽप्रीतिपरिणाम एव। (पंचसं. व्या., पृ. १)। ३. अप्रीतिलक्षणो द्वेषः। (आ. प्र. डी. ३९३; आव. भा. हरि. वृ. २०१; मलय. वृ. २०३)। ४. क्रोध-मानारति-शोक-जुगुप्सा-भयानि द्वेषः। (जय. धु. १२, पृ. २८३)। ५. तद्-(प्रेम-)विपरीतस्त्वात्मीयोपघातकारिणि द्वेषः (अप्रीतिलक्षणः)। (सूत्रकृ. नि. शी. वृ २–२२, पृ. १२६)। ६. द्वेषः अनभिव्यक्तक्रोध-मानव्यक्तिकमप्रीतिमात्रम्। (औपपा. अभय. वृ. ३४, पृ. ७६)। ७. अनिष्टविषये अप्रीतिपरिणामो द्वेषः। (पंचा. का. अय. वृ. १३१)। ८. असह्यजनेषु वापि चासह्यपदार्थेषु वा वैरस्य परिणामो द्वेषः। (नि. सा. वृ. ६६)। ९. तत्र द्विष्यते ऽनेनेति द्वेषः द्वेषवेदनीयं कर्म, क्वचिदनिष्टे वस्तुनि तेनात्मनोऽप्रीतिपरिणामापादनात्, द्वेषणं वा द्वेषः—द्वेषवेदनीयकर्मविपाकोदयजनितो जन्तोरप्रीतिपरिणाम एव। (धर्मसं. मलय. वृ. १)।

२ द्वेष वेदनीय कर्म के उदय से जो अप्रीतिरूप परिणाम होता है उसे द्वेष कहते हैं। ४ क्रोध, मान, अरति, शोक, जुगुप्सा और भय ये द्वेषरूप हैं।

द्वयणुकस्कन्ध—१. द्वयणुकादिपरिणामः द्वयोः स्निग्धरूक्षयोरण्वोः परस्परश्लेषलक्षणे बन्धे सति द्वयणुकस्कन्धो भवति। (त. सि. ५–३३; त. वा. ५, ३३, २)। २. द्वयोः परमाण्वोः संघातादेको द्वयकणुत्कन्धपर्यायः। (पंचा. का. अमृत. वृ. ७५)। ३. परमाणुद्वयं संघातेन द्वयणुकस्कन्धो भवति। (पंचा. का. जय. वृ. ७५)।

१ दो स्निग्ध या रूक्ष परमाणुओं के परस्पर श्लेषलक्षण बन्ध के होने पर जो स्कन्ध उत्पन्न होता है उसे द्वयणुकस्कन्ध कहते हैं।

धन-धान्यप्रमाणातिक्रम—१. तथा धनं गणिम-धरिम-मेय-परिच्छेद्यभेदाच्चतुर्विधम्। तत्र गणिमं पूगफलादि, धरिमं गुडादि, मेयं घृतादि, परिच्छेद्यं माणिक्यादि, धान्यं व्रीह्यादि। एतत्प्रमाणस्य बन्धनतोऽतिक्रमोऽतिचारो भवति। (त. वि. भा. वृ. ३–२७)। २. धनं गणिम-धरिम-मेय-परीक्ष्यलक्षणम्। ××× धान्यं सप्तदशविधम्। यदाह—व्रीहिर्यवो मसूरो गोधूम-मुद्ग-माष-तिल-चणकाः। अणवः प्रियङ्गु-कोद्रव-मकुष्ठकाः शालि-राढक्यः।। किं च कलाय-कुलत्थौ सणसप्तदशानि धान्यानि। धनं च धान्यं च धनधान्यम्, तस्य धनधान्यस्य ××× संख्या व्रतकाले यावज्जीवं चतुर्मासादिकालावधि वा यत्परिमाणं गृहीतं तस्या अतिक्रम उल्लङ्घनं संख्यातिक्रमोऽतिचारः। (योगशा. स्वो. विव. ३–९५)।

१ गणिम—सुपारी आदि, धरिम—गुड़ आदि, मेय—घी आदि और परिच्छेद्य—माणिक्य आदि के भेद से धन चार प्रकार का है। २ व्रीहि, जौ, मसूर, गेहूं, मूंग, उड़द, तिल, चना, अणु (व्रीहिभेद), प्रियंगु, कोद्रव, मकुष्ठ, शालि, राढकी, कलाय (मटर), कुलत्थ और सण; यह सत्तरह प्रकार का धान्य है। इन दोनों के नियमित प्रमाण का अतिक्रमण करना, यह धन-धान्यप्रमाणातिक्रम नाम का परिग्रहपरिमाणव्रत का अतिचार है।

धन-धान्यसंख्यातिक्रम—देखो धन-धान्यप्रमाणातिक्रम।

धनुष—१. छण्णवइ अंगुलाणि से एगे दंडेइ वा धणूइ वा जुएइ वा नालियाइ वा अक्खेइ वा मुसलेइ वा। (भगवती ६, ७, १)। २. दंडं धणुं जुगं नालिया य अक्खं मुसलं च चउहत्था। (ज्योतिष्क. ७६)। ३. चउहत्थं धणु। (संग्रहणी २४७)।

१ छयानवे अंगुल या चार हाथ प्रमाण माप को धनुष कहते हैं। इसके दण्ड, युग, नालिका, अक्ष और मुसल ये नामान्तर हैं।

धरण—सोलस रूप्पियमासा एक्को धरणो हवेज्ज संखित्तो। (ज्योतिष्क. १८)।

सोलह रौप्यमाष (तोला) का एक धरण होता है।

धरणी—धरणीव बुद्धिर्धरणी । यथा धरणी गिरि-सरित्-सागर-वृक्ष-क्षुपास्थादीन् धारयति तथा निर्वर्तितमर्थं या बुद्धिर्धारयति सा धरणी नाम । (धव. पु. ६, पृ. २४३)।

जिस प्रकार धरणी (पृथिवी) पर्वत, नदी और समुद्र आदि को धारण करती है उसी प्रकार जो बुद्धि निर्वर्तित अर्थ को धारण करती है उसे धरणी कहा जाता है।

धरणीकम्प—धरणीकम्पः पर्वत-प्रासादादिसमन्वितायाः भूमेश्चलनम् । (मूला. वृ. ५–७८)।

पर्वत और भवन आदि से संयुक्त पृथिवी के चलन (कम्पन) को धरणीकम्प कहते हैं।

धर्म—१. धम्मो दयाविसुद्धो ×××। (बोध-प्रा. २५); मोहक्खोहविहीणो परिणामो अप्पणो धम्मो ॥ (भावप्रा. ८१)। २. सद्दृष्टि-ज्ञान-वृत्तानि धर्मं धर्मेश्वरा विदुः। (रत्नक. ३; तत्त्वानु. ४१)। ३. तो भणइ मुणी धम्मो जीवदया निग्गहो कषायाणं। एएसु चेव जीवो मुच्चइ बहुकम्म-बंधाओ। (पउमच. २६–३४)। ४. धम्मो मंगल-मुक्किट्ठं अहिंसा संजमो तवो। (दशवै. सू. १–१)। ५. अहिंसालक्षणस्तदागमदेशतो धर्मः। (त. सि. ६–१३; इष्टे स्थाने धत्ते इति धर्मः। (त. सि. ९-२)। ६. यस्माज्जीवं नारक-तिर्यग्योनि-कुमानुष-देवत्वेषु प्रपतन्तं धारयतीति धर्मः। उक्तं च—दुर्गतिप्रसृतान् जीवान् यस्माद् धारयते ततः। धत्ते चैतान् शुभे स्थाने तस्माद् धर्म इति स्थितः ॥ (दशवै. चू. पृ. १५)। ७. अहिंसादिलक्षणो धर्मः। (त. वा. ६, १३, ५); इष्टे स्थाने धत्त इति धर्मः। आत्मानमिष्टे नरेन्द्र-सुरेन्द्र-मुनीन्द्रादिस्थाने धत्त इति धर्मः। (त. वा. ९, २, ३)। ८. धर्मस्तु सम्यग्दर्शनादिरूपो दान-शील-तपोभावनामयः साध्यवानाश्रवो महायोगात्मकः। (ललितवि. पृ. १६); चेतःस्वास्थ्यसाध्यस्याधिकृतो धर्मः। (ललितवि. पृ. ३९); तथा दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः। उक्तं च—दुर्गतिप्रसृतान् जन्तून् यस्माद् धारयते ततः। धत्ते चैतान् शुभे स्थाने तस्माद्धर्म इति स्मृतः ॥ (ललितवि. पृ. ९०; आव. सू. मलय. वृ. पृ. ५९२)। ९. दुर्गतौ प्रपतन्तमात्मानं धारयतीति धर्मः। (दशवै. नि. हरि. वृ. १–२०, पृ. १३; आव. नि. हरि. वृ. २११ व ३७४; आव. सू. २, हरि. वृ. पृ. ४२४)। १०. यथा-नाम्नानुष्ठानमविरुद्धाद्यपोषितम्। मैत्र्यादिभाव-संयुक्तं तद्धर्म इति कीर्त्यते ॥ (ध. बि. १, श्लोक ३)। ११. धारेइ दुग्गतीए पडंतमप्पाणयं ततो तेणं। धम्मोत्ति सिवगतीइ व सततं धरणा सम-क्खाओ ॥ (धर्मसं. हरि. २०)। १२. धर्मो दया-मयः प्रोक्तः जिनेन्द्रैर्जितमृत्युभिः। (वरांगच. १५, १०७); यत् प्राणिनां जन्म-जरोग्रमृत्युमहाभयव्यास-गिराकुलानाम्। भैषज्यभूतो हि दशप्रकारो धर्मो जिनानामिति चिन्तनीयम्। (वरांगच. ३१–६७)। १३. धारणार्थो यतो धर्मशब्दो वाचि परिस्थितः ॥ पतन्तं दुर्गतौ यस्मात् सम्यगाचरितो भवेत्। प्राणिनं धारयत्यस्माद् धर्म इत्यभिधीयते। (पद्मपु. १४, १०३–४)। १४. धम्मो णाम सम्मद्दंसण-णाण-चरित्ताणि। (धव. पु. ८, पृ. ९२)। १५. यतो ऽभ्युदयनिःश्रेयसार्थसंसिद्धिरंजसा। स धर्मः ××× ॥ (म. पु. १–१२० व ५–२०); स धर्मो विनिपातेभ्यो यस्मात् प्राणिनमुद्धरेत्। यत्ते चाभ्युदयस्थाने निरपायसुखोदये ॥ (म. पु. २–३७); दयामूलो भवेद् धर्मो ××× (म. पु. ५-२१); ध्रियते धारयत्युच्चैर्विमेयान् कुगतेस्ततः ॥ धर्म इत्युच्यते सद्भिः ××× । (म. पु. ४७, ३०२–३)। १६. ध्रियते वा धारयतीति वा धर्मः। (उत्तरा. चू. ३, पृ. ९८)। १७. अहिंसालक्षणो धर्मः। (त. श्लो. ६–१३); इष्टे स्थाने धत्ते इति धर्मः। (त. श्लो. ९–२)। १८. स धर्मो यत्र नाधर्मः ×××। (आत्मानु. ४६; उपासका. २९१)। १९. दुर्गतिप्रस्थितजीवधारणात् शुभे स्थाने वा दधाति इति धर्मः। (त. सा. विजयो. ४६); अभ्युदय-निःश्रेयससुखानि च प्रयच्छति सुचरितो धर्मः। (त. सा. विजयो. १४६)। ६०. क्षान्त्यादिलक्षणो धर्मः स्वाख्यातो जिनपुङ्गवैः। अयमालम्बनस्तम्भो भवाम्भोधौ निमज्जताम् ॥ (त. सा. ६–४२)। २१. धर्मः श्रुत-चारित्रात्मको जीवस्यात्मपरिणामः कर्मक्षयकारणम्। (सूत्रकृ. सू. शी. वृ. २, ५, १४)। २२. धम्मो दयाप्पहाणो ××× ॥ (कार्तिके. ९७); धम्मो वत्थुसहावो खमादिभावो य दसविहो धम्मो। रयणत्तयं च

धम्मो जीवाणं रक्खणे धम्मे ।। (कार्तिके. ४७८)। २३. अतोऽभ्युदय-निःश्रेयससिद्धिः स धर्मः। (नीतिवा. १–१, पृ. ८) । २४. यस्मादभ्युदयः पुंसां निःश्रेयसफलाश्रयः। वदन्ति विदिताम्नायास्तं धर्मं धर्मसूरयः ।। (उपासका. २) । २५. आत्मानमिष्टनरेन्द्र-सुरेन्द्र मुनीन्द्र-मुक्तिस्थाने धत्त इति धर्मः। (चा. सा. पृ. २); चतुर्दशगुणस्थानानां गत्यादिचतुर्दशमार्गणास्थानेषु स्वतत्त्वविचारलक्षणो धर्मः। (चा. सा. पृ. ८६) । २६. धारयतीति धर्मः दुर्गतौ पतन्तं सत्त्वमिति। (ओघनि. भा. द्रो. वृ. ५) । २७. संसारे पतन्तं जीवमुद्धृत्य नागेंद्र नरेन्द्र देवेन्द्राविबन्धे अव्याबाधानन्तसुखाद्यनन्तगुणलक्षणे मोक्षपदे धरतीति धर्मः अहिंसालक्षणः सागारानगारलक्षणो वा उत्तमक्षमादिलक्षणो वा निश्चय-व्यवहाररत्नत्रयात्मको वा शुद्धात्मसंविस्यात्मकमोहक्षोभरहितात्मपरिणामो वा धर्मः। (बृ. द्रव्यसं. टी. ३५) । २८. धारयति दुर्गतौ प्रपततो जीवान् धारयति सुगतौ वा तान् स्थापयतीति धर्मः। उक्तं च—दुर्गतिप्रसृतान् जन्तून् यस्माद्धारयते ततः। धत्ते चैतान् शुभे स्थाने तस्माद्धर्म इति स्मृतः ।। (स्थाना. अभय. वृ. १–४०, पृ. २१) । २९. धर्मं श्रुतचारित्रात्मक दुर्गतिप्रपतज्जन्तुधारणस्वभावं ×× ×। (समवा. अभय. वृ. १, पृ. ४) । ३०. धर्मो नाम कृपामूलः ×××। (अम्बू. ५–३५) । ३१. धर्मः सद्देश-शुभायुर्नाम-गोत्रलक्षणं पुण्यम्, उत्तमक्षमादिस्वरूपो वा, तत्साध्यः कर्तुं शुभफलदः पुद्गलपरिणामो वा, जीवादिवस्तुनो यथावस्थितस्वभावो वा। (स्याद्वादमं. १, पृ. ३) । ३२. मिथ्यात्व-रागादिसंसरणरूपेण भावसंसारे पतन्तं प्राणिनमुद्धृत्य निर्विकारशुद्धचैतन्ये धरतीति धर्मः। (प्र. सा. अम. वृ. १–८) । ३३. सो धम्मो जत्थ दया×××। (नि. सा. वृ. ६ उद्.)। ३४. दुर्गतिप्रपतत्प्राणिधारणाद् धर्म उच्यते। (आचा. वि. पृ. ४८) । ३५. धारयति दुर्गतौ निपततो जीवानिति धर्मः। तथा च वाचकः—प्राग् लोकबिन्दुसारे सर्वाक्षरसन्निपातपरिपठितः। धृङ् धरणार्थो धातुस्तदर्थयोगाद् भवति धर्मः ।। दुर्गतिभयप्रपाते पतन्तमभयकरदुर्लभत्राणे। सम्यक् चरितो यस्माद् धारयति ततः स्मृतो धर्मः ।। (उत्तरा. सू. ज्ञा. वृ. ३–८, पृ. १८४) । ३६. 'धर्मं' इति दुर्गतिपतज्जन्तुधारणात् स्वर्गादिसुगतौ वा धारणाच्च धर्मः। (द्र. वि. कु. कृ. १, श्लोक ३) । ३७. दुर्गतिप्रपतत्प्राणिधारणाद् धर्म उच्यते। (योगशा. २–११; त्रि. श. पु. च. १, १, ३५२); धर्मोऽभ्युदय-निःश्रेयसकारणम्। (योगशा. स्वो. विव. २–४०); दुर्गतौ प्रपतन्तं सत्त्वसंघातं धारयतीति धर्मः। (योगशा. स्वो. विव. ३–१२४) । ३८. सम्यग्दर्शनाद्यात्मपरिणामलक्षणो धर्मः। (धर्मसं. मलय. वृ. २५)। ३९. म्रियन्ते तिष्ठन्ति नरकादिभ्यो गतिभ्यो निवृत्ता जीवास्तेन सुगताविति धरत्यात्मानं सुगताविति वा धर्मस्तम्, रत्नत्रयलक्षणं मोहक्षोभविधर्जितात्मपरिणामरूपं वा, वस्तुयाथात्म्यस्वभावं वा, उत्तमक्षयादिदशलाक्षणिकं वा ××× । (अन. ध. स्वो. टी. १–५); धर्मः पुंसो विशुद्धिः सुदृग्-बगम-चारित्ररूपा स च स्वां, सामग्रीं प्राप्य मिथ्यादर्शनमतिचरणाकारसंक्लेशरूपम् । मूलं बन्धस्य दुःखप्रबन्धफलस्याबधुबन्धधर्मं संजातो जन्मदुःखाद् धरति शिवसुखे जीवमित्युच्यतेऽर्थात् ।। (अन. ध. १–९०) । ४०. धर्मः स्वदारसन्तोषाद्यात्मकसंयमलक्षणो देवादिपरिचरणस्वरूपः सत्पात्रदानादिस्वभावश्च । (सा. ध. स्वो. टी. २–५) । ४१. धर्मो वस्तुस्वभावः शम-धृतिरथवा स्वोत्थशुद्धोपयोगः, सद्वृत्तं वा श्रुतं वा दशविधविलसल्लक्षणो वापि धर्मः। (आत्मप्र. ८६) । ४२. अहिंसालक्षणो धर्मो यज्ञादिलक्षणोऽथवा। (भावसं. वाम. ३०६) । ४३. अहिंसा सत्यमस्तेयं ब्रह्मचर्यं निःसंगत्वमित्यादिलक्षणोपलक्षितः सर्वज्ञ-वीतरागप्रणीतः धर्मः, दुर्गतिदुःखादुद्धृत्य इन्द्रादिपूजितपदे धरतीति धर्मः। (त. वृत्ति श्रुत. ६–१३); संसार-सागरादुद्धृत्य इन्द्र-नरेन्द्र-धरणेन्द्र-चन्द्रादिवन्दिते पदे आत्मानं धरतीति धर्मः। (त. वृत्ति श्रुत. ९–२) । ४४. ××× धर्मो हिंसादिवर्जितः। (वसु. उपासका. ३) । ४५. दयादिलक्षणो धर्मः सर्वज्ञोक्तः स्वशक्तितः। पतन्तं दुर्गतौ यस्ते चेतनं सुखदे पदे ।। (धर्मसं. श्रा. १०–९९) । ४६. सर्वप्राणिदयालक्षणो गृहस्थ-यमिनोर्द्विधा। रत्नत्रयमयो धर्मः स त्रिज्ञैर्जिनदेशितः ।। (अम्बू. च. ३–१५१); यस्मादुच्चैःपदे धत्ते जीवं नीचैःपदादपि ।। धर्मो वस्तुस्वभावः स्यात्कर्मनिर्मूलनक्षमः। तच्चैव शुद्धचारित्रं साम्यभावश्चिदात्मनः ।। (अम्बू. च. १३, १५३–५४) ।

४७. अहिंसा परमो धर्मः ×××। (लाटीसं. २-१); धर्मो नीचैःपदादुच्चैःपदे धरति प्राणिकम्। तज्जातजन्मनो नीचैःपदमुच्चैस्तदत्ययः॥ सम्यग्दर्शन-ज्ञान-चारित्रं धर्मो रत्नत्रयात्मकः। (लाटीसं. ४, २३७-३८)। ४८. संसारदुःखादुद्धृत्य योजसूखे धरतीति धर्मः। (कार्तिके. टी. ४०५)।

१ मोह और क्षोभ से रहित आत्मा के शुद्ध परिणाम को धर्म कहते हैं। २ सम्यग्दर्शन, ज्ञान और चारित्र को धर्म माना गया है। ३ जीवों की दया और कषायों के निग्रह को धर्म कहा जाता है, कारण यह कि इन्हीं के आश्रय से जीव विश्लिष्ट कर्मबन्धन से छुटकारा पाता है।

धर्मकथा—१. धम्मकहा नाम जो अहिंसादिलक्खणं सव्वण्णुपणीयं धम्मं अणुयोगं वा कहेइ एसा धम्मकहा। (दसवै. चू., पृ. २६)। २. अहिंसालक्षणधर्मान्विाख्यानं धर्मकथा। (अनुयो. हरि. वृ. पृ. १०)। ३. एक्कगस्स एगाहियारोवसंहारो धम्मकहा। तत्थ जो उवजोगो सो वि धम्मकहा त्ति घेत्तव्वो। (धव. पु. ९, पृ. २६३); वत्थु-अणियोगादिविसओ भावो धम्मकहा णाम। (धव. पु. १४, पु. ९)। ४. यतोऽभ्युदय-निःश्रेयसार्थसंसिद्धिरंजसा। सद्धर्मस्तन्निबद्धा या सा सद्धर्मकथा स्मृता॥ (म. पु. १-१२०)। ५. सयलंगेक्कगेक्कंगहियारसवित्थरं ससंखेवं। वण्णणसत्थं थय-थुइ-धम्मकहा होइ णियमेण। (गो. क. ८८)।

१ सर्वज्ञोक्त अहिंसाविस्वरूप धर्म का जो कथन किया जाता है उसे अथवा अनुयोग के विचार को धर्मकथा कहते हैं। २ एक अंग के एक अधिकार का जो उपसंहार किया जाता है, इसका नाम धर्मकथा है। तद्विषयक उपयोग को भी धर्मकथा कहा जाता है।

धर्मकथी—धर्मकथा प्रशस्यास्तीति धर्मकथी। (योगशा. स्वो. विव. १-१६)।

प्रशंसनीय [illegible] को धर्मकथी कहा जाता है।

धर्मचरण—धर्मस्य चरणं आसेवनम्। (पंचव. [illegible] स्वो. विव. [illegible])।

[illegible] आचरण करने को धर्मचरण [illegible]

[illegible]—धर्म एव धर्मतीर्थं वा तीर्थं [illegible] तीर्थम्, तत्करणशीला धर्मतीर्थंकराः। (ललितवि. पृ. ९०)।

धर्मरूप या धर्मप्रधान तीर्थ का प्रवर्तन करने वाले महापुरुष को धर्मतीर्थ कहते हैं।

धर्मदेव—से केणट्ठेणं भंते एवं वुच्चइ धम्मदेवा? धम्मदेवा गोयमा? जे इमे अणगारा भगवंतो इरियासमिया जाव गुत्तबंभयारी से तेणट्ठेणं जाव धम्मदेवा। (भगवती १२, ९, २, पृ. १७६५)।

ईर्यासमिति से युक्त होकर ब्रह्मचर्य को सुरक्षित रखने वाले अनगारों (साधुओं) को धर्मदेव कहते हैं।

धर्मद्रव्य—देखो धर्मास्तिकाय। १. तत्थ धम्मदव्वस्स लक्खणं वुच्चदे—ववगदपंचवण्णं ववगदपंचरसं ववगददुगंधं ववगदअट्ठफासं जीव-पोग्गलाणं गमणागमणकारणं असंखेज्जपदेसियं लोगपमाणं धम्मदव्वं। (धव. पु. ३, पृ. ३); धम्मदव्वस्स जीव-पोग्गलदव्वाणं गमणागमणहेउभावेण परिणामो सब्भावकिरिया। (धव. पु. १३, पृ. ४३); जीव-पोग्गलाणं गमणागमणकारणं धम्मदव्वं। (धव. पु. १५, पृ. ३३)। २. एकजीवपरीमाणसंख्यातीतप्रदेशको लोकाकाशमभिव्याप्य धर्माधर्मौ व्यवस्थितौ॥४८॥ स्वयं गन्तुं प्रवृत्तेषु जीवाजीवेषु सर्वतः। सहकारी भवेद्धर्मः पानीयमिव यादसाम्॥४९॥ (योगशा. स्वो. विव. १-१६, पृ. ११३)।

१ जो पाँच वर्ण, पाँच रस, दो गन्ध और आठ प्रकार के स्पर्श से रहित होता हुआ जीव व पुद्गलों के गमनागमन का कारण एवं लोक प्रमाण असंख्यात प्रदेशों वाला है उसे धर्मद्रव्य कहते हैं।

धर्मध्यान—१. धम्मस्स लक्खणं से अज्जव-लहुगत्त-मद्दवोवसमा[महवुवदेसा]। उवदेसणा य सुत्ते णिसग्गजाओ रुचीओ दे॥ (भ. आ. १७०९)। २. आज्ञापाय-विपाक-संस्थानविचयाय धर्म्यम्। (त. सू. दि. ९-३६); आज्ञापाय-विपाक-संस्थानविचयाय धर्ममप्रमत्तसंयतस्य। (त. सू. श्वे. ९-३७)। ३. धर्मादनपेतं धर्म्यम्। (त. सि. ९-२८, त. वा. ९, २८, १; त. श्लो. ९-२८)। ४. आज्ञाविचयाय अपायविचयाय विपाकविचयाय संस्थानविचयाय च स्मृतिसमन्वाहारो धर्मध्यानम्। तदप्रमत्तसंयस्य भवति। (त. भा. ९-३७)। ५. दसविहसमणधम्मसमणुगतं धम्मं। (दसवै. चू. पृ. २९)।

६. इत्याज्ञाचरविरोधोऽयं कथास्तन्मननक्षमः। तद् धर्म्यम् ×××॥ (द्वात्रिंशिका १०–२७)। ७. तथानपेतं यद्धर्माद् धर्म्यध्यानमितीष्यते। धर्मो हि वस्तुयाथात्म्यमुत्पादादित्रयात्मकम्॥ (ह. पु. २१–२३); वाङ्मानसिकभावानां याथात्म्यं धर्म उच्यते। तद्धर्मादनपेतं यद्धर्म्यं तद् ध्यानमुच्यते॥ (ह. पु. ५६–३५)। ८. सूत्रार्थसाधनमहाव्रतधारणेषु बन्ध-प्रमोक्षगमनागमहेतुचिन्ता। पञ्चेन्द्रियव्युपरमश्च दया च भूते ध्यानं तु धर्ममिति तत्प्रवदन्ति तज्ज्ञाः॥ (वसुनं. श्रा., प. ३२ उद्.)। ९. जिनप्रणीतभाव-श्रद्धानादिलक्षणं धर्म्यम्। (श्राव. अ. ४, हरि. वृ. पृ. ५८२)। १०. दहलक्खणजुत्तो धम्मो सि वण्णिओ सुत्ते। चिंता जा तस्स हवे भणियं तं धम्मझाणुत्ति॥ अहवा वत्थुसहावो धम्मं वत्थू पुणो वि सो अप्पा। झायंताणं कहियं धम्मज्झाणं मुणिंदेहिं॥ (भावसं. दे. ३७२, ३७३)। ११. जिनप्रणीतभावश्रद्धानादिलिङ्गं धर्म्यम्। (त. भा. सिद्ध. वृ. ९–२७)। १२. वज्जिय सयलवियप्पे अप्पसरूवे मणं णिरुंभंतो। जं चिंतदि साणंदं तं धम्मं उत्तमं झाणं॥ (कार्तिके. ४८२)। १३. सद्दृष्टि-ज्ञान-वृत्तानि धर्मं धर्मेश्वराः विदुः। तस्माद्यदनपेतं हि धर्म्यं तद् ध्यानमभ्यधुः॥ आत्मनः परिणामो यो मोहक्षोभविवर्जितः। स च धर्मोऽनपेतं यत्तस्मात् तद्धर्म्यमित्यपि॥ शून्यीभवदिदं विश्वं स्वरूपेण यतः। तस्माद् वस्तुस्वरूपं हि प्राहुर्धर्मं महर्षयः॥ ततोऽनपेतं यज्ज्ञातं तद् धर्म्यं ध्यानमिष्यते। धर्मो हि वस्तुयाथात्म्यमित्यार्षेऽप्यभिधानतः॥ वस्तूत्तमक्षमादिः स्याद्धर्मो दशतया परः। ततोऽनपेतं यद् ध्यानं तद्धा धर्म्यमितीरितम्॥ (तत्त्वानु. ५१–५५)। १४. आज्ञापाय-विपाकानां विवेकाय च संस्थितेः। मनसः प्रणिधानं यद् धर्मध्यानं तदुच्यते॥ (त. सा. ७–३९)। १५. सुत्तत्थमग्गणत्थ-वय-गुत्ती-समिदि-भावणाईयं। जं कीरइ चिंतवणं धम्मज्झाणं च इह भणियं॥ जीवाइ जे पयत्था कायव्वा ते जहट्ठिया चेव। धम्मज्झाणं भणियं रायद्दोसे पमुत्तूणं॥ (आ. सा. १६–१७)। १६. श्रद्धानं सदर्शकतादिसत्कं तत्त्वार्थसंचिन्तनं संवेगः प्रशमोदयेन्द्रियदमः प्राग्व्योचमः संयमः॥ वैराग्यं वरगुप्तिताऽतिमृदुता निर्मानिताऽसंगता धर्मस्येति समस्तवस्तुपरमोपेक्षा च लक्ष्योदितम्॥ (आत्मा. सा. १०–४५)। १७. धर्मो वस्तुस्वभावः क्षम-धृतिरथवा स्वोत्तमशुद्धोपयोगः सद्वृत्तं वा श्रुतं वा दशविधविलसल्लक्षणो वापि धर्मः। धर्मस्थं धर्मधाम प्रगुणगुणगणं पंचकं वा गुरूणां नेदुक्ताद् ध्येयधर्माद् व्यपगतमिति हि ध्यानमाभाति धर्म्यम्॥ आज्ञामपायं विविधं विपाकं संस्थानचिन्त्यं च तदभ्यधेति। यं चिन्त्यते येन यतोऽस्य यच्च चत्वारि तत्त्वानि तदेव धर्म्यम्॥ (आत्मप्र. ८६–८७)। १८. धर्मो वस्तुस्वरूपम्, तस्मादनपेतम् आश्रितं धर्म्यम्। (भावप्राभृ. ७८)।

१ आर्जव (सरलता), लघुता (अपरिग्रहता), मृदुता—आत्मादितिरिक्त अभिमान का अभाव और हितोपदेश ये धर्मध्यान के लक्षण हैं। २ आज्ञाविचय, अपायविचय, विपाकविचय और संस्थानविचय के लिए जो बार बार स्मृति को उसी ओर लगाया जाता है; यह धर्मध्यान या धर्मध्यान कहलाता है। विचय का अर्थ विवेक या विचारणा है। ५ वस प्रकार के मुनिधर्म से जो अनुगत होता है उसे धर्मध्यान कहा जाता है।

धर्मध्यान का ध्याता— सम्यनिर्णीतजीवादिध्येयवस्तुव्यवस्थितिः। आर्त-रौद्रपरित्यागात्लब्धचित्तप्रसत्तिकः॥ मुक्तलोकद्वयापेक्षः सोढाशेषपरीषहः। अनुष्ठितक्रियायोगो ध्यानयोगे कृतोद्यमः॥ महासत्त्वः परित्यक्तदुर्लेश्याशुभभावनः। इतीदृग्लक्षणो ध्याता धर्मध्यानस्य सम्मतः॥ (तत्त्वानु. ४३-४५)। जिसने ध्येयभूत जीवादि तत्त्वों की व्यवस्था का भली भांति निर्णय कर लिया है, जिसने आर्त और रौद्र ध्यान से रहित होकर चित्त की प्रसन्नता को प्राप्त कर लिया है, जो उभय लोक की अपेक्षा से रहित है, सब परीषहों का सहन करने वाला है, क्रियायोग के अनुष्ठानपूर्वक ध्यानयोग में उद्यत है, तथा जो अशुभ लेश्या व अशुभ भावना से रहित है, ऐसा जीव धर्मध्यान का ध्याता होता है।

धर्मपत्नी—परिणीतात्मजातिश्च धर्मपत्नी च सैव च। धर्मकार्ये च सन्त्रीची यागादौ शुभकर्मणि॥ (सागारधर्मा. २–१८०)। जिसके साथ विधिपूर्वक विवाह किया गया है, जो सजातीय है, और पूजादिरूप धर्मकार्यों में सदा सहयोग प्रदान करती है; उसे धर्मपत्नी कहते हैं।

धर्मवृद्धि—जो अग्निकायवधं सुयणाणं जणु

चरित्रधर्मं च। सद्गृहं विश्वामिहितं सो धम्मवइ त्ति नायव्वो॥ (प्रज्ञाव. वा. १३०; प्रव. सारो. ९६०)।

जो जिनप्रकथित अस्तिकायधर्म, श्रुतधर्म और चारित्रधर्म का अद्भाव करता है उसे धर्मवादि—सराग दर्शन-आर्य (दसवां)—कहा जाता है।

धर्मवर्णजनन—१. दुःखात् त्रातुम्, सुखं दातुम्, निधीनां चाधिपत्ये स्थापयितुम्, स्वचक्रविक्रमानमितसकलभूपाल-खेचरगणवक्रमरुच्चक्रांघ्रिकमलांकनात् पादयोः पातयितुम्, सुरविलासिनीचेतःसंमोहाहं तदीयविलुठत्पाठीनलोचनरागमभिवर्धयन्तीं हर्षभरप्रवर्षाद्भिन्नसांद्ररोमांचकंचुकमाचरितुम्, उन्नतां रूपशोभामन्दिरां संपादयितुम्; अतिशयितानिमादिगुणप्रसाधनां सामानिकादिसुरसहस्रानुयानोपनीतमहत्तां सततप्रत्यग्रयुवतालिंगितां सुभगतालतारोहयष्टिम् अनेकसमुद्रबिन्दुगणनागणितायुःस्थितिं मेरु-कुल सुरसरित्कुलाचलादिगोचरस्वेच्छाविहारचतुरां सुरांगनापृथुलनितंबबिंबावरकठिननिबिडसमुन्नतकुचतटक्रीडालोकनस्पर्शनादिक्रियोपयोगामितप्रीतिविस्मितां शतमखतामखेदने झटिति घटयितुम्, विरूपताजननीजरा-डाकिनीनामगोचरां शोकवृकानुल्लंघितां विपद्दावानलशिखाभिरनुपप्लुतां रोगोरगैरदष्टवपुषं यम-महिषखुराखंडितां भीतिवराहसंघातिभिरनुल्लिखितां संक्लेशशतशरभैरनभ्याहतां प्रियवियोगचंडपुंडरीकैरसेवितां, अनश्वरसुखरत्नप्रभवभूमिं, निर्वृतिं प्रापयितुं समर्थो जिनप्रणीतो धर्म इति धर्मस्वरूपकथनं धर्मवर्णजननम्। (भ. आ. विजयो. ४७)। २. चतुर्गतिदुःखात् त्रातुं निरातंकातिशयितदीर्घकालोपलालितं सुखं दातुं सकलसाम्राज्यं स्वर्गाधिराज्यं चाधिकर्तुं सुरेन्द्रनागेन्द्रान् पादयोः पातयितुं समवसरणादिबहिरंगानंतज्ञानाद्यन्तरंगलक्ष्मीलक्षणां जीवन्मुक्तिं सम्यक्त्वाद्यष्टगुणलक्षणामात्यंतिकीं परममुक्तिं च सम्पादयितुं समर्थो जिनप्रणीत एव धर्मो नान्य इति धर्ममहिमख्यापनं धर्मवर्णजननम्। (भ. आ. मूला. ४७)।

१ दुःखों से रक्षा करने, सुख के देने, निधियों के स्वामित्व में स्थापित करने, तथा अपने चक्ररत्न के प्रभाव से समस्त राजाओं एवं विद्याधरों आदि के चरणसेवक बनाने आदि में धर्म ही सर्वथा समर्थ है। इस प्रकार यह सांसारिक उत्कृष्ट सुख के साथ निर्बाध मोक्षसुख को भी प्राप्त कराने वाला है। इत्यादि प्रकार से धर्म के कीर्तन करने को धर्मवर्णजनन कहा जाता है।

धर्मवाद—परलोकप्रधानेन मध्यस्थेन तु धीमता। स्वशास्त्रज्ञाततत्त्वेन धर्मवाद उदाहृतः। (अष्टक १२-६)।

स्वसमय के रहस्यके जानने वाले व परलोक के मानने वाले मध्यस्थ बुद्धिमान् पुरुष के द्वारा जो धर्मचर्चा की जाती है उसे धर्मवाद कहते हैं।

धर्मानुकम्पा—१. धर्मानुकम्पा नाम परित्यक्तासंयमेषु, मानावमान-सुखदुःख-लाभालाभ-तृणसुवर्णादिषु समानचित्तेषु, दान्तेन्द्रियान्तःकरणेषु मातरमिव मुक्तिमाश्रितेषु परिहृतोग्रकषाय-विषयेषु विध्येषु भोगेषु दोषान् विचिन्त्य विरागतामुपगतेषु, संसार-महासमुद्रात्। मयेन निशास्वभ्यल्पनिद्रेषु अगीकृतनिःसंगत्वेषु क्षमादिदशविधधर्मपरिणतेषु याऽनुकम्पा सा धर्मानुकम्पा। (भ. आ. विजयो. १८३४)। २. धर्मानुकम्पा नाम यया प्रयुक्तो विवेकिलोकः स्वशक्त्यनिगूहनेन संयमनिष्ठेभ्यस्तद्योग्यान्न-पान-वसत्युपकरणौषधादिकं संयमसाधनं प्रयच्छति। (भ. आ. मूला. १८३४)।

१ जिन्होंने सर्व प्रकार के असंयमों को छोड़ दिया है; जो मान-अपमान, सुख-दुःख, लाभ-अलाभ और तृण-सुवर्णादि में समानचित्त रहते हैं, जिन्होंने इन्द्रियों व मन को जीत लिया है, तथा जो माता के समान मुक्ति के आश्रित हैं; इत्यादि गुणों से विभूषित धर्मात्मा जनों के ऊपर जो दया की जाती है उसे धर्मानुकम्पा कहते हैं।

धर्मानुप्रेक्षा—१. संसारविसमदुग्गे भवगहणे कह वि मे भमंतेण। दिट्ठो जिणवरदिट्ठो जेट्ठो धम्मो त्ति चिंतेज्जो॥ (मूला. ८-६४)। २. अयं जिनोपदिष्टो धर्मोऽहिंसालक्षणः सत्याधिष्ठितो विनयमूलः क्षमाबलो ब्रह्मचर्यगुप्त उपशमप्रधानो नियतिलक्षणो निष्परिग्रहतालम्बनः, तस्यालाभादनादिसंसारे जीवाः परिभ्रमन्ति दुष्कर्मविपाकजं दुःखमनुभवन्तः। अस्य पुनः प्रतिलम्भे विविधाभ्युदयप्राप्तिपूर्विका निःश्रेयसोपलब्धिर्नियतेति चिन्तनं धर्मस्वाख्याततत्त्वानुप्रेक्षा। (स. सि. ९-७)। ३. जीवस्वाभ-सुखस्वभावात्मतत्त्वादिमार्गणालक्षणो धर्मः स्वाख्यातः ××× एवमादिलक्षणो धर्मो निःश्रेयसप्राप्तिहेतुरहो भव-

वद्भिरर्हद्भिरभ्याख्यात इति चिन्तनं धर्मस्वाख्यातत्वानुप्रेक्षा । (त. वा. ६, ७, १०, पृ. ६०३ व २०७, पं. ३–४)। ४. जीवस्थान-गुणस्थानानां गत्यादिषु मार्गणालक्षणो धर्मः । (त. श्लो. ६-७)। ५. चतुर्दशगुणस्थानानां गत्यादिचतुर्दशमार्गणास्थानेषु स्वतत्त्वविचारलक्षणो धर्मः निःश्रेयसप्राप्तिहेतुरहो भगवद्भिरर्हद्भिः स्वाख्यात इति चिन्तनं धर्मस्वाख्यातत्वानुप्रेक्षा । (का. सा. पृ. ८६)। ६. धाताऽभीष्टविशिष्टवस्तुनिचयस्याकांक्षिणेऽपि क्षणाद्वर्त्तिनैर-नारकादिभवसंभूतेः स्मृतेर्भीकृते: । हृत्ताऽऽक्रान्तजगत्त्रयान्तक-रिपोर्यः स्वान्तगः संस्तुतस्त्राताऽनाथशरीरिणां न हि परो धर्मात् सुखंप्रदात् ॥ (आचा. सा. १०–४४)। ७. लोकालोके रविरिव करैरुल्लसन् सत्क्षमाद्यैः, खद्योतानामिव घनतमोद्योतिनां यः प्रभावम् । दोषोच्छेदप्रथितमहिमा हन्ति धर्मान्तराणाम्, स व्याख्यातः परमविशदख्यातिभिः स्यात्तु धर्मः ॥ (अन. ध. ६–८०) ।

२ अहिंसा जिसका लक्षण है, सत्य से जो अभिष्ठित है, विनय जिसका मूल है व क्षमा बल है, ब्रह्मचर्य से जो सुरक्षित है, उपशमप्रधान है, और अपरिग्रहता जिसका आलम्बन है; इत्यादि यह जिनोपदिष्ट धर्म है । इसके बिना जीव संसार में परिभ्रमण करते हैं और उसे पा करके वे अनेक अभ्युदय के साथ मोक्ष को प्राप्त करते हैं । इस प्रकार का विचार करने को धर्मानुप्रेक्षा करते हैं ।

धर्मावर्णवाद—१. जिनोपदिष्टो धर्मो निर्गुणस्तदुपसेविनो ये ते चासुरा भविष्यन्तीत्येवमभिधानं धर्मावर्णवादः । (त. सि. ६–१३) । २. निर्गुणत्वाद्यभिधानं धर्मे । जिनोपदिष्टो दशविकल्पो धर्मो निर्गुणः, तदुपसेविनो ये ते चासुरा भवन्ति, इत्येवमाद्यभिधानं धर्मावर्णवादः । (त. वा. ६, १३, ११)। ३. अन्तःकलुषदोषादसद्भूतमलोद्भावनमवर्णवादः । ××× निर्गुणत्वाद्यभिधानं धर्मे । (त. श्लो. ६–१३) । ४. दुर्गतिप्रतिबन्धं स्वर्गादिकं च फलं विधत्ते धर्म इति कथमदृष्टं श्रद्धीयते ? न हि सन्निहितकारणस्य कार्यस्यानुद्भवोऽस्ति यथांकुरस्य । सुखप्रदायी स्वनिष्पत्त्यनन्तरं सुखमात्मन किं न करोति इति धर्मावर्णवादः । (म. आ. विजयो. ४७) ।

१ जिनेन्द्र के द्वारा उपदिष्ट धर्म निर्गुण है, इसका सेवन करने वाले असुर होने वाले हैं, इत्यादि प्रकार से धर्म की निन्दा करने को धर्मावर्णवाद कहते हैं ।

धर्मास्तिकाय—१. धम्मत्थिकायमरसं अवण्णगंधं असद्दमप्फासं । लोगोगाढं पुट्ठं पिहुलमसंखादियपदेसं ॥ अगुरुगलघुगेहिं सया तेहिं अणतेहिं परिणदं णिच्चं । गदिकिरियाजुत्ताणं कारणभूदं सयमकज्जं ॥ (पंचा. का. ८३–८४) । २. गमणणिमित्तं धम्मं ××× । (नि. सा. ३०) । ३. गतिपरिणामिनां जीव-पुद्गलानां गत्युपग्रहे कर्तव्ये धर्मास्तिकायः साधारणाश्रयः । (त. सि. ५–१७) । ४. गइलक्खणो उ धम्मो ××× । (उत्तरा. २८–९) । ५. धर्माधर्मौ यथासंख्यं गति-स्थित्योस्तु कारणम् । (वरांगच. २६–२३) । ६. पढमे धम्मत्थिकाए, सो गइलक्खणो । (दशवै. चू. पृ. १६) । ७. जीवपोग्गलदव्वाण गतिकिरियापरिणयाण उवग्गहकरणलक्षणओ धम्मो, अस्तीति ध्रौव्यं, आयत्ति कायः उत्पाद विनाशः, अस्ति चासौ कायश्च अस्तिकायः धर्मश्चासावस्तिकायश्च धर्मास्तिकायः । (अनुयो. चू. पृ. २६) । ८. स्वयं क्रियापरिणामिनां साचिव्यधानाद् धर्मः । स्वयं क्रियापरिणामिनां जीव-पुद्गलानां यस्मात् साचिव्यं दधाति तस्माद्धर्म इत्याख्यायते । (त. वा. ५, १, १६) । ९. जीवानां पुद्गलानां च गत्युपष्टम्भकारणम् । धर्मास्तिकायो ज्ञानस्य दीपश्चक्षुष्मतो यथा ॥ (आ. प्र. टी. ७८ उद्.) । १०. गतिपरिणामपरिणतानां जीव-पुद्गलानां गत्युपष्टम्भको धर्मास्तिकायः । (आव. नि. हरि. वृ. ८६) । ११. जीव-पुद्गलानां स्वाभाविके क्रियावत्त्वं गतिपरिणतानां तत्स्वभावधारणाद् धर्मः, अस्तयः प्रदेशास्तेषां कायः संघातः अस्तिकायः धर्मश्चासावस्तिकायश्चेति समासः । (अनुयो. हरि. वृ. पृ. ४१) । १२. तत्र यो हि गतिपरिणामपरिणतयोर्जीव-पुद्गलयोर्गत्युपष्टम्भहेतुर्जलमिव झषस्य, स लक्षसंख्येयप्रदेशात्मकोऽमूर्तो धर्मास्तिकाय इति । (नन्दी. हरि. वृ. पृ. ५८)। १३. जीव-पुद्गलयोर्गत्याद् गत्युपग्रहकारणम् । अवगन्तव्यं ××× ॥ (म. पु. २४–१३) । १४. सकृत्सकलगतिपरिणामिनां सान्निध्यधानाद् धर्मः । (त. श्लो. ५–१) । १५. गतिपरिणतो धर्म उपकारकः । (त. भा. सिद्ध. वृ. ५–७) । १६. गतिपर्यायस्य बाह्यं गतिहेतुत्वसंज्ञितं गुणं धारयतीति धर्मः । (म. आ. विजयो.

३६)। १७. जीवाण पुग्गलाणं गइप्पवत्ताण कारणं धम्मो। (भावसं. दे. ३०६)। १८. क्रियापरिणतानां यः स्वयमेव क्रियावताम्। आदधाति सहायत्वं स धर्मः परिगीयते॥ जीवानां पुद्गलानां च कर्तव्ये गत्युपग्रहे। जलवन्मत्स्यगमने धर्मः साधारणाश्रयः॥ (त. सा. ३, ३३-३४)। १९. धम्ममधम्मं दव्वं गमण ट्ठाणाण कारणं कमसो। जीवाण पुग्गलाणं विण्णि वि लोगप्पमाणाणि। (कार्तिके. २१२। २०. विवादापन्नाः सकलजीव-पुद्गलाश्रयाः सकृद्गतयः साधारणबाह्यनिमित्तापेक्षाः, युगपद्भावित्वात् एकसरस्सलिलादिना अनेकमत्स्यादिगतिवत् ××× यत् साधारणं गतिनिमित्तं स धर्मः। (न्यायकु. २-७, पृ. ३४०)। २१. गदि-ठाणोग्गहकिरियासाधणभूदं खु होदि धम्मत्थिं। (गो. जी. ६०४)। २२. जलवन्मत्स्ययानस्य तत्र यो गतिकारणम्। जीवादीनां पदार्थानां स धर्मः परिवर्णितः॥ (अम्र. अ. १८, ६६)। २३. गइपरिणयाण धम्मो पुग्गल-जीवाण गमणसहयारी। तोयं जह मच्छाणं अच्छंता णेव सो णेई॥ (द्रव्यसं. १७)। २४. निष्क्रियोऽमूर्तो निष्प्रेरकोऽपि धर्मास्तिकायः स्वकीयोपादानकारणेन गच्छतां जीव-पुद्गलानां गतेः सहकारिकारणम्। (बृ. द्रव्यसं. टी १७)। २५. स लोकगगनव्यापी धर्मः स्याद् गतिलक्षणः। (ज्ञाना. ६-३२, पृ. ६७)। २६. जीव-पुद्गलयोर्गतिहेतुलक्षणो धर्मः। (पंचा. का. अय. वृ. ३)। २७. जीव-पुद्गलजालस्य व्रजतः स्वेन हेतुना। धर्मो यानविमित्तं स्याज्जलं वा जलचारिणाम्॥ (आचा. सा. ३-३०)। २८. जीव-पुद्गलानां स्वाभाविके क्रियावत्त्वे सति गतिपरिणतानां तत्स्वभावधारणाद् धर्मः, स चास्तीनां प्रदेशानां सङ्घातात्मकत्वात् कायोऽस्तिकाय इति। ××× धर्मो हि जीव-पुद्गलानां गत्युपष्टम्भकारी। (स्थाना. अभय. वृ. ७, पृ. १५); धर्मः—धर्मास्तिकायो गत्युपष्टम्भगुणः। (स्थाना. अभय. वृ. २-४८, पृ. ४०)। २९. स्वभाव-विभावगतिक्रियापरिणतानां जीव पुद्गलानां गतिहेतुः धर्मः। (नि. सा. वृ. ९); यथोदकः पाठीनानां कारणं तथा तेषां जीव-पुद्गलानां गमनकारणं स धर्मः। (नि. सा. वृ. ३०)। ३०. धर्मः स तास्विकैरुक्तो यो भवेद् गतिकारणम्। जीवादीनां पदार्थानां मत्स्यानामुदकं यथा॥ (पद्मनं. २१-८३)। ३१. लोयपमाणमुत्तं अवेक्ख गमणलक्खणं धम्मं। (द्रव्यस्व. ११४)। ३२. जीवानां पुद्गलानां च स्वभावत एव गतिपरिणामपरिणतानां तत्स्वभावधारणात्—तत्स्वभावपोषणाद् धर्मः, अस्तयश्चेह प्रदेशास्तेषां कायः संघातः, ××× अस्तिकायः प्रदेशसंघात इत्यर्थः। धर्मश्चासावस्तिकायश्च धर्मास्तिकायः। (प्रज्ञाप. मलय. वृ. १-३, पृ. ८; जीवाजी. मलय. वृ. ५, पृ. ६)। ३३. जीव-पुद्गलयोः साधारण्येन गतिनिमित्तं धर्मः। (भ. आ. मूला. ३६)। ३४. गतिहेतुर्भवेद् धर्मो जीव-पुद्गलयोर्द्वयोः। (भावसं. वाम. ३६३)। ३५. गतिक्रियावतोर्जीव-पुद्गलयोः तत्क्रियासाधनभूतं धर्मद्रव्यम्। (गो. जी. जी. प्र. टी. ६०५)। ३६. जीव-पुद्गलयोर्यः स्याद् गत्युपग्रहकारणम्। धर्मद्रव्यं ××× । (अम्बू. अ. ३, ३४)। ३७. धर्मद्रव्यगुणो हि पुद्गल-स्थितोश्चिद्द्रव्ययोरात्मना [त्मना] गच्छद्भावावतोर्निमित्तगतिहेतुत्वं तयोरेव यत्। मत्स्यानां हि जलादिवद् भवति चोदास्येन सर्वत्र च, प्रत्येकं सकृदेव शश्वदनयोर्गत्यात्मशक्तावपि॥ (अध्यात्मक. ३-३०, पृ. ७३)। १ जो रूप, रस, गन्ध, स्पर्श और शब्द से रहित है; सर्व लोकाकाश में व्याप्त है; स्पृष्ट—अयुतसिद्ध प्रदेशों वाला—है, विस्तृत है, असंख्यातप्रदेशी है, प्रतिसमय होने वाली छह वृद्धियों व हानियों के आश्रय से अनन्त अविभागप्रतिच्छेदों से परिणत है तथा गमनक्रिया से युक्त जीव और पुद्गलों के गमन में सहकारी है; ऐसे द्रव्य को धर्मास्तिकाय कहते हैं।

धर्मास्तिकायदेश—तथा तस्यैव बुद्धिपरिकल्पितो द्वयादिप्रदेशात्मको विभागो धर्मास्तिकायस्य देशः। (जीवाजी. मलय. वृ. ४, पृ. ६)।

धर्मद्रव्य के बुद्धि के द्वारा कल्पित दो आदि प्रदेशस्वरूप विभाग को धर्मास्तिकाय का देश कहते हैं।

धर्मास्तिकायप्रदेश—धर्मास्तिकायस्य प्रदेशाः—प्रकृष्टा देशाः प्रदेशाः, प्रदेशा निर्विभागा भागा इति। (जीवाजी. मलय. वृ ४, पृ. ६)।

धर्मास्तिकाय के निर्विभागी अंशों को धर्मास्तिकायप्रदेश कहते हैं।

धर्मास्तिकायानुभाग—जीव-पोग्गलाणं गमणागमणहेदुत्तं धम्मत्थियाणुभागो। (धव. पु. १३, पृ. ३४९)।

जीव और पुद्गलों के गमन और आगमन में सहकारी होना, यह धर्मास्तिकाय का अनुभाग है।

धर्मी—१. प्रसिद्धो धर्मी। (परीक्षा. ३–२७)। २. कारणादिव्यपदेशं द्रव्यं धर्मी, स्वधर्मापेक्षया द्रव्यस्य धर्मिव्यपदेशः। (आ. मी. वसु. ७५)। ३. आनुमानिकप्रतिपत्त्यवसरापेक्षया तु पक्षापरपर्यायस्तद्विशिष्टः प्रसिद्धो धर्मी। (प्र. न. त. ३, २०)। ४. धर्मो प्रमाणसिद्धः। बुद्धिसिद्धोऽपि। (प्रमाणमी. १, २, १६–१७)।

१ जो (साध्य धर्म से विशिष्ट पक्ष) प्रमाण से, विकल्प से अथवा दोनों से प्रसिद्ध होता है उसे अनुमान के प्रकरण में धर्मी कहा जाता है। २ कारण आदि नाम वाला द्रव्य अपने धर्म की अपेक्षा धर्मी कहलाता है।

धर्मोपदेश—१. धर्मकथाद्यनुष्ठानं धर्मोपदेशः। (त. सि. ६–२५; त. श्लो. ६–२५)। २. अर्थोपदेशो व्याख्यानमनुयोगवर्णनं धर्मोपदेश इत्यनर्थान्तरम्। (त. भा. ६–२५; योगशा. स्वो. विव. ४–६०)। ३. धर्मकथाद्यनुष्ठानं धर्मोपदेशः। दृष्टप्रयोजनपरित्यागादुन्मार्गनिवर्तनार्थं सन्देहव्यावर्तनापूर्वपदार्थप्रकाशनार्थं धर्मकथाद्यनुष्ठानं धर्मोपदेश इत्याख्यायते। (त. वा. ६, २५, ५)। ४. आक्षेपणी विक्षेपणी संवेजनी निर्वेदनीति चतस्रः कथाः, तासां कथनं कर्मोपदेशः। (भ. आ. विजयो. १०४)। ५. कथा धर्माद्यनुष्ठानं विज्ञेया धर्मदेशना। (त. सा. ७–१६)। ६. दृष्टप्रयोजनपरित्यागादुन्मार्गनिवर्तनार्थं सन्देहव्यावर्तनार्थमपूर्वपदार्थप्रकाशनार्थं धर्मकथाद्यनुष्ठानं धर्मोपदेशः। (आ. सा. पृ. ६७)। ७. द्वादशांगैकदेशोपदेशो धर्मोपदेशनम्। (आचा. सा. ४–६२)। ८. धर्मोपदेशः स्याद् धर्मकथा संस्तुतिमङ्गला। (अन. ध. ७–८७)। ६. दृष्टादृष्टप्रयोजनानपेक्षमुन्मार्गनिवर्तन-सन्देहच्छेदापूर्वार्थप्रकाशनाद्यर्थो धर्मकथानुष्ठानं धर्मोपदेशः। (भावप्रा. टी. ७८, पृ. २८५)। १०. दृष्टादृष्टप्रयोजनमनपेक्ष्य उन्मार्गविच्छेदनार्थं सन्देहच्छेदनार्थमपूर्वार्थप्रकाशनादिकृते केवलमात्मश्रेयोऽर्थं महापुराणादिधर्मकथाद्यनुकथनं धर्मोपदेशः। (त. वृत्ति श्रुत. ६–२५)। ११. दृष्टादृष्टप्रयोजनमनपेक्ष्य उन्मार्गविच्छेदनाय सन्देहच्छेदनार्थम् अपूर्वार्थप्रकाशनादिकृते केवलमात्मश्रेयोऽर्थं महापुराणादिधर्मकथाद्यनुकथनं स्तुति-देववन्दनादिकं च धर्मोपदेशः। (कार्तिके. टी. ४६६)।

१ धर्मकथा आदि के अनुष्ठान को धर्मोपदेश कहा जाता है। २ दृष्ट प्रयोजन के परित्यागपूर्वक कुमार्ग से निवृत्त होने, सन्देह का विनाश करने और अपूर्व अर्थ के प्रकाशित करने के लिए जो धर्मकथा आदि का आचरण किया जाता है इसे धर्मोपदेश कहते हैं।

धर्म्यध्यान—देखो धर्मध्यान। १. धर्म्यमाज्ञादिपदार्थस्वरूपपर्यालोचनैकाग्रता। (समवा. अभय. वृ. ४, पृ. ६)। २. श्रुत-चरणधर्मादिनपेतं धर्म्यम्। (स्थाना. अभय. वृ. ४, १, २४७)।

१ आज्ञा व अपाय आदि के स्वरूप का एकाग्रता से विचार करना, यह धर्म्यध्यान कहलाता है।

धात्रीदोष—देखो धात्रीपिण्ड। १. मज्जण-मंडणधादी खेल्लावण खीर अंबधादी य। पंचविधधादिकम्मेणुप्पादो धादिदोसो दु॥ (मूला. ६–२८)। २. पंचविधानां धात्रीकर्मणां अन्यतमेनोत्पादिता वसतिः काचिद्दारकं स्नपयति भूषयति क्रीडयति आशयति स्वापयति वा वसत्यर्थमेवमुत्पादिता वसतिर्धात्रीदोषदुष्टा। (भ. आ. विजयो. २३०; कार्तिके. टी. ४४८–४६)। ३. पंचविधानां धात्रीणां क्रियया कर्मणा च आहारादिरुत्पद्यते स धात्री नामोत्पादनदोषः। (मूला. वृ. ६–२८)। ४. बाललालन-शिक्षादिर्धात्रीत्वं ×××। (आचा. सा. ८–३७; भावप्रा. टी. ६६)। ५. मार्जन-क्रीडन-स्तन्यपान-स्वापन-मण्डनम्। बाले प्रयोक्तुर्यत्प्रीतो दत्ते दोषः स धात्रिका। (अन. ध. ५–२०)। ६. दारकाणां स्नपनेनालंकरणेन क्रीडनेन भोजनेन स्वापेन वा धात्रीवत्कर्मणा संयतेनोत्पादिता वसतिः धात्रीदोषदुष्टा। (भ. आ. मूला. २३०)।

१ मज्जनधात्री, मण्डनधात्री, क्रीडनधात्री, क्षीरधात्री और अम्बधात्री; इन पांच धायों के क्रमशः स्नान, अलंकरण, क्रीडन, दुग्धपान और सुलानेरूप कार्य से अथवा तद्विषयक उपदेश के द्वारा जो भोजन प्राप्त किया जाता है वह इस धात्रीदोष से दूषित होता है।

धात्रीपिण्ड—देखो धात्रीदोष। १. तन्त्राशनार्थं दातुरपत्योपकारे वर्तत इति धात्रीपिण्डः। (आचारा. सू. शी. वृ. २७३, पृ. ३२०)। २. बालस्य क्षीर-मज्जन-मण्डन - क्रीडनाङ्कारोपणकर्मकारित्वं

पञ्च धान्यः, एतासां कर्म निष्कार्थं कुर्वतो मुनेर्धात्रीपिण्डः। (ओघनि. स्वो. विव. १–३८)।

१ भोजन आदि के लिये दाता की सन्तान के उपकारार्थ पांच प्रकार के धात्रीकर्म में प्रवृत्त होने पर जो भोजन आदि प्राप्त होता है वह धात्रीपिण्ड नामक उत्पादन दोष से दूषित होता है।

धानुष्क—धानुष्को धनुषो योगात् × × × (पञ्चवु. ६–२०८)।

धनुष धारण करनेवाले को उसके निमित्त से धानुष्क कहते हैं।

धान्य—धान्य व्रीह्यादि अष्टादशभेदसुसस्यम्। उक्तं च—गोधूम-शालि-यव-सर्षप-माष-मुद्गाः श्यामाक-कङ्गु-तिल-कोद्रव-राजमाषाः। कोनाश-नालमथ वैणव-माढकी च सिवा-कुलत्थ-चणकादि-सूबीजधान्यम्॥ (कार्तिके. टी. ३४०)।

व्रीहि आदि अठारह प्रकार के अनाज को धान्य कहा जाता है।

धान्यमानप्रमाण—से किं तं धन्नमाणपमाणे? २ दो असईओ पसई दो पसईओ सेतिआ चत्तारि सेइआओ कुलओ चत्तारि कुलया पत्थो चत्तारि पत्थया आढगं चत्तारि आढगाइ दोणो सट्ठि आढयाइं जहन्नए कुंभे असीइ आढयाइं मज्झिमए कुंभे। आढयसयं उक्कोसए कुंभे अट्ठ य आढयसइए वाहे। एएणं धण्णमाणमाणेण किं पओअणं? एएणं धण्णमाणपमाणेणं मुत्तोलीमुखइदुरअलिंदओचारसंसियाणं धण्णाणं धण्णमाणप्पमाणनिव्वित्तिलक्खणं भवइ, से तं धण्णमाणपमाणे। (अनुयो. सू. १३२, पृ. १५१)।

धान्य के मापने के बांटों को धान्यमानप्रमाण कहते हैं। जैसे—दो असतिकी एक प्रसृति, दो प्रसृतियों की एक सेतिका, चार सेतिकाओं का एक कुडव, चार कुडवों का एक प्रस्थ, चार प्रस्थों का आढक, चार आढकों का द्रोण, साठ आढकों का जघन्य कुम्भ, अस्सी आढकों का मध्यम कुम्भ, सौ आढकों का उत्कृष्ट कुम्भ और आठ सौ आढकों का वाह होता है। ये सब धान्य के मापविशेष हैं।

धारण—१. गृहीतस्याविस्मरणं धारणम्। (त. भा. सिद्ध. वृ. ७–६)। २. धारणमविस्मरणम्। (ओघनि. स्वो. विव. १–५१)।

१ गृहीत (अनुभूत) बात को नहीं भूलना, इसका नाम धारण है।

धारणा—१. धरणी धारणा ठवणा कोट्ठा पविट्ठा (एदे पंच धारणाए पज्जायसद्दा)। (षट्खं. ५, ५, ४०—पु. १३, पृ. २४३)। २. अवेतस्य कालान्तरेऽविस्मरणकारणं धारणा। (त. सि. १–१५)। ३. धारणा प्रतिपत्तिर्यथास्वं मत्यवस्थानमवधारणं च। धारणा प्रतिपत्तिरवधारणमवस्थानं निश्चयोऽवगमः अवबोध इत्यनर्थान्तरम्। (त. भा. १–१५)। ४. × × × धरणंमि य धारणं विंति॥ (आव. नि. ३)॥ ५. × × × धरणं पुण धारणं विंति। (विशेषा. भा. १७९); × × × अविच्चुई धारणा तस्स॥ (विशेषा. भा. १८०)। ६. तव्विसेसावगमस्स धरणं अविच्चुती, धारणा इत्यर्थः। (नन्दी. चू. पृ. २५)। ७. निर्णीतार्थाऽविस्मृतिर्धारणा। भाषा-वयोरूपादिविशेषैर्यथात्म्येन निर्णीतस्य (अर्थस्य) पुरुषस्योत्तरकालं स एवायमित्यविस्मरण यतो भवति सा धारणा। (त. वा. १, १५, ४)। ८. धारणा स्मृतिहेतुः × × ×। (लघीय. ६); स्मृतिहेतुर्धारणासंस्कारः। (लघीय. स्वो. वि. ६)। ९. अवगतार्थविशेषधरणं धारणा। × × × परिच्छिन्नस्य वस्तुनोऽविच्युति-स्मृति-वासनारूपं तद् धरणं पुनर्धारणां ब्रुवते। (आव. नि. हरि. वृ. ३)। १०. धारणा प्रतिपत्तिः, यथास्वं मत्यवस्थानमवधारणं च। (अने. ज. प., पृ. १८)। ११. तथा तदर्थविशेषधरणं धारणा, अविच्युति-स्मृति-वासनारूपा। (नन्दी. हरि. वृ. पृ. ६३); अपायानन्तरमवगतार्थमविच्युत्या जघन्योत्कृष्टमन्तर्मुहूर्तमात्रं कालं धारयतो धारणेति भण्यते, ततस्तमेवार्थं उपायोगाच्युतो जघन्येनान्तर्मुहूर्तादुत्कृष्टतोऽसंख्येयकालात् परतः स्मरतो धरणं धारणोच्यते। (नन्दी. हरि. वृ. पृ. ६६); धरणं संख्येयवर्षायुषां संख्येयमसंख्येयवर्षायुषामसंख्येयम्। (नन्दी. हरि. वृ. पृ. ६७)। १२. कालान्तरेऽप्यविस्मरणसंस्कारजनकं ज्ञानं धारणा। (धव. पु. १, पृ. ३५४); निर्णीतस्यार्थस्य कालान्तरे अविस्मृतिर्धारणा। जत्तो णाणादो कालंतरे वि अविस्सरणहेदुभूदो जीवे संसकारो उप्पज्जदि तण्णाणं धारणा णाम। (धव. पु. ६, पृ. १८); निर्णीतार्थाविस्मृतिर्यतस्सा धारणा। (धव. पु. ६, पृ. १४४); अने-

तस्य कालान्तरे अविस्मरणकारणं ज्ञानं धारणा। (षड्. पु. १३, पु. २१८–१६); × × × अवेदवस्तुविसयग्गहणदुवारेण कालंतरे अविस्सरणहेदुसंकारजणणं विण्णाणं धारणेत्ति भणमुवगमादो : (षड्. पु. १३, पु. २४३); धार्यते निर्णीतोऽर्थः अनया इति धारणा। (षड्. पु. १३, पु. २४३)। १३. कालंतरे संभरणणिमित्तसंसकारहेउणाणं धारणा। (जयध १, पु. ३३२); अं कालंतरे अविस्सरणहेउसंसकारुप्पायणं णाणं णिण्णयसरूवं सा धारणा। (जयध. १, पु. ३३६)। १४. धारणा श्रुतिनिर्दिष्टबोजानामवधारणम्। (म. पु. २१–२७)। १५. × × × स्मृतिहेतुः सा धारणा। (त. श्लो. १, १५, ४)। १६. तावधारणज्ञानं कालान्तराविस्मरणकारणं धारणाज्ञानम्। (प्रमाणप., पृ. ६८)। १७. यदा तु निश्चितं सन्तमविच्युतिरूपेण धारयति लब्धिरूपेण वा कालान्तरानुस्मरणे वा सा धारणा। (त. भा. सिद्ध. वृ. १–१५); तस्यैव स्पर्शादेरर्थस्य परिच्छिन्नस्योत्तरकालमविस्मृतिर्या सा धारणा। (त. भा. सिद्ध. वृ. १–१७)। १८. तह य अवायमदिस्स कुंजरसद्देत्ति णिच्छिदत्थस्स। कालंतरअविसरणं सा होदि य धारणा बुद्धी॥ (अं. बी. प. १३–६०)। १९. स्मृतेः अनुभूतवस्तुविषयायाः तच्छब्दपरामृष्टायाः प्रतीतेः हेतुः धारणा—भावना, संस्कार इति यावत्। (न्यायकु. ६, पृ. १७३)। २०. तस्यैव (अवायविषयस्यैव) कालान्तरस्मरणयोग्यतया ग्रहणं धारणा। (प्रमाणनि. पृ. २८)। २१. कालान्तरे वि णिण्णिदवत्थुसमरणस्स कारणं तुरियं। (गो. जी. ३०६)। २२. धारणमविस्मरणम्। (नीतिवा. ५-४६, पृ. ५६)। २३. निर्णीतस्यार्थस्य कालान्तरेष्वविस्मृतिर्धारणा यस्माज्ज्ञानात्कालान्तरेऽप्यविस्मरणहेतुभूतो जीवसंस्कार उत्पद्यते तज्ज्ञानं धारणा। (मूला. वृ. १२–१८७)। २४. कालान्तरे परिज्ञातवस्तुस्मरणकारकः। संस्कारो यस्तदुत्पत्तिकारणं धारणाह्वयम्॥ (आचा. सा. ४–१५)। २५. स एव दृढतमावस्थापन्नो धारणा। (प्र. न. त. २–१०)। २६. स इत्यवायो दृढतमावस्थापन्नो विवक्षितविषयावसाय एव साधारस्य प्रमातुरत्यन्तोपचितः कंचित् कालं तिष्ठन् धारणेत्यभिधीयते। दृढतमावस्थापन्नो ह्यवायः स्वोपढौकितात्मशक्तिविशेषरूपसंस्कारद्वारेण कालान्तरे स्मरणं कर्तुं पर्याप्नोतीति। (रत्नाकरा. २–१०, पृ. ६२)। २७. स्मृतिहेतुर्धारणा। (प्रमाणमी. १, १, ३०)। २८. धारणा अर्हद्गुणाविस्मरणरूपा। (योगशा. स्वो. विव. ३–१२४)। २९. अवायज्ञानानन्तरमन्तर्मुहूर्तं यावत्तदुपयोगादविच्यवनमविच्युतिः तत्स्तदाहितो यः संस्कारः संख्येयमसंख्येयं वा कालं यावत् स वासनेत्युच्यते। पुनः कालान्तरे कुतश्चित्तादृशार्थदर्शनादिकात् कारणात् संस्कारस्य प्रबोधे सति यत् ज्ञानमुदयते तदेवेदं यत् प्रागुपलब्धमित्यादि तत् स्मृतिः। एतानि च त्रीण्यप्यविच्युत्यादीनि ज्ञानानि अविशेषेण धारणाशब्दवाच्यानि। यदाह—तदनंतरं तदत्थाविच्चवणं जो य वासणाओगो। कालंतरेण जो पुण अणुसरणं धारणा सा उ॥ (धर्मसं. मलय. वृ. ४४); अवग्रहादिक्रमेण निश्चितार्थविषये तदुपयोगादभ्रंशोऽविच्युतिः, तज्जनितः संस्कारविशेषो वासना, तत्सामर्थ्यादुत्तरकालं पूर्वोपलब्धार्थविषयमिद तदित्यादिज्ञानं स्मृतिः, अविच्युति-वासनास्मृतयश्च धारणलक्षणसामान्यान्वर्थयोगाद् धारणेति व्यपदिश्यते। (धर्मसं. मलय. वृ. ८२३)। ३०. तस्यैवार्थस्य निर्णीतस्य धरणं धारणा। (आव. नि. मलय. वृ. २, पृ. २३)। ३१. धारणा स्मृतिः। (व्यव. भा. मलय. वृ. १०–२७६)। ३२. तथा निश्चितस्यैवाविच्युति-स्मृति-वासनारूपं धरणं धारणा। (प्रव. सारो. वृ. १२५३; कर्मस्त. गो. वृ. १०, पृ. १३)। ३३. ततः स एव अवायः पुनः पुनः प्रवृत्तिरूपाभ्यासजनितसंस्कारात्मकः सन् कालान्तरेऽपि निर्णीतवस्तुस्मरणकारणत्वेन तुर्यं धारणाख्यम्। (गो. जी. म. प्र. व जी. प्र. टी. ३०६)। ३४. कालान्तराविस्मरणयोग्यतया तस्यैव ज्ञानं धारणा। (न्यायदी., पृ. ३७)। ३५. अवेतस्य सम्यक्परिज्ञातस्य यत्कालान्तरे अविस्मरणकारणं ज्ञानं सा धारणेत्युच्यते। (त. वृत्ति श्रुत. १–१५); धारणा तु अवगृहीतार्थानामविस्मरणकारणमिति। (त. वृ. श्रुत. १–१६)।

१ धरणी, धारणा, स्थापना, कोष्ठा और प्रतिष्ठा ये धारणा के समानार्थक शब्द हैं। २ अवायसे जाने हुए पदार्थ के कालान्तर में नहीं भूलने का जो कारण है उसे धारणा कहते हैं। ३ विषय के अनुसार प्रतिपत्ति—गृहीत अर्थविषयक उपयोग के अविनाश, मति में अवस्थान— अन्यत्र उपयोग जाने

पर अधिकरण में धारणारूप मति की विद्यमानता —और अवधारण को धारणा कहा जाता है।

धारणावरणीय—एतस्याः (धारणायाः) आवारकं कर्म धारणावरणीयम्। (धव. पु. १३, पृ. २१६)।

इस धारणा मतिज्ञान का आच्छादन करनेवाले कर्म को धारणावरणीय कहते हैं।

धारणाव्यवहार—धारणाववहारो संविग्गेण गीयत्थेणायरिएणं दव्व-खेत्त-काल-भाव-पुरिसपडिसेवणासु अवलोएऊण जम्मि जं अवराहे दिन्नं पच्छित्तं तं पासिऊण अन्नो वि तेसु चेव दव्वाइएसु तारिसावराहे तं चेव पच्छित्तं देइ, एस धारणाववहारो। अहवा वेयावच्चगरस्स गच्छोवग्गहकारिणो फड्डगपइणो वा संविग्गस्स देसदरिसणसहायस्स वा बहुसो पडितप्पियस्स अवसेससुयाणुओगस्स उचियपायच्छित्तट्ठाणदाणधारणं धारणाववहारो भन्नइ। (जीतक. चू. पृ. ४)।

द्रव्य, क्षेत्र, काल, भाव और पुरुषप्रतिसेवना के विषय में देखकर संसार से भयभीत गीतार्थ—आगम के ज्ञाता—आचार्य के द्वारा जिस अपराध के होने पर जो प्रायश्चित्त दिया गया है उसका विचार करके अन्य आचार्य भी जो उक्त द्रव्यादि के आश्रित वैसे अपराध के होने पर वही प्रायश्चित्त देता है; इसका नाम धारणाव्यवहार है। अथवा वैयावृत्य करके गच्छ का उपकार करनेवाले, व गण के अवान्तर विभाग के स्वामी, संविग्न (मोक्षाभिलाषी); देशतः दर्शन की सहायता से युक्त, बहुत प्रकार से प्रतितर्पित तथा अवशेष श्रुत के उपयोग से सहित अन्य प्रायश्चित्तदाता आचार्य के प्रायश्चित्त के देने के धारण को व्यवहार कहा जाता है।

धाराचारण—अविराहिय तल्लीणे जीवे वणमुक्कधारिधाराणं। उवरिं जं जादि मुणी सा धाराचारणा रिद्धी॥ (ति. प. ४–१०४४)।

जिसके प्रभाव से साधु मेघों से छोड़ी हुई जलधारा का आश्रय करके ऊपर गमन करते हुए जलधारागत जीवों की विराधना नहीं करता है उसे धाराचारण ऋद्धि कहते हैं।

धार्मिक—धर्मे श्रुत-चारित्रात्मके भवः, स वा प्रयोजनमस्येति धार्मिकः। (स्थाना. वृ. ३, ३, १८८, पृ. १५४)।

श्रुत और चारित्र स्वरूप धर्म में होने वाला अथवा उक्त धर्म जिसका प्रयोजन है वह धार्मिक कहलाता है।

धार्मिक राजा (धम्मितो राया)— १. उभतो जोणिसुद्धो राया वसभागमेत्ततुट्ठो। लोए वेदे समए कयागमो धम्मितो राया॥ (व्यव. भा. ३)। २. यो राजा उभययोनिशुद्धो मातृ-पितृपक्षपरिशुद्धः, तथा प्रजाभ्यो दश (म) भागमात्रग्रहणसंतुष्टः तथा लोके लोकाचारे, वेदे समस्तदर्शनिनां सिद्धान्ते, समये नीतिशास्त्रे कृतागमः कृतपरिज्ञानो धार्मिको धर्मश्रद्धावान् स राजा। (व्यव. भा. मलय. वृ. ३, पृ. १२६)।

जिसका मातृपक्ष और पितृपक्ष शुद्ध हो, जो प्रजा से उसकी आय का दशम भाग लेने में ही सन्तुष्ट रहता हो; तथा जो लोकव्यवहार, वेद—सब दर्शनियों के सिद्धान्त और नीतिशास्त्र का ज्ञाता हो वह धार्मिक राजा कहलाता है।

धीर—१. धीरः सत्त्वसम्पन्नः। (आव. नि. हरि. वृ. ८७४, पृ. ३७२)। २. धीराः कर्मविदारणसहिष्णवो धीरा वा परीषहोपसर्गक्षोभ्याः, धिया बुद्धया राजन्नीति वा धीरा ये केचनासन्नसिद्धिगमनाः। (सूत्रकृ. सू. शी. वृ. १, ६, ३३, पृ. १८५)।

२ जो भी अपनी बुद्धि से सुशोभित होते हैं वे धीर कहलाते हैं और वे परीषह व उपसर्ग से विचलित न होकर थोड़े ही समय में मुक्ति को प्राप्त करने वाले होते हैं।

धूमकेतु—१. उप्पादकाले चेव धूमसट्ठि व्व आगासे उवलब्भमाणा धूमकेदू णाम। (धव. पु. १४, पृ. ३५)। २. धूमकेतुर्गगने धूमाकाररेखाया दर्शनम्। (मूला. वृ. ५–७८)।

१ उत्पात के समय में ही आकाश में जो धूमाकार रेखा दिखाई पड़ती है उसे धूमकेतु कहते हैं।

धूमचारण—१. अध-उड्ढ-तिरियपसरं धूमं अवलंबिऊण जं देंति। जं पदखेवे अक्खलिआ सा रिद्धी धूमचारणा णाम॥ (ति. प. ४–१०४२)। २. धूमवर्ति तिरश्चीनामूर्ध्वगां वा आलम्ब्यास्खलितगमनास्कन्दिनो धूमचारणाः। (योगशा. स्वो. विव. १–६; प्रव. सारो. वृ. ६०१, पृ. १६८)।

१ जिसके प्रभाव से ऋषि जल नीचे, ऊपर और तिरछे फैलने वाले धुएँ का अवलम्बन करके

अस्खलित पादक्षेप करते हुए गमन करते हैं उसे धूमचारण ऋद्धि कहते हैं।

धूमदोष—१. तं पुण होदि सधूमं जं आहारेदि णिंदिदो। (मूला. ६–५८)। २. शीतवातातपाम्बुपद्मसहिता वसतिरियमिति निन्दां कुर्वतो वसनं धूमदोषः। (भ. आ. विजयो. २३०; कार्तिके. टी. ४४८–४४९, पृ. ३३९)। ३. तथाऽन्त[न्य] प्रान्तादावाहारद्वेषाच्चारित्रस्याभिधूमनाद् धूम्रदोषः। (आचारा. सू. शी. वृ. ६–१, २७१, पृ. ३२१)। ४. यस्मादाहरति निन्दन् जुगुप्समानो विरूपकमेतदनिष्टं मम एवं कृत्वा यदि भुंक्ते तदानीं धूमो नाम दोषः। (मूला. वृ. ६–५८)। ५. निन्दन् पुनश्चारित्रेन्धनं दहन् धूमकरणाद् धूमो दोषः। (भोगशा. स्वो. विव. १–३८)। ६. धूमोऽनिष्टान्न-पानादौ यद् द्वेषेण निषेवनम्। (आचा. सा. ८–५७)। ७. ××× अश्नतो धूमो निन्दया ××× । (अन. ध. ५–३७)।

१ यह आहार मेरे लिए अनिष्टकर है, इस प्रकार निन्दा करते हुए उसे ग्रहण करने पर वह धूमदोष से दूषित होता है। ३ अन्त[अन्य] प्रान्त आदि में आहारविषयक द्वेष के वश चारित्र चूंकि धूमित (मलिन) होता है, अतएव इसे धूम या धूम्रदोष कहा जाता है।

धृति—१. निःश्रेयसधर्मभूमिकानिबन्धनभूता धृतिः। (ललितवि. पृ. ३८); धृतिः मनःप्रणिधानम्। (ललितवि. पृ. ८१)। २. धृतिः चित्तस्वास्थ्यम्। (समवा. अभय. वृ. १४१)। ३. धृतिः समाधिलक्षणा। (भोगशा. स्वो. विव. ३–१२४)।

१ मोक्षप्रापक धर्म की भूमिका का जो कारण है उसे धृति (धैर्य) कहा जाता है, मन की एकाग्रता को धृति कहते हैं।

धृतिमान्—धृतिः संयमे रतिः, सा विद्यते येषां ते धृतिमन्तः। (सूत्रकृ. सू. शी. वृ. १, ६, १३)। संयम में रति या अनुराग के करने वालों को धृतिमान् कहा जाता है।

धेनुमुद्रा— अन्योन्यग्रन्थिताङ्गुलीषु कनिष्ठिकानामिकयोर्मध्यमा-तर्जन्योश्च संयोजनेन गोस्तनाकारा धेनुमुद्रा। (निर्वाणक. १६, ३, २)।

दोनों हाथों की अंगुलियों को परस्पर में मिलाकर—ग्रंथित कर—कनिष्ठा-अनामिका और मध्यमा-तर्जनी के मिला देने पर जो गाय के स्तन के आकार वाली मुद्रा बन जाती है उसे धेनुमुद्रा कहते हैं।

ध्याता—१. णाहं होमि परेसि ण मे परे संति णाणमहमेक्को। इदि जो झायदि झाणे सो अप्पाणं हवदि झादा॥ (प्रव. सा. २–९९); जो खविदमोहकलुसो विसयविरत्तो मणो णिरुंभित्ता। समवट्ठिदो सहावे सो अप्पाणं हवदि झादा॥ (प्रव. सा. २–१०४)। २. पुव्वकयब्भासो भावणाहि झाणस्स जोग्गयमुवेइ। ताओ य णाण-दंसण-चरित्त-वेरग्गजणियाओ॥ णाणे णिच्चब्भासो कुणइ मणोधारणं विसुद्धिं च। णाणगुणमुणियसारो तो झाइ सुणिच्चलमईओ॥ संकाइदोसरहिओ पसमत्थेज्जाइगुणयणोवेओ। होइ असंमूढमणो दंसणसुद्धीए झाणंमि॥ नवकम्माणायाणं पोराणविणिज्जरं सुभायाणं। चारित्तभावणाए ज्झाणमयत्तेण य समेइ॥ सुविदियजगस्सहावो णिस्संगो निब्भओ णिरासो य। वेरग्गभावियमणो ज्झाणंमि सुनिच्चलो होइ॥ (ध्यानश. ३०–३४; धव. पु. १३, पृ. ६८ उद्.)। ३. उत्तमसंघडणो ओघबलो ओघसूरो चोद्दसपुव्वहरो वा [दस-]णवपुव्वहारो वा ××× सम्माइट्ठी ××× चत्तासेसबज्झंतरंगगंथो ××× विवित्तपासुयगिरि-गुहा-कंदर-पब्भार-सुसाण-आरामुज्जाणादिदेसत्थो ××× जहासुहृत्थो ××× पणियदकालो ××× सालंबणो ××× सुदट्ठु तिरयणेसु भावियप्पा ××× विसएहिंतो दिट्ठि णिरंभियूण ज्झेये णिरुद्धचित्तो ××× । एवं ज्झायंतस्स लक्खणं परूविदं। (धव. पु. १३, पृ. ६४–६९)। ४. ध्याताऽकषायकलुषितो गुप्तेन्द्रियश्च। (चा. सा. पृ. ७४)। ५. मुमुक्षुर्जन्मनिर्विण्णः शान्तचित्तो वशी स्थिरः। जितपरीषहः संवृतो धीरो ध्याता शास्त्रे प्रशस्यते॥ (ज्ञाना. ४–६, पृ. ६९); विरज्य काम-भोगेषु विमुच्य वपुषि स्पृहाम्। यस्य चित्तं स्थिरीभूतं स हि ध्याता प्रशस्यते॥ (ज्ञाना. ५–३, पृ. ८३)। ६. अमुंचन् प्राणनाशेऽपि संयमैकधुरीणताम्। परमप्यात्मवत्पश्यन् स्वस्वरूपापरिच्युतः॥ उपतापमसंप्राप्तः शीतवातातपादिभिः। पिपासुरमरीकारि योगामृतरसायनम्॥ रागादिभिरनाक्रान्तं क्रोधादिभिरदूषितम्। आत्मारामं मनः कुर्वन् निर्लेपः सर्वकर्मसु॥ विरतः काम-भोगेभ्यः

स्वशरीरेऽपि निःस्पृहः । संवेगरङ्गदनिर्मग्नः सर्वत्र भवतां भवन् ॥ नरेन्द्रे वा दरिद्रे वा तुल्यकल्याणकामनः । प्रमादकरुणापात्रं भवसौख्यपराङ्मुखः ॥ सुमेरुरिव निष्कम्पः शशीवानन्ददायकः । समीर इव निःसंगः सुधीर्ध्याता प्रशस्यते ॥ (योगशा. ७, २-७)। ७. स्वात्मसंवित्तिरसिको ध्याता × × × । (इष्टो. प. टी. ३६) । ८. आहारासन निद्राणां विजयो यस्य जायते । पंचानामिन्द्रियाणां च परीषहसहिष्णुता ॥ गिरीन्द्र इव निष्कम्पो गम्भीरस्तोयराशिवत् । अशेषशास्त्रविद् धीरो ध्याताऽसौ कथ्यते बुधैः ॥ (भावसं. वाम. ६५७–५८) ।

१ मैं पर (अन्य) का नहीं हूं और पर मेरे नहीं हैं, मैं तो एक ज्ञानस्वरूप हूं; इस प्रकार से जो ध्यानमें आत्मचिन्तन करता है उसे ध्याता जानना चाहिए। जो कषायों की कलुषता से रहित व विषयों से विरक्त होता हुआ मन को रोक कर स्वभाव में स्थित होता है वह ध्याता कहलाता है।

ध्यान — १. उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमान्तर्मुहूर्तात् । (त. सू. ९–२७) । २. चित्तविक्षेपत्यागो ध्यानम् । (स. सि. ९-२०)। ३. उत्तमसंहनन वज्रर्षभनाराचं वज्रनाराच नाराच अर्धनाराचं च, तद्युक्तस्यैकाग्रचिन्तानिरोधश्च ध्यानम् । (त. भा. ९–२७) । ४. तस्स (झाणस्स) य इमं लक्खणं । तं०—दढमज्झवसाणंति । केई पुण आयरिया एवं भणंति—एगग्गस्स चिन्ताए निरोधो झाणं, एगग्गस्स किर चिन्ताए निरोधो तं झाणमिच्छंति, तं छउमत्थस्स जुज्जइ, केवलिणो न जुज्जइत्ति । (दशवै. चू. १, पृ. २९) । ५. जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं । तं होज्ज भावणा वा अणुपेहा वा अहव चिंता ॥ (ध्यानश. २)। ६. ध्यानशब्दो भाव-कर्तृ-करणसाधनो विवक्षावशात् । अयं ध्यानशब्दः भाव-कर्तृ-करणसाधनो विवक्षावशाद् वेदितव्यः । तत्र ध्येयं प्रति अभ्यापृतस्य भावमात्रेणाभिधाने ध्यातिर्ध्यानमिति भावसाधनो ध्यानशब्दः । ध्यायतीति ध्यानमिति बहुलापेक्षया कर्तृसाधनश्च युज्यते । करणप्रशंसापरायामभिधानप्रवृत्तौ समीक्षितायां यथा साध्वसिक्तीति प्रयोक्तृ-निर्वर्त्ययोः सतोरप्युक्षमन-निपातनयोरविशेषसंश्रयात्छेदनस्य कर्तृधर्माध्यारोपः क्रियते, तथा दिव्यासोरप्यात्मनः ज्ञानावरण-वीर्यान्तरायक्षयोपशमविशेषसंश्रयात् ध्यानपरिणामस्य युज्यते कर्तृत्वम् । करणत्वमपि चास्य पर्याय-पर्यायिणोर्भेदपरिकल्पनासद्भावात् युज्यते अग्नेर्दाह-पाक-स्वेदादिक्रियाप्रवृत्तस्यात्मभूतोष्ण्यकरणपरिकल्पनवत् । (त. वा. ९, २७, ८) । ७. यत् स्थिरमध्यवसानं तद् ध्यानम् । (ध्यानश. हरि. वृ. २) । ८. अन्तर्मुहूर्तकालं चित्तस्यैकाग्रता भवति ध्यानम् । (आव. नि. हरि. वृ. १४६३, पृ. ७७४) । ९. उत्तमसंहननस्य एकाग्रचिन्तानिरोधो ध्यानम् । एत्थ गाहा—जं थिरमज्झवसाणं तं झाणं जं चलं तयं चित्तं । तं होइ भावणा वा अणुपेहा वा अहव चिंता ॥ (षट्. खं. १३, पृ. ६४ उद्.); दंसमसय-सीह-वय-वग्घतरच्छच्छहल्लेहि खज्जंतो वि वासीए तच्छिज्जंतो [वि] करवत्तेहि फाडिज्जतो वि दावानलसिहामुहेण कवलिज्जतो वि सीद-वादावेहि बाहिज्जंतो [वि] अच्छरसयकोडीहि लालिज्जंतओ वि जिस्से अवत्थाए उभेयादो ण चलदि सा जीवावस्था झाणं णाम । (षट्. खं. १३, पृ. ७४); अंतोमुहुत्तमेत्तं चिंतावत्थाणमेगवत्थुम्हि । छदुमत्थाणं झाणं जोगणिरोहो जिणाणं तु ॥ (ध्यानश. ३; षट्. खं. १३, पृ. ७६ उद्.)। १०. ध्यानमेकाग्रचिन्तायां वनसंहननस्य हि । निरोधोऽन्तर्मुहूर्तं स्याच्चिन्ता स्यादस्थिरं मनः ॥ (ह. पु. ५६–३) । ११. ऐकाग्र्येण निरोधो यश्चिन्तस्यैकत्र वस्तुनि । तद् ध्यानं वज्रकं यस्य भवेदान्तर्मुहूर्ततः ॥ स्थिरमध्यवसानं यत्तद् ध्यानं × × × ॥ वीर्यलाभस्यवृत्तित्वाद् ध्यानं तज्ज्ञैर्निरुच्यते । यथार्थमभिसन्धानाद् अपध्यानमतोऽन्यथा ॥ (म. पु. २१, ८–९ व ११); प्रशस्तप्रणिधानं यत् स्थिरमेकत्र वस्तुनि । तद् ध्यानमुक्तं मुक्त्यङ्गं धर्म्यं शुक्लमिति द्विधा ॥ (म. पु. २१–१३२) । १२. ततोऽयं ध्यानशब्दो भाव-कर्तृ-करणसाधनो विवक्षावशात् ध्येयं प्रति व्यापृतस्य भावमात्रत्वात् ध्यातिर्ध्यानमिति भवति । करणप्रशंसापरायां वृत्तौ कर्तृसाधनत्वं ध्यायतीति ध्यानम् । साधकतमत्वविवक्षायां कारणसाधनं ध्यायत्यनेन ज्ञानावरण-वीर्यान्तरायविरामविशेषोद्भूतशक्तिविशेषेणेति ध्यानमिति । (स. श्लो. ९–२७, पृ. ४९९) । १३. राग-द्वेष-मिथ्यात्वासंश्लिष्टं अर्थयाथात्म्यस्पर्शिप्रसिद्धिवृत्तविषयान्तरसंचारं ज्ञानं ध्यानम् । (म. आ. विजयो. २१); ध्यानं एकाग्रचिन्तारोधः । (म. आ. विजयो. ७०);

वस्तुन्यात्मस्थाववोधो निश्चलो यः स ध्यानम्। (अ. आ. विजयो. ७१)। १४. वाक्काय-चित्तानां आयमविधानेन निरोधो ध्यानम्। (त. भा. सिद्ध. वृ. ६-२०); अतो निश्चलं स्थिरमध्यवसानमेकालम्बनं छद्मस्थविषयं ध्यानम्। केवलिनां पुनर्वाक्कायमयोगनिरोध एव ध्यानम्, अभावान्मनसः। (त. भा. सिद्ध. वृ. ६-२७)। १५. एकाग्रचिन्तानिरोधो यः परिस्पन्देन वर्जितः। तद् ध्यानं निर्जराहेतुः संवरस्य च कारणम्॥ द्रव्य-पर्याययोर्मध्ये प्राधान्येन यदर्पितम्। तत्र चिन्तानिरोधो यस्तद् ध्यानं जगणुजिनाः॥ (तत्त्वानु. ५६ व ५८); निश्चयाद् व्यवहाराच्च ध्यानं द्विविधमागमे। स्वरूपालम्बनं पूर्वं परालम्बनमुत्तरम्॥ (तत्त्वानु. ६६)। १६. एकाग्रत्वेऽतिचिन्ताया निरोधो ध्यानमिष्यते। अन्तर्मुहूर्ततस्तच्च भवत्युत्तमसंहतेः॥ (त. सा. ७-३८)। १७. ततोऽनन्तशक्तिचिन्मात्रस्य परमस्यात्मनः एकाग्रसंचेतनलक्षणं ध्यानं स्यात्। (प्रव. सा. अमृत. वृ. २-१०२); तत्तु (स्वभावे समवस्थानं) स्वरूपप्रवृत्तानाकुलैकाग्रसंचेतनत्वात् ध्यानमित्युपगीयते। (प्रव. सा. अमृत. वृ. २-१०४)। १८. शुद्धस्वरूपेऽविचलितचैतन्यवृत्तिर्हि ध्यानम्। (पंचा. का. अमृत. वृ. १४६)। १९. एकाग्रचिन्तानिरोधो ध्यानम्, एकस्मिन् प्रियासाधनेऽग्रं मुखं यस्याश्चिन्तायाः इत्येकाग्रचिन्ता, तस्या निरोधोऽन्यत्राऽसंचारस्तदेकाग्रचिन्तानिरोधो ध्यानम्। ××× ध्यानं चिन्ताप्रबन्धलक्षणम्। (आ. सा. पृ. ७४)। २०. चित्तस्यैकाग्रता ध्यानं ×××। (उपासका. ६१६)। २१. एकं चिन्तानिरोधात् पुनरिदमुभयं ध्यानमान्तर्मुहूर्तम्। (अध्यात्मत. १५)। २२. उत्कृष्टं कायबन्धस्य साधोरन्तर्मुहूर्ततः। ध्यानमाहुरथैकाग्रचिन्तारोधो बुधोत्तमाः॥ एकचिन्तानिरोधो यस्तद् ध्यान×××। (आत्मा. १५-१६, पृ. २५५-५६)। २३. जं किंचि वि चिंतंतो णिरीहवित्ती हवे जदा साहू। लद्धूण य एयत्तं तदाहु तं तस्स णिच्चयं झाणं॥ (द्रव्यसं. ५५)। २४. एकाग्रचिन्तानिरोधेन च पूर्वोक्तविविधध्येयवस्तुनि स्थिरत्वं निश्चलत्वं ध्यानलक्षणम्। (बृ. द्रव्यसं. टी. ५५)। २५. एकस्मिन् विषयेऽग्रमानलमभूदस्या मतेरित्यसावेकाग्रा विषयोपयोगनिरता चिन्तानिरोधो यदा। तस्या स्यान्निजगोचरालमनो ध्यानं तदन्तर्मुहूर्तावस्थानमतीव दुर्धरतया नाऽतः परं तिष्ठति। (आचा. सा. १०-१२)। २६. अन्तर्मुहूर्तं यावच्चित्तस्यैकाग्रता योगनिरोधश्च ध्यानम्। (समवा. अभय. वृ. ४, पृ. ६)। २७. ध्यानमेकाग्रचिन्तानिरोधः। (चारित्रप्र. टी. ५; भ. आ. मूला. ७०)। २८. मुहूर्तान्तिमनस्थैर्यं ध्यानं छद्मस्थयोगिनाम्। धर्म्यं शुक्लं च तद् द्वेधा योगरोधस्त्वयोगिनाम्॥ (योगशा. ४-११५)। २९. ध्यातिर्ध्यानमेकाग्रचिन्तानिरोधः, एकवस्तुनिष्ठमात्मनो ज्ञानमित्यर्थः। ××× एकस्मिन् विवक्षितेऽग्रे मुखे ध्यालम्बने चिन्ताया यथोक्तपरिस्पन्दवत्त्वैतन्याश्रितायाः अन्तःकरणप्रवृत्तेर्निरोधोऽवरोधो नानार्थव्यावर्तनेन तत्रैवावस्थापनमेकाग्रचिन्तानिरोधो ध्यानस्याक्षुण्णं लक्षणमुपलक्षणीयम्। (अ. आ. मूला. टी. १६९९)। ३०. एकाग्रचिन्तनं ध्यानं चतुर्भेदविराजितम्। (भावसं. वाम. ६५९)। ३१. मनोविभ्रमपरिहरणं ध्यानमुच्यते। (त. वृत्ति श्रुत. ६-२०); एकमग्रं मुखमवलम्बनं द्रव्यं पर्यायः तदुभयं स्थूलं सूक्ष्मं वा यस्य स एकाग्रः; एकाग्रस्य चिन्तानिरोधः आत्मार्थं परित्यज्यापरचिन्तानिषेधः एकाग्रचिन्तानिरोधो ध्यानमुच्यते। (त. वृत्ति श्रुत. ६-२७)। ३२. कृत्स्नचिन्तानिरोधेन पुंसः शुद्धस्य चिन्तनम्। एकाग्रलक्षणं ध्यानं तदुक्तं परमं तपः॥ (लाटीसं. ७-८७)।

१ उत्तम संहनन वाले जीव के जो एक अग्र में—अनियमित भोजन-गमनादि रूप अनेक क्रियाओं में से किसी एक ही क्रिया के कर्ता रूप में—चिन्ता का जो निरोध होता है उसे ध्यान कहते हैं। वह अन्तर्मुहूर्त काल तक ही होता है। ५ स्थिर अध्यवसान—आत्मपरिणाम—का नाम ध्यान है।

ध्येय—१. जिणो वीयरायो केवलणाणेण सयलमतिकालगोयराणंतपज्जाओवचियछद्दव्वो णवकेवललद्धिप्पहुडिगुणेहि आरद्धदिव्वदेहधरो अजरो अमरो अजोणिसंभवो अदज्झो अछेज्जो अवत्तो णिरंजणो णिरामओ अणवज्जो सयलकिलेसुम्मुक्को तोसवज्जियो वि सेवयजणकप्परुक्खो, दोसवज्जिओ वि सगसमयपरम्मुहजीवाणं कयंतोवमो सिद्धसज्झो जियजेयो संसार-सायरुत्तिण्णो सुहामियसायरणिबुड्ढासेसकर-चरणो णिच्चओ णिरायुहभावेण जाणाविधपडिवक्खाभावो सव्वलक्खणसंपुण्णदव्वणसंकंत-

माणुसखायागारो संतो वि सयलमाणुसपहावुत्तिण्णो अच्चओ अक्खओ ××× सगसरूवे दिण्णचित्त-जीवाणमसेसपावपणासओ किण्णउवइट्ठणवपयत्था वा ज्झेयं होंति। ××× बारसअणुपेक्खाओ उवसमसेढि-खवगसेढिचढणविहाणं तेवीसवग्गणाओ पंच परियट्टाणि ट्ठिदि-अणुभाग-पयडि - पदेसादि सव्वं पि ज्झेयं होदि त्ति दट्ठव्वं। (धव. पु. १३, पृ. ६६, ७०)। २. अथवा पुरुषार्थस्य परां काष्ठामधिष्ठितः। परमेष्ठी जिनो ध्येयो निष्ठितार्थो निरञ्जनः॥ स हि कर्ममलापायाच्छुद्धिमात्यन्तिकीं श्रितः। सिद्धो निरामयो ध्येयो ध्यातृणां भावशुद्धये॥ (म. पु. २१, ११२-१३); ध्येयं स्यात् परमं तत्त्वमवाङ्मानसगोचरम्॥ (म. पु. २१–२२८)। ३. ध्येयमप्रशस्त-प्रशस्तपरिणामकारणम्। (ज्ञा. सा. पृ. ७४)। ४. यथावद्वस्तुनो रूपं ध्येयं स्यात् संयम[मे] सतां॥ (भावसं. वाम. ६५८)।

१ केवल ज्ञानादि रूप अनेक उत्तम गुणों से सम्पन्न वीतराग जिन व उनके द्वारा उपदिष्ट नौ पदार्थ ध्येय हैं—ध्यान करने योग्य हैं। इनके अतिरिक्त बारह अनुप्रेक्षायें, उपशम श्रेणि और क्षपक श्रेणि पर आरूढ होने की विधि, तेईस वर्गणायें, पांच परिवर्तन और प्रकृति-स्थिति आदि बन्धभेद भी ध्येय (चिन्तनीय) हैं।

ध्रुव-अचित्त-द्रव्यवर्गणा (अधन्य)—१. ध्रुवअचित्तदव्ववग्गणा जहण्णा णाम तहाविहपरिणामपरिणएहिं अचित्तखंधेहिं सव्वकालं अविरहितो लोगो अण्णे उप्पज्जंति अण्णे विगच्छंति। (कर्मप्र. चू. ब. क. १६, पृ. ४२)। २. ध्रुवाचित्तद्रव्यवर्गणा नाम याः सर्वदैव लोके प्राप्यन्ते। तथा हि—एतासां मध्येऽन्या उत्पद्यन्तेऽन्या विनश्यन्ति, न पुनरेताभिः कदाचनापि विरहितो भवति, अचित्तत्वं चासां जीवेन कदाचनापि अग्रहणादवसेयम्। (कर्मप्र. मलय. चू. ब. क. १६, पृ. ४६)।

२ जो अचित्तद्रव्यवर्गणायें लोक में सदा ही पायी जाती हैं वे ध्रुव अचित्त द्रव्यवर्गणायें कहलाती हैं। अभिप्राय यह है कि इन वर्गणाओं में अन्य उत्पन्न होती हैं और अन्य विनष्ट होती हैं, परन्तु इनसे लोक कभी रहित नहीं होता। अचित्त उन्हें इस लिए कहा जाता है कि जीव ने उन्हें कभी ग्रहण नहीं किया।

ध्रुवप्रत्यय—१. स एवायमहमेव स इति प्रत्ययो ध्रुवः। (धव. पु. ६, पृ. १५४)। २. स्वान्तिस्थस्वविशिष्टस्य स्तम्भादेर्ग्रहणं ध्रुवः। (आचा. सा. ४–२६)।

१ वही यह है, मैं ही वह हूं, इस प्रकार का जो प्रत्यय होता है वह ध्रुवप्रत्यय कहलाता है। २ नित्यस्वविशिष्ट स्तम्भ आदि के ग्रहण करने को ध्रुवप्रत्यय कहते हैं।

ध्रुवबन्धप्रकृति—जस्स पयडीए पच्चओ अत्थि कत्थ वि जीवे अणादिधुवभावेण लब्भइ सा धुवबंधपयडी। (धव. पु. ८, पृ. १७)।

जिस कर्मप्रकृति का प्रत्यय जिस किसी भी जीव में अनादि व ध्रुवस्वरूप से पाया जाता है वह ध्रुवबन्धप्रकृति कहलाती है।

ध्रुव-बाह्य-सचित्तनोआगमद्रव्यस्थान—जं तं धुवं तं सिद्धाणमोगाहणट्ठाणं। कुदो? तेसिमोगाहणाए वड्ढि-हाणीणमभावेण थिरसरूवेण अवट्ठाणादो। (धव. पु. १०, पृ. ४३४)।

ध्रुवबाह्यसचित्तनोआगमद्रव्यस्थान सिद्धों का अवगाहनास्थान है, क्योंकि उनकी अवगाहना वृद्धि-हानि से रहित होकर स्थिर स्वरूप से अवस्थित है।

ध्रुवराहु—१. तत्थ णं जे से धुवराहू से णं बहुलपक्खस्स पाडिवए पण्णरसइभागेणं भागं चंदस्स लेसं आवरेमाणे चिट्ठति तं पढमाए पढमं भागं जाव पन्नरसमं भागं चरमे समए चंदे रत्ते भवति, अवसेसे समए चंदे रत्ते य विरत्ते य भवइ, तमेव सुक्कपक्खे उवदंसेमाणे २ चिट्ठति, तं पढमाए पढमं भागं जाव [पण्णरसमं भागं, चरमे समए] चंदे विरत्ते भवइ, अवसेसे समए चंदे रत्ते विरत्ते य भवइ। (सूर्यप्र. २०–१०५, पृ. २८८)। २. तत्र यः सदैव चन्द्रविमानस्याधस्तात् सञ्चरति स ध्रुवराहुः। (सूर्यप्र. मलय. चू. २०–१०५)।

ध्रुवराहु कृष्णपक्ष में प्रतिपदा के दिन चन्द्र के पन्द्रहवें भाग को आच्छादित करता है; इस क्रम से वह प्रतिदिन एक एक भाग को आच्छादित करता है। इस प्रकार अन्तिम समय (अमावस्या) में चन्द्र रक्त (पूर्णतया आच्छादित) रहता है, शेष दिनों में वह कुछ आच्छादित और कुछ प्रगट रहता है। यही क्रम शुक्ल पक्ष में उसके छोड़ने का समझना चाहिए। यही ध्रुवराहु कहलाता है।

ध्रुवसत्ताक—ध्रुवं सत् सत्ता यासां ता ध्रुवसत्ताकाः। (पंचसं. मलय. वृ. सं. क. ५१, पृ. ५६)। जिन प्रकृतियों की सत्ता सत्त्वव्युच्छित्ति के होने तक नियम से पाई जाती है उन्हें ध्रुवसत्ताक प्रकृतियां कहते हैं।

ध्रुवावग्रह—देखो ध्रुवप्रत्यय। सोऽयमित्यादि ध्रुवावग्रहः। (धव. पु. १, पृ. ३५७); णिच्चत्ताए गहणं धुवावग्गहो। (धव. पु. ६, पृ. २१)।

नित्यरूप से जो वस्तु का ग्रहण होता है वह ध्रुवावग्रह कहलाता है। जैसे—वह यही है, इत्यादि।

ध्रुवोदय—अव्वोच्छिण्णो उदओ जाणं पगईण ता धुवोदइया। (पंचसं. ३, १५६, पृ. ४८); जीवकर्मसम्बन्धादव्यवच्छिन्नो ऽनुसन्ततो यासामुदितकालं यावदुदयस्ता ध्रुवोदयाः, प्रतिनिवृत्तो न भवतीति भावः। (पंचसं. स्वो. वृ. ३, १५६, पृ. ४८)।

जिन प्रकृतियों का उदय उदित रहने के काल तक नष्ट नहीं होता है उन्हें ध्रुवोदयी प्रकृतियां कहते हैं।

ध्रौव्य—१. अनादिपारिणामिकस्वभावेन व्ययोदयाभावात् ध्रुवति स्थिरीभवतीति ध्रुवः, ध्रुवस्य भावः कर्म वा ध्रौव्यम्। (त. सि. ५-३०)। २. ध्रुवेः स्थैर्यकर्मणो ध्रुवतीति ध्रुवः। अनादिपारिणामिकस्वभावत्वेन व्ययोदयाभावात् ध्रुवति स्थिरीभवति इति ध्रुवः, ध्रुवस्य भावः कर्म वा ध्रौव्यम्, यथा पिण्ड-घटाद्यवस्थासु मृदाद्यन्वयात्। (त. वा. ५, ३०, ३)। ३. ध्रुवेः स्थैर्यकर्मणो ध्रुवतीति ध्रुवस्तस्य भावः कर्म वा ध्रौव्यम्। (त. श्लो. ५-३०)। ४. अनादिना स्वभावेन तद् ध्रौव्यं ब्रुवते जिनाः। (त. सा. ३-८)। ५. पूर्वोत्तरभावोच्छेदोत्पादयोरपि स्वजातेरपरित्यागो ध्रौव्यम्। (पंचा. का. अमृत. वृ. १०)। ६. कालत्रयानुयायित्वं यद्रूपं वस्तुनो भवेत्। तद् ध्रौव्यत्वमिति प्राहुर्वृषभाद्या: गणाधिपाः॥ (भावसं. वाम. ३७६)। ७. ध्रुवति स्थिरीसंपद्यते यः स ध्रुवः, तस्य भावः कर्म वा ध्रौव्यम्। (त. वृत्ति श्रुत. ५-३०)। ८. तद्भावाव्ययमिति वा ध्रौव्यं तत्रापि सम्यगयमर्थः। यः पूर्वं परिणामो भवति स पश्चात् स एव परिणामः॥ (पंचाध्या. १-२०४)। ९. वर्तमानं ध्रुवं प्रोक्तं ×××। (भोजप्र. १०)।

१ अनादि पारिणामिक स्वभाव की अपेक्षा व्यय और उत्पाद सम्भव न होने से जो द्रव्य की स्थिरता है उसका नाम ध्रौव्य है।

ध्वजमुद्रा—संहतोर्ध्वाङ्गुलिवामहस्तमूले वाङ्गुष्ठं तिर्यग्विधाय तर्जनीचालनेन ध्वजमुद्रा। (निर्वाणक. १६, पृ. ३२।१)।

बायें हाथ की अंगुलियों को मिला कर और उसके मूल में अंगूठे को तिरछा रखकर तर्जनी के चलाने से ध्वजमुद्रा होती है।

नकर—नकरं अकरदायिलोक ×××। (प्रश्नव्या. अभय. वृ. पृ. १७५)।

कर (टैक्स) नहीं देने वाले व्यक्ति को नकर कहते हैं।

नक्षत्रनाम—से किं तं णक्खत्तणामे ?, २ कित्तिआहि जाए कित्तिए कित्तिआदिण्णे कित्तिआधम्मे कित्तिआसम्मे कित्तिआदेवे कित्तिआदासे कित्तिआसेणे कित्तिआरक्खिए, रोहिणीहिं जाए रोहिणिए रोहिणिदिन्ने रोहिणिधम्मे रोहिणिसम्मे रोहिणिदेवे रोहिणिदासे रोहिणिसेणे रोहिणिरक्खिए य, एवं सव्वनक्खत्तेसु नामा भाणिअव्वा। एत्थ संगहणिगाहाओ—कित्तिअ-रोहिणि मिगसिर-अद्दा य पुणव्वसू अ पुस्से अ। तत्तो अ अस्सिलेस्सा महा उ दो फग्गुणीओ अ॥ हत्थो चित्ता साती विसाहा तह य होइ अणुराहा। जेट्ठा मूला पुव्वासाढा तह उत्तरा चेव॥ अभिई सवण धणिट्ठा सतभिसदा दो अ होंति भद्दवया। रेवई अस्सिणि भरणी एसा नक्खत्तपरिवाडी॥ (अनुयो. सू. १३०, पृ. १४५)।

कृत्तिका आदि किसी नक्षत्र के आश्रय से किसी के नाम की जो स्थापना की जाती है उसे नक्षत्रनाम कहा जाता है। जैसे—कृत्तिका में उत्पन्न होने वाले मास को कार्तिक और कृत्तिका से दिये गये को कृत्तिकादत्त कहा जाता है, इसी प्रकार कृत्तिकाधर्म, कृत्तिकाशर्म, कृत्तिकादेव, कृत्तिकादास, कृत्तिकासेन और कृत्तिकारक्षित आदि कृत्तिकाश्रित अन्य नामों को तथा रोहिणी आदि शेष अन्य नक्षत्रों के आश्रित नामों को भी जानना चाहिए।

नक्षत्रमास—१. नक्खत्तो खलु मासो सत्तावीसं भवे अहोरत्ता। अंसा य एक्कवीसा सत्तट्ठिकएण

क्षेपण ॥ (ज्योतिष्क. ३८)। २. नक्षत्रमासस्वरूपम्—सप्तविंशतिदिनान्येकविंशतिः सप्तषष्टिभागाः (२७$\frac{२१}{६७}$)। (त. भा. सिद्ध. वृ. ४–१५)। ३. अत्र पुनरेकोनितनक्षत्रपर्यायोग एको नक्षत्रमासः सप्तविंशत्यहोरात्रा एकविंशतिश्च सप्तषष्टिभागा अहोरात्रस्य। (सूर्यप्र. मलय. वृ. १०, २०, ५५)। ४. तत्र नक्षत्रेषु भवो नाक्षत्रः। किमुक्तं भवति? चन्द्रश्चारं चरन् यावता कालेनाभिजित आरभ्योत्तराषाढानक्षत्रपर्यन्तं गच्छति तत्प्रमाणो नाक्षत्रो मासः। यदि वा चन्द्रस्य नक्षत्रमण्डले परिवर्तनतानिष्पन्न इत्युपचारतो मासोऽपि नक्षत्रम्। (जम्बूद्वी. शा. वृ. ७–१५१, पृ. ४८६; व्यव. मलय. वृ. २–१५, पृ. ६)।

१ सत्ताईस दिन-रात और एक दिन के सड़सठ भागों में से इक्कीस भाग प्रमाण (२७$\frac{२१}{६७}$) एक नक्षत्रमास होता है। ४ चन्द्रमा के अभिजित् नक्षत्र से लेकर उत्तराषाढा नक्षत्र तक संचार या परिभ्रमण करने में जितना काल लगता है उसे नक्षत्रमास कहते हैं। अथवा चन्द्र की नक्षत्रमण्डल में परिवर्तनता से उत्पन्न मास को भी उपचार से नक्षत्र कहा जाता है।

नक्षत्रसंवत्सर—१. ता णक्खत्तसंवच्छरे णं दुवालसविहे पण्णत्ते। तं सावणे भद्दवए जाव आसाढे जं वा बहस्सतीमहग्गहे दुवालसहिं संवच्छरेहिं सव्वं णक्खत्तमंडलं समाणेति। (सूर्यप्र. १०, २०, ५५); समगं णक्खत्ता जोयं जोएंति समगं उऊ परिणमंति। णच्चुण्हं णाइसीए बहुउदए होइ णक्खत्ते ॥ (सूर्यप्र. १०, २०, ५८, गा. १, पृ. १७१)। २. णक्खत्तचंदजोगो बारसगुणिओ उ णक्खत्तो। (ज्योतिष्क. ३५)। ३. एवंविधद्वादशमासनिष्पन्नो नक्षत्रसंवत्सरः। स चायं त्रीणि शतान्यष्टौ सप्तविंशत्युत्तराण्येकपञ्चाशच्च सप्तषष्टिभागाः (३२७$\frac{५१}{६७}$)। (त. भा. सिद्ध. वृ. ४–१५)। ४. स च द्वादशगुणो नक्षत्रसंवत्सरः। (जम्बूद्वी. शा. वृ. २५१, पृ. ४८६)। ५. यावता कालेनाष्टाविंशत्यापि नक्षत्रैः सह क्रमेण योगपरिसमाप्तिस्तावान् कालविशेषो द्वादशभिर्गुणितो नक्षत्रसंवत्सरः। उक्तं च—णक्खत्तचंदजोगो बारसगुणिओ य णक्खत्तो। अत्र पुनरेकोनितनक्षत्रपर्यायोग एको नक्षत्रमासः, सप्तविंशतिरहोरात्रा एकविंशतिश्च सप्तषष्टिभाग अहोरात्रस्य। एष राशिर्यदा द्वादशभिर्गुण्यते तदा त्रीण्यहोरात्रशतानि सप्तविंशत्यधिकानि एकपञ्चाशच्च सप्तषष्टिभागा अहोरात्रस्य एतावत्प्रमाणो नक्षत्रसंवत्सरः। ××× इह एकः समस्तनक्षत्रयोगपर्यायो द्वादशभिर्गुणितो नक्षत्रसंवत्सरः। ततो ये नक्षत्रसंवत्सरस्य पूरका द्वादश समस्तनक्षत्रयोगपर्यायाः श्रावण-भाद्रपदादिनामानस्तेऽप्यवयवे समुदायोपचारात् नक्षत्रसंवत्सरः। ततः श्रावणादिभेदात् द्वादशविधो नक्षत्रसंवत्सरः। ××× किमुक्तं भवति—यावता कालेन बृहस्पतिनामा महाग्रहो योगमधिकृत्याभिजिदादीन्यष्टाविंशतिमपि नक्षत्राणि परिसमापयति तावान् कालविशेषो द्वादशवर्षप्रमाणो नक्षत्रसंवत्सरः। (सूर्यप्र. मलय. वृ. १०, २०, ५४–५५); यस्मिन् संवत्सरे समकं समकमेव एककालमेव, ऋतुभिः सहेति गम्यते, नक्षत्राणि उत्तराषाढाप्रभृतीनि योगं युञ्जन्ति—चन्द्रेण सह योगं युञ्जन्ति चन्द्रेण सह योग युञ्जन्ति सन्ति तां पौर्णमासीं परिसमापयन्ति तथा समकमेव एककालमेव तया तया परिसमाप्यमानया पौर्णमास्या सह ऋतवो निदाघाद्याः परिणमन्ति या परिसमाप्तिमुपयन्ति, इयमत्र भावना—यस्मिन् संवत्सरे नक्षत्रैर्मासिसवृत्तनामकैस्तस्य तस्य ऋतोः पर्यन्तवर्ती मासः परिसमाप्यते, तेषु च तां तां पौर्णमासीं परिसमापयत्सु तया तया पौर्णमास्या सह ऋतवोऽपि निदाघादिकाः परिसमाप्तिमुपयन्ति। यथा उत्तराषाढानक्षत्रं आषाढीं पौर्णमासीं परिसमापयति तया आषाढपौर्णमास्या सह निदाघोऽपि ऋतुः परिसमाप्तिमुपैति, स नक्षत्रसंवत्सरः, नक्षत्रानुरोधेन तस्य तथा तथा परिणममानत्वात्, एतेन च लक्षणद्वयमभिहितं द्रष्टव्यं, तथा न विद्यतेऽतिशयेन उष्णम् उष्णरूपः परितापो यस्मिन् स नात्युष्णः, तथा न विद्यतेऽतिशयेन शीतं यत्र स नातिशीतो बहु उदकं यत्र स बहूदकः एवंरूपैः पञ्चभिः समयैर्लक्षणैरुपेतो भवति नक्षत्रसंवत्सरः। (सूर्यप्र. मलय. वृ. १०, २०, ५७, पृ. १७२)।

१ श्रावण-भादों आदि बारह मासों का एक नक्षत्रसंवत्सर होता है। अथवा बृहस्पति महाग्रह बारह वर्षों में जो समस्त नक्षत्रमण्डल को समाप्त करता

है उतने काल का नाम नक्षत्रसंवत्सर है। ३ बारह नक्षत्रमासों को अर्थात् तीन सौ सत्ताईस अहोरात्र और एक अहोरात्र के सड़सठ भागों में से इक्यावन भाग प्रमाण काल को ($३२७\frac{५१}{६७}$) नक्षत्रसंवत्सर कहते हैं।

नखसंस्कार—१. निर्वर्तन-विलेखन-घर्षण-रंजनादिको नखसंस्कारः। (भ. आ. विजयो. ९३)। २. लेखन-कर्तन-घर्षण-रंजनादिको नखसंस्कारः। (भ. आ. मूला. ९३)।

२ नखों के लिखने, काटने, घिसने और रंगने आदि को नखसंस्कार कहते हैं।

नगर—१. चतुर्गोपुरान्वितं नगरम्। (धव. पु. १३, पृ. ३३४)। २. चतुर्भिर्गोपुरैर्भासुरं नगरम्। (नि. सा. वृ. ५८)।

१ चार गोपुरों से युक्त पुर को नगर कहते हैं।

नग्न—यः सर्वसङ्गसंत्यक्तः स नग्नः परिकीर्तितः। (उपासका. ८६०)।

जो सर्व प्रकार के परिग्रह से रहित हो उसे नग्न (दिगम्बर मुनि) कहते हैं।

नन्दा—पूर्वपक्षीकृतपरदर्शनानि निराकृत्य स्वपक्षस्थापिका व्याख्या नन्दा। (धव. पु. ९, पृ. २५२)।

अन्य दर्शनों को पूर्व पक्ष के रूप में उपस्थित करके उनका निराकरण करते हुए अपने पक्ष को स्थापित करने वाली व्याख्या को नन्दा कहते हैं।

नन्द्यावर्धन—सुनाभिर्नन्द्यावर्धनः। (निर्वाणक. ४, पृ. ८)।

जिस शंख की नाभि सुन्दर हो उसे नन्द्यावर्धन कहते हैं। यह आठ शंखभेदों में चौथा है।

नन्दी—महाकुक्षीर्नन्दी। (निर्वाणक. ४, पृ. ८)।

जिसका उदर या मध्य भाग बड़ा हो उस शंख को नन्दी कहते हैं। यह आठ शंखभेदों में तीसरा है।

नपुंसक— १. चारित्रमोहविकल्पनोकषायभेदस्य नपुंसकवेदस्याशुभनाम्नश्चोदयान्न स्त्रियो न पुमांस इति नपुंसकानि भवन्ति। (स. सि. २–५०); नपुंसकवेदोदयात्तदुभयशक्तिविकलं नपुंसकम्। (स. सि. २–५२); यदुदयान्नपुंसकान् भावानुपव्रजति स नपुंसकवेदः। (स. सि. ८–९; त. वृत्ति श्रुत. ८–९)। २. णेवित्थी ण य पुरिसो णउंसओ उहयलिंगवदिरित्तो। इट्ठावग्गिसमाणो वेदणगरुओ कलुसचित्तो॥ (प्रा. पंचसं. १–१०७; धव. पु. १, पृ. ३४२ उद्.; गो. जी. २७५)। ३. नपुंसकवेदाशुभवेदोदयान्नपुंसकानि। चारित्रमोहविकल्पनोकषायभेदस्य नपुंसकवेदस्याशुभनाम्नश्चोदयान्न स्त्रियो न पुमांस इति नपुंसकानि। (त. वा. २, ५०, ४); नपुंसकवेदोदयात् तदुभयशक्तिविकलं नपुंसकम्। (त. वा. २, ५२, १); यत्कर्मोदयात् नपुंसकान् भावानुपव्रजति स नपुंसकवेदः। (त. वा. ८, ९, ४)। ४. तदुभयात्यये नपुंसकम्। (अधीय. स्वो. विव. ४७)। ५. नपुंसकस्य तु नपुंसकवेदोदयादुभयाभिलाषः। (आ. प्र. टी. १८)। ६. न स्त्री न पुमान् नपुंसकमुभयाभिलाष इति। (धव. पु. १, पृ. ३४१); जेसिमुदएण इट्ठावागग्गिसारिच्छेण दोसु वि आकंखा उप्पज्जइ तेसिं णउंसयवेदो त्ति सण्णा। (धव. पु. ६, पृ. ४७); णपुंसयवेदोदएण णवुंसयवेदो होदि। (धव. पु. ७, पृ. ७९); जस्स कम्मस्स उदएण इत्थि-पुरिसेसु अहिलासो उप्पज्जदि तं कम्मं णपुंसयवेदो णाम। (धव. पु. १३, पृ. ३६१)। ७. न स्त्री न पुरुषः पापो द्वयरूपो नपुंसकः। (पंचसं. अमित. १९५, पृ. २६); सुष्ठु क्लिष्टमनोवृत्तिर्द्वयाकांक्षी नपुंसकः। नरप्रजावतीरूपो दुःसहाधिकवेदनः। (पंचसं. अमित. २०१, पृ. २६)। ८. तदुभयात्यये स्त्यान-प्रसवनोभयाभावे नपुंसकम्। (न्यायकु. २–४७, पृ. ६४८)। ९. इत्थी-पुरिसाणुवरि जस्सिह उदएण राग उप्पज्जे। नगरमहादाहसमो सो उ विवागो अपुमवेए॥ (कर्मवि. ग. ५३)। १०. येषां च पुद्गलस्कन्धानामुदयेनेष्टकाग्निसदृशेन द्वयोराकांक्षा जायते तेषां नपुंसकवेद इति संज्ञा। (मूला. वृ. १२–१९२)। ११. नपुंसकवेदं नपुंसकभावप्राप्तिनिमित्तोदयकषायवेदनीयविशेषं क्षपयति। (भ. आ. मूला. २०९७)। १२. यदुदयेन पण्डकस्य स्त्री-पुंसयोरुभयोरभिलाषः पित्तश्लेष्मणोरुदयेन मञ्जिकाभिलाषवत् स महानगरदाहाग्निसमानो नपुंसकवेदः। (कर्मस्त. गो. वृ. १०, पृ. ८४; धर्मसं. मलय. वृ. ६१५)। १३. उभयोरप्यभिलाषो नपुंसकभेदः। (जीवाजी. मलय. वृ. १३, पृ. १८)। १४. नपुंसकस्य वेदो नपुंसकवेदः। नपुंसकस्य स्त्रियं पुरुषं च प्रत्यभिलाष इत्यर्थः, तद्विपाकवेद्यं कर्मापि नपुंसकवेदः। (प्रज्ञाप. मलय. वृ. २३–२९३, पृ. ४९३)।

१ चारित्रमोह के विकल्परूप नोकषाय के भेदभूत

नपुंसकवेद और अशुभ नामकर्म के उदय से जो न स्त्री होते हैं और न पुरुष भी, वे नपुंसक कहे जाते हैं। ××× जिसके उदय से जीव नपुंसक के भावों को प्राप्त होता है उसे नपुंसकवेद (नोकषाय-भेद) कहते हैं। ९ जिसके उदय से स्त्री और पुरुष के ऊपर नगर के महादाह के समान राग उत्पन्न होता है उसे नपुंसकवेद जानना चाहिए।

नपुंसकवेद—देखो नपुंसक।

नभ—देखो आकाश। भायणं सव्वदव्वाणं नहं ओगाहलक्खणं॥ (उत्तरा. २८–९)।

जो सब द्रव्यों का भाजन (आधार) है व जिसका अवकाश देना स्वभाव है उसे नभ (आकाश) कहते हैं।

नभोनिमित्त—रवि-ससि-गहपहुदीणं उदयत्थमणादिभाइ दट्ठूणं। खीणत्तं दुक्ख-सुहं जं जाणइ तं हि णहणिमित्तं॥ (ति. प. ४–१००३)।

सूर्य, चन्द्र और ग्रह आदि के उदय और अस्तमन आदि को देखकर क्षीणता और सुख-दुःखादि के जान लेने को नभोनिमित्त कहते हैं।

नभोयान—नभसि गगने हेममयाम्भोजोपरि यानं नभोयानम्। (आ. मी. वृ. १)।

आकाश में सुवर्णमय कमल के ऊपर गमन करने को नभोयान कहते हैं।

नम—नम इति नैपातिकं पदं द्रव्य-भावसंकोचार्थम्, आह च—नेदाइयं पयं दव्व-भावसंकोयणपयत्थो।

नमः—कर-चरण-मस्तकसुप्रणिधानरूपो नमस्कारो भवत्वित्यर्थः। (अम्बूद्वी. शा. वृ. १, पृ. १०)।

'नम' यह निपात से निष्पन्न पद है, इसका अर्थ है द्रव्य और भाव का संकोच। अभिप्राय यह है कि हाथ, पैर और मस्तक की साधुमानता को या उनके शुभ व्यापार को नम (नमस्कार) कहा जाता है।

नमस्कार—१. पंचहिं मुट्ठीहिं जिणिंदचलणे सुनिवदणं णमंसणं। (धव. पु. ८, पृ. ९२)। २. अर्हदादिगुणानुरागवतः आत्मनो वाक्कायक्रियास्तवनशिरोवनतिरूपो नमस्कारः। (भ. आ. विजयो. ७५३)।

१ पाँच मुट्ठियों (अंगों) से जिनेन्द्र के चरणों में पड़ने का नाम नमंसण (नमस्यन) या नमस्कार है। २ अरहंत आदि के गुणों में अनुराग रखने वाला जीव जो स्तुति और सिर झुकाने रूप अपने वचन और काय की क्रिया को करता है, इसे नमस्कार कहा जाता है।

नमस्कृतिमुद्रा—संलग्नौ दक्षिणाङ्गुष्ठाक्रान्तवामाङ्गुष्ठपाणीति नमस्कृतिमुद्रा। (निर्वाणक. १६. ९, ७, पृ. ३३)।

दाहिने अंगूठे से आक्रान्त बायें अंगूठे से युक्त संलग्न दोनों हाथों की जो अवस्था होती है, इसे नमस्कृतिमुद्रा कहते हैं।

नमस्यन—देखो नमस्कार।

नमि—परीषहोपसर्गादिनामनाद् नमिः, तथा गर्भस्थे भगवति परचक्रनृपैरपि प्रणतिः कृतेति नमिः। (योगशा. हेम. पृ. ३–१४२)।

परीसह व उपसर्ग आदि के नमाने के कारण तथा शत्रु राजाओं के द्वारा भी नमस्कार किये जाने के कारण इक्कीसवें तीर्थंकर 'नमि' कहलाये।

नय—१. गुणोऽपरो मुख्यनियामहेतुर्नयः×××। स्वयम्भू. ५२); नयास्तव स्यात्पदसत्यलाञ्छिता रसोपविद्धा इव लोहधातवः। (स्वयम्भू. ६५)। २. सधर्मणैव साध्यस्य साधर्म्यादविरोधतः। स्याद्वादप्रविभक्तार्थविशेषव्यंजको नयः। (आ. मी. १०६)। ३. वस्तुन्यनेकान्तात्मनि अविरोधेन हेत्वर्पणात् साध्यविशेषस्य याथात्म्यप्रापणप्रवणप्रयोगो नयः। (स. सि. १–३३)। ४. नयाः प्रापकाः कारकाः साधका निर्वर्तका निर्भासका उपलम्भका व्यञ्जका इत्यनर्थान्तरम्। जीवादीन् पदार्थान् नयन्ति प्राप्नुवन्ति कारयन्ति साधयन्ति निर्वर्तयन्ति निर्भासयन्ति उपलम्भयन्ति व्यञ्जयन्तीति नयाः। (त. भा. १–३५, पृ. १२०–२१)। ५. नायम्मि गिण्हियव्वे अगिण्हियव्वम्मि चेव अत्थम्मि। जइयव्वमेव इइ जो उवएसो सो नओ नाम॥ (आव. नि. १०६६; दशवै. नि. १४९)। ६. णीञ् प्रापणे, तस्य नय इति रूपम्, वक्तैव शुभार्थप्रापणे गम्ये परोपयोगान्नयति नयः, नीयते वानेन अस्मिन् वेति नयनं वा नयः, वस्तुनः पर्यायाणां संभवतोऽधिगमनमित्यर्थः। (उत्तरा. चू. पृ. ९); नयाः कारका दीपकाः व्यञ्जका भावकाः उपलम्भका इत्यर्थः, विविधैः प्रकारैरर्थविशेषान् स्वेन स्वेनाभिप्रायेण नयन्तीति नयाः। (उत्तरा. चू. पृ. ४७)। ७. एकदेशविशिष्टोऽर्थो नयस्य विषयो मतः। (न्यायाव.

२६)। ८. ज्ञातृणामभिसन्धयः खलु नयाः ×× ×। (सिद्धवि. १०-१); ××× नयो ज्ञातुर्मतं मतः। (सिद्धवि. १०-२)। ६. भेदाभेदात्मके ज्ञेये भेदाभेदाभिसन्धयः। ये ते ऽपेक्षानपेक्षाभ्यां लक्ष्यन्ते नय-दुर्नयाः॥ (लघीय. ३०); नयो ज्ञातुरभिप्रायः। (लघीय. स्वो. वि. ३०); तदपेक्षो (षट्कारकापेक्षो) नयः। (लघीय. स्वो. वि. ४८); नयो ज्ञातुरभिप्रायो युक्तितोऽर्थपरिग्रहः। (लघीय. ५२; प्रमाणसं. ८७); ××× नयो विकलसंकथा। (लघीय. ६२); श्रुतभेदा नयाः सप्त नैगमादिप्रभेदतः। द्रव्य-पर्यायमूलास्ते द्रव्यमेकान्वयानुगम्॥ (लघीय. ६६); सापेक्षो नयः। (लघीय. स्वो. वि. ७१); तदर्थांशपरीक्षाप्रवणोऽभिसन्धिर्नयः (लघीय. स्वो. वि. ७४)। १०. अवयवविषया नयाः। (त. भा. १, ६, ३); सम्यगेकान्तो नयः। (त. भा. १, ६, ७); प्रमाणप्रकाशितार्थविशेषप्ररूपको नयः। (त. भा. १, ३३, १)। ११. तस्य (अर्थतत्त्वस्य) विशेषो नित्यत्वादिः पृथक् पृथक्, तस्य प्रतिपादको नयः। तथा चोक्तम्—अर्थस्यानेकरूपस्य धीः प्रमाणं तदंशधीः। नयो धर्मान्तरापेक्षी ××× ॥ (अष्टश. १०६); उक्तलक्षणो (स्याद्वादप्रविभक्तार्थव्यञ्जको) द्रव्य-पर्यायस्थानः संग्रहादिर्नयः। (अष्टश. १०७)। १२. नयनं नीयते वा ऽनेनादस्मादस्मिन्निति वा नयः, वस्तुनः पर्यायाणां संभवतोऽधिगम इत्यर्थः। (आव. नि. हरि. वृ. ७६, पृ. ५४); नयन्तीति नयाः, वस्त्ववबोधगोचरं प्रापयन्त्यनेकधर्मात्मकज्ञेयाध्यवसायान्तरहेतवः इत्यर्थः। (आव. नि. हरि. वृ. ७५४, पृ. २८२)। १३. नयनं नयः, नीयते ऽनेनास्मिन्नस्मादिति वा नयः अनन्तधर्मात्मकस्य वस्तुन एकांशपरिच्छेद इत्यर्थः। (अनुयो. हरि. वृ. पृ. २७); नीतयो नयाः अनन्तधर्मात्मकस्य वस्तुन एकांशपरिच्छित्तयः। (अनुयो. हरि वृ. पृ. ६६) वस्तुनोऽनेकधर्मिणः एकेन धर्मेण नयनं नयः। (अनुयो. हरि. वृ. पृ. १०५)। १४. प्रमाणपरिगृहीतार्थैकदेशे वस्त्वध्यवसायो नयः। (धव. पु. १, पृ. ८३; पु. ६, पृ. १६३; जयध. १, पृ. ६६ व १६६); ज्ञातुरभिप्राय इत्यस्य कोऽर्थः। प्रमाणपरिगृहीतार्थैकदेशवस्त्वध्यवसाय अभिप्रायः। युक्तितः प्रमाणात् अर्थपरिग्रहः द्रव्य-पर्याययोरन्यतरस्य अर्थ इति परिग्रहो वा नयः, प्रमाणेन परिच्छिन्नस्य वस्तुनः द्रव्ये पर्याये वा वस्त्वध्यवसायो नय इति यावत्। (धव. पु. ६, पृ. १६२-६३); प्रमाणपरिच्छिन्नवस्तुनः एकदेशे वस्तुत्वार्पणा नयः। (धव. पु. ६, पृ. १६४)। प्रमाणपरिगृहीतवस्तुनि यो व्यवहार एकान्तरूपः स नयनिबन्धनः ××× तथा पूज्यपादभट्टारकैरप्यभाणि सामान्यनयलक्षणमिदमेव। तद्यथा—प्रमाणप्रकाशितार्थविशेषप्ररूपको नयः इति। ××× तथा प्रभाचन्द्रभट्टारकैरप्यभाणि—प्रमाणव्यपाश्रयतत्परिणामविकल्पवशीकृतार्थविशेषप्ररूपणप्रवणः प्रणिधिर्यः स नय इति। ××× सारसंग्रहेऽप्युक्तं पूज्यपादैः—अनन्तपर्यायात्मकस्य वस्तुनोऽन्यतमपर्यायाधिगमे कर्तव्ये जात्यहेत्वपेक्षो निरवद्यप्रयोगो नय इति। (धव. पु. ६, पृ. १६५-६७); आत्रिकामुत्रिकफलप्राप्त्युपायो नयः। (धव. पु १३, पृ. २८७)। १५. अनन्तपर्यायात्मकस्य वस्तुनोऽन्यतमपर्यायाधिगमे कर्तव्ये जात्ययुक्त्यपेक्षो निरवद्यप्रयोगो नयः इति। अयं वाक्यनयः सारसंग्रहीयः। प्रमाणप्रकाशितार्थविशेषप्ररूपको नयः। अयं वाक्यनयः तत्त्वार्थभाष्यगतः। ××× प्रमाणव्यपाश्रयपरिणामविकल्पवशीकृतार्थविशेषप्ररूपणप्रवणः प्रणिधिर्यः स नय इति। अयं वाक्यनयः प्रभाचन्द्रीयः। (जयध. १, पृ. २१०)। १६. नयो ऽनेकात्मनि द्रव्ये नियतैकात्मसंग्रहः। (ह. पु. ५८-३६)। १७. स्वार्थनिश्चायकत्वेन प्रमाणं नय इत्यसत्। स्वार्थैकदेशनिर्णीतिलक्षणो हि नयः स्मृतः। (त. श्लो. १, ६, ४); ××× सामान्यादेशतस्तावदेक एव नयः स्थितः। स्याद्वादप्रविभक्तार्थविशेषव्यंजनात्मकः॥ (त. श्लो. १, ३३, २); नीयते गम्यते येन श्रुतार्थांशो नयो हि सः। (त. श्लो. १, ३३, ६)। १८. अनन्तधर्मात्मकस्य वस्तुनोऽन्यतमधर्मपरिच्छेदस्तदविनाभाविधर्मबलप्रसूतो नयः। (भ. आ. विजयो. ५)। १६. नयन्तीति नयाः कारकाः व्यञ्जका इति ××× ये ह्यनेकधर्मात्मकं वस्त्वेकेन धर्मेण निरूपयन्ति एतावदेवेदं नित्यमनित्यं वेत्यादिविकल्पयुक्तं ते नयाः नैगमादयः। ××× नयास्तु एकांशावलम्बिनः, यत्तु ज्ञानमनेकधर्मात्मकं सद्वस्तु एकधर्मावधारणेनावच्छिनत्त्येवमात्मकमेवैतदिति तन्नया इति कथ्यन्ते। (त. भा. सिद्ध. वृ. १-६)। २०. लोयाणं ववहारं धम्मविवक्खाइ जो पसाहेदि। सुयणाणस्स वियप्पो

सो वि णओ लिंगसंभूदो ॥ (कार्तिके. २६३)। २१. जं णाणीण वियप्पं सुयभेयं वत्थुयंससंगहणं। तं इह णयं पउत्तं णाणी पुण तेहि णाणेहि ॥ (नयच. २; द्रव्यस्व. १७४)। २२. प्रमाणेन वस्तुसंगृहीतार्थैकांशो नयः, नानास्वभावेभ्यो व्यावृत्यैकस्मिन् स्वभावे वस्तु नयति प्रापयतीति वा नयः। (आलाप. पृ. १४५)। २३. वस्तुनो ऽनन्तधर्मस्य प्रमाणव्यञ्जितात्मनः। एकदेशस्य नेता यः स नयोऽनेकधा मतः ॥ (त. सा. १–३७)। २४. नय इति प्रमाणगृहीतैकदेशार्थ[व्य]वसायाभिप्रायः। (सिद्धि. वि. वृ. १०–३)। २५. नयस्तु विकलसंकथा—वस्त्वेकदेशकथनम्। (न्यायकु. ६२, पृ. ६८८)। २६. तत्राऽनिराकृतप्रतिपक्षो वस्त्वंशग्राही ज्ञातुरभिप्रायो नयः। (प्र. क. मा. ६–७४)। २७. स्याद्वादप्रविवेचितार्थैकदेशप्रतिपत्त्रभिप्रायो नयः। (न्यायवि. वृ. ३–६१)। २८. नयनं—अनन्तधर्मात्मकस्य वस्तुनो नियतैकधर्मावलम्बनेन प्रतीतौ प्रापणं नयः। × × × नयनं नयः। अनन्तधर्मणोऽर्थस्यैकांशेनेति निरुक्तयः ॥ (उत्तरा. नि. शा. वृ. २८, पृ. ११); नयति—अनेकांशात्मकं वस्त्वेकांशावलम्बनेन प्रतीतिपथमारोपयति, नीयते वा तेन तस्मिंस्ततो वा, नयनं वा नयः, प्रमाणप्रवृत्युत्तरकालभावी परामर्श इत्यर्थः। उक्तं च—स नयइ तेण तहिं वा ततोऽहवा वत्थुणो व जं णयणं। बहुहा पज्जायाणं संभवओ सो णतो णामं ॥ (उत्तरा. सू. शा. वृ. ४८, पृ. ६७,। २९. नयनं नयः, नीयतेऽनेनास्मिन्नस्मादिति वा नयः—अनन्तधर्मात्मकस्य वस्तुनः एकांशपरिच्छेद इत्यर्थः। (स्थाना. सू. अभय. वृ. १, पृ. ४); नयन्ति परिच्छिन्दन्त्यनेकधर्मात्मकं सद्वस्तु सा(अन)वधारणतयैकेन धर्मेणेति नयाः। (स्थाना. सू. अभय. वृ. ३, ३, १८६, पृ. १५२)। ३०. नीयते येन श्रुताख्यप्रमाणविषयीकृतस्यार्थस्यांशस्तदितरांशौदासीन्यतः स प्रतिपत्तुरभिप्रायविशेषो नयः। (प्र. न. त. ७–१)। ३१. नीयते गम्यते श्रुतपरिच्छिन्नार्थैकदेशोऽनेनेति नयः। (स्या. र. १–१, पृ. ८)। ३२. नयनं नयो नीयते परिच्छिद्यते अनेनास्मिन्नस्मादिति वा नयः, सर्वत्रानन्तधर्माध्यासिते वस्त्वेकांशग्राहको बोध इत्यर्थः। (अनुयो. मल. हेम. वृ. ५६, पृ. ४५); अनन्तधर्मणो वस्तुन एकांशेन नयनं नयः। (अनुयो. हेम. वृ. १४५, पृ. २२३)। ३३. नयः प्रमाणपरिगृहीतार्थैकदेशे वस्त्वध्यवसायः। (आ. मी. वसु. वृ. २६); जातियुक्तिनिबन्धनो वितर्को नयः। (आ. मी. वसु. वृ. १०१); एकधर्मप्रतिपत्तिर्नयः। (आ. मी. वसु. वृ. १०६)। ३४. श्रुतनिरूपितैकदेशाध्यवसायो नयः। (मूला. वृ. ६–६७)। ३५. अर्थैकवचनमतन्त्रम्, तेनांशावंशा वा येन परामर्शविशेषेण श्रुतप्रमाणप्रतिपन्नवस्तुनो विषयीक्रियन्ते तदितरांशौदासीन्यापेक्षया स नयो ऽभिधीयते। (रत्नाकरा. ७–१, पृ. १)। ३६. नयो नाम प्रतिनियतैकवस्त्वंशविषयो ऽभिप्रायविशेषः। यदाहुः समन्तभद्रादयः—नयो ज्ञातुरभिप्राय इति। (सूर्यप्र. मलय. वृ. १–७, पृ. ३६)। ३७. नयनं नीयते वा अनेनेति नयः—वस्तुनो वाच्यस्य पर्यायाणां सम्भवतांऽधिगमः। (आव. नि. मलय. वृ. ७६, पृ. ६०); अनेकधर्मकं वस्त्ववधारणपूर्वकमेकेन नित्यत्वाद्यन्यतमेन धर्मेण प्रतिपाद्यस्य बुद्धि नीयते प्राप्यते येनाभिप्रायविशेषेण स ज्ञातुरभिप्रायविशेषो नयः। आह च—एगेण वत्थुणोऽणेगधम्मुणो जमवधारणेण (दट्ठेण)। नयणं धम्मेण णओ होइ तओ सत्तहा सो य ॥ (आव. नि. मलय. वृ. ७५४, पृ. ३६६; प्रव. सारो. वृ. ८४७); ज्ञेये प्रमाणपरिच्छेद्ये वस्तुनि ये भेदाभेदाभिसन्धयः सामान्य-विशेषविषयाः पुरुषाभिप्रायाः अपेक्षानपेक्षाभ्यां लक्ष्यन्ते ते यथासंख्यं नय-दुर्नया ज्ञातव्याः। किमुक्तं भवति ? विशेषाकांक्षः सामान्यग्राहको वा अभिप्रायः सामान्यसापेक्षो विशेषग्राहको वा नयः। [लघीयस्त्रयस्य ३०तमायाः कारिकायाः इयं व्याख्या]। (आव. नि. मलय. वृ. ७५४, पृ. ३७०)। ३८. अनन्तधर्मात्मकस्य वस्तुनो अन्यतमधर्मपरिच्छेदस्तदविनाभाविधर्मपरिच्छेदबलप्रसूतो नयः। (भ. आ. मूला. ५)। ३९. नयनं वस्तुनो विवक्षितधर्मप्रापणं नयः। (लघीय. अभय. वृ. ६२, पृ. ८४)। ४०. प्रमाणगृहीतार्थैकदेशग्राही प्रमातुरभिप्रायविशेषो नयः। (न्यायदी. पृ. १२५)। ४१. जीवादौ अनेकान्तात्मनि अनेकरूपिणि वस्तुनि अविरोधेन प्रतीत्यऽनतिक्रमेण हेत्वर्पणात् द्रव्य-पर्यायाद्यर्पणात् साध्यविशेषयाथात्म्यप्रापणप्रवणप्रयोगो नयः उच्यते। अस्यायमर्थः—साध्यविशेषस्य नित्यत्वानित्यत्वादेः याथात्म्यप्रापणप्रवणप्रयोगो यथावस्थितस्वरूपेण प्रदर्शनसमर्थव्यापारो नयः। (त.

वृत्ति सूत्र. १–३३)। ४२. इत्युक्तलक्षणोऽस्मिन् विरुद्धधर्मद्वयात्मके तत्त्वे। तत्राप्यन्यतरस्य स्याविह धर्मस्य वाचकश्च यः॥ (पंचाध्या. १–५०४)। ४३. नयनं नीयते ऽनेनास्मिन्नस्मादिति वा नयः— अनन्तधर्मात्मकस्य वस्तुन एकांशपरिच्छेदः एकेनैव धर्मेण पुरस्कृतेन वस्त्वङ्गीकार इत्यर्थः। (अम्बूद्वी. ज्ञा. वृ. पृ. ५)।

२ सधर्मा दृष्टान्त के साथ ही साधर्म्य होने से जो बिना किसी प्रकार के विरोध के स्याद्वाद रूप परमागम में विभक्त अर्थ (साध्य) विशेष का व्यंजक (गमक) होता है उसे नय कहते हैं। 'नीयते साध्यते गम्यार्थोऽनेनेति नयो हेतुः' इस निरुक्ति के अनुसार प्रकृत नय शब्द यहां हेतु का नामान्तर है। ३ अनेक धर्मात्मक वस्तु के विषय में विरोध के बिना हेतु की मुख्यता से साध्यविशेष की यथार्थता के प्राप्त कराने में समर्थ जो प्रयोग होता है उसे नय कहा जाता है। ४ नय प्रापक, कारक, साधक, निर्वर्तक, निर्भासक, उपलम्भक और व्यंजक ये सब समानार्थक शब्द हैं। तदनुसार जो जीवादि पदार्थों को प्राप्त कराते हैं, कराते हैं, साधते हैं अथवा प्रकाशित करते हैं उन्हें नय समझना चाहिए। ८ ज्ञाता जनों के जो अभिप्राय हुआ करते हैं उनका नाम नय है। १४ प्रमाण से परिगृहीत वस्तु के एक देश में जो वस्तु का निश्चय होता है वह नय कहलाता है।

नयगति—से किं तं णयगती ? २ जण्णं णेगम-संगह-ववहार-उज्जुसुय-सद्द-समभिरूढ-एवंभूयाणं जा गती अहवा सव्वणया वि जं इच्छंति से तं नयगती। (प्रज्ञाप. १६–२०५, पृ. ३२७)।

नैगमादि नयों की गति को नयगति कहते हैं। अथवा सभी नय जो स्वीकार करते हैं, इसका नाम नयगति है।

नयनक्रिया—स्वयं नयनक्रिया अन्यैर्वाऽऽनायनं स्वच्छन्दन्तो नयनक्रिया। (त. भा. सिद्ध. वृ. १–६)।

स्वयं ले जाना या स्वच्छन्दतापूर्वक दूसरों से लेजाना; यह नयनक्रिया कहलाती है।

नयप्रमाण—नीतयो नयाः अनन्तधर्मात्मकस्य वस्तुन एकांशपरिच्छित्तयः तद्विषया वा ते एव वा प्रमाणं नयप्रमाणम्, नयसमुदायात्मकत्वाद्धि स्याद्वादस्य समुदाय-समुदायिनोः कथंचिदभेदेन नया एव प्रमाणं नयप्रमाणम्। (अनुयो. हरि. वृ. पृ. ९९)।

अनन्त धर्मस्वरूप वस्तु के एक अंश के ग्रहण करने वाले ज्ञानों, उनके विषयों अथवा उन नयों को ही नयप्रमाण कहा जाता है। कारण यह कि प्रमाणभूत स्याद्वाद नयों के समुदाय रूप है, अतः समुदाय और समुदायी में कथंचित् अभेद होने से नयों को प्रमाण कहना विरुद्ध नहीं है।

नयवाद—स (नयः) उच्यते कथ्यते अनेनेति नयवादः सिद्धान्तः। (धव. पु. १३, पृ. २८७)।

नय के प्ररूपक सिद्धान्त को नयवाद कहा जाता है।

नयविधि—नया नैगमादयः, ते विधीयन्ते निरूप्यन्ते सदसदादिरूपेणास्मिन्निति नयविधिः। अथवा नैगमादिनयैः विधीयन्ते जीवादयः पदार्था अस्मिन्निति नयविधिः। (धव. पु. १३, पृ. २८४)।

सत् असत् आदि रूप से जहां नैगमादि नयों का निरूपण किया जाता है उसे नयविधि कहते हैं, अथवा जहां नैगमादि नयों के आश्रय से जीवादि पदार्थों का विधान किया जाता है वह नयविधि कहलाती है।

नयसप्तभङ्गी—विकलादेशस्वभावा हि नयसप्तभङ्गी वस्त्वंशमात्रप्ररूपकत्वात्। (प्र. क. मा. ६, ७४, पृ. ६८२)।

विकलादेश स्वभाववाली सप्तभंगी वस्तु के केवल एक अंश की प्ररूपणा करने के कारण नयसप्तभंगी कहलाती है।

नयान्तरविधि—नयान्तराणि नैगमादिसप्तशतनयभेदाः। ते विधीयन्ते निरूप्यन्ते विषयसाङ्कर्यनिराकरणद्वारेण अस्मिन्निति नयान्तरविधिः श्रुतज्ञानम्। (धव. पु. १३, पृ. २८४)।

विषयसांकर्य का निराकरण करते हुए जहां सात सौ नयभेदों की प्ररूपणा की जाती है उसे नयान्तरविधि कहा जाता है।

नयाभास—१. पुनर्नैगमादयो निरपेक्षा परस्परेण ते नयाभासाः इति। (त. भा. सिद्ध. वृ. १–७)। २. निराकृतप्रतिपक्षस्तु नयाभासः। (प्र. क. मा. ६–७४, पृ. ६७६)। ३. स्वाभिप्रेतादंशादितरांशापलापी पुनर्नयाभासः। (प्र. न. त. ७–२)। ४. नयाभासो नयप्रतिबिम्बात्मा, दुर्नय इत्यर्थः।

यथा लौकिकानां 'नित्यानित्याद्येकान्तप्रदर्शकं सकलं वाक्यम्। (रत्नाकरा. ७–२, पृ. ५)।

१ परस्पर की अपेक्षा से रहित नैगमादि नयों को नयाभास कहा जाता है। २ प्रतिपक्ष का निराकरण करने वाले नय को नयाभास कहते हैं।

नयुत—चतुरशीतिनयुताङ्गशतसहस्राणि एकं नयुतम्। (जीवाजी. मलय. वृ. १७८, पृ. ३४५)।

चौरासी लाख नयुतांगों का एक नयुत होता है।

नयुताङ्ग—चतुरशीतिः प्रयुतशतसहस्राणि एकं नयुताङ्गम्। (जीवाजी. मलय. वृ. १७८, पृ. ३४५)।

चौरासी लाख प्रयुतों का एक नयुतांग होता है।

नर— १. धर्मार्थ-काम-मोक्षकार्यकरणान्नरः। धर्मार्थ-काम-मोक्षलक्षणानि कार्याणि नृणन्ति नयन्तीति नराः। (त. वा. २, ५०, १)। २. 'नृ नये' नृणन्ति तथाविधद्रव्य-क्षेत्रादिसामग्रीमवाप्य स्वर्गापवर्गादिहेतुसम्यग्नय-विनयपरा भवन्तीत्यधि नरा मनुष्याः। (संग्रहणी. दे. वृ. १, पृ. ३)।

१ जो धर्म, अर्थ, काम और मोक्षरूप कार्यों को ले जाते हैं—उनकी आराधना करते हैं—वे नर कहलाते हैं। २ उस प्रकार की द्रव्य-क्षेत्रादिरूप सामग्री को पाकर जो स्वर्ग-मोक्ष आदि के कारणों में समुद्यत होते हैं उन्हें नर या मनुष्य कहते हैं।

नरक—१. नरान् कायन्तीति नरकाणि। शीतोष्णासद्वेद्योदयापादितवेदनया नरान् कायन्ति शब्दायन्त इति नरकाणि, नृणन्तीति वा। अथवा पापकृतः प्राणिनः आत्यन्तिकं दुःखं नृणन्ति नयन्तीति नरकाणि। (त. वा. २, ५०, २–३)। २. नरान् प्राणिनः कायति पातयति खलीकरोति इति नरकः कर्म। (धव. पु. १, पृ. २०१)। ३. को नरकः? परवशता। (रत्नमा. १३)।

१ असातावेदनीय कर्म के उदय से प्राप्त हुई शीत व उष्ण आदि की वेदना से जो नरों को—जीवों को—शब्द कराते हैं—चिल्लाते हैं वे नरक कहलाते हैं। अथवा जो पाप करने वाले प्राणियों को अतिशय दुःख को प्राप्त कराते हैं उन्हें नरक कहा जाता है।

नरकगति नामकर्म—१. यन्निमित्त आत्मनो नारको भावस्तन्नरकगतिनाम। (स. सि. ८–११; त. वा. ८, ११, १)। २. यस्या उदयः सकलाशुभकर्मणामुदयस्य सहकारिकारणं भवति सा नरकगतिः। (धव. पु. १, पृ. २०१; अस्स कम्मस्स उदएण णिरयभावो जीवाणं होदि तं कम्मं णिरयगदि त्ति उच्चदि। (धव. पु. ६, पृ. ६७); जं णिरय-तिरिक्ख-मणुस्स-देवाणं णिव्वत्तयं कम्मं तं गदिणामं (जं णिरयभावणिव्वत्तयं कम्मं तं णिरयगदिणामं)। (धव पु. १३, पृ. ३६३)। ३. जीए उदएण जीवो णेरइयो होइ नरयपुढवीए। सा भणिया नरयगई सेसगईओवि एमेव ॥ (कर्मवि. ग. ८५)। ४. नारकशब्दव्यपदेश्यपर्यायनिबन्धनं नरकगतिनाम। (कर्मस्त. गो. वृ. १०, पृ. १७)। ५. नरकस्य गतिर्नरकगतिरात्मनो नारकभावनिमित्तं नामकर्मविशेषः। (भ. आ. मूला. २०९५)। ६. यन्निमित्तमात्मनो नारकपर्यायः तन्नरकगतिनाम। (गो. क. जी. प्र. ३३)। ७. यदुदयाज्जीवो नारकशरीरनिष्पत्तिको भवति तन्नरकगतिनाम। (त वृत्ति श्रुत. ८–११)।

१ जिस कर्म के निमित्त से जीव के नारकभाव—नारक पर्याय—प्राप्त होती है उसे नरकगति नामकर्म कहते हैं।

नरकगतिप्रायोग्यानुपूर्व्यनाम—१. यदा छिन्नायुर्मनुष्यस्तिर्यग्वा पूर्वेण शरीरेण वियुज्यते तदैव नरकभवं प्रत्यभिमुखस्य तस्य पूर्वशरीरसंस्थानानिवृत्तिकारणं विग्रहगतावुदेति तन्नरकगतिप्रायोग्यानुपूर्व्यनाम। (त. वा. ८, ११, ११)। २. अस्स कम्मस्स उदएण णिरयगइं गयस्स जीवस्स विग्गहगईए वट्टमाणस्स णिरयगइपाओग्गसंठाणं होदि तं णिरयगइपाओग्गाणुपुव्वीणाम। (धव. पु. ६, पृ. ७६)। ३. नरयाउअस्स उदए नरए वक्केण गच्छमाणस्स। नरयाणुपुव्वियाए तहिं उदओ अन्नहिं नत्थि ॥ (कर्मवि. ग. १२२)। ४. यस्य कर्मस्कन्धस्योदयेन नरकगतिं गतस्य जीवस्य विग्रहगतौ वर्तमानस्य नरकगतिप्रायोग्यसंस्थानं भवति तन्नरकगतिप्रायोग्यानुपूर्व्यं नाम। (मूला. वृ. १२–१६४)। ५. यदुत्पूर्वशरीराकारम् अविनाश्य जीवेन सह नरकादि यावदेव डोलापकवद् गच्छति तत् (आनुपूर्व्यं नाम) नरकादिगतिप्रायोग्यानुपूर्व्यादिभेदाच्चतुर्विधम्। (भ. आ. मूला. २०९५)।

१ जो मनुष्य अथवा तिर्यंच आयु के क्षीण हो जाने से पूर्व शरीर को छोड़कर नारक पर्याय के अभिमुख होता है उसके पूर्व शरीर के आकार के बने

रहने का कारणभूत जो कर्म विग्रहगति में उदय को प्राप्त होता है उसे नरकगतिप्रायोग्यानुपूर्व्यनामकर्म कहते हैं। ३ नारक आयु का उदय होने पर मोड़ लेकर नरक में जाते हुए जीव के वहां (मोड़ वाली विग्रहगति में) नरकानुपूर्वी का उदय होता है, अन्यत्र (ऋजुगति में) उसका उदय नहीं होता।

नरकायु—जं नेरइयं नारयभवम्मि तहि धरइ उव्विगंतंपि। जाणसु तं निरयाउं हडिसरिसो तस्स उ विवागो॥ (कर्मवि. ग. ६४)।

जो कर्म नारकी जीव को उद्विग्न होने पर भी नारक पर्याय में धारण करता है—उसे वहां रोककर रखता है—उसे नरकायु कहते हैं। उसका विपाक काठ की बेड़ी से समान है।

नरत—देखो नारक। द्रव्य-क्षेत्र-काल-भावेष्वन्योन्येषु च निरताः नरताः। ×××उक्तं च—ण रमंति जदो णिच्चं दव्वे खेत्ते य काल-भावे य। अण्णोण्णेहि जम्हा तम्हा ते णारया भणिया॥ (धव. पु. १, पृ. २०२)।

जो द्रव्य, क्षेत्र, काल और भाव तथा परस्पर में भी रत (प्रीतियुक्त) नहीं होते हैं वे नरत (नारकी) कहे जाते हैं।

नरतगति—देखो नारकगति। तेषां (नरतानां) गतिर्नरतगतिः। (धव. पु. १. पृ. २०२)।

नरतों (नारकियों) की गति को नरतगति कहते हैं।

नरदेव—से केणट्ठेणं भंते एवं वुच्चइ नरदेवा? गोयमा जे इमे रायाणो चाउरंतचक्कवट्टी उप्पण्णसम्मत्त चक्करयणपहाणा णवणिहिपइणो समिद्धकोसा बत्तीसंरायवरसहस्साणुयातमग्गा सागरवरमेहलाहिपतिणो मणुस्सिंदा, से तेणट्ठेणं जाव नरदेवा। (व्याख्याप्र. १२, ६, २, पृ. १७६४–६५)।

जो चातुरन्त चक्रवर्ती होकर सम्यक्त्व से सहित, चक्ररत्न के स्वामी, नौ निधियों के अधिपति, वृद्धिगत कोश (खजाना) से सहित, बत्तीस हजार राजाओं से अनुगत और समुद्र पर्यन्त पृथिवी के पति होते हैं; उन मनुष्यश्रेष्ठों को नरदेव कहा जाता है।

नर्तक—गीताङ्गपटप्रावरणेन नृत्यवृत्त्याजीवी नर्तको नाटकाभिनयरङ्गनर्तको वा। (नीतिवा. १४–१२३, पृ. १७३)।

गीत के योग्य शरीर की वेषभूषा के साथ जो नृत्यवृत्ति से आजीविका चलाता है, अथवा नाटक की रंगभूमि में नृत्य करता है उसे नर्तक कहते हैं।

नलिन—१. ××× तं पि गुणिदव्वं। चउसीदिलक्खवासे णलिणं णामं वियाणाहि॥ (ति. प. ४–२९७)। २. पूर्वं चतुरशीतिघ्नं पर्वाङ्गं परिभाष्यते। पूर्वाङ्गताडितं तत्तु पर्वाङ्गं पर्वमिष्यते॥ गुणाकारविधिः सोऽयं योजनीयो यथाक्रमम्। उत्तरेष्वपि संख्यानविकल्पेषु निराकुलम्॥ ××× नलिनाङ्गमतोऽपि च॥ नलिनं कमलाङ्गं च ××। (म. पु. ३, ३१९–२४)। ३. चतुरशीतिनलिनाङ्गशतसहस्राणि एकं नलिनम्। (जीवाजी. मलय. वृ. ३, २, १७८; ज्योतिष्क. मलय. वृ. ६६)।

१ चौरासी लाख वर्षों से गुणित नलिनांग प्रमाण एक नलिन होता है। ३ चौरासी लाख नलिनांगों का एक नलिन होता है।

नलिनाङ्ग—१. पउमं चउसीदिहदं णलिणंगं होदि ×××॥ (ति. प. ४–२९७)। २. तत्तो महालयाणं चुलसीइ चेव सयसहस्साणि। नलिणंगं नाम भवे ××× ॥ (ज्योतिष्क ६५)। ३. चतुरशीतिः पद्मशतसहस्राणि एकं नलिनाङ्गम्। (जीवाजी. मलय. वृ. ३, २, १७८)। ४. महालतारूपसंख्यास्थानादूर्ध्वं महालतानां चतुरशीतिशतसहस्राणि नलिनाङ्ग नाम संख्यास्थानं भवति। (ज्योतिष्क. मलय. वृ. ६५)।

१ चौरासी से गुणित पद्म प्रमाण एक नलिनांग होता है। २ चौरासी लाख महालता प्रमाण एक नलिनाङ्ग होता है।

नवमी प्रतिमा—नवमासान् प्रेष्यैरप्यारम्भं न कारयतीति नवमी। (योगशा. स्वो. विव. ३-१४८, पृ. २७२)।

नौवीं प्रतिमा का धारक वह श्रावक होता है जो स्वयं तो आरम्भ करता ही नहीं, पर साथ ही सेवकों से भी नौ महीने आरम्भ नहीं कराता है।

नागकुमार—१. शिरोमुखेष्वधिकप्रतिरूपाः कृष्णाः श्यामा मृदुललितगतयः शिरस्सु फणिचिह्ना नागकुमाराः। (त. भा. ४–११)। २. फणोपलक्षिताः नागाः। (धव. पु. १३, पृ. ३९१)। ३. नागकुमारा भूषणनियुक्तनागस्फटारूपचिह्नधराः। (जीवा-

जी. मज्झ. वृ. ३, १, ११७)। ४. नागकुमाराः शिरोमुखेष्वधिकरूपशोभाः श्वेततरुचयो ललिततनवः। (संग्रहणी दे. वृ. १७)। ५. नगेषु पर्वतेषु चन्दनादिषु वृक्षेषु वा भवा नागाः ×××ते च ते कुमारा नागकुमाराः। (त. वृ. श्रुत. ४–१०)।

१ जो देव शिर व मुख में अधिक सुन्दर, वर्ण से कृष्ण, श्याम, कोमल व शोभायमान गति से सहित और शिर में सर्प के चिह्न से युक्त होते हैं वे नागकुमार कहलाते हैं। ५ जो नगों (पर्वतों) या चन्दनादि वृक्षों पर होते हैं उन्हें नागकुमार कहा जाता है।

नाग्न्यपरीषहजय — देखो अचेलपरीषहजय। १. जातरूपवन्निष्कलंकजातरूपधारणमशक्यप्रार्थनीयं याचन रक्षण-हिंसनादिदोषविनिर्मुक्तं निष्परिग्रहत्वान्निर्वाणप्राप्ति प्रत्येकं साधनमनन्यबाधनं नाग्न्यं बिभ्रतो मनोविक्रियाविप्लुतिविरहात् स्त्रीरूपाण्यत्यन्ताशुचिकुणपरूपेण भावयतो रात्रिदिवं ब्रह्मचर्यमखण्डमातिष्ठमानस्याचेलव्रतधारणमनवद्यमवगन्तव्यम्। (स. सि. ९–९)। २. जातरूपधारणं नाग्न्यम्। गुप्ति-समित्यविरोधिपरिग्रहनिवृत्ति-परिपूर्णब्रह्मचर्यमप्राथिकमोक्षसाधनचारित्रानुष्ठानं यथाजातरूपम् असंस्कृतमविकारं मिथ्यादर्शनाविष्टविद्विष्टं परममांगल्यं नाग्न्यमभ्युपगतस्य स्त्रीरूपाणि नित्याशुचि-बीभत्स-कुणपभावेन पश्यतो वैराग्यभावनावरुद्धमनोविक्रियस्याऽसंभावितमनुष्यत्वस्य नाग्न्यदोषासंस्पर्शनात् परिषहजयसिद्धिरिति जातरूपधारणमुत्तमं श्रेयःप्राप्तिकारणमित्युच्यते। (त. वा. ९, ९, १०)। ३. वासोऽशुभं न वा मेऽस्ति नेच्छेत् तत्साध्वसाधु वा। लाभालाभविचित्रत्वं जानन्नाग्न्येन विप्लुतः॥ (आव. नि. हरि. पृ. ९१८, पृ. ४०३)। ४. जातरूपधारणं नाग्न्यसहनम्। (त. श्लो. ९–९; का. सा. पृ. ५१)। ५. नाग्न्यपरीषहस्तु न निरूपकरणतैव दिगम्बरभौतादिवत्। किं तर्हि? प्रवचनोक्तविधानेन नाग्न्यम्। प्रवचने तु ×××। (त. भा. सिद्ध. वृ. ९-९)। ७. भूषावेषविकारशस्त्रनिचयत्यागात् प्रशस्ताकृतेर्बालस्येव मनोज्ञजातविकृतिश्चित्तस्य लज्जेति ताम्। हित्वा मातृसमानमेव सकलं कान्ताजनं पश्यतः पूज्यो नाग्न्यपरीषहस्य विजयस्तस्वज्ञतापोदयः॥ (आचा. सा. ७-२०)। ६. निर्ग्रन्थनिर्मूषणविश्वपूज्यनाग्न्यव्रतो दोषयितुं प्रवृत्तः। चित्तं निमित्ते प्रबलेऽपि यो न स्मृष्येत दोर्बीजितनग्न्यरुक् सः॥ (अन. ध. ६–९४)। ८. नाग्न्यं नाम जात्यसुवर्णवदकलङ्कम्, परं विषयिभिरशक्यैः शेषविकारवद्भिश्च कर्तुं न शक्यते। तद्धरतां परप्रार्थनं न भवति। नाग्न्यं हि नाम याचनावश-जन्तुघातादिदोषरहितमपरिग्रहत्वात् मुक्तिप्राप्तिहेतीयकारणं परेषां बाधाया अकारकम्। यो मुनिस्तन्नाग्न्यं बिभर्ति तस्य मनसि विकृतिर्नोत्पद्यते, स्त्रीरूपमतीवाप्रविभक्तं मृतकरूपसमानमहर्निशं भावयति। ब्रह्मचर्यमक्षुण्णं तस्य भवति। एवमचेलव्रतधारणं नाग्न्यं निष्पापं ज्ञातव्यम्। (त. वृत्ति श्रुत. ९–९)।

१ नग्नता (निर्वस्त्रता) का धारण करना उत्पन्न हुए बालक की नग्नता के समान निर्दोष, अशक्यप्रार्थनीय—वस्त्रादि की याचना से रहित; याचना, रक्षण और हिंसा आदि दोषों से रहित; परिग्रह से रहित होने के कारण निर्वाणप्राप्ति का प्रमुख हेतु तथा अन्य बाधाओं से रहित है। इस नग्नता का धारक साधु मानसिक विकार से रहित होता हुआ स्त्रियों के रूपों को निर्जीव शरीर (शव) के समान अपवित्र देखता है। इस प्रकार से वह रात-दिन अखण्ड ब्रह्मचर्य का परिपालन करता हुआ निर्दोष अचेलव्रत को धारण करता है— नाग्न्यपरीषह को जीतता है।

नान्तरीयक—न अन्तरा भवतीति नान्तरीयकम्, अविनाभावीत्यर्थः। (सिद्धिवि. पृ. ४१, टि. १०)। जो जिसके बिना नहीं होता है वह उसका नान्तरीयक कहलाता है। जैसे—अग्नि के बिना न होने वाला धुआं उसका नान्तरीयक या अविनाभावी है।

नाभ्यधोनिर्गम—१. नाभ्यधो निर्गमनं नाभेरधो मस्तकं कृत्वा यदि निर्गमनं भवेत्। (मूला. वृ. ६–७७)। २. ××× निर्गमो नाभ्यधः शिरः॥ नाभ्यधोनिर्गमः ×××। (अन. ध. ५–४७, ४८)।

१ नाभि के नीचे मस्तक को करके यदि कहीं निकलना पड़ता है तो वह नाभ्यधोनिर्गम नाम का भोजन का अन्तराय माना जाता है।

नाम—१. नमयत्यात्मानं नम्यतेऽनेनेति वा नाम। (स. सि. ८–४)। २. गति-जात्यादीन् नमयति—अभिमुखीकरोति संसारिणः प्रापयतीति नामोच्यते।

(त. भा. हरि. वृ. ८–१२)। ३. तथा गत्यादिशुभाशुभनामनाम्नामयतीति नाम। (आ. प्र. टी. ११)। ४. सांस्तानात्मभावान् नामयतीति नाम कर्मपुद्गलद्रव्यम्। (अनुयो. हरि. वृ. पृ. ६३)। ५. नाना मिनोति निर्वर्त्तयतीति नाम। जे पोग्गला शरीर-संठाण-संघडण-वण्ण-गंधादिकज्जकारया जीवणिबिट्ठा ते णामसण्णिदा होंति त्ति उत्तं होदि। (धव. पु. ६, पु. १३); णाणा मिणोदि त्ति णामं। (धव. पु. १३, पृ. २०६)। ६. नम्यतेऽनेन वाऽऽत्मानं नमयत्यपि नाम तत्॥ (हे. पु. ५८, २१७)। ७. नामयतीति नाम प्रह्वयत्यात्मानं गत्याद्यभिमुखमिति, नम्यते वा प्रह्वीक्रियतेऽनेनेति नाम। (त. भा. सिद्ध. वृ. ८–५); नमयति प्रापयति नारकादिभावान्तराणि जीवमिति नाम। अथवा जीवप्रदेशसम्बन्धिपुद्गलद्रव्यविपाकसामर्थ्याद् यथार्थसंज्ञा। नमयति प्रह्वयतीति नाम, यथा शुक्लादिगुणोपेतद्रव्येषु चित्रपटादिव्यपदेशप्रवृत्तिर्नियतसंज्ञाहेतुरिति। (त. भा. सिद्ध. वृ. ८–१२)। ८. ××× छट्ठं कम्मं तु भण्णए नामं। तं चित्तगरसमाणं जह होइ तहा निसामेह॥ जह चित्तयरो निउणो अणेगरूवाइं कुणइ रूवाइं। सोहणमसोहणाइं चोक्खाचोक्खेहिं वण्णेहिं॥ तह नामंपि य कम्मं अणेगरूवाइं कुणइ जीवस्स। सोहणमसोहणाइं इट्ठाणिट्ठाइं लोयस्स॥ गइयाइएसु जीवं नामइ भेएसु जं तओ नामं॥ (कर्मवि. ग. ६६–६९)। ९. नामयत्यधम-मध्योत्तमासु गतिषु प्राणिनं प्रह्वीकरोतीति नाम। (पंचसं. सं. स्वो. भ-१, पृ. ३३)। १०. तथा नामयति परिणमयत्यात्मानं तैस्तैर्गत्यादिभिः पर्यायैरिति नाम। (कर्मस्त. गो. वृ. १०, पृ. १७)। ११. तथा नामयति गत्यादिपर्यायानुभवनं प्रति प्रवणयति जीवमिति नाम। (प्रज्ञाप. मलय. वृ. २३–२८८, पृ. ४५४; कर्मसं. मलय. वृ. ६०८; प्रव. सारो. वृ. १२५०)। १२. गति-जात्यादिवैचित्र्यकारि चित्रकरोपमम्। नामकर्मविपाकोऽस्य शरीरेषु शरीरिणाम्। (त्रि. श. पु. च. २, ३, ४७१)।

१ जो जीव को नमाता है—गति आदि के प्रति नम्रीभूत करता है—उसे नामकर्म कहा जाता है। २ जो संसारी प्राणियों को गति-जाति आदि के अभिमुख करता है—उन्हें प्राप्त कराता है—वह नामकर्म कहलाता है।

नामकरण—१. तत्र च नामकरणं करणमिति नामैव, नाम्नो वा करणं नामकरणम्—प्रियङ्कर-शुभङ्करादिभिधानधानम्। यदि वा नामतःकरणं नामकरणं यत् पूज्यनामापेक्षया पूजादिविधानम्। (उत्तरा. नि. शा. वृ. १८३, पृ. १९४); इह नामकरणं करणमित्यभिधानमात्रम्। (उत्तरा. नि. शा. वृ. १८४)। २. नामकरणमिहाभिधानमात्रं 'करणम्' इत्यक्षरत्रयात्मकं परिगृह्यते, ××× यद्वा तदर्थविकले वस्तुनि सङ्केतमात्रतः करणमिति नाम क्रियते तन्नामकरणम्। (आव. भा. मलय. वृ. १५३, पृ. ५५८)।

१ 'करण' इस नाम मात्र को नामकरण कहा जाता है। अथवा प्रियंकर व शुभंकर आदि नामों के करने को नामकरण जानना चाहिए। पूज्य नाम की अपेक्षा पूजादि के विधान को भी नामकरण कहा जाता है।

नामकायोत्सर्ग—खर-परुषादिभावद्यनामकरणद्वारेणागतातीचारशोधनाय कायोत्सर्गो नाममात्रकायोत्सर्गो वा नामकायोत्सर्गः। (मूला. वृ. ७–१५१)। खर व परुष आदि सावद्य नाम करने के द्वारा लगे हुए दोषों के शोधन के लिए जो कायोत्सर्ग किया जाता है उसे अथवा नाममात्र कायोत्सर्ग को नामकायोत्सर्ग कहा जाता है।

नामकृति—जा सा णामकदी णाम सा जीवस्स वा अजीवस्स वा जीवाणं वा अजीवाणं वा जीवस्स च अजीवस्स च जीवस्स च अजीवाणं च जीवाणं च अजीवस्स च जीवाणं च अजीवाणं च जस्स णामं कीरदि कदित्ति सा णामकदी णाम। (ष. खं. ४, १, ५१—पु. ९, पृ. २४६)।

एक जीव, एक अजीव, बहुत जीव, बहुत अजीव, एक जीव एक अजीव, एक जीव बहुत अजीव, बहुत जीव एक अजीव तथा बहुत जीव बहुत अजीव; इन आठ में जिसका 'कृति' यह नाम किया जाता है उस सबको नामकृति कहा जाता है।

नामक्षेत्र—जीवाजीवुभयकारणनिरपेक्खो अप्पाणम्हि पयट्टो खेत्तसद्दो णामखेत्तं। (धव. पु. ४, पृ. ३)।

जीव, अजीव व उभय कारणों से निरपेक्ष अपने

आप में प्रयुक्त 'क्षेत्र' शब्द को नामक्षेत्र कहा जाता है।

नामचतुर्विंशति—तत्र नामचतुर्विंशतिः जीवस्य अजीवस्य वा यस्य चतुर्विंशतिरिति नाम क्रियते, चतुर्विंशत्यक्षरावली वा। (आव. नि. मलय. वृ. १०६८)।

जिस किसी चेतन या अचेतन पदार्थ का 'चतुर्विंशति' ऐसा नाम किया जाता है उसे अथवा 'चतुर्विंशति' इन अक्षरों की पंक्ति को नामचतुर्विंशति कहते हैं।

नामच्छेदना—सचित्त-अचित्तदव्वाणि अण्णेहिंतो पुध काऊण सण्णा जाणावेदि त्ति णामच्छेदणा। (धव. पु. १४, पृ. ४३५)।

सचित्त अचित्त द्रव्यों को दूसरों से अलग करके चूंकि संज्ञा जतलाती है, अतः उसे नामच्छेदना कहते हैं।

नामजिन—१. णामजिणा जिणणामा। (चैत्यवन्दनक भा. ५१)। २. जिणसद्दो णामजिणो। (धव. पु. ६, पृ. ६)।

१ जिन के नामों को नामजिन कहते हैं। २ 'जिन' शब्द को नामजिन कहा जाता है।

नामजीव—१. जीवनगुणमनपेक्ष्य यस्य कस्यचिन्नाम क्रियमाणं नामजीवः। (त. सि. १-५)। २. नाम संज्ञाकर्म इत्यनर्थान्तरम्। चेतनावतोऽचेतनस्य वा द्रव्यस्य जीव इति नाम क्रियते स नामजीवः। (त. भा. १-५)। ३. नाम्नैव जीवः, जीवशब्द इत्यर्थः। ××× तत्र यो जीव इति शब्दः प्रवर्तते स नामजीवः। ××× जीव इत्यय ध्वनिः तच्चेष्टाद्योऽर्थो नामतया नियुज्यते स नामजीव इति। 'सः' इत्यनेन तत्र चेतनावत्यचेतने वा यदृच्छया यो जीवशब्दो नियुक्तस्तं व्यपदिशति स शब्दो नामजीव इत्युच्यते। न तद्वस्तूपाधिक इति। (त. भा. हरि. वृ. १-५)। ४. नामैव जीवो नामजीवः योऽयं जीव इति ध्वनिः, अयं च यस्य कस्यचिद् वस्तुनो वाचकः स नामजीवोऽभिधीयते। ×××× स इत्यनेन चेतनावत्यचेतने वा यदृच्छया यो जीवशब्दो नियुक्तस्तं व्यपदिशति स शब्दो नामजीव इति। एतदुक्तं भवति— स एव शब्दो जीव इत्युच्यते तद्वस्तूपाधिक इति, अर्थाभिधान-प्रत्ययास्तुल्यनामधेया इति न्यायात्। (त. भा. सिद्ध. वृ. १-५, पृ. ४५-४६)। ५. जीवनगुणं विनापि यस्य कस्यचिज्जीवसंज्ञा विधीयते स नामजीवः। (त. वृत्ति श्रुत. १-५)।

१ जीवन गुण की अपेक्षा न करके जिस किसी पदार्थ का 'जीव' ऐसा नाम रखने को नामजीव कहते हैं। २ नाम और संज्ञाकर्म ये समानार्थक शब्द हैं। चेतन अथवा अचेतन द्रव्य का 'जीव' ऐसा जो नाम किया जाता है उसे नामजीव कहा जाता है।

नामदिक्—तत्र सचित्तादेर्द्रव्यस्य दिगित्यभिधानं नामदिक्। (आचारा. नि. शी. वृ. ४०, पृ. १२)।

सचित्त या अचित्त द्रव्य का 'दिक्' ऐसा नाम रखने को नामदिक् कहते हैं।

नामद्रव्य—१. यस्य जीवस्याजीवस्य वा नाम क्रियते द्रव्यमिति तन्नामद्रव्यम्। (त. भा. १-५)। २. नामद्रव्यं यस्य चेतनावतोऽचेतनस्य वा द्रव्यमिति नाम क्रियते। (त. भा. सिद्ध. वृ. १-५)।

१ जिस जीव या अजीव का 'द्रव्य' ऐसा नाम किया जाता है उसे नामद्रव्य कहते हैं।

नामधर्म—जीवस्साजीवस्स व अन्नत्थविवज्जियस्स जस्सेह। धम्मो णामं कीरइ स नामधम्मो तयक्खा वा॥ (धर्मसं. हरि. २८)।

धर्म के अन्वर्थ से रहित जिस किसी जीव या अजीव पदार्थ का 'धर्म' ऐसा नाम किया जाता है उसे नामधर्म कहते हैं। अथवा धर्म की संज्ञा (नाम) को ही नामधर्म जानना चाहिए।

नामनमस्कार—नामनमस्कारो यस्य कस्यचिन्नमस्कार इति कृता संज्ञा। (भ. आ. विजयो. ७५३)।

जिस किसी का 'नमस्कार' ऐसा जो नाम किया जाता है वह नामनमस्कार कहलाता है।

नामनिक्षेप—१. अतद्गुणे वस्तुनि संव्यवहारार्थं पुरुषाकारान्नियुज्यमानं संज्ञाकर्म नाम। (त. सि. १-५)। २. नाम संज्ञाकर्म इत्यनर्थान्तरम्। (त. भा. १-५)। ३. पज्जायाणभिधेयं ठिअमण्णत्थे तयत्थनिरवेक्खं। जाइच्छिअं च नामं जावदव्वं च पाएणं॥ (विशेषा. २५)। ४. यद्वस्तुनोऽभिधानं जाति-रूपादिपर्यायप्रभेदानुसरणस्वभावं तन्नाम, नमनं प्रह्वित्वमिति, वस्तु नमनात्—प्रतिवस्तु नमनात् भवनादित्यर्थः। (उत्तरा. चू. पृ. १०)। ५. नीयते गम्यतेऽनेनार्थः, नमति वाऽर्थमभिमुखी-

सुखप्रबोधा स्वापावस्था, नखच्छोटिकामात्रेणापि यत्र प्रबोधो भवति। तद्विपाकवेद्या कर्मप्रकृतिरपि निद्रेति कार्येण व्यपदिश्यते। (कर्मस्त. गो. वृ. १०, पृ. १४)। ११. सुखप्रबोधा स्वापावस्था निद्रा। (जीवाजी. मलय. वृ. ३, २, ८६)। १२. निसरां द्राति—कुत्सितत्वमविस्पष्टत्वं गच्छति चैतन्यमनयेति निद्रा, ×××सुखप्रबोधा स्वापावस्था, यत्र नखच्छोटिकामात्रेणापि पुंसः प्रबोधः संपद्यते। तद्विपाकवेद्या कर्मप्रकृतिरपि कारणे कार्योपचारात् निद्रा। (धर्मसं. मलय. वृ. ६१०)। १३. 'द्रा' कुत्सायाम्, निपतं द्राति कुत्सितत्वमविस्पष्टत्वं गच्छति चैतन्यं यस्यां स्वापावस्थायां सा निद्रा, यदि वा 'द्रै स्वप्ने' निद्राणं निद्रा नखच्छोटिकामात्रेण यस्यां प्रबोध उपजायते सा स्वापावस्था निद्रा, तद्विपाकवेद्या कर्मप्रकृतिरपि निद्रा, कारणे कार्योपचारात्। (प्रज्ञाप. मलय. वृ. २३–२६३, पृ. ४६७)। १४. दर्शनावरणीयकर्मोदयेन प्रत्यस्तमितज्ञानज्योतिरेव निद्रा। (नि. सा. वृ. ६)। १५. भुक्तान्नपरिणाम-मद-खेद-क्लमादेर्विनोदार्थो निद्रात्यदर्शनावरणकर्मविशेषविपाकनिमित्तो जीवस्यैन्द्रियात्ममनोमरुत्सूक्ष्मावस्थालक्षणः स्वापो निद्रा। (भ. आ. मूला. २०६४)। १६. का निद्रा मूढता जन्तोः। (प्रश्नो. मा. ११)। १७. यदुदयात् मद-खेद-क्लमव्यपनोदार्थं स्वापः तन्निद्रादर्शनावरणम्। (गो क. जी. प्र. टी. ३३)। १८. सर्वदोन्निद्रकेवलज्ञान-दर्शननेत्रपरमात्मपदार्थविलक्षणनिद्रादर्शनावरणकर्मोदयेन स्वापलक्षणा निद्रा। (आरा. सा. टी. २६, पृ. ३५–३६)। १९. मद-खेद-क्लमविनाशार्थं स्वपनं निद्रा। (त. वृत्ति श्रुत. ८–७)।

१ मद, खेद व थकावट को दूर करने के लिए जो शयन किया जाता है उसे निद्रा कहते हैं। ४ जिस स्वाप (शयन) में सुखपूर्वक जागरण होता है उसका नाम निद्रा है। १० जिसमें चेतनता कुत्सितपने या अस्पष्टता को प्राप्त होती है उस स्वाप अवस्था को निद्रा कहा जाता है। अथवा जिसमें नखच्छोटिका मात्र से सुखपूर्वक जागरण हो जाता है उसे निद्रा कहते हैं। इसका वेदन कराने वाली कर्मप्रकृति (निद्रादर्शनावरण) को भी निद्रा कहा जाता है।

निद्राद्विकस्य जघन्य स्थितिसंक्रम—१. निद्दादुगस्स साहियआवलियदुगं तु साहिए तंसे। (पंचसं. सं. क. ४८)। २. निद्राद्विकस्य निद्रा-प्रचलारूपस्य स्वसंक्रमान्ते स्वस्थितेरुपरितनी या एकसमयमात्रा स्थितिः सा 'अर्थांशे'—तस्य एव समयमात्रायाः स्थितेरनन्तरमवस्तन्यामावलिकाया अवस्तने त्रिभागे——साधिके—समयाधिके प्रक्षिप्यते स जघन्यः स्थितिसंक्रमः। इदमुक्तं भवति—क्षीणकषायवीतरागछद्मस्थो निद्राद्विकस्य द्वयोरावलिकयोस्तृतीयस्यादावलिकाया असंख्येयतमे भागे वर्तमानः सर्वोपरितनीं समयमात्रां स्थितिमपवर्तनाकरणेनावस्तन्यामावलिकायास्त्रिभागे समयाधिके यत्प्रक्षिप्यते स निद्राद्विकस्य जघन्यस्थितिसंक्रमः। (पंचसं. मलय. वृ. सं. क. ४८, पृ. ५०–५१)।

क्षीणकषाय-वीतराग-छद्मस्थ संयत निद्रा और प्रचला की दो आवली तथा तृतीय आवली के असंख्यातवें भाग में वर्तमान होता हुआ समय प्रबाध सब उपरिम स्थिति को अपवर्तनाकरण के द्वारा जो अवस्तन आवली के तृतीय भाग में प्रक्षिप्त करता है उसे निद्रा व प्रचला इन दोनों का जघन्य स्थितिसंक्रमण कहते हैं।

निद्रानिद्रा—१. तस्याः (निद्रायाः) उपर्युपरि वृत्तिर्निद्रानिद्रा। (स. सि. ८–७; मूला. वृ. १२, १८८; त. श्लो. ८–७)। २. मुखाग्रे वाथ रथ्यायां तथा जागरणेऽपि वा। निद्रानिद्राप्रभावेन न दृष्टधृग्घाटनं भवेत्॥ (वरांगच. ४–५०)। ३. उपर्युपरि तद्वृत्तिर्निद्रानिद्रा। तस्या निद्राया उपर्युपरि पुनः पुनर्वृत्तिः निद्रानिद्रा इत्युच्यते। (त. वा. ८, ७, ३)। ४. णिद्दाणिद्दाए तिव्वोदएण रुक्खगे विसमभूमीए अत्थ वा तत्थ वा देसे घोरंतो अघोरंतो वा णिब्भरं सोवदि। (ध. पु. ६, पृ. ३१); जिस्से पयडीए उदएण अइणिब्भरं सोवदि, अण्णेहि उट्ठाविज्जंतो वि ण उट्ठइ, स णिद्दाणिद्दा णाम। (ध. पु. १३, पृ. ३५४)। ५. उपर्युपरि तद्वृत्तिर्निद्रानिद्राभिधीयते। (ह. पु. ५८–२२७)। ६. बीया पुण णिद्दणिद्दा य॥ सा दुक्खबोहणीया ×××। (कर्मवि. ग. २२–२३)। ७. णिद्दाणिद्दुदयेण य ण दिट्ठिमुग्घादिदुं सक्को। (गो. क. २३)। ८. निद्रातोऽभिहितस्वरूपाया अतिशायिनी निद्रानिद्रा, शाकपार्थिवादिदर्शनात् 'मयूरव्यंसकादयः' इति मध्यमपदलोपी समासः, तस्या हि चैतन्य-

स्यात्यन्तमस्फुटीभूतत्वात् बहुभिर्बोधनाप्रकारैः प्रबोधो भवति, ततः सुखप्रबोधहेतुनिद्रातोऽस्या अतिशायिनीत्वम्, तद्विपाकवेद्या प्रकृतिरपि निद्रानिद्रा उपचारात्। (प्रज्ञाप. मलय. वृ. २३–२६३)। ६. निद्रातोऽभिहितस्वरूपाया अतिशायिनी निद्रा निद्रानिद्रा, × × × दुःखप्रबोधात्मिका स्वापावस्था। अस्यामस्फुटीभूतचैतन्यभावतो दुःखेन प्रभूतैर्बोधनादिभिः प्रबोधो जन्यत इति। (धर्मसं. मलय. वृ. ६१०)। १०. तथा निद्रातिशायिनी निद्रा निद्रानिद्रा, शाकपार्थिवादित्वान्मध्यमपदलोपी समासः, सा पुनर्दुःखप्रबोधा स्वापावस्था। तस्यां ह्यत्यर्थमस्फुटतरीभूतचैतन्यत्वाद् दुःखेन बहुभिर्बोधनादिभिः प्रबोधो भवति, अतः सुखप्रबोधनिद्रापेक्षयाऽस्या अतिशायिनीत्वम्। तद्विपाकवेद्या कर्मप्रकृतिः कार्यद्वारेण निद्रानिद्रेत्युच्यते। (कर्मस्त. गो. वृ. १०, पृ. १४)। ११. निद्राया उपरिउपरि वृत्तिर्निद्रानिद्रा निद्रानिद्रादर्शनावरणकर्मविशेषोदयजन्यश्चेतनस्य दुःखप्रतिबोधस्वापपरिणामः। उक्तं च—णिद्दाणिद्दा य दुक्खपडिबोहा। (भ. आ. मूला. २०६४)। १२. निद्रायाः पुनः पुनः प्रवृत्तिर्निद्रानिद्रा। (त. वृत्ति. श्रुत. ८–७)।

१ नींद के ऊपर जो बार-बार नींद आती है उसे निद्रानिद्रा कहा जाता है। २ निद्रानिद्रा के वशीभूत हुआ प्राणी वृक्ष के अग्र भाग पर व गली में भी सो जाता है, जागने पर भी आंखें नहीं खुलतीं। ३ निद्रानिद्रा के प्रभाव से प्राणी को नींद के ऊपर बार बार नींद आती है।

निधत्त—१. जं पदेसग्गं ण सक्कमुदए दादुं अण्णपयडिं वासंकामेदुं तं णिधत्त णाम। (ष. खं. पु. ६, पृ. २३५); जं पदेसग्गं णिधत्तीकयं उदए दादुं णो सक्कं, अण्णपयडिं संकामिदुं पि णो सक्कं, ओकड्डिदुमुक्कड्डिदुं च सक्कं; एवंविहस्स पदेसग्गस्स णिधत्तमिदि सण्णा। (ष. खं. पु. १६, पृ. ५१६); अणोकड्डिज्जदि, उक्कड्डिज्जदि, परपयडिं ण संकामिज्जदि उदए ण दिज्जदि पदेसग्गं तं णिधत्तं णाम। (ष. खं. पु. १६, पृ. ५७६)। २. उवट्टण-ओवट्टणावज्जकरणाणं अजोगत्तेण अवत्थावणं णिहत्तीकरणं। अहवा पुव्वपुट्ठस्स कम्मस्स तत्तसंमेलियलोहसलागासंबंधसरिसकिरिया णिहत्ती। (कर्मप्र. चू. २, पृ. १८)। ३. उदये संकममुदये चउसु वि दादुं कमेण जो सक्कं। उवसंतं च णिधत्तं णिकाचिदं होदि अं कम्मं। (अं कम्मं संकममुदए दादुं णो सक्कं तं णिधत्त होदि)। (गो. क. ४४०)। ४. निधत्तिरुदयोदीरणा-संक्रमकरणैस्त्रिभिः करणैरुदयमथाकर्तुं न शक्यते। (षडशी. हरि. वृ. ११, पृ. १५)। ५. उद्वर्तनापवर्तनावर्जशेषकरणायोग्यत्वेन व्यवस्थापनं निधत्तिः। (कर्मप्र. मलय. वृ. बं. क. २, पृ. १७)। ६. निधीयते उद्वर्तनापवर्तनावर्जशेषकरणायोग्यत्वेन व्यवस्थाप्यते यया सा निधत्तिः। (पंचसं. मलय. वृ. बं. क. १, पृ. २; कर्मप्र. यशो. वृ. बं. क. २, पृ. १८)। ७. यत् कर्म उदयावस्यां निक्षेप्तुं संक्रमयितुं चाशक्यं तन्निधत्तिनाम। (गो. क. जी. प्र. ४४०)।

१ जो कर्म का प्रदेशपिण्ड न तो उदय में दिया जा सके और न अन्य प्रकृतियों में संक्रान्त भी किया जा सके उसे निधत्त या निधत्ति कहा जाता है। २ उद्वर्तना और अपवर्तना करणों को छोड़कर शेष करणों के अयोग्य रूप से जो कर्म को व्यवस्थापित किया जाता है उसे निधत्तिकरण कहते हैं। **निधत्ति**—देखो निधत्त।

निन्दा—१. तथ्यस्य वा अतथ्यस्य वा दोषस्योद्भावनं प्रति इच्छा निन्दा। (त. वृ. ६–२५)। २. सचरित्तपच्छयाओ निन्दा × × ×। (आव. नि. १०६१)। ३. दोषोद्भावनेच्छा निन्दा। तथ्यस्य वा अतथ्यस्य वा दोषस्योद्भावन प्रतीच्छा मनःपरिणामोऽक्षेपो निन्दा। (त. भा. ६, २५, १)। ४. अन्यात्मसाक्षिकी निन्दा। (दशवै. सू. हरि. वृ. ४–२, पृ. १४४; स्थाना. अभय. वृ. ३, ३, १६८; योगशा. स्वो. विव. ३–८२; कार्तिके. टी. ३२६)। ५. दोषोद्भावनेच्छा निन्दा। (त. श्लो. ६–२५)। ६. सकलपरिग्रहत्यागो मुक्तेर्मार्गो मया तु पातकेन वस्त्र-पात्रादिकः परिग्रहः परीषहभीरुणा गृहीत इत्यन्तःसन्तापो निन्दा। (भ. आ. विजयो. ८७)। ७. कान्ता-पुत्र-भ्रातृ-मित्रादिहेतोः शिष्ट-दिष्टे निमित्ते कार्यजाते। पश्चात्तापो यो विरक्तस्य पुंसो निन्दा सोक्ताऽवद्यवृक्षस्य वात्री। (अमित. आ. २–७६)। ८. सचरित्रस्य सत्त्वस्य पश्चात्तापः स्वप्रत्यक्षं जुगुप्सा निन्दा। उक्तं च—आत्मसाक्षिकी निन्देति। (आव. मलय. वृ. १०६१)। ६. निन्दन—सर्वसंगत्यागो जिनोपज्ञ[ज्ञ]मुक्तिमार्गः, मया पुनः पापेन

परीषहभीरुणा वस्त्र-पात्रादिग्रन्थो गृहीत इत्यन्तःसन्तापकरणं निन्हा। (भ. आ. मूला. ८७)।

१ यथार्थ व अयथार्थ दोषों के प्रकट करने की जो इच्छा होती है उसे निन्हा कहा जाता है। २ चारित्रमूढ़ता जीव के जो अपने आप पश्चात्ताप होता है उसे निन्हा कहते हैं।

निबन्धन—निबध्यते तदस्मिन्निति निबन्धनम्। जं दव्वं जम्हि निबद्धं तं णिबंधणं। (ध. पु. १५, पृ. १)।

जो द्रव्य जिसमें सम्बद्ध है उसे निबन्धन कहते हैं।

निमग्ना—जियजलभरउयरिगदं दव्वं लहुगं पि णेदि हेट्ठम्मि। जेणं तेणं भण्णइ एसा सरिया णिमग्ग त्ति॥ (ति. प. ४–२३६; त्रि. सा. ५६५)।

अपने जलप्रवाह में पड़े हुए लघु (हलके) द्रव्य को भी जो नदी नीचे ले जाती है उसका नाम निमग्ना है।

निमंत्रण—१. ××× णिमंतणा होइऽगहिएण। (आव. नि. हरि. वृ. ६६७)। २. तथा निमंत्रणा भवत्यगृहीतेनानशनादिना अहं भवतोऽशनाद्यानयामीति। (आव. हरि. वृ. ६६७)। ३. निमंत्रणं अहं ते भक्तं लब्ध्वा दास्यामीति। उक्तं च—पुव्वगहिएण छंदण निमंतणा होइऽगहिएणं। (अनुयो हरि. वृ. पृ. ५८)।

२ 'मैं आपके लिए भोजन लाता हूं' इस प्रकार अगृहीत भोजन आदि के आश्रय से निमंत्रणा होती है।

निमित्त—१. तिविहं होइ निमित्तं, तीय पडुप्पन्नऽणागयं चेव। तेण न विणा उ नेयं नज्जइ तेणं निमित्तं तु॥ (बृहत्क. भा. १३१३)। २. अतीतभविष्यद्वर्तमानकालत्रयवर्तिलाभादिभावकथनं निमित्तं भवति। (आव. ह. वृ. मल. हेम. टि. पृ. ८३; प्रव. सारो. वृ. ११४)। ३. तीयाइभावकहणं होइ निमित्तं ××× । (प्रव. सारो. ११४)।

१ तीनों काल सम्बन्धी लाभ-अलाभ का कारणभूत निमित्तशास्त्र अतीतादि के भेद से तीन प्रकार का है। चूंकि ऐसे (चूडामणि आदि) शास्त्र के बिना लाभालाभादि का ज्ञान सम्भव नहीं है, अतः उनके जानने का निमित्त होने से उसे निमित्तशास्त्र कहा जाता है।

निमित्तकुशील—कश्चिन्निमित्तकुशीलः अष्टांगनिमित्तं ज्ञात्वा यो लोकस्यादेशं करोति स निमित्तकुशीलः। (भ. आ. विजयो. टी. १९५०)।

अष्टांग निमित्तको जानकर जो अन्य जनों को आदेश देता है उसे निमित्तकुशील कहते हैं।

निमित्तदोष—१. वंजणमंग च सर छिण्णं भूम च अंतरिक्ख च। लक्खण सुविणं च तहा अट्ठविहं होइ णेमित्त॥ (मूला. ६–३०)। २. अंग स्वरो व्यंजनं लक्षणं छिन्नं भौमं स्वप्नोऽन्तरिक्षमिति एवंभूतनिमित्तोपदेशेन लब्धा वसतिर्निमित्तदोषदुष्टा। (भ. आ. विजयो. २३०; कार्तिके. टी. ४४८–४६)। ३. निमित्तेन भिक्षामुत्पाद्य यदि भुंक्ते तदा तस्य निमित्तनामोत्पादनदोषः। (मूला. वृ. ६–३०)। ४. स्वरान्तरिक्ष-भौमांग-व्यंजन-च्छिन्नलक्षणम्। स्वप्नाष्टांगनिमित्तैर्यन्निमित्तमशनार्जनम्॥ (आचा. सा. ८–३६)। ५. अंगादिनिमित्तोपदेशाल्लब्धा निमित्तदुष्टा। (भ. आ. मूला. टी. २३०)। ६. स्वरान्तरिक्ष-भौमाङ्ग-व्यञ्जन-च्छिन्न-लक्षण-स्वप्नाष्टाङ्गनिमित्तैरशनार्जनं निमित्तम्। (भावप्रा. टी. ६६)।

१ व्यंजन, अंग, स्वर, छिन्न, भौम, अन्तरिक्ष, लक्षण और स्वप्न; यह आठ प्रकार का निमित्त है। इस निमित्त के द्वारा भिक्षा को उत्पन्न करके ग्रहण करना, यह निमित्तनामक उत्पादनदोष है। २ अंग, स्वर, व्यंजन, लक्षण, छिन्न, भौम, स्वप्न और अन्तरिक्ष इस प्रकार के निमित्त के उपदेश द्वारा जो वसतिका प्राप्त की जाती है वह निमित्तदोष से दुष्ट होती है।

निमित्तपिण्ड—१. निमित्तम् अङ्गुष्ठप्रश्नादि, तदवाप्तो निमित्तपिण्डः। (आचारा. शी. वृ. २७३, पृ. ३२०)। २. अतीतानागत-वर्तमानकालेषु लाभालाभादिकथनं निमित्तम्, तद् भिक्षार्थं कुर्वतो निमित्तपिण्डः। (योगशा. स्वो. विव. १–३८)।

१ अंगुष्ठप्रश्न आदि विद्याविशेष के निमित्त से भोजन प्राप्त करने पर निमित्तपिण्ड नामक दोष का भागी होता है। २ अतीत, अनागत और वर्तमान इन तीन कालविषयक लाभालाभादि के कहने का नाम निमित्त है। उसे भिक्षा का साधन बनाने से निमित्तपिण्ड नामका उत्पादनदोष होता है।

निमित्तशुद्धि—निमित्तशुद्धिः तत्कालोच्छ्वसितशङ्खपणवादिनिनादश्रवण - पूर्णकुम्भ-शृंगार-छत्र- ध्वज-

चामरादावलोकन-शुभगन्धाघ्राणादिस्वभावा। (त. वि. मू. पृ. ३-१४)।

उस समय उठते हुए शंख व ढोल आदि के शब्द को सुनना तथा जलपूर्ण कलश, शृंगार, छत्र, ध्वजा एवं चमर आदि को देखना और उत्तम गन्धादि का सूंघना; यह निमित्तशुद्धि का स्वरूप है।

निमित्तसम्यग्दर्शन—निमित्तं तु यद् यद् बाह्यं वस्तूत्पद्यमानस्य सम्यग्दर्शनस्य प्रतिमादि तत् तत् सर्वमाद्गृहीतम्, ततो निमित्तात् प्रतिमादिकात् सम्यक्त्वं निमित्तसम्यग्दर्शनमुच्यते। (त. भा. सिद्ध. मू. १-३, पृ. ४०)।

जो जो प्रतिमादिरूप वस्तु उत्पन्न होने वाले सम्यग्दर्शन का निमित्त होती है उसके निमित्त से उत्पन्न होने वाले उस सम्यग्दर्शन को निमित्तसम्यग्दर्शन कहा जाता है।

निमिष—१. नयनपुटघटनायत्तो निमिषः। (पंचा. अमृत. मू. २५)। २. नयनपुटविघटनेन व्यज्यमानः संख्यातीतसमयो निमिषः। (पंचा. जय. मू. २५)। ३. तादृशैरसंख्यातसमयैः निमिषः अथवा नयनपुटघटनायत्तो निमेषः। (नि. सा. मू. ३१)।

१ नेत्रपुटों की घटनाके अधीन काल को निमिष कहते हैं। अभिप्राय यह है कि आंखों के पलकों के मिलने में जितना समय लगता है उतने समय का नाम निमिष या निमेष है।

नियतिवाद—१. वत्थु जदा जेण जहा जस्स य णियमेण होदि तत्थु तदा। तेण तहा तस्स हवे इदि वादो णियदिवादो दु॥ (गो. क. ८८२)। २. जेण जदा जं तु जहा णियमेण य जस्स होइ तं तु तदा। तस्स तहा तेण हवे इदि वादो णियदिवादो दु॥ (अंगप. २-२२)।

१ जो जिस समय में, जिससे, जैसे और जिसके नियम से होता है वह उस समय, उसीके द्वारा, उसी प्रकार से और उसके होना ही; इस प्रकार के कथन को नियतिवाद कहते हैं।

नियम—१. णियमेण य जं कज्जं तण्णियमं णाण-दंसण-चरित्तं॥ (नि. सा. ३)। २. नियमः परिमितकालो ×××॥ (रत्नक. ८७)। ३. ××× × सावधिनियमः स्मृतः॥ (उपासका. ७६१)। ४. विहितावश्यकरणं निषिद्धपरिवर्जनं च नियमः। (नीतिवा. १-२१, पृ. १५)। ५. यः सहजपरमपारिणामिकभावस्थितः स्वभावानन्तचतुष्टयात्मकः शुद्धज्ञानचेतनापरिणामः स नियमः। (नि. सा. मू. ३)। ६. ××× नियमः कालसीमकृत्॥ (धर्मसं. श्रा. ७-१९)।

१ नियम से करने योग्य कार्य को नियम कहा जाता है। वह ज्ञान-दर्शन-चारित्रस्वरूप है। २ नियमित काल के लिए किये गये त्याग को नियम कहते हैं।

नियमनिषिद्ध—आवस्सयंमि जुत्तो नियमणिसिद्धोत्ति होइ नायव्वो। अहवाऽवि णिसिद्धप्पा णियमा आवस्सए जुत्तो॥ (आव. भा. १२२, पृ. २६७)।

मूल और उत्तर गुणों के अनुष्ठान स्वरूप आवश्यक में जो युक्त है उसे नियमनिषिद्ध—नियम से मूल व उत्तर गुणों के अतिचारों से रहित—जानना चाहिए। अथवा निषिद्धात्मा—उक्त अतिचारों से रहित जीव—उक्त लक्षण आवश्यक में युक्त होता ही है। इस प्रकार आवश्यकी और नैषेधिकी दोनों क्रियाओं को समानार्थक समझना चाहिए।

नियाग—नियागमित्यामन्त्रितस्य पिण्डस्य ग्रहणं नित्यम्, न त्वनामन्त्रितस्य। (दशवै. सू. हरि. वृ. ३-२, पृ. ११६)।

सदा आमंत्रित आहार को ही ग्रहण करना, अनामंत्रित को ग्रहण न करना; इसका नाम नियाग है। यह संयमी साधु का अनाचरित है।

नियोग—अहिगो जोगो निजोगो जहाहदाहो भवे निदाहो त्ति। अत्थनिउत्तं सुत्तं पसवइ चरणं जओ मुक्खो॥ (बृहत्क. १९४)।

'नि' का अर्थ अधिकता है। सूत्र के साथ अर्थ के अधिक योग को नियोग कहते हैं। अर्थ की अधिकता से नियुक्त सूत्र उस चरित्र को उत्पन्न करता है जिस के आश्रय से मुक्ति प्राप्त होती है।

नियंसण—१. पाडगणियंसणभिक्खापरिमाणं—इमम् एव पाटकं प्रविश्य लब्धां भिक्षां गृह्णामि, नान्यम्; एकमेव पाटकं पाटकद्वयमेवेति। अस्य गृहस्य परिकरतया अवस्थितां भूमिं प्रविशामि, न गृहमित्थमभिग्रहः णियसणमित्युच्यते इति केचिद् वदन्ति। अपरे तु पाटस्य भूमिमेव प्रविशामि, न पाटगृहाणि इति संकल्पः पाडगणियंसणमित्युच्यते इति कथयन्ति। (भ. आ. विजयो. टी. २१६)।

२. पाटकनियंत्रणपरिमाणम्—एकमेव पाटकं पाटकद्वयमेव वा प्रविश्य भिक्षाग्रहणं निवसनपरिमाणम्। यदि वा अस्य गृहस्य परिकरतयावस्थितां भूमिं प्रविशामि, न गृहम्, इत्येवं ग्रहेण भिक्षाग्रहणं निवसनपरिमाणम्। अन्ये पाटकभूमिमेव प्रविशामि न पाटकगृहाणीति भिक्षासंकल्पं पाटकनिवसनपरिमाणमाहुः। (भ. आ. मूला. २१६)।

१ इस गृहरचना अथवा गली में प्रवेश करके प्राप्त भिक्षा को ग्रहण करूंगा, अथवा एक ही या दो गृहरचनों में प्रवेश करके प्राप्त भिक्षा को ग्रहण करूंगा, दूसरे गृहरचने में प्रवेश न करूंगा; इस प्रकार के नियम का नाम नियंत्रण है। कितने ही आचार्यों का कहना है कि इस घर के परिकर (परिवार) स्वरूप से स्थित भूमि में प्रवेश करूंगा, घर में नहीं; इस प्रकार की प्रतिज्ञा को नियंत्रण कहा जाता है। अन्य आचार्यों का अभिमत है कि गृहरचने की भूमि में ही प्रवेश करूंगा, घरों में नहीं; इस प्रकार के नियम को पाटकनियंत्रण कहते हैं।

निरत—देखो नारक। हिंसादिष्वसदनुष्ठानेषु व्यापृताः निरताः। (अव. पु. १, पृ. २०१)।

जो हिंसादिरूप असदाचरण में उद्यत रहते हैं उन्हें निरत या नारक कहा जाता है।

निरतगति—देखो नारकगति। तेषां (निरतानां) गतिर्निरतगतिः। (अव. पु. १, पृ. २०१)।

निरतों (नारकों) की गति को निरतगति (नारकगति) कहते हैं।

निरतिचार छेदोपस्थापन—१. तत्र निरतिचारमित्वरसामायिकस्य शैक्षकस्य यदारोप्यते, यद्वा तीर्थान्तरप्रतिपत्तौ—यथा पार्श्वस्वामितीर्थाद् वर्द्धमानतीर्थं संक्रामतः। (अनुयो. हरि. वृ. पृ. १०४)। २. तत्र शिक्षकस्य निरतिचारमधीतविशिष्टाध्ययनविदः, मध्यमतीर्थंकरशिष्यो वा यदोपसम्पद्यते चरमतीर्थंकरशिष्याणामिति। (त. भा. सिद्ध. वृ. ९, १८)। ३. तत्र निरतिचारं यत् इत्वरसामायिकतः शैक्षस्यारोप्यते, तीर्थान्तरसङ्क्रान्तौ वा—यथा पार्श्वनाथतीर्थाद् वर्द्धमानस्वामितीर्थं संक्रामतः पञ्चयामधर्मप्रतिपत्तौ। ××× उक्तं च—सेहस्स निरइयारं तित्थंतरसंकमे व तं होज्जा। (आव. नि. मलय. वृ. ११४, पृ. ११६)।

१ इत्वरसामायिक वाले शिष्य साधु के पूर्व पर्याय को छेद कर जो उसका फिर से आरोपण किया जाता है उसे, अथवा एक तीर्थ से दूसरे तीर्थ को प्राप्त होने पर—जैसे पार्श्वनाथ के तीर्थ से वर्द्धमान स्वामी के तीर्थ में संक्रमण करने वाले साधु के जो चारित्र होता है उसे निरतिचार छेदोपस्थापन कहते हैं।

निरतिचारिता—देखो अतिचार। सुराणाण मांसभक्खण-कोह-माण-माया लोह-हस्स रइ- [अरइ-] सोग - भय-दुगुंछित्थि पुरिस-णवुंसयवेयापरिच्चागो अदिचारो। एदेसिं विणासो णिरदिचारो संपुण्णदा, तस्स भावो णिरदिचारिदा। (अव. पु. ८, पृ. ८२)। मद्यपानादि के त्याग न करने रूप अतिचार के अभाव को—उनके परित्याग को—निरतिचारिता कहते हैं।

निरनुकम्प—जो उ परं कंपतं दट्ठण न कंपये कढिणभावो। एसो उ निरणुकंपो अणु पच्छाभावजोएणं॥ (बृहत्क. १३२०)।

जो कठोरहृदय दूसरे को पीड़ा से कांपता हुआ देखकर स्वयं कम्पित नहीं होता है उसे निरनुकम्प कहते हैं। 'अनु' का अर्थ पश्चात् है, तदनुसार दुखित जीव के कांपने के पश्चात् जो कम्पन होता है उसका सार्थक नाम अनुकम्पा है। इस अनुकम्पा से जो रहित होता है वह निरनुकम्प कहलाता है।

निरनुतापी—निरणुतावी—जो अकिच्च काऊण णाणुतप्पइ; जहा मए दुट्ठु कयं। (जीवक. चू. १, पृ. ३)।

जो अकृत्य को—नहीं करने योग्य कार्य को—करके 'मैंने बुरा किया है' इस प्रकार से पश्चात्ताप नहीं करता है उसे निरनुतापी कहते हैं।

निरन्तर—णिग्गयमंतरं जम्हा गुणट्ठाणादो तं गुणट्ठाणं णिरंतरं। ××× णत्थि अंतरं णिरंतरं। (अव. पु. ५, पृ. ५५-५६)।

जिस गुणस्थान से अन्तर नहीं होता है वह निरन्तर कहलाता है।

निरन्तर अवक्कमणकालविसेस—पढमसवक्कमणकदयजहण्णकाले तस्सेव चरिमुक्कस्सकालम्मि सोहिदे सेसो णिरंतरवक्कमणकालविसेसो णाम। (अव. पु. १४, पृ. ४७८)।

प्रथम अवक्रमणकाण्डक के जघन्य काल को उसी के

उत्कृष्ट काल में से कम कर देने पर जो शेष रहे उसका नाम निरन्तर उपक्रमणकालविशेष है।

निरन्तरबन्धप्रकृति—जिस्से पयडीए पच्चओ नियमेण सादि-अद्धुवो अणोमुहुत्तादिकालावट्ठाई सा णिरंतरबंधपयडी। (षट्. पु. ८, पृ. १७); जिस्से बंधकालो जहण्णो वि अणोमुहुत्तमेत्तो सा णिरंतरबंधपयडी। (षट्. पु. ८, पृ. १००)।

जिस प्रकृति का प्रत्यय (कारण) नियम से सादि-अध्रुव होकर अन्तर्मुहूर्त काल तक रहने वाला है वह निरन्तरबन्धप्रकृति कहलाती है। अथवा जिसके बन्ध का काल जघन्य भी अन्तर्मुहूर्त मात्र होता है उसे निरन्तरबन्धप्रकृति जानना चाहिए।

निरन्तरवेदककाल—बद्धसमयादो आवलियाअदिक्कंतो समयपबद्धो णियमेण ओकड्डिदूण वेदिज्जदि। तदो उवरि णिरंतरं पलिदोवमस्स असंखेज्जदिभागमेत्तकालं णियमेण वेदिज्जदि, एसो णिरंतरवेदगकालो णाम।। (षट्. पु. १०, पृ. १४२-४३)।

बन्ध के समय से लेकर एक आवली के बीतने पर समयप्रबद्ध का वेदन नियम से अपकर्षणपूर्वक होता है, तत्पश्चात् पल्योपम के असंख्यातवें भाग मात्र काल तक उसका वेदन नियम से निरन्तर होता है। इसी का नाम निरन्तरवेदककाल है।

निरपेक्षत्व— अनेकान्तनिराकृतेः निरपेक्षत्वम्। (लघीय. स्वो. वि. ७२)।

अनेकान्त का निराकरण करने से—विरोधी धर्म की अपेक्षा न करने के कारण—नय में निरपेक्षता होती है और इसी से वह मिथ्या माना जाता है।

निरर्थक— १. वर्णक्रमनिर्देशवत् निरर्थकमारादेसादिवत्, आर् आत् एस् इत्येते आदेशाः, एतेषु वर्णानां क्रमनिर्दर्शनमात्रं विद्यते, न पुनरभिधेयतया कश्चिदर्थः प्रतीयते इत्येवंभूतं निरर्थकमभिधीयते, डित्थादिवद्वा। (आव. नि हरि. वृ. ८८१, पृ. ३७५)। २. वर्णक्रमनिर्देशवत् निरर्थकम् आरादेसादिवत् डित्थादिवद्वा। (आव. मलय. वृ. ८८१, पृ. ४८३)।

जो शब्द वर्णों के क्रम से युक्त हो, पर अर्थ उसका कुछ भी न हो, वह निरर्थक कहलाता है। जैसे आरादेस्—आर् आत् और एस्; ये तीन आदेश हैं। इनमें वर्णक्रम तो है, पर अर्थ कुछ भी नहीं है। इसी प्रकार डित्थ-डविरथ आदि शब्दों को निरर्थक जानना चाहिए। यह ३२ सूक्ष्मदोषों में तीसरा है।

निरंजन—१. जासु ण वण्णु ण गंधु रसु, जासु ण सद्दु ण फासु। जासु ण जम्मणु मरणु णवि, णाउ णिरंजणु तासु।। जासु ण कोहु ण मोहु मउ, जासु ण माय ण माणु। जासु ण ठाणु ण झाणु जिय, सो जि णिरंजणु जाणि।। अत्थि ण पुण्णु ण पाउ जसु, सो जि णिरंजणु भाउ।। (परमा. १६-२१)। २. जस्स ण कोहो माणो माया लोहो य सल्ल-लेस्साओ। जाइ जरा मरणं वि य णिरंजणो सो अहं भणिओ।। णत्थि कला संठाणं मग्गण-गुणठाण जीवठाणाइं। ण य लद्धि-बंधठाणा ओदयठाणाइया केई।। फास-रस-रूव-गंधा सद्दादीया य जस्स णत्थि पुणो। सुद्धो चेयणभावो णिरंजणो सो अहं भणिओ।। (तत्त्वसा. १६-२१)।

१ जिसके वर्ण, गन्ध, रस, शब्द, स्पर्श, जन्म, मरण, क्रोध, मोह, मद, माया, मान, स्थान, ध्यान, पुण्य, पाप, हर्ष और विषाद नहीं हैं तथा एक भी दोष नहीं है, ऐसे परम शुद्ध आत्मस्वभाव को निरंजन कहते हैं।

निराकार उपयोग—देखो अनाकारोपयोग। १. अनाकारं दर्शनम्। (स. सि. २-९; त. वा. २, ९, १)। २. निराकारो दर्शनोपयोगः सामान्यविषयत्वात्। (त. श्लो. २-९)। ३. सामान्यार्थावभासो यो हृषीकाद्यविभानसः। उपयोगो निराकारः स ज्ञेयोऽन्तर्मुहूर्तगः।। (पञ्चसं. अमित. ३३४, पृ. ४६)।

१ आकार से रहित—सामान्यविषयक—उपयोग को निराकार या दर्शन कहा जाता है।

निराकांक्षा—१. तथा निर्गता कांक्षा अन्यान्यदर्शनग्रहणरूपा यस्यासौ निराकांक्षः। (सूत्रकृ. सू. शी. वृ. २, ७, ६६, पृ. ६१)। २. निराकांक्षत्वं हि प्रतिपत्तृधर्मः वाक्येष्वध्यारोप्यते, न पुनः शब्दधर्मः, तस्याचेतनत्वात्। (न्यायकु. ६५, पृ. ७३८)।

१ विभिन्न दर्शनों के ग्रहणरूप आकांक्षा से जो रहित हो चुका है ऐसे सम्यग्दृष्टि को निराकांक्ष कहा जाता है। २ वाक्य में जो निराकांक्षता मानी गई है वह वस्तुतः प्रतिपत्ता (ज्ञाता) का धर्म है, शब्द का नहीं।

निरालम्ब ध्यान—धारणा यत्र काचिन्न मंत्रपदचिन्तनम्। मनःसङ्कल्पनं नास्ति तद् ध्यानं निरालम्बनम्।। आत्मानमात्मनात्मानं निश्चयात्म-

संस्थितो मुनिः। कृतात्मात्मसंस्थं ध्यायेत् तन्निरालम्बमुच्यते ॥ (धर्मसं. श्रा. १०, १३३–३४)।

ध्यान की जिस अवस्था में न कोई धारणा हो, न किसी मंत्रपद का चिन्तवन हो, न मन में किसी प्रकार का संकल्प हो; किन्तु अपने आत्मा को आत्मा के द्वारा रोककर मुनि जो आत्मस्थ होता है उस अवस्था को निरालम्ब ध्यान कहते हैं।

निरालम्बन योग— × × × तत्तत्स्वगतत्वपरः ॥ (षोडश. १४–१)।

जिनके तत्त्व को—केवलज्ञानादि स्वभाव को—प्राप्त हुए योग (ध्यान) को निरालम्बन योग कहा जाता है।

निरालम्ब प्रतिसेवना—१. निरालम्बो आलम्बणरहिओ सेवइ। (जीतक. चू. १, पृ ३)। २. निरालम्बो ज्ञानाद्यालम्बनरहितप्रतिसेवनाकः। (व्यव. भा. मलय. वृ. १०–६३४)।

१ ज्ञानादि आलम्बन से रहित जो अकल्पित (अयोग्य) का सेवन किया जाता है, इसका नाम दर्पविषयक निरालम्ब प्रतिसेवना है। यह दस प्रकार की दर्पित प्रतिसेवना में तीसरी है।

निरुपक्रमा निर्जरा—तत्र निरुपक्रमा उपक्रमकारणमन्तरेण संसारिणां परिपाकोदयलक्षणप्राप्तस्य कर्मणः परिशाट[शाट]रूपा। (स्था. व. २–२३)।

उपक्रमकारण—कर्मपरिपाक के योग्य प्रयत्नविशेष—के बिना जो संसारी जीवों के परिपाकोदय को प्राप्त कर्म का पृथक्करण होता है, इसे निरुपक्रम निर्जरा कहते हैं।

निरूपण—१. तस्य (आलम्बनस्य) नामादिभिः प्रकल्पना निरूपणम्। (त. वा. १, १२, ११, पृ. ५५)। २. निरूपणमाराधनानिर्विघ्नसिद्धयर्थं देशराज्यादिकल्याणगवेषणम्। (अन. ध. स्वो. टी. ७–९८)।

१ नामादि के द्वारा आलम्बन की कल्पना का नाम निरूपण है। यह बौद्धाभिमत पांच विज्ञानधातुओं में तीसरा है। २ आराधना की निर्विघ्न सिद्धि के लिए कल्याणकारक देश व राज्य आदि के अन्वेषण करने को निरूपण कहते हैं। यह भक्तप्रत्याख्यान मरण से सम्बद्ध अर्हल्लिंगादि में से एक है।

निरोध—१. अनियतक्रियार्थस्य नियतक्रियाकर्तृस्वेनावस्थानं निरोधः। गमन-भोजन-शयनाद्यनियमादिषु क्रियाविशेषेषु अनियमेन वर्तमानस्य एकस्याः क्रियायाः कर्तृस्वेनावस्थानं निरोध इत्यवगम्यते। (त. वा. ९, २७, ५)। २. तस्य एकत्रावस्थापनमन्यथाप्रचारो निरोधः। (त. भा. सिद्ध. वृ. ९–२७)।

१ गमन, भोजन और शयन आदि क्रियाविशेषों में अनियम से प्रवर्तमान मन को किसी एक क्रिया के कर्तारूप से स्थापित करना, यह चिन्ता का निरोध है।

निर्ग्रन्थ—१. एत्थवि णिग्गन्थे एगे एगविऊ बुद्धे संछिन्नसोए सुसंजते सुसमिते सुसामाइए आयवायपत्ते विऊ दुहओवि सोयपलिछिन्ने णो पूया-सक्कारलाभट्ठी धम्मट्ठी धम्मविऊ णियागपडिवन्ने समियं चरे दन्ते दविए वोसट्ठकाए णिग्गन्थेत्ति वच्चे। (सूत्रकृ. सू. १, १६, ४, पृ. २७३–७४)। २. उदकदण्डराजिवदनभिव्यक्तोदयकर्माण ऊर्ध्वं मुहूर्तादुद्भिद्यमानकेवलज्ञान-दर्शनभाजो निर्ग्रन्थाः। (त. सि. ९–४६)। ३. ये वीतरागछद्मस्था ईर्यापथप्राप्तास्ते निर्ग्रन्थाः। ईर्या योगः, पन्था संयमः, योग-संयमप्राप्ता इत्यर्थः। (त. भा. ९–४८)। ४. उदके दण्डराजिवत्संनिरस्तकर्माणोऽन्तर्मुहूर्तंकेवलज्ञान-दर्शनप्राप्तिनो निर्ग्रन्थाः। उदके दण्डराजिर्यथा आश्वेव विलयमुपयाति तथा ऽनभिव्यक्तोदयकर्माण ऊर्ध्वं मुहूर्तादुद्भिद्यमानकेवलज्ञान-दर्शनभाजो निर्ग्रन्थाः। (त. वा. ९, ४६, ४)। ५. निर्ग्रन्थाः बाह्याभ्यन्तरग्रन्थनिर्गताः साधवः। (आव. हरि. वृ. ४, पृ. ७६०)। ६. निर्गतो ग्रन्थान्निर्ग्रन्थः, बाह्याभ्यन्तरग्रन्थरहित इत्यर्थः। (दशवै. नि. हरि. वृ. १५८, पृ. ८४)। ७. अव्यक्तोदयकर्माणो ये पयोदण्डराजिवत्। निर्ग्रन्थास्ते मुहूर्तोर्ध्वोद्भिद्यमानात्मकेवलः। (ह. पु. ६४–६३)। ८. उदके दण्डराजिवत्संनिरस्तकर्माणोऽन्तर्मुहूर्तंकेवलज्ञान-दर्शनप्रापिणो निर्ग्रन्थाः। (त. श्लो. ९–४६)। ९. ग्रन्थः कर्माष्टकप्रकारं मिथ्यात्वाऽविरति-(कषाय-)दुष्प्रणिहितयोगश्च, तज्जये प्रवृत्तानि निर्ग्रन्थानि। निर्गच्छद्ग्रन्था निर्ग्रन्थाः धर्मोपकरणादृते परित्यक्तबाह्याभ्यन्तरोपधयो निर्ग्रन्थाः। (त. भा. सिद्ध. वृ. ९–४८); उपशान्त-क्षीणमोहा निर्ग्रन्थाः। (त. भा. सिद्ध. वृ.

६–४६)। १०. देहो बाहिरगंथो अण्णो अक्खाण विसयग्गहिलासो। तेसिं चाए खवओ परमत्थे हवइ णिग्गंथो ॥ (आरा. सा. ३३)। ११. बहिरब्भंतर-गंथा मुक्का जेणेह तिविहजोएण। सो णिग्गंथो भणिओ जिणलिंगसमासिओ सवणो ॥ (त. सा. १०)। १२. यथोदके दण्डराजिरात्मैव विलयमुपयाति तथा ऽनभिव्यक्तोदयकर्मणि ऊर्ध्वं मुहूर्तादुद्भिद्यमानकेवलज्ञान दर्शनभाजो निर्ग्रन्थाः। (चा. सा पृ. ४५)। १३. संसार-द्रुममूलेन किमनेन ममेति यः। निःशेषं त्यजति ग्रन्थं निर्ग्रन्थं तं विदुर्जिनाः ॥ (सुभा. सं. ८४१)। १४. गंथो मिच्छत्त घणाइओ मओ जे य निग्गया तत्तो। ते णिग्गंथा वुत्ता ××× ॥ (प्रव. सारो. ७२०); णिग्गंथ सक्क तावस गेरुय आजीव पंचहा समणा। तम्मि णिग्गंथा ते जे जिणसासणभवा मुणिणो ॥ (प्रव. सारो. ७३१)। १५. तथा ऽसकटकर्मोदया मुहूर्तादुपरि समुत्पद्यमानकेवलज्ञान-केवलदर्शनद्वयाः निर्ग्रन्थाः। (त. वृत्ति श्रुत. ६–४६)।

१ निर्ग्रन्थ उसे कहना चाहिए जो एक है, एकचित्—एक आत्मा को ही परलोकगामी मानता है, बुद्ध है, स्रोतों—कर्मास्रवद्वारों—को नष्ट करने वाला है, भली भांति संयत है सुसमित—पांच समितियों के आश्रय से मोक्षमार्ग को प्राप्त है, सुसामायिक—शत्रु-मित्र को समान समझता है, आत्मवाद को प्राप्त है, विद्वान् है, द्रव्य व भाव से द्रव्यस्रोतों एवं भावस्रोतों को विनष्ट करने वाला है, पूजा-सत्कार की प्राप्ति का इच्छुक नहीं है, धर्मार्थी है, धर्मविद् है, और नियाग—मोक्षमार्ग या समीचीन संयम को प्राप्त है। ऐसा निर्ग्रन्थ दान्त होकर शरीर से निर्ममत्व होता हुआ समताभाव का आचरण करता है। २ जिनके लकड़ी के द्वारा जल में खींची जाने वाली रेखा के समान कर्म का उदय प्रगट नहीं है, तथा जो अन्तर्मुहूर्त में केवलज्ञान और केवलदर्शन को प्राप्त कर लेने वाले हैं, वे मुनि निर्ग्रन्थ कहलाते हैं। ३ जो वीतराग-छद्मस्थ ईर्यापथ को—योग-संयम को—प्राप्त हैं उन्हें निर्ग्रन्थ कहा जाता है।

निर्ग्रन्थत्व—तत्थ अब्भंतरिया मिच्छत्त-तिवेद-हस्स-रदि-अरदि-सोग-भय-दुगुंछा-कोह-माण-माया-लोहभेएण चोद्दसविहा, बाहिरिया खेत्त-वत्थु-धण-धण्ण-दुवय-चउप्पय-जाण-सयणासण-कुप्प-भंडभेएण दसविहा। कथं खेत्तादीणं भावगंथसण्णा? कारणे कज्जोवयारादो। ववहारणयं पडुच्च खेत्तादी गंथो, अब्भंतरगंथकारणत्तादो। एदस्स परिहरणं णिग्गंथत्तं। णिच्छयणयं पडुच्च मिच्छत्तादी गंथो, कम्मबंधकारणत्तादो। तेसिं परिच्चागो णिग्गंथत्तं, णइगमणएण तिरयणाणुवजोगी बज्झब्भंतरपरिग्गहपरिच्चाओ णिग्गंथत्तं। (धव. पु. ६, पृ. ३२३, ३२४)।

मिथ्यात्वादिरूप चौदह प्रकार की अभ्यन्तर नोआगम ग्रन्थकृति और क्षेत्र-वास्तु आदिरूप दस प्रकार की बाह्य नोआगम ग्रन्थकृति कहलाती है। व्यवहारनय की अपेक्षा क्षेत्र-वास्तु आदि तथा निश्चयनय की अपेक्षा मिथ्यात्व आदि ग्रन्थ कहलाते हैं। दोनों प्रकार के इस ग्रन्थ के परित्याग का नाम निर्ग्रन्थता है।

निर्ग्रन्थधर्म—नास्मिन् मौनीन्द्रधर्मे बाह्याभ्यन्तररूपो ग्रन्थो ऽस्यास्तीति निर्ग्रन्थः, स चासौ धर्मश्च निर्ग्रन्थधर्मः, स च श्रुत-चारित्राख्यः क्षान्त्यादिको वा सर्वज्ञोक्तः। (सूत्रकृ. सू. शी. वृ. २, ६, ४२)। मौनीन्द्र धर्म में—मुनियों के आचार में—बाह्य और अभ्यन्तर दोनों ही प्रकार का ग्रन्थ (परिग्रह) नहीं है, इसीलिए उस धर्म को निर्ग्रन्थधर्म कहा जाता है।

निर्जरा—देखो निर्जरानुप्रेक्षा। १. बद्धपदेसग्गलणं णिज्जरणं इदि जिणेहि पण्णत्तं। (द्वादशानु. ६६)। २. पुव्वकदकम्मसडणं तु णिज्जरा सा हवे दुविहा। पढमा विवागजादा विदिया अविवागजादा य ॥ (मूला. ५–४८; भ. आ. १८४७)। ३. एकदेशकर्मसंक्षयलक्षणा निर्जरा। (त. सि. १–४); पीडानुग्रहावात्मने प्रदायाभ्यवहृतौदनादिविकारवत् पूर्वस्थितिक्षयादवस्थानाभावात् कर्मणो निवृत्तिर्निर्जरा। (त. सि. ८–२३)। ४. निर्जरा वेदना विपाक इत्यनर्थान्तरम्। (त. भा. ६–७)। ५. तपोबलात् प्राक्तनकर्महानिस्तथा मुनेः सा खलु निर्जरोक्ता ॥ (वरांगच. ३१–६४)। ६. निर्जीर्यते यया निर्जरणमात्रं वा निर्जरा। निर्जीर्यते निरस्यते यया निरसनमात्रं वा निर्जरा। (त. वा. १, ४, १२); एकदेशकर्मसंक्षयलक्षणा निर्जरा। उपात्तस्य कर्मणो तपोविशेषसन्निधाने सत्येकदेशसंक्षयलक्षणा निर्जरा।

(त. वा. १, ४, १६); पूर्वार्जितकर्मपरित्यागो निर्जरा। पीडानुग्रहावात्मने प्रदायाभ्यवहृतौदनवत् व्यावर्तते स्थितिक्षयादवस्थानाभावात्। (त. वा. ८, २३, १)। ७. तवसा उ निज्जरा इह निज्जरणं खवणलाससेगट्ठा। कम्माभावापायणमिह निज्जरमो विना विति॥ (आ. प्र. ८२)। ८. कर्मणां विपाकतस्तपसा वा शाटो निर्जरा। (त. भा. हरि. वृ. १–४); प्रथमबद्धस्य च निर्जरणं निर्जरा आत्मप्रदेशेभ्यः परिशटनं कर्मणः। (त. भा. हरि. व सिद्ध. वृ. १०–२)। ९. बद्धस्य कर्मणः शाटो यस्तु सा निर्जरा मता। (बृद्ध. स. ५२)। १०. निर्जरणं निर्जरा कर्मक्षयलक्षणा। (आव. नि. हरि. वृ. ११०८, पृ. ५१९)। ११. गुणसेढीए एक्कारसभेदभिण्णाए कम्मगलणं णिज्जरा णाम। (धव. पु. १३, पृ. ३५२)। १२. पूर्वोपार्जितकर्मपरित्यागो निर्जरा। ××× ततोऽनुभूतानां गृहीतवीर्याणां पुद्गलानां निवृत्तिर्निर्जरा। (त. श्लो. ८–२३)। १३. कर्मणां तु विपाकात् तपसा वा यः शाटः सा निर्जरा। (त. भा. सिद्ध. वृ. १–४); निर्जरणं निर्जरा—विपक्वानां कर्मविषयवानां परिशटनम्, दूरनिरित्यर्थः। ××× निर्जरा च भवतीति चिरन्तनबद्धकर्मभावप्रतिपत्तिः। (त. भा. सिद्ध. वृ. ९–३); निर्जरणं निर्जरा आत्मप्रदेशेभ्योऽनुभूतरसकर्मपुद्गलपरिशटना। (त. भा. सिद्ध. वृ. ९, ७)। १४. निर्जीयते निरस्यते यया, निर्जरणं वा निर्जरा। आत्मप्रदेशस्थं कर्म निरस्यते यया परिपरिणत्या सा निर्जरा। निर्जरणं पृथग्भवनं विश्लेषणं वा कर्मणां निर्जरा। (भ. आ. विजयो. ३८); पूर्वगतकर्मपुद्गलस्कन्धावयवानां जीवप्रदेशेभ्यो ऽगमनं निर्जरा। तथा चोक्तम्—एकदेशकर्मसंक्षयलक्षणा निर्जरेति। (भ. आ. विजयो. १८४७)। १५. उपात्तकर्मणः पातो निर्जरा ××× । (त. सा. ७–२)। १६. कर्मवीर्यशातनसमर्थो बहिरङ्गान्तरङ्गतपोभिर्हितशुद्धोपयोगो जीवस्य, तदनुभावनीरसीभूतानामेकदेशसंक्षयः समुपात्तकर्मपुद्गलानां च निर्जरा। (पंचा. का. अमृत. वृ. १०८)। १७. पुव्वकयकम्मसडणं णिज्जरा ××× । (भावसं. दे. ३४४)। १८. तदनंतरं (विपाकानंतरं) तु सडणं कम्माणं णिज्जरा जाण॥ (कार्तिके. १०३)। १९. पूर्वोपार्जितकर्मैकदेशसंक्षयलक्षणा। निर्जरा ××× ॥ (योगशा. ६–१)। २०. कर्मैकदेशगलनं निर्जरा। (का. सा. पृ. ८७)। २१. ××× निर्जरा कर्मक्षपणलक्षणा। (चन्द्र. च. १८–१०६)। २२. सचितं पुनः तत् (कर्म) निर्जरातः प्रलीयते, उपात्तकर्मणां निर्हरणं निर्जरा इति वचनात्। (न्यायकु. ७६, पृ. ८१२ उद्.)। २३. पूर्वोपार्जितकर्मैकदेशसंक्षयलक्षणा। सविपाकाविपाका च द्विविधा निर्जराऽकथि॥ (अमित. श्रा. ३–६३)। २४. जह कालेण तवेण व भुत्तरसं कम्म-पुग्गलं जेण। भावेण सडदि णेया तस्सडणं चेदि णिज्जरा दुविहा॥ (द्रव्यसं. ३६)। २५. शुद्धोपयोगभावनासामर्थ्येन नीरसीभूतकर्म-पुद्गलानामेकदेशगलनं निर्जरा। (बृ. द्रव्यसं. टी. २८)। २६. यया कर्माणि शीर्यन्ते बीजभूतानि जन्मनः। प्रणीता यमिभिः सेयं निर्जरा जीर्णबन्धनैः। (ज्ञाना. वृ. ४७)। २७. निर्जरणं निर्जरा विशरणं परिशटनमित्यर्थः, देशतः कर्मक्षयो निर्जरा। (स्थाना. अभय. वृ. १–१६, पृ. १८); निर्जरा कर्मणोऽकर्मत्वभवनमिति। (स्थाना. अभय. वृ. ४, १, २५०, पृ. १८४)। २८. निर्जरा देशतः कर्मक्षयः। (औपपा. अभय. वृ. ३४, पृ. ७६)। २९. णिज्जराए पुव्वोवचियसुहासुहकम्मपोग्गलपरिसाडो, ××× णिज्जरा पुण गुत्ति-समिइ-समण-धम्म-भावणा-मूलगुण-उत्तरगुण-परीसहोवसग्गाहियासणरयस्स भवइ। (जीतकचू. २, पृ. ५)। ३०. निर्जरणं निर्जरत्यनया वा निर्जरा जीवलग्नकर्मप्रदेशहानिः। (मूला. वृ. ५–६)। ३१. गलनं निर्जरांशस्य स्याच्चिरन्तनकर्मणः। (आचा. सा. ३–३३)। ३२. निर्जरा शातनं प्रोक्ता पूर्वोपार्जितकर्मणाम्। तपोभिर्बहुभिः सा स्याद् वैराग्याभितप्तेष्टितैः॥ (पद्म. पं. ६–५३)। ३३. कर्मणां भवहेतूनां जरणादिह निर्जरा। (योगशा. स्वो. विव. १–१६, पृ. ११४ उद्.); संसारबीजभूतानां कर्मणां जरणादिह। निर्जरा सा स्मृता द्वेधा सकामा कामवर्जिता॥ (योगशा. ४–८६)। ३४. निर्जीर्यते कर्म निरस्यते यया पुंसः प्रदेशस्थितमेकदेशतः। सा निर्जरा पर्ययवृत्तिरंशतस्तत्संक्षयो निर्जरणं मताऽथ सा॥ (अन. ध. २–४२)। ३५. निर्जरा एकदेशेन संक्षयो विश्लेषः इत्यर्थः। केषाम्? कर्मणां सिद्धयोग्यपेक्षयाऽशुभानां च शुभानां साध्ययोग्यपेक्षया

त्वसङ्क्लेशादीनाम् । (इष्टो. टी. २४) । ३६. निर्जीर्यते आत्मप्रदेशादेकदेशेन पृथक् क्रियते कर्म यया जीवपरिणत्या सा, अथवा निर्जरणं निर्जरा, कर्मणामेकदेशेन संक्षयः । (भ. आ. मूला. ३८) । ३७. चिरबद्धकम्माणिवहं जीवपदेसा हु अं च परिगलइ । सा णिज्जरा पउत्ता × × × ॥ (द्रव्यस्व. १५८) । ३८. दुर्जरं निर्जरत्यात्मा यया कर्म शुभाशुभम् । निर्जरा सा द्विधा ज्ञेया सकामाकामभेदतः ॥ (धर्मश. २१–१२२) । ३९. कर्मणामेकदेशेन गलनं निर्जराऽऽत्मनः । (धर्मसं. श्रा. १०–९६) । ४०. कर्मणामेकदेशगलनं निर्जरा । (आरा. सा. टी. ४) । ४१. एकदेशेन कर्मक्षयो निर्जरा । (त. वृत्ति श्रुत. १–४) । ४२. एकदेशेन कर्मणः निर्जरणं गलनं अधःपतनं शटनं निर्जरा । (कार्तिके. टी. २) । १ बंधे हुए कर्मों के प्रदेशपिण्ड के गलने का नाम निर्जरा है । २ परिपाक के वश अथवा तप के द्वारा कर्मों के आत्मा से पृथक् होने को निर्जरा कहा जाता है ।

निर्जरानुप्रेक्षा—१. सा (वेदनाविपाकरूपा निर्जरा) द्वेधा अबुद्धिपूर्वा कुशलमूला चेति । तत्र नरकादिषु गतिषु कर्मफलविपाकजा अबुद्धिपूर्वा, सा अकुशलानुबन्धा । परीषहजये कृते कुशलमूला, सा शुभानुबन्धा निरनुबन्धा चेति । इत्येवं निर्जराया गुणदोष-भावनं निर्जरानुप्रेक्षा । (स. सि. ९–७; त. भा. ९, ७, ७) । २. निर्जरा वेदना विपाक इत्यनर्थान्तरम् । स द्विविधः अबुद्धिपूर्वः कुशलमूलश्च । तत्र नरकादिषु कर्मफलविपाकादयो अबुद्धिपूर्वकस्तमवद्यतोऽनुचिन्तयेत् अकुशलानुबन्ध इति । तपःपरीषहजयकृतः कुशलमूलः, तं गुणतोऽनुचिन्तयेत् शुभानुबन्धो निरनुबन्धो चेति । एवमनुचिन्तयन् कर्म निर्जरायैव घटत इति निर्जरानुप्रेक्षा । (त. भा. ९–७) । ३. कर्मैकदेशगलनं निर्जरा । साऽपि द्वेधा उदयोदीरणाविकल्पात् । तत्र नरकादिषु कर्मफलविपाकोदयोद्भवा, परीषहजयादुदीरणोद्भवा । सा शुभानुबन्धा निरनुबन्धा चेत्येवं निर्जराया गुणदोषभावनं निर्जराऽनुप्रेक्षा । (चा. सा. पृ. ८७, ३८) । ४. निरन्तरानेकभवार्जितस्य या, पुरातनस्य क्षतिरेकदेशतः । विपाकजाऽपाकजभेदतो द्विधा यतीश्वरास्तां निगदन्ति निर्जराम् । (अमित. श्रा. १४–५६) । ५. संश्लिष्टात्मबलस्य निर्गलनतो निःशेषविश्लेषतश्चान्तर्बाह्यचतुःस्वहेतुवशतः स्वर्णोपले स्वर्णता । यद्वद् देहिनि कर्मणोऽगलनान्निःशेषविश्लेषतः सम्यक्त्वग्रहणाद्यनेककरणैस्तद्वद्विशुद्धात्मता ॥ (आचा. सा. १०–४१) । ६. अबुद्धिपूर्वा कुशलमूला च निर्जरा द्विप्रकारा भवति । तत्राबुद्धिपूर्वा अकुशलानुबन्धापरनामिका नरकादिषु कर्मफलोदयजा जायते । परीषहसहने तु शुभानुबन्धा निरनुबन्धा च द्विप्रकारापि कुशलमूला निर्जरा उच्यते । एवं निर्जरायाः दोषान् गुणांश्च भावयतो भव्यजीवस्य कर्मनिर्जरणार्थं प्रवृत्तिर्भवतीति निर्जरानुप्रेक्षा । (त. वृत्ति श्रुत. ९–७) ।

१ निर्जरा दो प्रकार की होती है—एक अबुद्धिपूर्वक और दूसरी कुशलमूलक । नरकादि गतियों में फल के दे चुकने पर कर्मों की जो निर्जरा होती है वह अबुद्धिपूर्वक निर्जरा है, जो पापबन्ध की निरन्तरता का कारण है । परीषहजय के द्वारा जो कर्मों की निर्जरा होती है वह कुशलमूलक निर्जरा है, जो या तो पुण्यबन्ध की कारण होती है, या फिर पाप और पुण्य दोनों के ही अबन्ध की कारण होती है । इस प्रकार से निर्जरा के गुण और दोषों के चिन्तवन करने को निर्जरानुप्रेक्षा कहते हैं ।

निर्जराभाव—एदेहि चेव परिणामेहि (तिव्वमंदभावेहि) असंखेज्जगुणाए सेढीए कम्मसडणं कम्मसडणजणिदजीवपरिणामो वा णिज्जराभावो णाम । (धव. पु. ५, पृ. १८७) ।

तीव्रता या मन्दता को प्राप्त जीवपरिणामों के द्वारा असंख्यातगुणित श्रेणिके क्रम से कर्म जो आत्मा से पृथक् होते हैं, उनकी इस पृथक्ता का नाम निर्जराभाव है । अथवा कर्मों की इस पृथक्ता से जो जीव का परिणाम उत्पन्न होता है उसे निर्जराभाव जानना चाहिए ।

निर्देश—१. निर्देशः स्वरूपाभिधानम् । (स. सि. १–७) । २. निर्देशोऽर्थात्मावधारणम् । (त. भा. १–७) । ३. दुविहो णिद्देसो—ओदाराणं जहा णिच्छयो होदि तहादेसो णिद्देसो, कुतीर्थ-पाखण्डिनः अतिशय्य कथनं वा निर्देशः । × × × गत्यादिमार्गणास्थानैरविशेषितानां चतुर्दशगुणस्थानानां प्रमाणप्ररूपणमोघनिर्देशः । (धव. पु. ३, पृ. ८); णिद्देसो पदुप्पायणं कहणमिदि एयट्ठो । (धव. पु. ४. पृ. ९); णिद्देसो कहणं वक्खाणमिदि एयट्ठो ।

(ध. पु. ४, पृ. १४४); णिद्देसो कहणं पयासणं अहिव्वत्तिजणणमिदि एयट्ठो। (ध. पु. ४, पृ. ३२२)। ४. यत्किमित्यनुयोगेऽर्थस्वरूपप्रतिपादनम्। कात्स्न्यंतो देशतो वापि स निर्देशो विदां मतः॥ (त. श्लो. १, ७, २)। ५. तद्विशेषव्यतिपादयिषया वचनं निर्देशः, ×××निश्चयेन उपयुज्यते प्रस्तुते वस्तुनि स निर्देशः। (त. भा. सिद्ध. वृ. १–७)। ६. किमित्यनुयोगे वस्तुस्वरूपकथनं निर्देशः। (न्यायकु. ७५, पृ. ८०२; लघीय. अभय. वृ. ७५, पृ. ६५)। ७. निर्देशनं निर्देशः विशेषाभिधानम्। (आव. नि. मलय. वृ. १३७, पृ. १४६)। ८. निर्दिश्यते इति निर्देशः, निर्देशश्च स्वरूपकथनम्। (त. वृत्ति श्रुत. १–७)।

१ विवक्षित वस्तु के स्वरूप के कथन करने को निर्देश कहते हैं। २ निर्देश दो प्रकार का है— श्रोताओं को जिस प्रकार से निश्चय होता है, उस प्रकार के कथन का नाम आदेशनिर्देश है, अथवा पाखण्डियों का निराकरण करके कथन करना, इसे आदेशनिर्देश कहा जाता है। गत्यादि मार्गणाओं की विशेषता से रहित जीवादि गुणस्थानों के प्रमाण के निरूपण को ओघनिर्देश कहते हैं।

निर्देशदोष—निर्देशदोषो यत्र उद्दिश्य पदानामेकवाक्यभावो न क्रियते, यथा देवदत्तः स्थाल्यामोदनं पचतीति वक्तव्ये पचतिशब्दानभिधानम्। (आव. नि. मलय. वृ. ८८४, पृ. ४८४)।

जहां उद्देश्य करके पदों में एकवाक्यता नहीं की जाती है वहां निर्देशदोष होता है। जैसे—देवदत्त थाली में ओदन पकाता है, इस विवक्षा में 'पचति (पकाता है)' शब्द का कथन न करना। यह ३२ सूत्रदोषों में ३०वां दोष है।

निर्दोषत्व — १. दोषास्तावदज्ञान-राग-द्वेषादय उक्ताः, निष्क्रान्तो दोषेभ्यो निर्दोषः। (अष्टस. ६, पृ. ६२)। २. आवरण-रागादयो दोषास्तेभ्यो निष्क्रान्तत्वं हि निर्दोषत्वम्। (न्यायदी. पृ. ४५)।

१ अज्ञान, राग और द्वेष आदि दोषों से जो रहित हो चुका है उसे निर्दोष कहा जाता है।

निर्मम—निर्ममो ममेदमिति संकल्पनिष्क्रान्तः। (अन. ध. स्वो. टी. ४–१०६)।

'यह मेरा है' इस प्रकार के संकल्प से जो रहित है उसे निर्मम कहते हैं।

निर्मल बोध—निर्मलबोधोऽप्येवं श्रुतभावसंभवो ज्ञेयः। समगमंशास्त्रयोगात् श्रुत-चिन्ता-भावनासारः॥ (षोडश. ४–६)।

श्रुतभाव के प्ररूपक शास्त्र के सम्बन्ध से जो श्रुतपूर्वक ज्ञान प्रगट होता है उसे निर्मल बोध जानना चाहिए। वह श्रुतसार, चिन्तासार और भावनासार के भेद से तीन प्रकार का है।

निर्माण—१. यन्निमित्तात्परिनिष्पत्तिस्तन्निर्माणम्। (स. सि. ८–११; त. श्लो. ८–११; भ. आ. मूला. २१२)। २. जाति-लिङ्गाकृतिव्यवस्थानियामकं निर्माणनाम। (त. भा. ८–१२)। ३. यन्निमित्ता परिनिष्पत्तिस्तन्निर्माणम्। अंगोपांगानां यन्निमित्ता परिनिष्पत्तिस्तन्निर्माणमिति ज्ञायते। (त. भा. ८, ११, ५)। ४. सर्वजीवानामात्मीयात्मीयावयवविन्यासनियमकारणं कलाकौशलोपेतवर्द्धकिवत्। (त. भा. हरि. व सिद्ध. वृ. ८–१२)। ५. निर्माणनाम यदुदयात् सर्वजीवानां जातौ अङ्गोपाङ्गनिवेशो भवति। जाति-लिङ्गाकृतिव्यवस्थानियम इत्यन्ये। (आ. प्र. टी. २४)। ६. नियतं मानं निमानम्। तं दुविहं पमाणणिमिणं संठाणणिमिणमिदि। जस्स कम्मस्स उदएण जीवाणं दो वि णिमिणाणि होंति तस्स कम्मस्स णिमिणमिदि सण्णा। (ध. पु. ६, पृ. ६६); जस्स कम्मस्सुदएण अंग-पच्चंगाणं ठाणं पमाणं च जादिवसेण णियमिज्जदि तं णिमिणणामं। (ध. पु. १३, पृ. ३६६)। ७. देहंगावयवाणं लिंगाणिट्ठ-जाइणियमणं जं च। तंहि सुत्तहारसरिसो णिम्माणे होइ हु विवागो॥ (कर्मवि. म. १४८)। ८. यदुदयात् स्वजात्यनुरूपाण्यङ्गोपाङ्गानि निष्पद्यन्ते तन्निर्माणनाम। (पंचसं. प. स्वो. वृ. ३–१२७, पृ. ३८)। ९. यदुदयाज्जातो जातौ जीवदेहेषु स्थादिलिङ्गाकारनियमो भवति तत्सूत्रधारसमानं निर्माणनामेति। (तत्त्वा. भाष्य. वृ. ४२)। १०. यदुदयाच्छरीरेष्वङ्ग-प्रत्यङ्गानां प्रतिनियतस्थानवृत्तिता भवति तत्सूत्रधारकल्पं निर्माणनाम। (कर्मस्त. गो. वृ. १०, पृ. २०)। ११. यदुदयाज्जन्तुशरीरेषु स्व-स्वजात्यनुसारेणाङ्ग-प्रत्यङ्गानां प्रतिनियतस्थानवर्तिता भवति तन्निर्माणनाम, तच्च सूत्रधारकल्पम्। (प्रज्ञाप. मलय. वृ. २९३, पृ. ४७५; पंचसं. मलय. वृ. ३–७, पृ. ११६; प्रव. सारो. वृ. १२६६)। १२. यदुदयात् परिनिष्पत्ति-

भवति तत् निर्माणं द्विप्रकारं जातिनामकर्मोदयापेक्षं ज्ञातव्यम्। स्थाननिर्माणं प्रमाणनिर्माणं चक्षुरादीनां स्थानं सृष्टवां च निर्मापयति। निर्मीयते अनेनेति निर्माणम्। (त. वृत्ति श्रुत. ८-११)।

१ जिस कर्म के निमित्त से परिनिष्पत्ति—जाति नामकर्म की अपेक्षा रखते हुए चक्षुरादि शरीरावयवों के स्थान और प्रमाण की रचना—होती है वह निर्माण नामकर्म कहलाता है। २ जो कर्म जाति-विशेष में स्त्री-पुरुषादि के लिंग और आकार का नियामक है उसे निर्माण नामकर्म कहते हैं। ३ जिसके उदय से सब जीवों के जाति के अनुसार अंग और उपांगों का निवेश (स्थापन या रचना) होता है उसे निर्माण नामकर्म कहा जाता है। अन्य कितने ही आचार्य उसे जातिगत लिंग और आकार की व्यवस्था का नियामक मानते हैं।

निर्याणकथा—निर्याणं निर्गमः, तत्कथा निर्याण-कथा। यथा—वज्जताउज्जममदबंदिसद्दं मिलंतसा-मंतं। संखुद्धसेन्नमुद्घुयचिंधं नयरा निवे नियइ॥ (स्थाना. अभय. वृ. २८२, पृ. २००)।

राजा आदि के नगर से निकलने की कथा को निर्याणकथा कहा जाता है।

निर्यापक—१. छेदेसूवट्ठवगा सेसा णिज्जावया समणा। (प्रव. सा. ३-१०)। २. कप्पाकप्पे कुसला समाधिकरणुज्जदा सुदरहस्सा। गीदत्था भयवंता अडदालीसं तु णिज्जवया॥ (भ. आ. ६४८)। ३. निर्यापका आराधकस्य समाधिसहायाः। (भ. आ. विजयो. व मूला. टी. ६६)। ४. यः पुनरनन्तरं सविकल्पछेदोपस्थापनसंयमप्रति-पादकत्वेन छेदं प्रत्युपस्थापकः स निर्यापकः, योऽपि छिन्नसंयमप्रतिसन्धानविधानप्रतिपादकत्वेन छेदे सत्युपस्थापकः सोऽपि निर्यापक एव। (प्रव. सार. अमृत. वृ. ३-१०)। ५. तयोश्छेदयोः (देश-सकलछेदयोः) प्रायश्चित्तं दत्त्वा संवेग-वैराग्यजनक-परमागमवचनैः संवरणं कुर्वन्ति ते निर्यापकाः शिक्षागुरवः श्रुतगुरवश्चेति भण्यन्ते। (प्रव. सा. अम. वृ. ३-१०)।

१ दीक्षादायक गुरु के अतिरिक्त जो देश और सकल दोनों ही प्रकार के छेद (व्रतभंग) में व्रत का आरोपण करने वाला होता है वह निर्यापक श्रमण कहलाता है। २ जो कल्प्य और अकल्प्य की—ग्राह्य और अग्राह्य भोजन-पान की—परीक्षा में कुशल होते हैं, समाधि के कराने में—आराधक के चित्त के स्वस्थ करने में—उद्यत होते हैं, तथा जो प्रायश्चित्त ग्रन्थों के रहस्य के साथ सूत्रार्थ के ज्ञाता होते हैं ऐसे मुनियों को निर्यापक कहते हैं।

निर्यापकपरिग्रह—निर्यापकपरिग्रहः आराधकस्य समाधिसहायपरिवर्गः। (अन. ध. स्वो. टी. ७, ६८)।

समाधिमरण के लिए उद्यत आराधक की समाधि में सहायक परिवर्ग (परिजनसमुदाय) को निर्यापक-परिग्रह कहते हैं।

निर्युक्ति—देखो आवश्यकनिर्युक्ति। १. जुत्ति त्ति उवायत्ति य णिरवयवा होदि णिज्जुत्ति॥ (मूला. ७-१४)। २. णिज्जुत्ता ते अत्था जं बद्धा तेण होइ णिज्जुत्ती। तहवि य इच्छावेइ विभासिउं सुत्त-परिवाडी॥ (आव. नि. ८८)।

१ निर्युक्ति में 'नि' का अर्थ निरवयव या सम्पूर्ण तथा 'युक्ति' का अर्थ है उपाय। तदनुसार अभीष्ट तत्त्व के उपाय को निर्युक्ति जानना चाहिए। २ 'नि' का अर्थ निश्चय या अधिकता है तथा 'युक्त' का अर्थ सम्बद्ध है। तदनुसार जो जीवा-जीवादि तत्त्व सूत्र में निश्चय से या अधिकता से प्रथम ही सम्बद्ध हैं, उन निर्युक्त तत्त्वों की जिसके द्वारा व्याख्या की जाती है उसे निर्युक्ति कहा जाता है।

निर्लाञ्छन—१. नासावेधोऽङ्कनं मुष्कच्छेदनं पृष्ठ-गालनम्। कर्ण-कम्बलविच्छेदो निर्लाञ्छनमुदीरि-तम्॥ (त्रि. श. पु. च. ६, ३, ३४६; योगशा. ३-१११); निनरां लाञ्छनमङ्गावयवच्छेदः, तेन कर्म जीविका निर्लाञ्छनाकर्म। (योगशा. स्वो. विव. ३-१११)। २. निर्लाञ्छनं निर्लाञ्छनकर्म वृषभादेर्नासावेधादिना जीविका, निर्लाञ्छनं निरतां लाञ्छनमङ्गावयवच्छेदः॥ (सा. ध. ५-२२)।

१ बैल आदि की नासिका का वेधन करना, गाय व घोड़े आदि को दागना—गरम लोहशलाका आदि से चिह्नित करना, बैल व घोड़े आदि को बधिया करना, ऊंटों की पीठ का गालना, गाय-बैल के कानों एवं गलकम्बल का विच्छेद करना; इत्यादि को निर्लाञ्छनकर्म कहते हैं।

निर्लेपन—आहारसरीरिंदिय-आणपाणमप्पज्जत्तीणं णिव्वत्ती णिल्लेवणं णाम। (धव. पु. १४, पृ. ५०७)।

आहार, शरीर, इन्द्रिय और आनपान अपर्याप्तियों की निर्वृत्ति का नाम निर्लेपन है।

निर्लेपनस्थान—१. जत्थ छप्पज्जत्तिणिमित्तं पोग्गलाणमागमो थक्कदि तण्णिल्लेवणट्ठाणं णाम। ×××एवमागच्छमाणे जत्थ पंचण्णं पज्जत्तीणं दव्वुवयरणाणमक्कमेण णिप्पत्ती होदि तण्णिल्लेवणट्ठाणं णाम। (धव. पु. १४, पृ. ५२७)। २. एगसमये बद्धकम्मपरमाणवो बंधावलियमेत्तकाले वोलिदे पच्छा उदयं पविसमाणा केत्तियं पि कालं सांतर-णिरंतरसरूवेणुदयमागंतूण जम्हि समयम्हि सव्वे चेव णिस्सेसमुदयं कादूण गच्छंति तेसिं णिरुद्धभवसमयप्पबद्धपदेसाण तण्णिल्लेवणट्ठाणमिदि भण्णदे। (जयध.—कसायपा. पृ. ८१८, टि. नं. २)।

२ कर्मलेप के दूर होने के स्थान को निर्लेपनस्थान कहते हैं। अर्थात् एक समय में बंधे हुए कर्मपरमाणु बन्धावली के पश्चात् क्रमशः उदय में प्रविष्ट होकर सान्तर या निरन्तररूपसे अपना फल देते हुए जिस समय में सभी निःशेषरूप से निर्जीर्ण हो जाते हैं उसे निर्लेपनस्थान कहते हैं।

निर्वर्गणा—बंधोदयजहण्णकिट्टीणमणंतगुणहाणीए ओसरणविसप्पा णिव्वग्गणा। (जयध. अ. प. ११८२)।

बन्ध और उदय सम्बन्धी जघन्य कृष्टियों के अनन्तगुणहानि के क्रम से होने वाले अपसरणभेदों को निर्वर्गणा कहते हैं।

निर्वर्गणाकाण्डक—१. एदिस्से अद्धाए (अधापवत्तकरणद्धाए) संखेज्जदिभागो णिव्वग्गणकंडयं णाम। (धव. पु. ६, पृ. ६१५)। २. विवक्खियसमयपरिणामाणं जत्तो परमणुकट्टिवोच्छेदो तं णिव्वग्गणकंडयमिदि भण्णदे। (जयध. अ. प. ६४६—बद्धं. पु. ६, पृ. २१५ का टि. ३)। ३. ताए अधापवत्तद्धाए संखेज्जभागमेत्तं तु। अणुकट्टीए अद्धा णिव्वग्गणकंडयं तं तु॥ (ल. सा. ४३)। ४. वर्गणा समयसाधुवयम्, ततो निष्क्रान्ता उपर्युपरि समयवर्तिपरिणामखण्डाः, तेषां काण्डकं पर्व निर्वर्गणाकाण्डकम्। (ल. सा. डी. ४३)।

१ अधःप्रवृत्तकरणकाल के संख्यातवें भाग मात्र परिणामस्थानों का नाम निर्वर्गणाकाण्डक है।

निर्वर्तनकाण्डक—१. णिव्वत्तणकंडयं णाम जहण्णियाए ठितीए अणुकड्ढी जत्थ णिट्ठिया तं णिव्वत्तणकंडयं वुच्चति। (कर्मप्र. चू. बं. क. ६५, पृ. १३७)। २. निर्वर्तनकांडकं नाम यत्र जघन्यस्थितिबन्धारम्भभाविनामनुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्ता तत्पर्यन्ता मूलतः आरभ्य स्थितयः पल्योपमासंख्येयभागमात्रप्रमाणा उच्यन्ते। (कर्मप्र. मलय. चू. बं. क. ६५)।

२ जघन्य स्थिति के बन्ध से लेकर होने वाले अनुभागबन्धाध्यवसायस्थानों की अनुकृष्टि के समाप्त होने तक प्रारम्भ से लेकर पल्योपम के असंख्यातवें भाग प्रमाण स्थितियों का नाम निर्वर्तनकाण्डक है।

निर्वर्तना—देखो निर्वर्तनाधिकरण। १. निर्वर्त्यते इति निर्वर्तना निष्पादना। (स. सि. ६-६; त. सुखबो. ६-६)। २. निर्वर्त्यते इति निर्वर्तना। (त. वा. ६, ६, १)। ३. हिंसोपकरणतया निर्वर्त्यते इति निर्वर्तना। (अन. ध. स्वो. टी. ४-२८)।

१ जो रचा जाता है उसका नाम निर्वर्तना है। ३ हिंसा के उपकरणरूप से जिसकी रचना की जाती है उसे निर्वर्तना कहते हैं।

निर्वर्तनाधिकरण—१. निर्वर्तनाधिकरणं द्विविधं मूलगुणनिर्वर्तनाधिकरणमुत्तरगुणनिर्वर्तनाधिकरणं चेति। तत्र मूलगुणनिर्वर्तनं पञ्चविधम्—शरीरवाङ्मनःप्राणापानाश्च। उत्तरगुणनिर्वर्तनं काष्ठपुस्त-चित्रकर्मादि। (स. सि. ६-६)। २. तत्र निर्वर्तनाधिकरणं द्विविधं मूलगुणनिर्वर्तनाधिकरणमुत्तरगुणनिर्वर्तनाधिकरण च। तत्र मूलगुणनिर्वर्तना पञ्च शरीराणि वाङ्मनःप्राणापानाश्च। उत्तरगुणनिर्वर्तना काष्ठ-पुस्त-चित्रकर्मादीनि। (त. भा. ६-१०)। ३. निर्वर्तनाधिकरणं द्विविधं मूलोत्तरभेदात्। ××× तत्र मूलं पंचविधानि शरीराणि वाङ्मनःप्राणापानाश्च। उत्तरं काष्ठ-पुस्त-चित्रकर्मादि। (त. वा. ६, ६, १२)। ४. दुःप्रयुक्तं शरीरं हिंसोपकरणतया निर्वर्त्यते इति निर्वर्तनाधिकरणं भवति। उपकरणानि च सच्छिद्राणि यानि जीववधनिमित्तानि निर्वर्तन्त तान्यपि निर्वर्तनाधिकरणम्। (भ. आ. विजयो. ८१४)।

१ निर्वर्तनाधिकरण दो प्रकार का है—मूलगुण-

निर्वर्तनाधिकरण और उत्तरगुणनिर्वर्तनाधिकरण। इनमें मूलगुणनिर्वर्तन पांच प्रकार का है—शरीर, वचन, मन, प्राण और अपान। काष्ठकर्म, पुस्तकर्म और चित्रकर्म आदि को उत्तरगुणनिर्वर्तन कहा जाता है। ४ दुष्प्रवृत्तियुक्त शरीर को हिंसा के उपकरणस्वरूप से निर्वर्तित करने का नाम निर्वर्तनाधिकरण है। उपकरण भी जो जीवघात के निमित्त छेदयुक्त रचे जाते हैं उन्हें भी निर्वर्तनाधिकरण कहा जाता है।

निर्वर्तनाधिकरणिकी — १. यच्चादितस्तयोः (खड्ग-तन्मुष्ट्यादिकयोः) निर्वर्तनं सा निर्वर्तनाधिकरणिकीति। (स्थाना. अभय. वृ. २–६०)। २. तथा निर्वर्तनमसि-शक्ति कुन्त तोमरादीनां मूलतो निष्पादनम्, तदेवाधिकरणिकी निर्वर्तनाधिकरणिकी, पञ्चविधस्य वा शरीरस्य निष्पादन निर्वर्तनाधिकरणिकी। (प्रज्ञाप. मलय. वृ. २२–२७६, पृ. ४३६)।

१ प्रथमतः तलवार व उसकी मुट्ठी आदि को बनाना, यह निर्वर्तनाधिकरणिकी क्रिया कहलाती है। २ तलवार, शक्ति, भाला और बाण आदि के उत्पन्न करने को अथवा पांच प्रकार के शरीर के निष्पादन को निर्वर्तनाधिकरणिकी क्रिया कहते हैं।

निर्वहन—१. निराकुलं वहनं धारणं निर्वहणम्, परीषहाद्युपनिपातेऽप्याकुलतामन्तरेण दर्शनादिपरिणती वृत्तिः। (भ. आ. विजयो. २)। २. परीषहाद्युपनिपातेऽपि निराकुलं लाभादिनिरपेक्षं वा वहनं धारणम्। (भ. आ. मूला. २)।

सम्यग्दर्शनादि का निराकुलतापूर्वक धारण करना तथा परीषह आदि के उपस्थित होने पर भी उनमें परिणत रहना—उनकी विराधना न करना, इसका नाम निर्वहन है।

निर्वाण—१. पारतन्त्र्यनिवृत्तिलक्षणस्य निर्वाणस्य (पारतन्त्र्यनिवृत्तिलक्षणं निर्वाणम्) शुद्धात्मतत्त्वोपलम्भरूपस्य ×××। (पंचा. का. अमृत. वृ. २)। २. सकलकर्मविमोचनलक्षणनिर्वाणम्। (पंचा. का. जय. वृ. २)। ३. निर्वान्ति राग-द्वेषोपतप्ताः शीतीभवन्त्यस्मिन्निति निर्वाणम्। (योगशा. स्वो. विव. ४–४६)।

१ परतंत्रता की निवृत्ति अथवा शुद्ध आत्मतत्त्व की उपलब्धि को निर्वाण कहते हैं। ३ जहां राग द्वेष से सन्तप्त प्राणी शीतलता को प्राप्त करते हैं उसका नाम निर्वाण है।

निर्वाणपथ—देखो निर्वाणमार्ग। सम्मद्दंसणदिट्ठो णाणेण य सुट्ठु तेहि उवलद्धो। चरणकरणेण पहओ निव्वाणपहो जिणिंदेहिं॥ (आव. नि. ६१०)।

जो अरहन्तों के द्वारा समीचीन दर्शन से देखा गया है, ज्ञान के आश्रय से यथावस्थित जाना गया है, तथा चरण (व्रतादि) और करण (पिण्डविशुद्धि आदि) से आराधित है; वही मोक्षपथ है।

निर्वाणमार्ग— निर्वृत्तिनिर्वाणम्, सकलकर्मक्षयजमात्यन्तिकं सुखमित्यर्थः, निर्वाणस्य मार्गो निर्वाणमार्ग इति। (आव. नि. हरि. वृ. ४, पृ. ७६१)।

समस्त कर्मों के क्षय से जो आत्यन्तिक सुख प्राप्त होता है, उसका नाम निर्वाण है, इस निर्वाण के सम्यग्दर्शनरूप मार्ग को निर्वाणमार्ग कहते हैं।

निर्वाणसुख—संसारसुखमतीत्यात्यन्तिकमैकान्तिकं निरुपमं नित्यं निरतिशयं निर्वाणसुखम्। (त. भा. सिद्ध. वृ. १०–७)।

सांसारिक सुख का अतिक्रमण करके जो आत्यन्तिक, ऐकान्तिक (अविनश्वर), अनुपम, नित्य और निरतिशय सुख है वह निर्वाणसुख कहलाता है।

निर्वापकथा—पक्वापक्वान्नभेदा व्यञ्जनभेदा वेति निर्वापकथेति। ××× पक्कापक्को य होइ निव्वाओ। (स्थाना. अभय. वृ. ४, २, २८२)।

पक्व या अपक्व अन्नभेदों की अथवा नाना प्रकार के व्यञ्जनभेदों—शाक व पापड़ आदि रसव्यञ्जक वस्तुओं—की चर्चा को निर्वापकथा कहते हैं।

निर्विकृति—१. यथा रूक्षाहारस्य भोजनं तक्रेण वा शक्त्याद्यपेक्षया। विकृतयो रसाः, निर्गता विकृतयो यस्या भुक्तेः सा निर्विकृतिः। (प्रायश्चित्त चू. १, १२)। २. निर्विकृतिः—विक्रियेते जिह्वा-मनसी येनेति विकृतिर्गोरसेक्षुरस-फलरस-धान्यरसभेदाच्चतुर्धा। तत्र गोरसः क्षीर-घृतादिः, इक्षुरसः खण्ड-गुडादिः, फलरसः द्राक्षाम्रादिनिष्यन्दः, धान्यरसस्तैल-मण्डादिः। अथवा यद्येन सह भुज्यमान स्वदते तत्तत्र विकृतिरित्युच्यते। विकृतेर्निष्क्रान्तं भोजनं निर्विकृति। (सा. ध. स्वो. टी. ५–३५)।

२ जिस गोरस, इक्षुरस, फलरस, और धान्यरस से जिह्वा एवं मन विकार को प्राप्त होते हैं उसे विकृति कहा जाता है। अथवा जो जिसके साथ

जाने से सुस्वादु बनता है उसे विकृति समझना चाहिए। इस प्रकार की विकृति से जो भोजन-रहित होता है उसे निर्विकृति कहते हैं।

निर्विचिकित्स—देखो निर्विचिकित्सा अंग। १. विचिकित्सा मतिविभ्रमः, निर्गता विचिकित्सा मतिविभ्रमो यतोऽसौ निर्विचिकित्सः। ×××यद्वा साधुजुगुप्सारहितः। (वसुनं. श्रि. हरि. वृ. १८२; ब. वि. मु. वृ. २–११; व्यव. भाष्य. वृ. १, पृ. २७)। २. तथा निर्गता विचिकित्सा चित्तविप्लुतिर्विद्वज्जुगुप्सा वा यस्यासौ निर्विचिकित्सः। (सूत्रकृ. सू. शी. वृ. २, ७, ६६)। ३. विचिकित्सा फलं प्रति सन्देहः, विदः विज्ञाः, ते च तत्त्वतः साधव एव, तज्जुगुप्सा वा; तदभावो निर्विचिकित्सं निर्विज्जुगुप्सं वा। (उत्तरा. ने. वृ. २८–३१)।

१ विचिकित्सा का अर्थ मतिविभ्रम—युक्ति और आगम से संगत भी अर्थ में फल के प्रति संमोह (अस्थिरता) है। इस प्रकार के मतिविभ्रम से जो रहित है उसे निर्विचिकित्स कहते हैं। अथवा सामान्तर से उसे निर्विद्वज्जुगुप्स—विद्वान् साधुओं के विषय में ग्लानि से रहित—भी कहा जाता है। यह दर्शनाचार का तीसरा भेद है।

नीचैर्वृत्ति—१. गुणोत्कृष्टेषु विनयेनावनतिर्नीचैर्वृत्तिः। (स. सि. ६–२६)। २. गुरुष्ववनतिर्नीचैर्वृत्तिः। गुणोत्कृष्टेषु विनयेन अवनतिर्नीचैर्वृत्तिरित्याख्यायते। (त. वा. ६, २६, ३)। ३. नीचैर्वृत्तिः—अभ्युत्थानासनदानाञ्जलिप्रग्रह-यथार्हविनयकरणरूपं नीचैर्वर्तनम्। (त. भा. हरि. व सिद्ध. वृ. ६–६)। ४. गुरुष्ववनतिर्नीचैर्वृत्तिः। (त. श्लो. ६–२६)। ५. गुणोत्कृष्टेषु विनयेन प्रह्वीभावः नीचैर्वृत्तिः। (त. वृत्ति श्रुत. ६–२६)।

१ जो गुणों से उत्कृष्ट हैं उनको विनयपूर्वक नमस्कार आदि करना, इसे नीचैर्वृत्ति कहा जाता है।

नीतिशास्त्र— तंत्रापायौ[वापौ] नीतिशास्त्रम्। स्वमण्डलपालनाभियोगस्तंत्रम्। परमण्डलावाप्त्यभियोगोऽवापः। (नीतिवा. ३०, ४५–४७)।

अपने राज्य के भलीभांति परिपालन को तंत्र कहते हैं। दूसरे राज्य के प्राप्त करने को अवाप कहते हैं। तंत्र और अवाप इन दोनों के प्रतिपादन करने वाले शास्त्र को नीतिशास्त्र कहते हैं।

नीरजस्क—नीरजस्का इत्यष्टविधकर्मविप्रमुक्ताः। (वशवै. सू. हरि. वृ. ३–३४, पृ. ११६)।

आठ प्रकार के कर्म-रज से रहित सिद्ध जीवों को नीरजस्क कहते हैं।

नीललेश्या—१. मंदो बुद्धिविहीणो णिव्विण्णाणी य विसयलोलो य। माणी माई य तहा आलस्सो चेव भेज्जो य॥ णिद्दा-वंचणबहुलो धण-धण्णे होइ तिव्वसण्णाओ। लक्खणमेयं भणियं समासओ णीललेस्सस्स॥ (प्रा. पंचसं. १, १४४–४५); धव. पु. १, पृ. ३८६ व पु. १६, पृ. ४६०–६१ उद्; गो. जी. ५०६–१०)। २. आलस्य-विज्ञानहानि-कार्यानिष्ठापन-भीरुता-विषयातिगृद्धि-माया-तृष्णाति-मान-वंचनाऽनृतभाषण-चापलातिलुब्धत्वादि नीललेश्यालक्षणम्। (त. वा. ४, २२, १०)। ३. कसायाणुभागफद्दयाणमुदयमागदाणं जहण्णफद्दयप्पहुडि जाव उक्कस्सफद्दया त्ति ठइदाणं छब्भागविहत्ताणं ××× पंचमभागो तिव्वयरो, तस्सुदएण आवकसाओ णीललेस्सा णाम। (धव. पु. ७, पृ. १०४); दावण्णादिसु पावदविवज्जियं णिव्विण्णाणं णिब्बुद्धि माण-मायबहुलं णिद्दालुयं सलोहं हिंसादिसु अण्णिमज्झवसायं कुणइ णीललेस्सा। (धव. पु. १६, पृ. ४६०)। ४. नीलवर्णद्रव्यावष्टम्भान्नीललेश्या। (त. भा. सिद्ध. वृ. २–६)। ५. कोपी मानी मायी लोभी रागी द्वेषी मोही शोकी। द्विषः क्रूरश्चण्डश्चौरो मूर्खः स्तब्धः स्पर्द्धाकारी॥ निद्रालुः कामुको मन्दः कृत्याकृत्य[त्या]विचारकः। महामूर्च्छो महारम्भो नीललेश्यो निगद्यते॥ (पंचसं. अमित. १, २७४–७५, पृ. ३५)। ६. निर्बुद्धिर्मानवान् मायी मन्दो विषयलम्पटः। निर्विज्ञानोऽलसो भीरुनिद्रालुः परवंचकः॥ नानाविधे वने धान्ये सर्वत्रैवातिमूर्च्छितः। सारम्भो नीलया प्राणी लेश्यया संयुतो भवेत्॥ (भ. आ. मूला. १६०८)।

१ जो काम करने में मन्द हो, विचारशून्य हो, विशिष्ट ज्ञान से रहित हो, विषयलोलुपी हो, मानयुक्त हो, मायाचारी हो, आलसी हो, अभेद्य हो—जिसके अभिप्राय को समझना अशक्य हो, बहुत निद्रालु हो, दूसरों के ठगने में कुशल हो तथा धनधान्य का तीव्र अभिलाषी हो; उसे नीललेश्या वाला जानना चाहिए। ४ नील द्रव्य के आश्रय से नीललेश्या हुआ करती है।

नीलवर्णनाम—जस्स कम्मस्स उदएण सरीरपोग्गलाणं णीलवण्णो उप्पज्जदि तं णीलवण्णणामं। (धव. पु. ६, पृ. ७४); जस्स कम्मस्स उदएण सरीरे णीलवण्णणिप्पत्ती होदि तं णीलवण्णणामं। (धव. पु. १३, पृ. ३६४)।

जिस कर्म के उदय से शरीरपुद्गलों का वर्ण नीला होता है उसे नीलवर्ण नामकर्म कहते हैं।

नीवी—आय-व्ययविशुद्धं द्रव्यं नीवी। (नीतिवा. १८–५२, पृ. १८८)।

आय (आमदनी) और व्यय (खर्च) से विशुद्ध (रहित) द्रव्य को नीवी कहते हैं। अमरकोष (२, ६, ८०) के अनुसार नीवी नाम मूल द्रव्य का है।

नीहारचारण— नीहारमवष्टम्याप्कायिकजीवपीडामजनयन्तो गतिमसङ्क्रामयन्तो नीहारचारणाः। (योगशा. स्वो. विव. १–६, पृ. ४१; प्रव. सारो. वृ. ६०१, पृ. १६६)।

हिम का आश्रय लेकर अप्कायिक जीवों की विराधना न करते हुए गमन करने वाले साधुओं को नीहारचारण कहते हैं।

नीहारप्रायोपगमन—उवसग्गेण य आहरिदो सो अण्णत्थ कुणदि जं कालं। तम्हा वुत्तं णीहारमदो अण्णं अणीहारं ॥ (भ. आ. २०७०)।

उपसर्ग के द्वारा अपहृत होकर जो अन्यत्र मृत्यु को प्राप्त होता है उसके मरण को नीहारप्रायोपगमन मरण कहते हैं।

नृशंसत्व—नृशंसत्वं क्रूरकर्मकारिता। (योगशा. स्वो. विव. २-८४)।

क्रूर कर्म करनेरूप स्वभाव को नृशंसत्व कहते हैं।

नेत्रसंस्कार—प्रक्षालनांजनादिको नेत्रसंस्कारः। (भ. आ. मूला. ६३)।

आंखों के धोने और अंजन आदि लगाने को नेत्र-संस्कार कहते हैं।

नेपथ्यकथा—तासामेव अन्यतमायाः कच्छाबन्धादिनेपथ्यस्य यत्प्रशंसादि नेपथ्यकथेति। यथा—धिग्नारीरौद्रीच्या बहुवसनाच्छादिताङ्गलतिकत्वात्। यद् यौवनं न यूनां चक्षुर्मोदाय भवति सदा ॥ (स्थाना. ४, २, २८२)।

आन्ध्र आदि की स्त्रियों में से किसी एक के कच्छा-बन्ध (कमर का वस्त्र) आदि रूप वेष की प्रशंसा आदि करने को नेपथ्य कथा कहते हैं।

नेम—नेमा नाम भूमिभागादूर्ध्वं निष्क्रामन्तः प्रदेशाः। (जम्बूद्वी. शा. वृ. सू. ४ व ८, पृ. २३ व ४८)।

भूभाग से ऊपर निकलते हुए प्रदेशों को नेम कहते हैं।

नेमि—धर्म-चक्रस्य नेमिवन्नेमिः, तथा गर्भस्थे भगवति जनन्या रिष्टरत्नमयो महानेमिर्दृष्ट इति रिष्टनेमिः, अपश्चिमादिशब्दवत् नलुपूर्वस्वेऽरिष्ट-नेमिः। (योगशा. स्वो. विव. ३-१२४, पृ. २२६)।

रथ के चाक के अन्तभाग को (परिधि को), अथवा उसके अन्त में सुरक्षा के लिए जो लोहे का घेरा (हाल) रहता है उसे नेमि कहते हैं। बाईसवें तीर्थंकर चूंकि धर्मरूप रथ के ले जाने में नेमि के समान थे, अतएव वे 'नेमि' कहलाये। अथवा माता ने उनके गर्भवास के समय अरिष्टरत्नमय विशाल रथचक्र की नेमि को देखा था, अतः उनका नाम अरिष्टनेमि प्रसिद्ध हुआ।

नैगम—देखो नैगमनय।

नैगमनय—१. अनभिनिवृत्तार्थसंकल्पमात्रग्राही नैगमः। (त. सि. १-३३)। २. निगमेषु येऽभिहिताः शब्दास्तेषामर्थः शब्दार्थपरिज्ञानं च देश-सम-ग्रग्राही नैगमः (पृ. ११८)। ××× घट इत्युक्ते योऽसौ चेष्टाभिनिर्वृत्त ऊर्ध्वकुण्डलोष्टायत-वृत्तग्रीवोऽधस्तात्परिमण्डलो जलादीनामाहरण-धारणसमर्थ उत्तरगुणनिर्वर्तनानिर्वृत्तो द्रव्यविशेषस्तस्मिन्नेकस्मिन् विशेषवति तज्जातीयेषु वा सर्वेष्वविशेषात् परिज्ञानं नैगमनयः। (पृ. १२२)। ××× आह च—नैगमशब्दार्थानामेकानेकार्थनय-गमापेक्षः। देश-समग्र-ग्राही व्यवहारी नैगमो ज्ञेयः ॥ (त. भा. १-३५, पृ. १२७)। ३. णेगेहिं माणेहिं मिणइत्ती णेगमस्स णेरुत्ती। (आव. नि. ७५५; अनुयो. गा. १३६. पृ. २६४)। ४. से जहानामए केई पुरिसे परसुं गहाय अडवीसमहुत्तो गच्छेज्जा। तं पासित्ता केई वएज्जा कहिं भवं गच्छसि? अविसुद्धो णेगमो भणइ—पत्थगस्स गच्छामि। तं च केई छिंदमाणं पासित्ता वएज्जा—किं भवं छिंदसि? विसुद्धो णेगमो भणइ—पत्थयं छिंदामि। तं च केई तच्छमाणं पासित्ता वएज्जा—किं भवं तच्छसि? विसुद्धतराओ णेगमो भणइ—पत्थयं तच्छामि। तं च कइ उक्कीरमाणं पासित्ता वएज्जा किं भवं उक्कीरसि? विसुद्धतराओ णेगमो भणइ—पत्थयं उक्कीरामि। तं च केइ (वि)लिहमाणं पासित्ता वएज्जा—किं भवं (वि) लिहसि? विसुद्ध-तराओ णेगमो भणइ—पत्थयं (वि) लिहामि। एवं विसुद्धतरस्स णेगमस्स नामाउडिओ पत्थओ। (अनुयो. सू. १४५, पृ. २२२-२३)। ५. णेगाइं माणाइं सामन्नोभयविसेसमाणाइं। जं तेहिं मिणइ तो णेगमो णओ णेगमाणोत्ति ॥ लोगत्थनिबोहा वा निगमा तेसु कुसलो भवो वाऽयं। अहवा जं नेगग-मोऽणेगपहो णेगमो तेणं। (विशेषा. २६८२-८३)।

६. अर्थसंकल्पमात्रग्राही नैगमः। निगच्छन्ति तस्मिन्निति निगमनमात्रं वा निगमः, निगमे कुशलो भवो वा नैगमः। तस्य लोके व्यापारः अर्थसंकल्पमात्र-ग्रहणं प्रस्थेन्द्र-गुह-गम्यादिषु। तद्यथा—कश्चित् प्रगृह्य परशुं पुरुष गच्छन्तमभिसमीक्ष्याह 'किमर्थं गच्छति भवान्' इति? स तस्मै आचष्टे प्रस्थार्थमिति। एवमिन्द्र-गुहादावपि। तथा 'कतरोऽत्र गमी' इत्युक्ते

आचष्टे 'अहं गमी' इति संप्रत्यगच्छत्यपि गमीति व्यवहारः। एवंप्रकारोऽन्योऽपि नैगमनयस्य विषयः। (त. भा. १, ३३, २)। ७. अन्योन्यगुणभूतैकभेदाभेदप्ररूपणात्। नैगमो ×××॥ (लघीय. ३६); स्वलक्षणभेदाभेदयोरन्यतरस्य प्ररूपणायाम् इतरो गुणः स्यादिति नैगमः। यथा जीवस्वरूपनिरूपणायां गुणाः सुख-दुःखादयः, तत्प्ररूपणायां च आत्मा। (लघीय. स्वो. वि. ३६); गुण-प्रधानभावेन धर्मयोरेकधर्मिणि। विवक्षा नैगमो ××॥ (लघीय. ६८); ८. ×××अविवक्षिततादात्म्यलक्षणत्वात् नैगमस्य। सिद्धिवि. स्वो. वृ. १०–७); विद्याविद्याविनिर्भासात् नित्यानित्यत्वसंभवात्। स्वार्थस्वरूपयोः सिद्धिः द्वयरूपेति नैगमः॥ (सिद्धिवि. १२–११, पृ. ७४७)। ९. निगम्यन्ते परिच्छिद्यन्ते इति निगमाः पदार्थाः लौकिकाः, तेषु भवो नैगमः। (त. भा. हरि. वृ. १–३४)। १०. न एकं नैकम्, प्रभूतानीत्यर्थः, नैकैर्मानैः महासत्तासामान्य-विशेषज्ञानैर्मिमीते मिनोनीति वा नैकम इति, इयं नैकमस्य निरुक्तिः। निगमेषु वा भवो नैगमः, निगमाः पदार्थपरिच्छेदाः। (आव. नि. हरि. वृ. ७५५)। ११. तत्रानेकगमो नैगमः इति कृत्वाऽऽह—अविशुद्धो नैगमो भणति अभिप्रैति 'प्रस्थकस्य गच्छामि' कारणे कार्योपचारात् ××× विशुद्धतरो नैगमो भणति—प्रस्थकं छिनत्मि। (अनुयो. हरि. वृ. पृ. १०५); न एकं नैकं, प्रभूतानीत्यर्थः। एतैः कैः? मानैः महासत्तासामान्य-विशेषज्ञानैर्मिमीते मिनोतीति वा नैकम इति नैकमस्य निरुक्तिः। निगमेषु वा भवो नैगमः, निगमाः पदार्थपरिच्छेदाः। (अनुयो. हरि. वृ. पृ. १२३)। १२. यदस्ति न तद् द्वयमतिलङ्घ्य वर्तत इति नैकगमो नैगमः, संग्रहासंग्रहस्वरूपद्रव्यार्थिको नैगमः इति यावत्। (धव. पु. १, पृ. ८४); यदस्ति न तद् द्वयमतिलङ्घ्य वर्तत इति संग्रहव्यवहारयोः परस्परविभिन्नोभयविषयावलम्बनो नैगमनयः, शब्द-शील-कर्म-कार्य-कारणाधाराधेयभूत-भविष्यद्वर्तमान-मेयोन्मेयादिकमाश्रित्य स्थितोपचारप्रभवः इति यावत्। (धव. पु. ९, पृ. १७१; जयध. १, पृ. २२१); नैकगमो नैगमः, द्रव्यपर्यायद्वयं मिथो विभिन्नमिच्छन् नैगम इति यावत्। (धव. पु. १३, पृ. १९९)। १३. अर्थसंकल्पमात्रस्य ग्राहको नैगमो नयः। (ह. पु. ५८–४३; त. सा. १–४४)। १४. तत्र संकल्पमात्रस्य ग्राहको नैगमो नयः। सोपाधिरित्यशुद्धस्य द्रव्यार्थस्याभिधानतः॥ संकल्पो निगमस्तत्र भवोऽयं तत्प्रयोजनः। तथा प्रस्थादिसंकल्पः तदभिप्राय इष्यते॥ यद्वा नैकं गमो योऽत्र स सतां नैगमो मतः। धर्मयोर्धर्मिणो वापि विवक्षा धर्म-धर्मिणोः॥ (त. श्लो. १–३३, १७, १८ व २१)। १५. द्रव्ययोः पर्याययोर्द्रव्य-पर्याययोर्वा गुण-प्रधानभावेन विवक्षायां नैगमत्वात्, नैकं गमो नैगम इति निर्वचनात्। (अष्टस. पृ. २८७)। १६. निगम्यन्ते परिच्छिद्यन्ते इति निगमाः लौकिका अर्थाः, तेषु निगमेषु भवो योऽध्यवसायो ज्ञानाख्यः स नैगमः। (त. भा. सिद्ध. वृ. १–३४)। १७. सामान्य-विशेषात्मकस्य वस्तुनो नैकेन प्रकारेणावगमः परिच्छेदो निगमस्तत्र भवो नैगमः, नैकगमो वा नैगमः — महासामान्यापान्तरालसामान्यविशेषाणां परिच्छेदकः। (सूत्रकृ. सू. शी. वृ. २, ७, ८१, पृ. १८७)। १८. जो साहेदि अदीदं वियप्परूवं भविस्समत्थं च। संपडिकालाविट्ठं सो हु णओ णेगमो णेओ॥ (कार्तिके. २७१)। १९. नैकं गच्छतीति निगमो विकल्पस्तत्र भवो नैगमः। (आलाप. पृ. १४६)। २०. सर्वेण देशादिप्रकारेणानयोर्द्रव्य-पर्याययोरतादात्म्यात् नैगमः। (सिद्धिवि. वृ. १०–७, पृ. ६७०); विद्या तत्त्वज्ञानम्, अविद्या विप्लवज्ञानम्, तयोर्विनिर्भासात् प्रतीतेः नित्यानित्यत्वसंभवो य एकत्र तस्मात् स्वार्थस्वरूपयोः स्व-स्वरूपस्य अर्थस्वरूपस्य च सिद्धिः निष्पत्तिः निर्णीतिर्वा द्वयरूपा नित्यानित्यस्वभावा इत्येवं नैगमः। (सिद्धिवि. वृ. १२–११, पृ. ७४७)। २१. राश्यन्तरोपलब्धं नित्यत्वमनित्यत्वं च नयतीति निगमव्यवस्थाभ्युपगमपरो नैगमनयः। निगमो हि नित्या-नित्य-सदसत्-कृतकाकृतकस्वरूपेषु भावेष्वपास्तसाङ्कर्यस्वभावः सर्वथैव धर्म-धर्मिभेदेन सम्पद्यत इति। (सम्मति. अभय. वृ. ३, पृ. ३१०)। २२. स्वलक्षणं पर्यायात्मकं द्रव्यं तदात्मकाः पर्यायाश्च, तस्य यो भेदाभेदौ तयोर्मध्येऽन्यतरस्य भेदस्याभेदस्य वा प्ररूपणायां क्रियमाणायां इतरो भेदप्ररूपणायामभेदस्तत्प्ररूपणायां वा भेदो गुणः स्यादित्येवंविधो नैगमो नयः। (न्यायकु. ३६, पृ. ६२३); गुण-प्रधानभावेन मुख्यामुख्यरूपतया, धर्मयोरेकस्मिन् धर्मिणि विवक्षा प्रतिपत्तुरभिसन्धिः नैगमः। (न्याय.

कु. ६८, पृ. ७८६)। २३. तत्रानिष्पन्नार्थसंकल्पमात्रग्राही नैगमः। निगमो हि संकल्पस्तत्र भवस्तत्प्रयोजनो वा नैगमः। (प्रमेयक. ६-७४, पृ. ६७६)। २४. सामान्य-विशेषादिपरस्परापेक्षानेकात्मकवस्तुनिगमनकुशलो नैगमः। (चूला. बृ. ६, ६७)। २५. नैकेन सामान्य-विशेषग्राहकत्वात्तस्यानेकेन ज्ञानेन मिनोति परिच्छिनत्तीति नैकमः, अथवा निगमाः—निश्चितार्थबोधास्तेषु कुशलो भवो वा नैगमः, अथवा नैको गमः अर्थमार्गो यस्य स प्राकृतत्वेन नैगमः। (स्थाना. अभय. वृ. ३, १, १८६)। २६. धर्मयोर्धर्मिणोर्धर्म-धर्मिणोश्च प्रधानोपसर्जनभावेन यद्विवक्षणं स नैकगमो नैगमः। (प्र. न. त. ७-७)। २७. अन्योन्यगुण-प्रधानभूतभेदाभेदप्ररूपणो नैगमः, नैकं गमो नैगमः इति निरुक्तेः। (प्रमेयर. ६-७४)। २८. न एकं नैकम्, ×××नैकैः प्रभूतसंख्यैर्मानैः—महासामान्याद्यावान्तरसामान्य-विशेषादिविषयैः प्रमाणैर्मिमीते—परिच्छिनत्ति वस्तुजातमिति नैगमः। ××× निश्चितो गमो निगमः—परस्परविविक्तसामान्यादिवस्तुग्रहणम्, स एव प्रज्ञादेराकृतिगणतया स्वार्थिकाण्प्रत्ययविधानात् नैगमः, यदि वा निगम्यन्ते परिच्छिद्यन्ते इति निगमास्तेषु भवो योऽभिप्रायो नियतपरिच्छेदरूपः स नैगमः। ××× अथवा गमाः पन्थानः, नैके गमा यस्य स नैगमः। (आव. नि. मलय. वृ. ७५५; प्रव. सारो. वृ. ८४७)। २९. नैगमः निगमो मुख्य-गौणकल्पना, तत्र भवो नयो नैगमः। (लघीय. अभय. वृ. २-९, पृ. ५८)।

१ जो अभी उत्पन्न नहीं हुआ है—भविष्य में उत्पन्न होने वाला है—ऐसे पदार्थ को जो संकल्प मात्र से ग्रहण करता है उसे नैगमनय कहते हैं। २ निगमों (जनपदों) में जो शब्द कहे गये हैं उनके अर्थ—जैसे 'घट' शब्द का अर्थ जलधारण आदि में समर्थ—तथा शब्द और अर्थ के वाच्य-वाचकभावरूप परिज्ञान को नैगमनय कहते हैं। यह नैगमनय देश (विशेष) और सकल (सामान्य) को ग्रहण करने वाला है।

नैगमाभास—१. ××× अर्थान्तरत्वोक्तौ नैगमाभास इष्यते॥ (लघीय. ३९); तदर्थान्तरताभिसन्धिः नैगमाभासः। (लघीय. स्वो. वृ. ३९); ××× अत्यन्तभेदोक्तिः स्यात्तदाकृतिः। (लघीय. ६८); तदत्यन्तभेदाभिसन्धिः नैगमाभासः। (लघीय. स्वो. वृ. ६८)। २. तेषां जीवसुखादीनां प्रक्रमादेकान्तेनार्थान्तरताभिसन्धिः नैगमाभासः। (न्यायकु. ५-३९); तयोः सुखाद्यात्मनोरत्यन्तभेदाभिसन्धिर्नैगमाभासः। ××× यतोऽसौ धर्म-धर्मिणोस्तादात्म्यं सदप्यविवक्षितत्वात् स्वदुरागमवासनाविपर्यासितमतेः प्रतिपत्तुः प्रवर्तते ततोऽसौ नैगमाभास इति। (न्यायकु. ६-६८, पृ. ७८६)। ३. सर्वथानयोरर्थान्तरत्वाभिसन्धिस्तु नैगमाभासः, धर्म-धर्मिणोः सर्वथार्थान्तरत्वे धर्मिणि धर्माणां वृत्तिविरोधस्य प्रतिपादितत्वादिति। (प्रमेयक. ६-७४)। ४. धर्मद्वयादीनामैकान्तिकपार्थक्याभिसन्धिर्नैगमाभासः। (प्र. न. त. ७-११)। ५. आदिशब्दाद् धर्मिद्वय-धर्म-धर्मिद्वययोः परिग्रहः। ऐकान्तिकपार्थक्याभिसन्धिरैकान्तिकभेदाभिप्रायो नैगमाभासो नैगमदुर्नय इत्यर्थः। (रत्नाकरा. ७-११, पृ. १२०)। ६. सर्वथाऽभेदवादस्तदाभासः। (प्रमेयर. ६-७४)। ७. अर्थान्तरत्वं गुण-गुण्यादीनामत्यन्तभेदः, तस्योक्तौ प्ररूपणायां नैगमाभास इष्यते। (लघीय. अभय. वृ. २-९, पृ. ५९)।

१ गुण-गुणी और धर्म-धर्मी आदि में अत्यन्त भेद का प्रतिपादन करना, इसे नैगमाभास माना जाता है।

नैमित्तिक—१. नैमित्तिको लक्ष्यवेधी दैवज्ञो वा। (नीतिवा. १४-३१, पृ. १७४)। २. निमित्तं त्रैकालिकं लाभालाभादिप्रतिपादकं शास्त्रम्, तद्वेत्त्यधीते वा नैमित्तिकः। (योगशा. स्वो. विव. २, १६)।

१ लक्ष्य के बेधने वाले अथवा ज्योतिषी को नैमित्तिक कहते हैं। २ तीनों कालों सम्बन्धी लाभ व अलाभ आदि के वर्णन करने वाले शास्त्र का नाम निमित्त है। इस शास्त्र को जो जानता है या पढ़ता है वह नैमित्तिक कहलाता है।

नैश्चयिक अवग्रह—तत्र नैश्चयिको नाम सामान्यपरिच्छेदः, स चैकसामयिकः शास्त्रेऽभिहितः। (त. भा. सिद्ध. वृ. १-१६)।

सामान्य के ग्रहण करने वाले ज्ञान को नैश्चयिक अवग्रह कहा जाता है। उसे शास्त्र में एकसामयिक—एक समय वाला—कहा गया है।

नैषेधिकी—१. आवस्सियं च णितो जं च अइंतो

णिसीहियं कुणइ। सेज्जा णिसीहियाए णिसीहिया-अभिमुहो होई ॥ जो होइ निसिद्धप्पा निसीहिया तस्स भावओ होइ। अणिसिद्धस्स निसीहिय केवलमेत्तं हवइ सद्दो ॥ आवस्सयंमि जुत्तो नियमणिसिद्धोत्ति होइ नायव्वो। अहवाऽवि णिसिद्धप्पा णियमा आवस्सए जुत्तो ॥ (आव. भा. १२०–२२, पृ. २६६–६७)। २. निषिद्धात्मनश्चातिचारेभ्यः क्रिया नैषेधिकीति। (आव. मि. हरि. वृ. ६६२)। ३. निषिद्धात्मा अहमस्मिन् प्रविशामीति शेषसाधूनामन्वाख्यानाय त्रासादिदोषपरिहरणार्थम् अस्यार्थस्य संसूचिका नैषेधिकी। (अनुयो. हरि. वृ. पृ. ५८)। ४. निषेधेन स्वाध्यायव्यतिरिक्तशेषव्यापारप्रतिषेधेन निर्वृत्ता नैषेधिकी। (व्यव. मलय. वृ. पृ. ५४)।

१ आवश्यिकी क्रिया निकलते हुए की जाती है और नैषेधिकी आते हुए की जाती है। जिसने अपनी आत्मा को मूल और उत्तर गुणों सम्बन्धी अतिचारों से रहित कर लिया है उसके यथार्थतः नैषेधिकी क्रिया होती है। अनिषिद्ध के तो केवल शब्द मात्र से निषेधिका होती है, न कि परमार्थ से। मूल व उत्तर गुणों के अनुष्ठानरूप आवश्यक में जो युक्त (निरत) है उसे नियम से निषिद्धात्मा जानना चाहिए। अथवा यह भी कहा जा सकता है कि निषिद्धात्मा ही आवश्यक में युक्त होता है।

नैष्ठिक ब्रह्मचारी—१. नैष्ठिकब्रह्मचारिणः समधिगतशिखालक्षितशिरोलिंगाः गणधरसूत्रोपलक्षितोरोलिंगाः,शुक्ल-रक्तवसनखण्डकोपीनलक्षितकटीलिंगाः स्नातका (सा. ध. 'स्नातकाः' स्थाने तथा') भिक्षावृत्तयो देवतार्चनपरा भवन्ति। (आ. सा. पृ. २१; सा. ध. स्वो. टी. ७–१६)। २. स नैष्ठिको ब्रह्मचारी यस्य प्राणान्तिकमदारकर्म। (नीतिवा. ५, १०, पृ. ४५)। ३. शिखा-यज्ञोपवीताकूस्त्यक्तारम्भपरिग्रहः। भिक्षां चरन्ति देवार्चां कुर्वते कक्षपट्टकम् ॥ धवलारक्तयोरेकतरैकवस्त्रखण्डकम्। चरन्ति ये च ते प्रोक्ता नैष्ठिकब्रह्मचारिणः ॥ (धर्मसं. आ. ६–२२, २३)। ४. यस्य ब्रह्मचारिणः प्राणान्तिकं मृत्युपर्यन्तं कलत्ररहितं क्रियाकाण्डं भवति स नैष्ठिकः प्रोच्यते। ××× तथा च भारद्वाजः—कलत्ररहितस्यात्र यस्य कालोऽतिवर्तते। कष्टेन मृत्युपर्यन्तो ब्रह्मचारी स नैष्ठिकः ॥ (नीतिवा. टी. ५–१०)।

१ जो शिर के चिह्न के रूप में शिखा (चोटी) को, वक्ष के चिह्नस्वरूप गणधरसूत्र (यज्ञोपवीत) को, तथा कटिभाग के चिह्नस्वरूप धवल या रक्त वस्त्रखण्ड और लंगोटी को धारण करते हुए भिक्षावृत्ति से भोजन करते हैं व देवपूजा में तत्पर रहते हैं वे नैष्ठिक ब्रह्मचारी कहलाते हैं। २ जिसका क्रियाकाण्ड आमरणान्त स्त्री से रहित होता है उसे नैष्ठिक ब्रह्मचारी कहा जाता है।

नैष्ठिक श्रावक— १. नैष्ठिकः निष्ठया चरति तत्र वा भवः। ××× धर्मे निष्ठा निर्वहणं यस्यासौ घटमानदेशसंयमो निरतिचारश्रावकधर्मनिर्वाहपर इत्यर्थः। (सा. ध. स्वो. टी. १–२०); नैष्ठिको मूलोत्तरगुणश्लाघ्यतपोऽनुष्ठाननिष्ठः। (सा. ध. स्वो. टी. २–५१); देशयमघ्नकषायक्षयोपशमतारतम्यवशतः स्यात्। दर्शनिकाद्येकादशदशावशो नैष्ठिकः सुलेश्यतरः। (सा. ध. ३–१)। २. दृष्टयादिदशधर्माणां निष्ठा निर्वहणं मता। तया चरति यः स स्यान्नैष्ठिकः साधकोत्सुकः ॥ देशयमघ्नकोपादिक्षयोपशमभावतः। श्राद्धो दर्शनिकादिस्तु नैष्ठिकः स्यात् सुलेश्यकः ॥ (धर्मसं. आ. ५–६ व ६)।

१ जो निष्ठापूर्वक धर्म का आचरण करता है वह नैष्ठिक श्रावक कहलाता है। उसकी धर्म के विषय में निर्वाहरूप निष्ठा रहती है, इसी से वह निरतिचार श्रावकधर्म का परिपालन करता है।

नैसर्गिक मिथ्यादर्शन— १. तत्रोपदेशनिरपेक्षं नैसर्गिकम्। तत्र परोपदेशमन्तरेण मिथ्याकर्मोदयवशात् यदाविर्भवति तत्त्वार्थाश्रद्धानलक्षणं तन्नैसर्गिकमिति व्यवसीयते। (त. वा. ८, १, ७)। २. मिथ्याकर्मोदयादाद्य तत्त्वाश्रद्धानलक्षणम् ॥ (ह. पु. ५८–१६३)। ३. तत्र नैसर्गिकं मिथ्यादर्शनं मिथ्यात्वकर्मोदयात् तत्त्वार्थानामश्रद्धानलक्षणं परोपदेशनं विनापि समाविर्भवति। (त. वृत्ति श्रुत. ८–१)।

१ परोपदेश के विना ही मिथ्यात्व कर्म के उदय से जो तत्त्वों का अश्रद्धान प्रकट होता है उसे नैसर्गिक मिथ्यादर्शन कहते हैं।

नैसर्गिक सम्यग्दर्शन—देखो निसर्गज सम्यग्दर्शन। १. उभयत्र सम्यग्दर्शने अन्तरङ्गो हेतुस्तुल्यो दर्शनमोहस्योपशमः क्षयः क्षयोपशमो वा, तस्मिन् सति

यद् बाह्योपदेशादृते प्रादुर्भवति तन्नैसर्गिकम्। (त. सि. १–३; त. वा. १, ३, ५)। २. जाईसरण-णिसग्गुग्गया वि न णिरागमा दिट्ठी ॥ (आव. नि. ११४२)। ३. नैसर्गिकमाश्रित्याह—जातिस्मरणात् सकाशात् निसर्गेण स्वभावेनोद्गता सम्भूता जातिस्मरणनिसर्गोद्गता × × × दृष्टिः दर्शनम्, यतः स्वयम्भूरमणमत्स्यादीनामपि जिनप्रतिमाद्याकारमत्स्यदर्शनाज्जातिमनुस्मृत्य भूतार्थालोचनपरिणाममेव नैसर्गिकसम्यक्त्वम्। (आव. नि. हरि. वृ. ११४२, पृ. ५२८)। ४. विना परोपदेशेन तत्त्वार्थप्रतिभासनम्। निसर्गो × × × ॥ (त. श्लो. १, ३, ३); तत्र प्रत्यासन्ननिष्ठस्य भव्यस्य दर्शनमोहोपशमादौ सत्यन्तरङ्गे हेतौ बहिरङ्गादपरोपदेशात्तत्त्वार्थज्ञानात् परोपदेशापेक्षाच्च प्रजायमानं तत्त्वार्थश्रद्धानं निसर्गजमधिगमजं च प्रत्येतव्यम्। (त. श्लो. १–१३, पृ. ६१)। ५. तत्त्वोपदेशव्यतिरिक्तमाद्यं × × ×॥ (धर्मप. २०–६६)। ६. किन्तु सत्यन्तरङ्गेऽस्मिन् हेतावुत्पद्यते च यत्। नैसर्गिकं हि सम्यक्त्वं विनोद्देशादिहेतुना ॥ (लाटीसं. ३–२१)।

१ दर्शनमोह के उपशम, क्षय अथवा क्षयोपशम के होने पर जो सम्यग्दर्शन बाह्य उपदेश के विना प्रादुर्भूत होता है उसे नैसर्गिक सम्यग्दर्शन कहा जाता है। २ जो दृष्टि (दर्शन) जातिस्मरण के आश्रय से स्वभावतः उत्पन्न होती है उसे नैसर्गिक सम्यक्त्व कहते हैं। इसका कारण यह है कि स्वयम्भूरमण समुद्रगत मत्स्यादिकों के जिनप्रतिमादि के आकार मत्स्य के देखने से जाति का स्मरण कर जो भूतार्थ के आलोचनरूप परिणाम होता है वही नैसर्गिक सम्यक्त्व कहलाता है।

नैसर्प निधि—१. काल-महकाल-पंडू माणवसंखा य पउम-णइसप्पा। पिंगल-णाणारयणा अट्ठुत्तरसय-जुदाणि णिहि एदे ॥ उड्ढजोग्गदव्व-भायण-धण्णायुह-तूर-वत्थ-हम्माणि। आभरण-सयलरयणा देंति कालादिया कमसो ॥ (ति. प. ४, ७३९–४०)। २. णेसप्पम्मि णिवेसा गामाकर-णगर-पट्टणाणं च। दोणमुह-मडंबाणं खंधावारावणगिहाणं ॥ (जम्बूदी. ३–६६, प्र. सारो. १२१९)। ३. काल-महकाल-माणव-पिंगल-णेसप्प-पउम-पांडु तदो। संखो णाणारयणं णवणिहिओ देंति फलमेदं ॥ उड्ढजोग्गकुसुमदामप्पहुदि भाजणयमाउहाभरणं। गेहं वत्थं धण्णं तूरं बहुरयणमणुकमसो ॥ (त्रि. सा. ८२१–२२)। ४. स्कन्धावारपुरग्रामाकरद्रोणमुखौकसाम्। मडंबपत्तनानां च नैसर्पादिनिवेशनम् ॥ (त्रि. श्रा. पु. च. १४–५७४)।

१ जो निधि प्रासादों (भवनों) को दिया करती है उसका नाम नैसर्पनिधि है। २ जिसमें ग्राम, आकर, नगर, पट्टन, द्रोणमुख, मटंब, स्कन्धावार, आपण (हाट) और गृह के निवेश की विधि—स्थापनविधि—हो उसे नैसर्पनिधि कहते हैं।

नो-अनुभागबीर्य—अप्पप्पणो उक्कस्साणुभागट्ठाणाणि बधमाणस्स अणुभागबीहं। तदूणं बंधमाणस्स णोअणुभागबीहं। (धव. पु. १६, पृ. ५०९)।

अपने अपने उत्कृष्ट अनुभागस्थानों से हीन बांधने वाले के नो-अनुभागबीर्य होता है।

नो-आगम—आगमादण्णो णोआगमो। (धव. पु. ३, पृ. १३)।

आगम से भिन्न नो-आगम कहलाता है।

नोआगम-अचित्तद्रव्यभाव— अचित्तो पोग्गल-धम्माधम्म-कालागासदव्वाणि। (धव. पु. ५, पृ. १८४)।

पुद्गल, धर्म, अधर्म, काल और आकाश ये तद्व्यतिरिक्त अचित्त नो-आगमद्रव्यभाव हैं।

नोआगम-ज्ञशरीरद्रव्यमङ्गल—तत्र ज्ञस्य शरीरं ज्ञशरीरम्, शीर्यत इति शरीरम्, ज्ञशरीरमेव द्रव्यमङ्गलं ज्ञशरीरद्रव्यमङ्गलम्। अथवा ज्ञशरीरं च तद् द्रव्यमङ्गलं चेति समासः। एतदुक्तं भवति—मङ्गलपदार्थज्ञस्य यच्छरीरमात्मरहितं तदतीतकालानुभूतभावानुवृत्त्या सिद्धशिलादितलगतमपि घृतघटादिन्यायेन नोआगमतो ज्ञशरीरद्रव्यमङ्गलमिति, मङ्गलज्ञानशून्यत्वाच्च तस्य। इह सर्वनिषेध एव नोशब्दः। (आव. हरि. वृ. पृ. ५)।

मंगल पदार्थ के ज्ञाता का जो शरीर है उसे नो-आगम-ज्ञशरीरद्रव्यमंगल कहते हैं। अभिप्राय यह है कि मंगल पदार्थ के ज्ञाता का जो निर्जीव शरीर है वह भूतकाल में अनुभूत मंगलभाव की अनुवृत्ति से सिद्धशिलातलपर स्थित होता हुआ घी के घड़े के न्याय से—व्यवहार से—नोआगमज्ञशरीरद्रव्यमंगल कहलाता है।

नोआगम-ज्ञशरीर-भव्यव्यतिरिक्तद्रव्यमंगल—ज्ञशरीर-भव्यशरीरव्यतिरिक्तं च द्रव्यमङ्गलं संयम-

तपोनियमक्रियानुष्ठाता अनुपयुक्तः। (आव. हरि. वृ. पृ. ५)।

संयम, तप और नियम क्रियाओं का अनुष्ठाता होकर भी जो वर्तमान में उपयोग से रहित है उसे नो-आगम-ज्ञशरीर-भव्यशरीरव्यतिरिक्त द्रव्यमंगल कहते हैं।

नोआगमद्रव्यकाल—जीवाजीवादिसट्ठभंगदव्वं वा णोआगमदव्वकालो। (ध. पु. ४, पृ. ३१६)।

अथवा जीव-अजीव आदि आठ भंगस्वरूप (देखिये ध. पु. ६, पृ. २४६) द्रव्य को नोआगमद्रव्यकाल कहते हैं।

नो-आगमद्रव्यदोष—णोआगमदव्वदोसो णाम जं दव्वं जेण उवघादेण उवभोगं ण एदि तस्स दव्वस्स सो उवघादो दोसो णाम। तं जहा। साडियाए अग्गिदड्ढं वा मूसगभक्खियं वा एवमादि। (कसाय-पा. चू. पृ. १६)।

जो द्रव्य जिस उपघात के निमित्त से उपभोग को प्राप्त नहीं होता है, वह उपघात उस द्रव्य का द्वेष कहलाता है। इसी को तद्व्यतिरिक्त नोआगम-द्रव्यद्वेष कहते हैं। जैसे—साड़ी का द्वेष अग्नि से जलना या चूहे से काटा जाना है।

नोआगमद्रव्यनन्दी— नोआगमतस्तु ज्ञशरीर-भव्यशरीरोभयव्यतिरिक्ता च द्रव्यनन्दी द्वादशप्रकार-स्तूर्यसंघातः—भंभा मुकुंद महल कडंब झल्लरि हुडुक्क कंसाला। काहलि तलिमा वंसो संखो पणवो य बारसमो॥ (आव. हरि. वृ. पृ. ७)।

भेरी, मुकुन्द, मृदंग, कडम्ब, झालर, हुडुक्क, कंसाल, काहल, तलिमा, वंस, शंख और पणव इन बारह प्रकार के बाजों के समूह को नोआगम-ज्ञशरीर-भव्यशरीरव्यतिरिक्त द्रव्यनन्दी कहते हैं।

नोआगमद्रव्यमङ्गल—देखो नो-आगम-ज्ञशरीर द्रव्यमङ्गल। मङ्गलपयत्थजाणयदेहो भव्वस्स वा सजीवोऽवि। नो-आगमओ दव्वं आगमरहिओत्ति जं भणियं॥ अहवा नो देसम्मि नो आगमओ तदेकदेसाओ। भूयस्स भाविणो वा ऽऽगमस्स जं कारणं देहो॥ जाणय-भव्वसरीराइरित्तमिह दव्वमंगलं होइ। वा मंगल्ला किरिआ तं कुणमाणो अणुवउत्तो॥ जं भूयभावमंगलपरिणामं तस्स वा जयं जोग्गं। जं वा सहावसोहणवन्नाइगुणं सुवण्णाई॥ तं पि व हु भाव-मंगलकारणओ मंगलंति निद्दिट्ठं। नो-आगमओ दव्वं नोसद्दो सव्वपडिसेहे॥ (विशेषा. ४४–४८)।

मंगल पदार्थ के ज्ञाता का जो निर्जीव शरीर है उसको अथवा भविष्य में जो मंगल पदार्थ का ज्ञाता होने वाला है उसके सजीव शरीर को आगम रहित होने से नोआगमद्रव्यमंगल कहा जाता है।

नोआगमद्रव्यविमोक्ष—नोआगमतस्तु ज्ञशरीर-भव्यशरीरव्यतिरिक्तो निगडादिकेषु विषयभूतेषु यो विमोक्षः स द्रव्यविमोक्षः, सुब्व्यत्ययेन वा पञ्चम्यर्थे सप्तमी, निगडादिभ्यो द्रव्येभ्यः सकाशाद्विमोक्षः द्रव्यविमोक्षः। (आचारा. नि. शी. वृ. २५८, पृ. २३६)।

विषयभूत सांकल आदि विषयक जो विमोक्ष है वह नोआगमद्रव्यविमोक्ष कहलाता है। अथवा सांकल आदिरूप बन्धन से विमुक्त होने को नोआगम-द्रव्यविमोक्ष कहते हैं।

नोआगमद्रव्यव्यतिरिक्तकर्मप्रतिक्रमण—क्षयोपशमावस्थामुपगतः चारित्रमोहः नोआगमद्रव्यव्यतिरिक्तकर्मप्रतिक्रमणम्। (भ. आ. विजयो. ११६)।

क्षयोपशम अवस्था को प्राप्त चारित्रमोहनीय कर्म को नोआगमद्रव्यव्यतिरिक्तकर्मप्रतिक्रमण कहते हैं।

नोआगमद्रव्यव्यतिरिक्तकर्मव्रत—उपशमे क्षयोपशमे वावस्थितः चारित्रमोहो नोआगमद्रव्यव्यतिरिक्त-कर्मव्रतम्। (भ. आ. विजयो. ११८५)।

उपशम अथवा क्षयोपशम अवस्था में स्थित चारित्र-मोहनीयकर्म को नोआगमद्रव्यव्यतिरिक्तकर्मव्रत कहते हैं।

नोआगमद्रव्यश्रुत—नोआगमतस्तु श्रुतपदार्थज्ञश-रीरं भूत भविष्यत्पर्यायम्। (उत्तरा. नि. शा. वृ. १–१२, पृ. ८)।

श्रुतपदार्थ के ज्ञाता के भूत-भविष्यत् पर्याय सम्बन्धी शरीर को नोआगमद्रव्यश्रुत कहते हैं।

नोआगमद्रव्यसामायिक—नोआगमद्रव्यसामायि-कं नाम यत् त्रिविकल्पं ज्ञायकशरीर-भावि-तद्व्यति-रिक्तभेदेन। सामायिकज्ञस्य यच्छरीरं तदपि सामा-यिकज्ञानकारणम्। आत्मैव शरीरमन्तरेण तस्या-भावात्। यस्य हि भावाभावौ नियमतो यदनुकरोति तत्तस्य कारणमिति हेतु-फलव्यवस्था वस्तुषु। ततः प्रत्ययसामायिकस्य कारणत्वाच्छरीरं त्रिकालगोचरं सामायिकशब्दवाच्यं भवति। (भ. आ. विजयो. ११६, पृ. २७४)।

ज्ञायकशरीर, भावी और तद्व्यतिरिक्त के भेद से तीन प्रकार की सामायिक को नोआगमद्रव्यसामायिक कहा जाता है। सामायिक के ज्ञाता का जो शरीर है वह भी सामायिकज्ञान में कारण है, क्योंकि आत्मा के समान शरीर के बिना सामायिकज्ञान सम्भव नहीं है। इसलिए प्रत्ययसामायिक का कारण होने से तीन काल सम्बन्धी शरीर भी सामायिक शब्द का अभिधेय होता है।

नोआगमद्रव्योत्तर — नोआगमतो (द्रव्योत्तरं) ज्ञशरीर-भव्यशरीरे तद्व्यतिरिक्तं च। तत्र तद्व्यतिरिक्तं त्रिधा सचित्ताचित्त-मिश्रभेदेन। तत्र सचित्तं पितुः पुत्रः, अचित्तं क्षीरात् दधि, मिश्रं जननीशरीरतो रोमादिमदपत्यम्। (उत्तरा. नि. शा. वृ. १, पृ. ३)।

ज्ञशरीर, भावी शरीर और तद्व्यतिरिक्त को नोआगमद्रव्योत्तर कहते हैं। उत्तर पदार्थ विषयक ज्ञाता का शरीर ज्ञशरीर कहलाता है। भविष्य में जो उसका ज्ञाता होने वाला है उसके शरीर को भव्य (भावी) शरीर कहा जाता है। सचित्त, अचित्त और मिश्र के भेद से तद्व्यतिरिक्त तीन प्रकार का है— पिता से होने वाला पुत्र सचित्त तद्व्यतिरिक्त है, दूध से उत्पन्न होने वाला दही अचित्त तद्व्यतिरिक्त द्रव्योत्तर है, तथा माता के शरीर से उत्पन्न होने वाला रोमादियुक्त पुत्र मिश्र तद्व्यतिरिक्त द्रव्योत्तर है।

नोआगमभाव-उपशामना—णोआगमभावुवसामणा उवसंतो कलहो जुद्धं वा इच्चेवमादि। (धव. पु. १५, पृ. २७५)।

शान्त हुए झगड़े या युद्ध आदि का नाम नोआगमभाव-उपशामना है।

नोआगमभावकर्म—णोआगमभावो पुण कम्मफलं भुंजमाणगो जीवो। (गो. क. ६६)।

कर्मफल के भोगने वाले जीव को नोआगमभावकर्म कहते हैं।

नोआगमभावकर्मप्रकृतिप्राभृत—आगमेण विणा तदट्ठुवजुत्तो णोआगमभावकम्मपयडिपाहुडमुवयारादो। (धव. पु. ९, पृ. २३०)।

आगम के बिना जो उसके अर्थ में उपयोगयुक्त है उसे नोआगमभावकर्मप्रकृतिप्राभृत कहते हैं।

नोआगमभावचतुर्विंशतिस्तव—१. चतुर्विंशतिसंख्यानां तीर्थकृतामत्र भरते प्रवृत्तानां वृषभादीनां जिनवरत्वादिगुणज्ञान-श्रद्धानपुरस्सरा चतुर्विंशतिस्तवन-पठनक्रिया नोआगमभावचतुर्विंशतिस्तव इह गृह्यते। (भ. आ. विजयो. ११६, पृ. २७४)। २. चतुर्विंशतिस्तवपरिणतपरिणामो नोआगमभावस्तव इति। (मूला. वृ. ७-४१)।

१ वृषभादि चौबीस तीर्थंकरों के जिनवरत्व आदि गुणों के ज्ञान और श्रद्धानपूर्वक चतुर्विंशतिस्तवन पढ़नेरूप क्रिया का नाम नोआगमभावचतुर्विंशतिस्तव है। २ चौबीस तीर्थंकरों की स्तुति करनेरूप परिणाम से परिणत जीव को नोआगमभावचतुर्विंशतिस्तव कहते हैं।

नोआगमभावव्यवनलब्धि—आगमेण विणा अत्थोवजुत्तो णोआगमभावचयणलद्धी। (धव. पु. ९, पृ. २२८)।

आगम के बिना जो च्यवनलब्धि के अर्थ में उपयुक्त है उसे नोआगमभावव्यवनलब्धि कहते हैं।

नोआगमभावजीव—१. जीवनपर्यायेण मनुष्यजीवत्वपर्यायेण वा समाविष्ट आत्मा नोआगमभावजीवः। (त. सि. १-५)। २. जीवनादिपर्यायाविष्टोऽन्यः। जीवनादिपर्यायेणाऽऽविष्ट आत्माऽन्यो नोआगमतो भाव इत्युच्यते। (त. वा. १, ५, ११)। ३. नोआगमः पुनर्भावो वस्तु तत्पर्यायात्मकम्। द्रव्यादर्थान्तरं भेदप्रत्ययाद् ध्वस्तबाधनात्॥ ×××ततोऽन्यस्य जीवादिपर्यायाविष्टस्यार्थादेर्नोआगमभावजीवत्येन व्यवस्थापनात्। (त. श्लो. १, ५, ६८)। ४. जीवादिपर्यायाविष्टो नोआगमः। (न्यायकु. ७४, पृ. ८०७)। ५. विवक्षितपर्यायपरिणतो नोआगमभावः। (लघीय. अभय. वृ. ७, २, पृ. ९८)। ६. जीवनपर्यायेण समाविष्ट आत्मा नोआगमभावजीवः मनुष्यजीवनपर्यायेण वा समाविष्ट आत्मा नोआगमभावजीवः कथ्यते। (त. वृत्ति श्रुत. १-५)।

१ जीवनरूप पर्याय से अथवा मनुष्यजीवनपर्याय से युक्त आत्मा को नोआगमभावजीव कहा जाता है।

नोआगमभावदृष्टिवाद—आगमेण विणा केवलोहि-मणपज्जवणाणेहि दिट्ठिवादवुत्तत्थपरिच्छेदओ नोआगमभावदिट्ठिवादो। (धव. पु. ९, पृ. २०५)।

आगम के बिना केवलज्ञान, अवधिज्ञान या मनःपर्ययज्ञान के द्वारा दृष्टिवाद में प्रकपित पदार्थों के

जानने वाले को नोआगमभाव वृष्टिवाद कहते हैं।

नोआगमभावनन्दी—नोआगमतः (भाववन्दी) पञ्चप्रकारं ज्ञानम्। (आव. हरि. वृ. पृ. ७)।
पांच प्रकार के ज्ञान को नोआगमभावनन्दी कहते हैं।

नोआगमभावनमस्कार— नमस्क्रियमाणार्हदादि-गुणानुरागवतः मुकुलीकृतकर-कमलस्य प्रणामो नोआगमभावनमस्कारः। (भ. आ. विजयो. ७५३)।
जिनको नमस्कार किया जा रहा है ऐसे अरहन्त आदि के गुणों में अनुरागयुक्त होकर हाथों को जोड़ने वाला जीव जो उनको प्रणाम करता है उसे नोआगमभावनमस्कार कहते हैं।

नोआगमभावनारक—णिरयगदिणामाए उदएण णिरयभावमुवगदो णोआगमभावणेरइओ णाम। (धव. पु. ७, पृ. ३०)।
नरकगति नामकर्म के उदय से नारकपर्याय को प्राप्त हुए जीव को नोआगमभावनारक कहते हैं।

नोआगमभावपूर्वगत—आगमेण विणा केवलोहिमणपज्जवणाणेहि पुव्वगयत्थपरिच्छेदओ णोआगमभावपुव्वगयं। (धव. पु. ९, पृ. २११)।
आगम के विना केवलज्ञान, अवधिज्ञान अथवा मनःपर्ययज्ञान के द्वारा पूर्वगत श्रुत में प्ररूपित अर्थ के जानने वाले को आगमभावपूर्वगत कहते हैं।

नोआगमभावप्रतिक्रमण— अशुभपरिणामदोषमवबुध्य श्रद्धाय तत्प्रतिपक्षपरिणामवृत्तिर्नोआगमभावप्रतिक्रमणम्। (भ. आ. विजयो. ११६)।
अशुभ परिणामरूप दोष को जानकर उसके विरोधी परिणाम की प्रवृत्ति को नोआगमभावप्रतिक्रमण कहते हैं।

नोआगमभावमंगल—१. नोआगमओ भावो सुविसुद्धो खाइयाईओ॥ अहवा सम्मद्दंसण-नाण-चरित्तोवओगपरिणामो। नोआगमओ भावो नोसद्दो मिस्सभावंमि॥ अहवेह नमुक्काराइनाण-किरिआविमिस्सपरिणामो। नोआगमओ भण्णइ जम्हा से आगमो देसे (सो)॥ (विशेषा. ४९–५१)।
२. नोआगमतो भावमङ्गलम् आगमवर्जं ज्ञानचतुष्टयमिति, सर्वनिषेधवचनत्वान्नोशब्दस्य। अथवा सम्यग्दर्शन-ज्ञान-चारित्रोपयोगपरिणामो यः स नागम एव केवलः, न चानागमः, इत्यनोऽपि मिश्रवचनत्वान्नोशब्दस्य नोआगमत इत्याख्यायते। अथवा अर्हन्नमस्काराद्युपयोगः खल्वागमैकदेशत्वात् नोआगमतो भावमङ्गलमिति। (आव. हरि. वृ. पृ. ६)।
१ अतिशय विशुद्ध क्षायिक आदि (औपशमिक) भाव को नोआगमभावमंगल कहा जाता है। यहाँ 'नो' शब्द आगम का सर्वथा निषेधक है। अथवा सम्यग्दर्शन, ज्ञान और चारित्ररूप उपयोग परिणाम को नोआगमभावमंगल जानना चाहिए। यहाँ 'नो' शब्द आगम और अनागम के मिश्रण का बोधक है। अथवा अरहन्त आदि को किये जाने वाले नमस्कार के ज्ञान और क्रियारूप मिश्र परिणाम को नोआगमभावमंगल कहते हैं।

नोआगमभावमास—तत्र नोआगमतः खलु मूलादिकः मूल-कंद-कांड-पत्र-पुष्प-फलवेदकः। किमुक्तं भवति ? यो धान्यमाषजीवो धान्यमाषभवे वर्तमानो मूलरूपतया कंदरूपतया कांडरूपतया पत्ररूपतया पुष्परूपतया फलरूपतया वा धान्यमाषभावायुर्वेदयते स नोआगमतो भावमासः, प्राकृते माषशब्दस्यापि मास इति रूपसम्भवात्। (व्यव. मलय. वृ. २-२६, पृ. ६)।
मास (माष) अर्थात् उड़द नामक धान्यभव में वर्तमान जो जीव मूल, कन्द, कांड, पत्र, पुष्प और फलरूप अवस्था द्वारा धान्यमाषभावरूप आयु का वेदन करता है उसे नोआगमभावमास कहते हैं। 'माष' शब्द का प्राकृत में 'मास' ऐसा रूप सम्भव है, अतः उसका 'मास' रूप में व्याख्यान किया गया है।

नोआगमभावराग—नोआगमतो रागवेदनीयकर्मोदयप्रभवः परिणामविशेषः। (आव. नि. हरि. वृ. ९१८)।
रागवेदनीय कर्म के उदय से उत्पन्न होने वाले परिणामविशेष को नोआगमभावराग कहते हैं।

नोआगमभावव्रत—नोआगमभावव्रतं नाम चारित्रमोहोपशमात् क्षयोपशमात् क्षयाद्वा प्रवृत्तो हिंसादिपरिणामाभावः अहिंसादिव्रतम्। प्राणिनां वियोजने प्राणानाम्, असदभिधाने, अदत्तादाने, मिथुनकर्मविशेषे, मूर्च्छायां वा ऽपरिणतिरिति यावत्। (भ. आ. ११८५)।
चारित्रमोहनीय के उपशम, क्षय या क्षयोपशम से प्रवृत्त हुए हिंसादिरूप परिणामों के अभाव को नोआगमभावव्रत कहते हैं।

नोआगमभावश्रमण—नोआगमतस्तु चारित्रपरिणामवान् यतिः। (सर्वार्थ. सि. हरि. वृ. १५३)। चारित्र परिणाम वाले साधु को नोआगमभाव श्रमण कहते हैं।

नोआगमभावसामायिक—१. से किं तं नोआगमओ भावसामाइए? २—जस्स सामाणिओ अप्पा संजमे णियमे तवे। तस्स सामाइयं होइ इह केवलिभासियं॥ जो समो सव्वभूएसु तसेसु थावरेसु य। तस्स सामाइयं होइ इह केवलिभासियं॥ जह मम ण पियं दुक्खं जाणिअ एमेव सव्वजीवाणं। न हणइ न हणावेइ अ सममणइ तेण सो समणो॥ णत्थि य सि कोइ वेसो पिओ अ सव्वेसु चेव जीवेसु। एएण होइ समणो एसो अन्नोऽवि पज्जाओ॥ उरगगिरि-जलण-सागर-नहतल-तरुगणसमो अ जो होइ। भमर-मिय-धरणि-जलरुह-रवि पवणसमो अ सो समणो॥ तो समणो जइ सुमणो भावेण य जइ ण होइ पावमणो। सयणे अ जणे अ समो समो अ माणावमाणेसु॥ से तं नोआगमओ भावसामाइए। (अनुयो. सू. १५०, पृ. २५५–५६)। २. नोआगमभावसामायिकं नाम सर्वसावद्ययोगनिवृत्तिपरिणामः। (भ. आ. विजयो. ११६)। ३. सामायिकपरिणतपरिणामादि नोआगमभावसामायिकम्। (मूला. वृ. ७–१७)। ४. नोआगमभावसामायिकं पुनर्द्विविधमुपयुक्त-तत्परिणतभेदात्। सामायिकप्राभृतकेन विना सामायिकार्थेषूपयुक्तो जीवः उपयुक्तनोआगमभावसामायिकम्। राग-द्वेषाद्यभावस्वरूपेण परिणतो जीवस्तत्परिणतनोआगमभावसामायिकम्। (अन. ध. स्वो. टी. ८–१९)।

१ जिसकी आत्मा मूलगुणरूप संयम, उत्तरगुणसमूहरूप नियम और अनशनादिरूप तप में संनिहित है; ऐसे जीव के सामायिक होती है। जो त्रस और स्थावररूप सभी जीवों में सम है—राग-द्वेष से रहित है—उसके केवलिप्रकथित सामायिक होती है। जिस प्रकार दुःख मुझे प्रिय नहीं है, उसी प्रकार वह सभी जीवों को प्रिय नहीं है; ऐसा जानकर चूंकि साधु न स्वयं जीवघात करता है और न दूसरे से कराता है तथा सबको समान मानता है; इसी से वह समन—सबको समान मानने वाला—कहलाता है। सब जीवों में न कोई द्वेष्य—द्वेष करने योग्य—है और न कोई प्रिय भी है, इसी से वह समन—समान मन वाला है; यह उसका दूसरा भी पर्याय नाम है। जो सर्प के समान दूसरे के आश्रय में रहता है, पर्वत के समान परीषह व उपसर्ग के समय अडिग होता है, अग्नि के समान तेजस्वी एवं सूत्र-अर्थरूप तृणादि के विषय में तृप्ति से रहित होता है, समुद्र के समान गम्भीर व ज्ञानादिरूप रत्नों की खान होता है, आकाशतल के समान परालम्बन से रहित होता है, वृक्षसमूह के समान सुख-दुःख का सहने वाला होता है, तथा भ्रमर के समान अनियतवृत्ति, मृग के समान संसारभय से उद्विग्न, पृथिवी के समान कष्टसहिष्णु, कमल के समान कामभोगों से ऊपर स्थित, सूर्य के समान समभाव से प्रकाश करने वाला, और वायु के समान प्रतिबन्ध से रहित होता है; वह श्रमण कहलाता है। इस प्रकार श्रमण यदि द्रव्यमन की अपेक्षा सुमन—सुन्दर मन वाला—और भावमन की अपेक्षा यदि पाप मन वाला नहीं है तो वह स्वजन और अन्य जन तथा मान और अपमान में सम—हर्ष-विषाद से रहित होता है। इस प्रकार से ज्ञानक्रियारूप सामायिक के साथ उस सामायिक से युक्त साधु को भी अभेदोपचार से नोआगमभावसामायिक कहा जाता है। २ समस्त सावद्ययोग से निवृत्तिरूप जो परिणाम होता है उसे नोआगमभावसामायिक कहते हैं।

नोआगमभावसिद्ध — क्षायिकज्ञान-दर्शनोपयुक्तः परिप्राप्ताव्याबाधस्वरूपस्त्रिविष्टपशिखरस्थो नोआगमभावसिद्धः। (भ. आ. विजयो. १); निरस्तभाव द्रव्यकर्ममलकलङ्क-परिप्राप्तसकलक्षायिकभावः नोआगमभावसिद्धः। (भ. आ. विजयो. ४६)।

१ जिन्होंने सर्व द्रव्यकर्म और भावकर्म को दूर करके समस्त क्षायिक भावों को प्राप्त कर लिया है, ऐसे लोकशिखरस्थ मुक्तात्मा को नोआगमभावसिद्ध कहते हैं।

नोआगमभावस्कन्ध—१. एएसि चेव सामाइयमाइयाणं छण्हं अज्झयणाणं समुदयसमिइसमागमेण भावस्सयसुयखंधे भावखंधे त्ति लब्भइ, से तं नोआगमओ भावखंधे से तं भावखंधे। (अनुयो. सू. ५६, पृ. ४२)। २. णोआगमतो भावखंधो णाण-

किरियागुणसमूहमतो, सो त सामादियादिछण्हं अवस्सयाणं समेलो, एत्थ किरिया णोआगमोत्ति काउं, णोसद्दो मीसभावे भवति, तस्स य भावसंजस्स एगट्ठिया इमे × × ×। (अनुयो. चू. पृ. १७)।

३. सामायिकादिषडध्ययनसंहतिनिष्पन्न आवश्यकश्रुतस्कन्धो मुखवस्त्रिका रजोहरणादिव्यापारलक्षणक्रियायुक्ततया विवक्षितो नोआगमतो भावस्कन्धः। (अनुयो. मल. हेम. वृ. सू. ५६, पृ. ४२)।

१ सामायिकादि छहों आवश्यकों के समुदायरूप एक विशिष्ट परिणाम से जो आवश्यक श्रुतस्कन्ध निष्पन्न है वही भावस्कन्ध है और इसी को नोआगमभावस्कन्ध कहा जाता है।

नोआगमभावस्पर्शन—फरिसगुणपरिणदपोग्गलदव्वं णोआगमभावफोसणं। (धव. पु. ४, पृ. १४४)। स्पर्श गुण से परिणत पुद्गल द्रव्य को नोआगमभावस्पर्शन कहा जाता है।

नोआगमभावानुयोग—नोआगमतो भावस्यानुयोगोऽन्यतमस्यौदयिकादेर्व्याख्यानम्, भावानामनुयोगो नाम बहूनामौदयिकादीनां भावानां व्याख्यानम्। (आव. नि. मलय. वृ. १२६, पृ. १३२)।

औदयिक आदि पांच भावों में से किसी एक भाव के या बहुत भावों के व्याख्यान करने को नोआगमभावानुयोग कहते हैं। इसी प्रकार भाव से अनुयोग, भावों से अनुयोग, एकभावविषयक अनुयोग एवं अनेक भावविषयक अनुयोग आदि अनेक विकल्पों को जानना चाहिए।

नोआगमभावार्त—नोआगमतस्तु औदयिकभाववर्ती राग-द्वेषग्रहपरिगृहीतात्मा प्रियविप्रयोगादिदुःखसङ्कटनिमग्नो भावार्त इति व्यपदिश्यते, अथवा शब्दादिविषयेषु विषविपाकसदृशेषु तदाकांक्षित्वाद्धिताहितविचारशून्यमना भावार्तः कर्मोपचिनोति। (आचारा. शी. वृ. १, १, २, १४, पृ. ३१)।

औदयिकभाव के वशीभूत, राग-द्वेष से परिणत और इष्टवियोग व अनिष्टसंयोग जनित दुःख से व्याप्त जीव को नोआगमभावार्त कहते हैं। अथवा विषविपाक के समान शब्दादि विषयों का अभिलाषी होकर हिताहितविचार से शून्य मन वाले जीव को नोआगमभावार्त कहते हैं।

नोआगमभावार्हन्—अरिहननाद् रजोहननाद् रहस्याभावादतिशयपूजार्हत्वाच्चाधिगतार्हद्व्यपदेशा नोआगमभावार्हन्त इति गृहीताः। (अ. आ. विजयो. ४६)।

जिन्होंने मोहरूप अरि का हनन करके तथा ज्ञानावरण और दर्शनावरणरूप रज (धूलि) और रहस्य (अन्तराय) को नष्ट करके अतिशय पूजा के योग्य होने के कारण 'अर्हन्त' नाम को प्राप्त कर लिया है, ऐसे कैवल्य अवस्था को प्राप्त अरहन्त देवों को नोआगमभावार्हन् कहते हैं।

नोआगमभावावश्यक—१. नोआगमतो भावावस्सयं णाणुवयोगेण किरियं करेमाणस्स णाण-किरियारूवसुभोवयोगपरिणयस्स णोआगमतो भावावस्सतं। (अनुयो. चू. पृ. १३)। २. नोआगमतस्तु ज्ञानक्रियोभयपरिणामो भावावश्यकम्, उपयुक्तस्य क्रियेति भावार्थः। (आव. नि. हरि. वृ. ७६, पृ. ५२)।

१ ज्ञानोपयोग के साथ क्रिया को करता हुआ जो जीव ज्ञान और क्रियारूप शुभ उपयोग से परिणत है उसे नोआगमभावावश्यक कहा जाता है। २ आवश्यक क्रियाओं के ज्ञान और आचरणरूप परिणाम को नोआगमभावावश्यक कहते हैं। अभिप्राय यह है कि सामायिकादि आवश्यकविषयक जीव का जो आचरण है उसे नोआगमभावावश्यक समझना चाहिए।

नोआगमभावी दृष्टिवाद—णोआगमदिट्ठिवादसरूवेण परिणमंतओ जीवो णोआगमभवियदिट्ठिवादो। (धव. पु. ९, पृ. २०४)।

भविष्य में दृष्टिवाद स्वरूप से परिणत होने वाले जीव को नोआगमभावी दृष्टिवाद कहा जाता है।

नोआगमभावी द्रव्यभाव—भावपाहुडपज्जयसरूवेण जो जीवो परिणमिस्सदि सो णोआगमभवियदव्वभावो णाम। (धव. पु. ५, पृ. १८४)।

जो जीव भावप्राभृत पर्यायस्वरूप से भविष्य में परिणत होगा उसे नोआगमभावी द्रव्यभाव कहा जाता है।

नोआगमभावोपक्रम—तत्राद्यो जामातृ-परीक्षक-ब्राह्मणी-वेश्यामास्यानामिव संसाराग्निवृद्धिना अध्यवसायेन परभावोपक्रमणरूपः, परस्य भूतादिनिमित्तमाचार्यभावावधारणरूपः। (जम्बूदी. ज्ञा. वृ. पृ. ६)।

नोआगमभावोपक्रम प्रशस्त और अप्रशस्त के भेद से दो प्रकार का है—उनमें जामाता, परीक्षक, ब्राह्म-

भी, वेदना और अवाय के समान संसार के बढ़ाने वाले अध्यवसाय द्वारा परभाव के उपक्रमण को अप्रशस्त नोआगमभावोपक्रम और श्रुत आदि के निमित्त आचार्यभाव के अवधारणरूप उपक्रम को प्रशस्त नोआगमभावोपक्रम कहा जाता है।

नोआगमभिन्नद्रव्यभाव—पोग्गल-जीवदव्वाणं संजोगो कधंचि जच्चंतरसमावण्णो णोआगमभिण्णदव्वभावो णाम। (धव. पु. ५, पृ. १८४)।

कथंचित् जात्यन्तर अवस्था को प्राप्त जो पुद्गल और जीव द्रव्यों का संयोग है वह नोआगमभिन्नद्रव्यभाव कहलाता है।

नोइन्द्रियप्रणिधि—कोहं माणं मायं लोहं च महब्भयाणि चत्तारि। जो रुंभइ सुद्धप्पा एसो नोइंदिअप्पणिही॥ (दशवै. नि. २९९)।

क्रोध, मान, माया और लोभ इन चार महाभयानक कषायों को जो रोकता है उस शुद्ध आत्मा को नोइन्द्रियप्रणिधि कहते हैं।

नोइन्द्रियप्रत्यक्ष—१. नोइन्द्रियप्रत्यक्षं तु यदात्मन एवालिङ्गिकमवध्यादीति। (अनुयो. चू. पृ. ७५; अनुयो. हरि. वृ. पृ. १००)। २. इन्द्रियप्रत्यक्षं न भवतीति नोइन्द्रियप्रत्यक्षम्, नोशब्दः सर्वप्रतिषेधे। (नन्दी. हरि. वृ. पृ. २८)। ३. इन्द्रियप्रत्यक्षं तु यन्न भवति तन्नोइन्द्रियप्रत्यक्षम्, नोशब्दस्य सर्वनिषेधपरत्वात्, यन्नेन्द्रियं सर्वथैव न प्रवर्तते, किन्तु जीव एव साक्षादर्थं पश्यति तन्नोइन्द्रियप्रत्यक्षम्, अवधि-मनःपर्याय-केवलाख्यमिति भावार्थः। (अनुयो. मल. हेम. वृ. १४४, पृ. २१२)।

१ लिंग के बिना—इन्द्रिय आदि की सहायता न लेकर—जीव के जो स्वयमेव अवधि आदिरूप ज्ञान होता है उसे नोइन्द्रियप्रत्यक्ष कहा जाता है।

नोकर्म—१. तदुदयापादितः (कर्मोदयापादितः) पुद्गलपरिणामः आत्मनः सुख-दुःखबलाधानहेतुः औदारिकशरीरादिः, ईषत्कर्म नोकर्मेत्युच्यते। (त. वा. ५, २४, ९, पृ. ४८८)। २. नोकर्म च शरीरत्वपरिणामनिवृत्तुकम्॥ पुद्गलद्रव्यमाहारप्रभृत्युपचयात्मकम्। (त. श्लो. १, ५, ६४-६५)। ३. शरीर-पर्याप्तियोग्यपुद्गलादानं नोकर्म। (न्यायकु. ७४, पृ. ८०७)। ४. शरीरत्रय-पर्याप्तिषट्कयोग्यपुद्गलपरिणामो नोकर्म। (लघीय. अभय. वृ. ७-२, पृ. ९८)। ५. औदारिक-वैक्रियिकाहारकशरीरत्रयस्य षट्पर्याप्तीनां च योग्यपुद्गलानामादानं नोकर्म। (त. वृत्ति श्रुत. १-५)।

१ कर्मोदयवश जो पुद्गलपरिणाम जीव के सुख-दुःख का कारण होता है वह नोकर्म कहलाता है। ईषत् (किंचित्) कर्मरूप यह नोकर्म औदारिकादि शरीरस्वरूप है।

नोकर्मद्रव्यनारक—पास-पंजर-जंतादीणि णोकम्मदव्वाणि णेरइयभावकारणाणि णोकम्मदव्वणेरइओ णाम। (धव. पु. ७, पृ. १०)।

नारकभाव के कारणभूत पाश, पंजर और यंत्र आदि को नोकर्मद्रव्यनारक कहा जाता है।

नोकर्मद्रव्यपरिवर्तन—देखो नोकर्मद्रव्यसंसार। १. नोकर्मद्रव्यपरिवर्तनं नाम त्रयाणां शरीराणां षण्णां पर्याप्तीनां योग्या ये पुद्गला एकेन जीवेन एकस्मिन् समये गृहीताः स्निग्ध-रूक्ष-वर्ण गन्धादिभिस्तीव्र-मन्द-मध्यमभावेन च यथावस्थिता द्वितीयादिषु समयेषु निर्जीर्णा अगृहीताननन्तवारानतीत्य मिश्रकांश्चानन्तवारानतीत्य मध्ये गृहीतांश्चानन्तवारानतीत्य त एव तेनैव प्रकारेण तस्यैव जीवस्य नोकर्मभावमापद्यन्ते यावत्तावत्समुदितं नोकर्मद्रव्यपरिवर्तनम्। (स. सि. २-१०; भ. आ. विजयो. १७७३ —अत्र 'मध्ये गृहीतांश्चानन्तवारानतीत्य त एव' इत्येतावान् पाठस्त्रुटितः प्रतिभाति; मूला. वृ. ८-१४; भ. आ. मूला. १७७३)। २. औदारिक-वैक्रियिकाहारकशरीरत्रयस्य पर्याप्तिषट्कस्य च ये योग्यपुद्गलाः एकेन जीवेन एकस्मिन् समये गृहीताः स्निग्ध रूक्ष-वर्ण-गन्धादिभिस्तीव्र-मन्द-मध्यमभावेन च यथावस्थिताः द्वितीयादिषु समयेषु निर्जीर्णा अगृहीतान् अनन्तवारान् अतीत्य मिश्रितांश्च अनन्तवारान् अतीत्य मध्यमगृहीतांश्च अनन्तवारान् अतीत्य त एव पुद्गलाः तेनैव स्निग्धादिभावेन तेनैव तीव्रादिभावेन च यथावस्थितप्रकारेण च तस्यैव जीवस्य नोकर्मभावमापद्यन्ते यावत् तावत् समुदितं सर्वं त्रैलोक्यस्थितं पुद्गलद्रव्यं नोकर्मद्रव्यपरिवर्तनं कथ्यते। (त. वृत्ति श्रुत. २-१०)।

१ तीन शरीर और छह पर्याप्तियों के योग्य जिन पुद्गलों को एक जीव ने एक समय में ग्रहण किया था वे स्निग्ध-रूक्ष स्पर्श, वर्ण और गन्ध आदि से तीव्र, मन्द या मध्यम भाव से यथावस्थित होते हुए द्वितीय आदि समयों में निर्जीर्ण हो चुके। पश्चात्

अनन्त बार अगृहीत पुद्गलों का, अनन्त बार मिश्र पुद्गलों का, मध्य में अनन्त बार गृहीत पुद्गलों का अतिक्रमण कर—उनको ग्रहण करते हुए निर्जीर्ण करके—जब वे ही पूर्वोक्त पुद्गल उसी प्रकार से उक्त जीव के नोकर्मरूपता को प्राप्त होते हैं, उतने समुदित काल का नाम नोकर्मद्रव्यपरिवर्तन है।

नोकर्मद्रव्यसमता—नोकर्म मृत्सुवर्णादिसमानिकया-ऽहिरत्नादिकम्। समताकारणं बाह्यभावभावावलोकिनः॥ (आचा. सा. ६-१६)।

बाह्य पदार्थों की अवस्था के देखने वाले जीव के जो मिट्टी व सुवर्ण, पाषाण व माणिक्य तथा सर्प और माला आदि पदार्थ समता के कारण हैं उन्हें नोकर्मद्रव्यसमता या नोकर्मद्रव्यसामायिक कहा जाता है।

नोकर्मद्रव्यसंसार—देखो नोकर्मद्रव्यपरिवर्तन। नोकर्मद्रव्यसंसार औदारिक-वैक्रियिकाऽऽहारक तैजस-शरीराणामाहार- शरीरेन्द्रियाऽऽनपान - भाषा-मनः-पर्याप्तीनां विषयः। (आ. सा. पृ. ८०)।

औदारिक, वैक्रियिक, आहारक और तैजस शरीर तथा आहार, शरीर, इन्द्रिय, आनपान, भाषा और मन इन पर्याप्तियों का जो विषय है वह नोकर्मद्रव्यसंसार कहलाता है।

नोकर्मबन्ध—माता-पितृ पुत्रस्नेहसम्बन्धः नोकर्मबन्धः। (त. वा. ८, पृ. ५६१)।

माता, पिता और पुत्र के स्नेह का जो सम्बन्ध है उसे नोकर्मबन्ध कहा जाता है।

नोकषायवशार्तमरण—हास्य-रत्यरति-शोक-भय-जुगुप्सा-स्त्री पुंनपुंसकवेदे मूढमतेर्मरणं नोकषायवशार्तमरणम्। (भ. आ. विजयो. २५, पृ. ६०)।

हास्य, रति, अरति, शोक, भय, जुगुप्सा, स्त्रीवेद, पुरुषवेद और नपुंसकवेद इन नोकषायों में मुग्ध हुए जीव के मरण को नोकषायवशार्तमरण कहते हैं।

नोकषायवेदनीय—देखो अकषायवेदनीय। तथा स्त्रीवेदादिनोकषायरूपेण यद्वेद्यते तन्नोकषायवेदनीयम्। (आ. प्र. १६; धर्मसं. मलय. वृ. ६१३; प्रज्ञाप. मलय. वृ. २९३, पृ. ४६८)।

स्त्रीवेद आदि नोकषायरूप से जिसका वेदन किया जाता है उसे नोकषायवेदनीय कहते हैं।

नोकुत्ति—एगो अगिज्झमाणो ण वड्ढदि, मूले अवणिदे णिम्मूलं किट्टदि, तेण एगो णोकत्तिरि वुत्तं। (धव. पु. ६, पृ. २७४)।

एक (१) अंक का वर्ग करने पर वह वृद्धि को प्राप्त नहीं होता तथा उसे वर्गमूल में से घटाने पर वह निर्मूल नष्ट हो जाता है, इसी से उसे कृति न कहकर नोकृति कहा जाता है।

नोगोण्ण—देखो नोगोण्ण। से किं तं नोगुण्णे? अकुंतो सकुंतो अमुग्गो समुग्गो अमुद्दो समुद्दो अलालं पलालं अकुलिया सकुलिया नो पलं असइत्ति पलासो अमाइवाहए माइवाहए अबीअवावए बीअवावए नो इंदगोवए इंदगोवे, से तं नोगोण्णे। (अनुयो. सू. १३०, पृ. १४१)।

अकुंत-सकुंत, अमुद्ग-समुद्ग, अमुद्र-समुद्र, अलाल पलाल, अकुलिका-सकुलिका, अपलभक्षक-पलाश, अमातृवाहक-मातृवाहक, अबीजवाप-बीजवाप और नोइन्द्रगोप-इन्द्रगोप; इत्यादि निरुक्त्यर्थ से रहित नामों को नोगौण कहा जाता है। जैसे—पूर्वोक्त नामोंमें कुन्त (भाला) से रहित पक्षी को सकुन्त और मुद्ग (मूंग) से रहित डिब्बे को समुग्ग (समुद्ग) आदि कहना।

नोगोण्ण पद—देखो नोगौण। १. नोगोण्णपदं नाम गुणनिरपेक्षमनन्वर्थमिति यावत्। तद्यथा—चन्द्रस्वामी सूर्यस्वामी इन्द्रगोप इत्यादीनि नामानि। (धव. पु. १, पृ. ८४-७५)। २. चंदसामी सूरसामी इंदगोव इच्चादिसण्णाओ णोगोण्णपदाओ, णामिल्लए पुरिसे णामत्थाणुवलभादो। (जयध. १, पृ ३१)।

१ गुणनिरपेक्ष अर्थात् अनुगत अर्थ से जो पद रहित होते हैं उन्हें नोगोण्यपद कहा जाता है। जैसे—चन्द्रस्वामी, सूर्यस्वामी और इन्द्रगोप आदि नाम।

नोअुतप्रत्याख्यान—नोअुतप्रत्याख्यानं अुतप्रत्याख्यानादन्यत्। (आव. नि. मलय. वृ. १०५४)।

अुतप्रत्याख्यान (प्रत्याख्यानपूर्व) से भिन्न को नोअुतप्रत्याख्यान कहते हैं। यह नोअुतप्रत्याख्यान मूलगुणप्रत्याख्यान और उत्तरगुणप्रत्याख्यान के भेद से दो प्रकार का है।

नोसंज्ञाकरण—१. नोसन्ना वीसस-पओगे। (आव. भा. १५३, पृ. ५५७)। २. नोसंज्ञाकरणं तु यत्करणमपि सन्न तत् संज्ञया कृतं। उक्तं हि—

णोसण्णाकरणं पुण दव्वस्सारूढकरणसण्णं पि । (उत्तरा. नि. शा. वृ. १८४, पृ. १६५) ।
२ जो करण होकर भी संज्ञा से रूढ नहीं है उसे नोसंज्ञाकरण कहा जाता है । यह विध्यसा (स्वभाव) और प्रयोग की अपेक्षा दो प्रकार का है । इनमें विध्यसाकरण भी दो प्रकार का है—सादि और अनादि । धर्म, अधर्म और आकाश द्रव्यों का जो परस्पर में संकलनरूप अवस्थान है, यह अनादिकरण है । सादिकरण चक्षु के द्वारा गृह्यमाण स्थूल पुद्गल द्रव्य है ।

नोसंसार—१. सयोगकेवलिनश्चतुर्गतिभ्रमणाभावात् असंसारप्राप्त्यभावाच्च ईषत्संसारो नोसंसार इति । (त. वा. ९, ७, ३) । २. सयोगकेवलिनश्चतुर्गतिभ्रमणाभावात् संसारान्तःप्राप्त्यभावाच्चेषत्संसारो नोसंसारः । (चा. सा. पृ. ८०) ।
१ सयोगकेवली के चारों गतियों के परिभ्रमणरूप संसार का तो अभाव हो गया है, पर असंसार (मोक्ष) की प्राप्ति अभी हुई नहीं है; अतएव उनके ईषत्संसाररूप नोसंसार माना जाता है ।

न्यग्रोधपरिमण्डलसंस्थान—१. नाभेरुपरिष्टाद् भूयसो देहसंनिवेशस्याधस्ताच्चाल्पीयसो जनकं न्यग्रोधपरिमण्डलसंस्थाननाम । (त. वा. ८, ११, ८) । २. न्यग्रोधपरिमण्डलनाम्नस्तु नाभेरुपरि सर्वावयवाः समचतुरस्रसंस्थानलक्षणाविसंवादिनः अधस्तात् पुनरुपरितनभागानुरूपास्तस्य नावयवा इति, अतएव न्यग्रोधपरिमण्डलं तदुच्यते, न्यग्रोधाकृतित्वात्, न्यग्रोधपरिमण्डलमुपरि विशालाकारवत्त्वात् (सि. वृ. 'विशालशाखत्वात्') इति । (त. भा. हरि. व सिद्ध. वृ. ८–१२) । ३. नाभीत उपर्यादिलक्षणयुक्तं अधस्तादनुरूपं न भवति, तस्मात्प्रमाणाद्धीनतरं न्यग्रोधपरिमण्डलम् । (अनु. हरि. वृ. पृ. ५७) । ४. णग्गोहो वडरुक्खो, तस्स परिमंडलं व परिमंडलं अस्स सरीरस्स तण्णग्गोहपरिमंडलं । णग्गोहपरिमंडलमेव सरीरसंठाणं णग्गोहपरिमंडलसरीरसंठाणं, आयतवृत्तमित्यर्थः । (अव. पु. ६, पृ. ७१); न्यग्रोधो वटवृक्षः, समन्तान्मण्डलं परिमण्डलम् । न्यग्रोधस्य परिमण्डलमिव परिमण्डलं यस्य शरीरसंस्थानस्य तन्न्यग्रोधपरिमण्डलशरीरसंस्थानं नाम । एतस्य यत्कारणं कर्म तस्याप्येषैव संज्ञा । (अव. पु. १३, पृ. ३६८) । ५. न्यग्रोधसंस्थानं शरीरस्योर्ध्वभागेऽवयवपरमाणुबहुत्वम् । (मूला. वृ. १२–४६); न्यग्रोधो वृक्षस्तस्य परिमण्डलमिव परिमण्डलं यस्य तन्न्यग्रोधपरिमण्डलं नाभेरूर्ध्वं सर्वावयवपरमाणुबहुत्वं न्यग्रोधपरिमण्डलमिव न्यग्रोधपरिमण्डलशरीरसंस्थानमायतवृत्तमित्यर्थः । (मूला. वृ. १२-१६३)। ६. नाहीइ उवरि बीअं ×××। (संग्रहणी सू. १२१) । ७. न्यग्रोधवत्परिमण्डलं यस्य तन्न्यग्रोधपरिमण्डलम्, यथा न्यग्रोध उपरि सम्पूर्णप्रमाणोऽधस्तु हीनः तथा यत्संस्थानं नाभेरुपरि सम्पूर्णमधस्तु न तथा तन्न्यग्रोधपरिमण्डलम् । (जीवाजी. मलय. वृ. १–३८, पृ. ४२; प्रज्ञाप. मलय. वृ. २६८, पृ. ४१२) । ८. यदुदयात्तु न्यग्रोधपरिमण्डलं संस्थानं तन्न्यग्रोधपरिमण्डलसंस्थाननाम । (प्रज्ञाप. मलय. वृ. २९३, पृ. ४७१) । ९. न्यग्रोध उपरि सम्पूर्णोऽधस्तु हीनस्तथा यन्नाभेरुपरि लक्षणोपेततया सम्पूर्णमधस्तु न तथा, तत् न्यग्रोधवत्परिमण्डलं यस्येति न्यग्रोधपरिमण्डलम् । (संग्रहणी. दे. वृ. १२१) । १०. नाभेरूर्ध्वं प्रचुरशरीरसन्निवेश अधस्तु अल्पशरीरसन्निवेशो न्यग्रोधपरिमण्डलसंस्थानम् । (त. वृत्ति श्रुत. ८–११) ।
१ जिस नामकर्म के उदय से नाभि से ऊपर के शरीरावयव विशाल हों और नाभि से नीचे के अंग छोटे हों उसे न्यग्रोधपरिमण्डलसंस्थान कहते हैं ।

न्यस्तदोष—न्यस्तं क्षिप्त्वा पाकपात्रात् पात्रादौ स्थापितं क्वचित् ॥ (अन. ध. ५–१२) ।
जिस पात्र (बर्तन) में अन्न पकाया गया हो उससे निकाल कर साधु के देने के लिए अन्य पात्र में रखने को न्यस्तदोष कहते हैं ।

न्याय—१. न्यायो-द्विज-क्षत्रिय-विट्-शूद्राणां स्ववृत्त्यनुष्ठानम् । (आ. प्र. टी. ३२५) । २. अथवा ज्ञेयानुसारित्वान्न्यायरूपत्वाद्वा न्यायः सिद्धान्तः । (धव. पु. १३, पृ. २८६) । ३. न्यायो युक्तिः प्रमाणेन प्रमेयस्य घटना । (आप्तमी. वसु. वृ. १३)। ४. स्वामिद्रोह-मित्रद्रोह-विश्वसितवञ्चन-चौर्यादिगर्ह्यार्थोपार्जनपरिहारेणार्थोपार्जनोपायभूतः स्वस्वर्णानुरूपः सदाचारो न्यायः । (योगशा. स्वो. विव. १–४७; सा. ध. स्वो. टी. १–११) । ५. नय-प्रमाणात्मको न्यायः, निपूर्वादिण् गतौ इत्यस्माद् धातोः करणे घञ्प्रत्यये न्यायशब्दसिद्धिः । नितराम् इयते ज्ञायतेऽर्थोऽनेनेति न्यायः । प्रमाण-

शास्त्र-क्षीरसमुद्रस्य श्रीमदित्यादिनियमेन कथंचित्स्वावधारणत्वेन प्रमेयस्वरूपमियते गम्यते येन स न्यायः नय-प्रमाणयुक्तिः, तत्प्रतिपादकत्वादिति युक्तिशास्त्रमपि न्यायः। (प्रमेयर. टिप्पण २, पृ. ३)।

१ ब्राह्मण, क्षत्रिय, वैश्य और शूद्रों के अपनी वृत्ति (आजीविका) के अनुष्ठान को न्याय कहते हैं। २ श्रेय का अनुसरण करने वाला अथवा न्यायरूप होने से सिद्धान्त को न्याय कहा जाता है। ३ प्रमाण से प्रमेय की संगतिरूप युक्ति को न्याय कहते हैं।

न्याय्य—न्यायादनपेतं न्याय्यं श्रुतज्ञानम्। (धव. पु. १३, पृ. २८६)।

श्रुत चूंकि न्याय से युक्त है, अतः उसे न्याय्य कहा कहा जाता है।

न्यास—देखो निक्षेप। ××× उपायो न्यास इष्यते। (प्रमाणसं. ८६; लघीय ५२; धव. पु. १, पृ. १७ व पु. ३, पृ. १८ उद्.)।

जीवादि पदार्थों के जानने के उपाय को न्यास या निक्षेप कहते हैं।

न्यासापलाप—देखो न्यासापहरण।

न्यासापहरण—देखो न्यासापहार। न्यस्यते रक्षणायान्यस्मै समर्प्यत इति न्यासः सुवर्णादिः, तस्यापहरणमपलापः। (योगशा. स्वो. विव. ३, ५४; सा. ध. स्वो. टी. ४-३६)।

जो सुवर्णादि द्रव्य सुरक्षा के निमित्त दूसरे के लिए समर्पित किया जाता है उसे न्यास कहा जाता है। इस न्यास के अपहरण का नाम न्यासापहरण या न्यासापलाप है।

न्यासापहार—देखो न्यासापहरण। १. हिरण्यादेर्द्रव्यस्य निक्षेप्तुर्विस्मृतसंख्यस्याल्पसंख्येयमाददानस्यैवमित्यनुज्ञावचनं न्यासापहारः। (त. सि. ७-२६)। २. न्यासापहारो विस्मरणकृतपरनिक्षेपग्रहणम्। (त. भा. ७-२१)। ३. हिरण्यादिनिक्षेपेऽल्पसंख्यानुज्ञावचनं न्यासापहारः। हिरण्यादेर्द्रव्यस्य निक्षेप्तुर्विस्मृतसंख्यस्याल्पशः संख्यानमाददानस्यैवमित्यनुज्ञावचनं न्यासापहार इत्याख्यायते। (त. वा. ७, २६, ४)। ४. न्यस्यते निक्षिप्यत इति न्यासो रूपकाद्यर्पणम्, तस्यापहरणं न्यासापहारः। (आ. प्र. टी. २६०)। ५. विस्मृतन्यस्तसंख्यस्य स्वल्पं स्वं संप्रगृह्णतः। न्यासापहार एतावदित्यनुज्ञापकं वचः॥ (ह. पु. ५८-१६८)। ६. हिरण्यादिनिक्षेपे अल्पसंख्यानुज्ञावचनं न्यासापहारः॥ (त. श्लो. ७-२६)। ७. गोपनाय स्वद्रव्यार्पणमन्यस्य न्यासः, तस्यापहारः अपलापः सुश्लिष्टवचनेन। (त. भा. सिद्ध. वृ. ७-२१)। ८. हिरण्यादेर्द्रव्यस्य निक्षेप्तुर्विस्मृतसंख्यस्याल्पसंख्यानमाददानस्य एवमित्यनुज्ञावचनं न्यासापहारः। (आ. सा. पृ. ५)। ९. न्यासः परगृहे रूपकादेर्निक्षेपः, तस्य अपहारः अपलापः। (व. वि. मू. वृ. ३-२४)। १०. न्यासापहारिता द्रव्यनिक्षेप्तुर्विस्मृतसंख्यस्याल्पसंख्यं द्रव्यमाददानस्य एवमेवेत्यभ्युपगमवचनम्। (रत्नक. टी. ३-१०)। ११. न्यस्तांशविस्मर्त्रनुज्ञा—न्यस्तस्य निक्षिप्तस्य हिरण्यादिद्रव्यस्य अंशमेकमंशं विस्मर्तुर्विस्मरणशीलस्य निक्षेप्तुरनुज्ञा। द्रव्यमनुनिक्षेप्तुर्विस्मृततत्संख्यस्याल्पसंख्यं तद् गृह्णत एवमित्यनुमतिवचनम्। सोऽयं न्यासापहाराख्योऽतिचारः। (सा. ध. स्वो. टी. ४-४५)। १२. केनचित्पुरुषेण निजमन्दिरे हिरण्यादिद्रव्यं न्यासीकृतम्, निक्षिप्तमित्यर्थः। तस्य द्रव्यस्य ग्रहणकाले संख्या विस्मृता, विस्मरणप्रत्ययादल्पं द्रव्यं गृह्णाति, न्यासवान् पुमान् अनुज्ञावचनं ददाति—देवदत्त, यावन्मात्रं द्रव्यं ते वर्तते तावन्मात्रं त्वं गृहाण, किमत्र पृष्टव्यमिति जानन्नपि परिपूर्णं तस्य न ददाति न्यासापहार उच्यते। (त. वृत्ति श्रुत. ७-२६; कार्तिके. टी. ३३३-३४)।

१ जिसने दूसरे के पास रक्षा के निमित्त सुवर्णादि द्रव्य को रख दिया है वह यदि पीछे भूल से कम प्रमाण में उसे वापिस मांगता है तो 'हां इतना ही है' इस प्रकार कहकर रखे हुए द्रव्य से कम देना, यह न्यासापहार नामक सत्याणुव्रत का एक अतिचार है। २ विस्मरणकृत—दूसरे के विस्मृत—निक्षेप (धरोहर) का ग्रहण करना, इसका नाम न्यासापहार है। अभिप्राय यह है कि किसी ने दूसरे के यहां पांच सौ रखे, पर ठीक स्मरण न रहने से वापिस लेते समय वह पूछता है कि मैंने पांच सौ रखे थे कि चार सौ, जितना रखा हो वे दीजिए। इस पर 'चार सौ ही रखे थे' ऐसा कहते हुए चार सौ देकर भूले हुए शेष एक सौ को स्वयं रख लेना, इसे न्यासापहार जानना चाहिए।

न्यून दोष—१. 'ऊनं' व्यञ्जनाभिलापावश्यकैरसम्पूर्णं वन्दते। (आव. नि. हरि. वृ. १२१०)। २. वयणक्खरेहिं ऊणं जहण्णकालेवि सेसेहिं। (प्रव. सारो. १७१)। ३. वचनं वाक्य क्रियान्ताक्षरसमूहात्मकम्, तेन अक्षरैर्वा एक-द्व्यादिभिर्हीनं न्यूनमुच्यते, यदि वा × × × यदि पुनः कश्चिदत्युत्सुकः प्रमादितया अवन्द्येनैव – अतिस्वल्पेनैव कालेन वन्दनकं समापयति तदा आस्तां वचनाक्षरैः, शेषैरव्यवनामादिभिरावश्यकैर्न्यूनं भवतीत्यर्थः। (आव. ह. वृ. मल. हे. टि. पृ. ८६; प्रव. सारो. वृ. १७१, पृ. ३८)। ४. न्यूनं व्यञ्जनाभिलापावश्यकैरसम्पूर्णम्। (योगशा. स्वो. विव. ३–१३०, पृ. २३७)। ३ क्रियापर्यन्त अक्षरों के समूह को वचन या वाक्य कहा जाता है, इस प्रकार के वचन से अथवा एक-दो अक्षरों से हीन वन्दना करना, अथवा अत्यन्त उत्सुक होता हुआ प्रमाद के कारण अतिशय अल्प काल में ही जो वन्दना करता है, इसमें अक्षरहीनता तो दूर रहे, शेष अवनामादि आवश्यकों से भी वह हीन होती है। यह न्यून नाम का दोष माना गया है जो कृतिकर्म के ३२ दोषों में से २८वां है।

पक्व—पक्वं नाम यद् अग्निना संस्कृतम्, यथा इक्षुगुडीबीज-बिल्वादि। (बृहत्क. भा. क्षे. वृ. १०८०)।

अग्नि से संस्कार को गई—पकाई गई—वस्तु को पक्व कहते हैं।

पक्ष (कालविशेष)—१. पण्णरस अहोरत्ता पक्खो। (भगवती. ६, ७, ४, पृ. ८२५; जम्बूद्वी. १८, पृ. ८६; अनुयो. सू. १३७, पृ. १७६; ज्योतिष्क. ३०; जीवस. ११०)। २. तानि पञ्चदश पक्षः। (त. भा. ४–१५)। ३. × × × पण्णरसेहिं दिवसेहिं एक्कपक्खो हु। (ति. प. ४–२८८)। ४. त्रिपञ्चकैस्तैर्दिवसैश्च पक्षः × × × ॥ (वरांगच. २७–५)। ५. पञ्चदशाहोरात्राः पक्षः। (त. वा. ३, ३८, ८)। ६. अहोरात्रं भवेत् पक्षस्तानि पञ्चदशैव × × ×। (ह. पु. ७–२१)। ७. पक्षः पञ्चदशाहोरात्रात्मकः। (आव. नि. हरि. व मलय. वृ. ६६३)। ८. पञ्चदशाहोरात्राणि पक्षः। (आव. भा. हरि. व मलय. वृ. १२८)। ९. पक्खदसदिवसा पक्खो। (धव. पु. ४, पृ. ३१६); पण्णरसदिवसेहि पक्खो होदि। (धव. पु. १३, पृ. ३००)। १०. × × × पणरहदिवसेहिं होइ पक्खं तु। (प्रा. भावसं. ३१४)। ११. पञ्चदशाहोरात्रः एकः पक्षः। (जीवाभी. मलय. वृ. १७८; ज्योतिष्क. मलय. वृ. ३०)। १२. पञ्चदशपरिपूर्णा अहोरात्राः पक्षः। (सूर्यप्र. मलय. वृ. सू. ५७, पृ. १६६)। १३. तैः पञ्चदशभिः (अहोरात्रैः) पक्षः। (अनुयो. सू. मल. हेम. वृ. ११४, पृ. ६६; प्रज्ञाप. मलय. वृ. १०४; बडक्षी. बे. स्वो. वृ. ६६)। १४. पक्षः पुनरहोरात्रैः स्यात्पञ्चदशभिर्ध्रुवम्। (लोकप्र. २८–२८४)।

१ पन्द्रह दिन-रात को पक्ष कहते हैं।

पक्ष (श्रावकाचारविशेष)—स्यान्मैत्र्यादुपबृंहितोऽखिलवधत्यागो न हिंस्यामहं धर्मार्थमितीह पक्ष × × ×। (सा. ध. १–१६)।

मैत्री-प्रमोद आदि भावनाओं से वृद्धिगत होकर 'मैं धर्मादि के निमित्त हिंसा नहीं करूँगा' इस प्रकार त्रसत्वादि के साथ जो सम्पूर्ण वध के—त्रसहिंसा के—त्याग की प्रतिज्ञा की जाती है, इस प्रकार के आचार का नाम पक्ष है।

पक्ष (अनुमानांग)—१. साध्याभ्युपगमः पक्षः प्रत्यक्षाद्यनिराकृतः। (न्यायाव. १४)। २. धर्म-धर्मिसमुदायः पक्षः। (विशेषा. को. वृ. १५, पृ. ११)। ३. पक्षश्च धर्म-धर्मिसमुदायात्मा। (न्यायकु. १–३, पृ. ६७; स्या. र. २–१)। ४. जिज्ञासितविशेषो धर्मी पक्षः। (सिद्धिवि. वृ. ६–२, पृ. ३७३, पं. १)। ५. धर्म-धर्मिसमुदायलक्षणः पक्षः। (समयप्रा. जय. वृ. ५५, पृ. ३२)। ६. आनुमानिकप्रतिपत्त्यवसरापेक्षया तु पक्षापरपर्यायस्तद्विशिष्टः प्रसिद्धो धर्मी। (प्र. न. त. ३–१८)। ७. साध्यधर्मविशिष्टस्य धर्मिणो पक्षत्वात् (साध्यधर्मविशिष्टो धर्मी पक्षः)। (न्यायदी. पृ. ७२)। ८. साध्यविशिष्टः प्रसिद्धो धर्मी पक्षः। (षड्द. वृ. ५५, पृ. २१०)।

१ प्रत्यक्षादि के द्वारा जिसका निराकरण नहीं किया गया है ऐसे साध्य (अनुमेय) की स्वीकारता को पक्ष कहा जाता है। २ धर्म और धर्मी के समुदाय को पक्ष कहते हैं।

पक्षधर्म—यो हि धर्मिधर्मः स पक्षधर्मः इत्युच्यते। (न्यायकु. १–३, पृ. ६७)।

धर्मी के धर्म को पक्षधर्म कहते हैं।

पक्षधर्मता—१. पक्षधर्मत्वं हि तज्जनकस्य हेतोः स्वरूपम्। (स्या. र. २-१, पृ. २६१)। २. तस्मिन् (पक्षे) व्याप्य वर्तमानत्वं हेतोः पक्षधर्मत्वम्। (न्यायदी. पृ. ८३)।
१ पक्षधर्मता—हेतु का पक्ष में रहना, यह अनुमान के जनक हेतु का स्वरूप है। २ हेतु के पक्ष में रहने को पक्षधर्मता कहते हैं।

पक्षपात—पक्षपातस्तु बहुमान-तत्प्रशंसा-साहाय्यकरणादिना अनुकूला प्रवृत्तिः। (योगशा. स्वो. विव. १-५३, पृ. १५७)।
सौजन्य व उदारता आदि गुणों के विषय में बहुत सम्मान, उनकी प्रशंसा और सहायता आदि के द्वारा अनुकूल प्रवृत्ति करने को पक्षपात कहते हैं।

पक्षाभास—१. तत्रानिष्टादिः पक्षाभासः। (परीक्षा. ६-१२)। २. तत्र प्रतीत-निराकृतानभीप्सितसाध्यधर्मविशेषणास्त्रयः पक्षाभासाः। (प्र. न. त. ६-३८)।
१ अनिष्ट, बाधित और सिद्ध साध्यधर्म से युक्त धर्मी (पक्ष) को पक्षाभास कहा जाता है।

पक्षी—पक्षवन्तस्तिर्यञ्चः पक्षिणः। (धव. पु. १३, पृ. ३९१)।
पंखों वाले तिर्यंच जीव पक्षी कहलाते हैं।

पङ्क—पतन्त्यस्मिन्निति पङ्कः, पङ्को नाम स्वेदाबद्धो मलः। (उत्तरा. चू. पृ. ७९)।
पसीने से सम्बद्ध मल को पङ्क कहते हैं।

पङ्कगति—से जहाणाम ते केइ पुरिसे पंकंसि वा उदयंसि वा कायं उव्विहिया गच्छति, से तं पंकगती। (प्रज्ञाप. २०५, पृ. ३२८)।
कीचड़ या पानी में शरीर को ऊंचा करके गमन करने को पङ्कगति कहते हैं।

पञ्चम अणुव्रत—देखो परिग्रहपरिमाणाणुव्रत।

पञ्चमगुणस्थानवर्ती श्रावक—यश्चाप्रत्याख्यानावरणसंज्ञिद्वितीयकषायक्षयोपशमे जाते सति पृथिव्यादिपञ्चस्थावरवधे प्रवृत्तोऽपि यथाशक्त्या त्रसवधे निवृत्तः स पञ्चमगुणस्थानवर्ती श्रावको भण्यते। (बृ. द्रव्यसं. टी. ४५, पृ. १७१)।
अप्रत्याख्यानावरण नामक द्वितीय कषाय का क्षयोपशम होने पर स्थावर जीवों के घात में प्रवृत्त होते हुए भी जो शक्ति के अनुसार त्रसजीवघात से निवृत्त हो चुका है उसे पंचमगुणस्थानवर्ती श्रावक कहते हैं।

पञ्चम महाव्रत—देखो परिग्रहत्यागमहाव्रत।

पञ्चम मूलगुण—पंचमगो गामादिसु अप्प-बहुविवज्जणमेव॥ (धर्मसं. हरि. ८६०)।
ग्राम, नगर अथवा वन आदि में थोड़े-बहुत—सभी प्रकार के—परिग्रह का परित्याग करना, यह साधुओं के प्राणातिपातविरति आदि मूलगुणों में पांचवां मूलगुण है।

पञ्चमी प्रतिमा—पञ्चमासांश्चतुष्पर्व्यां गृहे तद्द्वारे चतुष्पथे वा परीषहोपसर्गादिनिष्कम्पकायोत्सर्गः पूर्वोक्तप्रतिमानुष्ठानं पालयन् सकलां रात्रिमास्त इति पञ्चमी। (योगशा. स्वो. विव. ३-१४८, पृ. १७१-७२)।
पांच मास पर्यन्त चारों पर्वों (अष्टमी व चतुर्दशी) में घर पर, उसके द्वार पर अथवा चौराहे पर परीषह और उपसर्ग आदि में अडिग रहते हुए कायोत्सर्गपूर्वक पूर्व चार प्रतिमाओं के अनुष्ठान का परिपालन करना व समस्त रात्रि को बिताना, यह पांचवीं प्रतिमा है।

पञ्चाग्निसाधक—कामः क्रोधो मदो माया लोभश्चेत्यग्निपञ्चकम्। येनेदं साधितं स स्यात्कृती पञ्चाग्निसाधकः॥ (उपासका. ८७१)।
काम, क्रोध, मान, माया और लोभ, इन पांच अग्नियों को—अग्नि के समान सन्तापजनक दुर्गुणों को—जिसने शान्त कर दिया है, ऐसे साधु को पञ्चाग्निसाधक कहते हैं।

पञ्चाङ्ग नमस्कार—'पञ्चाङ्ग' पञ्चाङ्गानि जानुद्वय-करद्वय-शिरोलक्षणानि भूस्पृष्टानि यत्र स पञ्चाङ्गः। (चैत्यव. भा. दे. ६, पृ. ५)।
दो हाथ, दो घुटने और शिर को भूमि से लगाकर नमस्कार करने को पञ्चाङ्ग नमस्कार कहते हैं।

पञ्चेन्द्रिय—१. सुर-णर णारय-तिरिया वण्ण-रस-फास-गंध-सद्दण्हू। जलचर-थलचर-खचरा बलिया पंचेंदिया जीवा॥ (पंचा. का. ११७)। २. पञ्चानां स्पर्शन-रसन-घ्राण-चक्षुःश्रोत्रज्ञानानामावरणक्षयोपशमात् पञ्चविधज्ञानभाजः पञ्चेन्द्रियाः। (शतक. मल. हेम. पृ. ३८; कर्मस्त. गो. पृ. १०, पृ. १७)। ३. पञ्च स्पर्शन-रसन-घ्राण-चक्षुःश्रोत्र-

ज्वालीन्द्रियादि येषां ते पञ्चेन्द्रियाः। (कर्मवि. वै. स्वो. वृ. ४८)।

१ जो वर्ण, रस, स्पर्श, गन्ध और शब्द के ज्ञाता हैं ऐसे देव, मनुष्य, नारकी तथा जलचर, थलचर, नभचर व बलवान् तिर्यंच जीवों को पञ्चेन्द्रिय कहते हैं।

पञ्चेन्द्रिय जातिनाम—१. जस्स कम्मस्स उदएण जीवाणं पंचिंदियजादिभावेण समाणत्तं होदि तं पंचिंदियजादिणामकम्मं। (धव. पु. ६, पृ. ६८); पंचिंदियभावणिव्वत्तयं जं कम्मं तं पंचिंदियजादिणामं। (धव. पु. १३, पृ. ३६३)। २. यदुदयात् प्राणी पञ्चेन्द्रिय इति कथ्यते तत्पञ्चेन्द्रियजातिनाम। (त. वृत्ति श्रुत. ८-११)।

१ जिस कर्म के उदय से जीवों में पंचेन्द्रिय जातिस्वरूप से समानता होती है उसे पंचेन्द्रिय जाति-नामकर्म कहते हैं।

पञ्जर—तित्तिर-लावक-हरिणादिधरणार्थं विरचितं ग्रन्थिविशेषकलितरज्जुमयं जालं पञ्जरः। (गो. जी. मं. प्र. व जी. प्र. टी. ३०३।

तीतर, लावक (पक्षी विशेष) और हरिण आदि के पकड़ने के लिए रस्सी में गांठें लगाकर बनाये गये जाल को पञ्जर कहते हैं।

पटबुद्धि— पटवत् विशिष्टवस्तूबनस्पतिविसृष्टविविधप्रभूतसूत्रार्थ-पुष्प-फलग्रहणसमर्थतया बुद्धिः पटबुद्धिः। (औपपा. अभय. वृ. १५, पृ. २८)।

पट के समान विशिष्ट वस्तुरूप वनस्पति (कपास) के द्वारा छोड़े गये (बिये गये) अनेक प्रकार के प्रचुर सूत्र-अर्थरूप पुष्प और फलों के ग्रहणविषयक सामर्थ्य से युक्त बुद्धि को पटबुद्धि कहा जाता है।

पटह—पटह आतोद्यविशेषः, स च किंचिदायत उपर्यधश्च समप्रमाणः। (प्रज्ञाप. मलय. वृ. ३१, ३१६, पृ. ५४२)।

ऊपर नीचे और ऊपर-नीचे समान प्रमाण वाले वाद्यविशेष (ढोल) को पटह कहते हैं।

पट्टन—वररयणाणं जोणी पट्टणणामं विणिद्दिट्ठं। (ति. प. १३९९)।

उत्तम रत्नों के योनिभूत (उत्पादक) स्थान का नाम पट्टन है।

पण्डित—१. देहविभिण्णउ णाणमउ जो परमप्पु णिएइ। परमसमाहिपरिट्ठियउ पंडिउ सो जि हवेइ॥ (परमा. १-१४)। २. पापाद्दीनः पण्डितः, पण्डा वा बुद्धिः, तया इतः अनुगतः पण्डितः। (उत्तरा. चू. पृ. १३१)। ३. पण्डिताः सम्यग्ज्ञानवन्तः, ××× अन्ये व्याचक्षते ××× पण्डिता वान्तभोगासेवनदोषज्ञाः। (दशवै. हरि. वृ. मू. २-११, पृ. ९९)। ४. एतत्पाण्डित्यप्रकर्षरहितं पाण्डित्यं यस्य स पण्डित उच्यते। (भ. आ. विजयो. २६)। ५. पण्डा हि रत्नत्रयपरिणता बुद्धिः संजाता अस्येति पण्डितः। (भ. आ. मूला. २६)। ६. पापात् डीनः—पलायित. पण्डितः। अथवा पण्डा बुद्धिः, सा संजाता अस्येति पण्डितः। (बृहत्क. भा. मलय. वृ. १९६)।

१ जो आत्मानुभूतिरूप परम समाधि में स्थित होकर शरीरसे भिन्न ज्ञानमय परमात्मा को जानता है उसे पण्डित—अन्तरात्मा—कहा जाता है। २ पाप से जो डीन अर्थात् दूर रहता है उसे पण्डित कहते हैं, अथवा 'पण्डा' नाम बुद्धि का है, उससे जो युक्त हो उसे पण्डित जानना चाहिए। ४ पण्डितपण्डित के पाण्डित्यप्रकर्ष से रहित—उसकी अपेक्षा हीन—पाण्डित्य से जो सहित हो वह पण्डित कहलाता है।

पण्डितपण्डित—अतिशयितं पाण्डित्यं यस्य ज्ञान-दर्शन-चारित्रेषु स पण्डितपण्डित इत्युच्यते। (भ. आ. विजयो. २६)।

ज्ञान, दर्शन और चारित्रविषयक पाण्डित्य जिसका अतिशय को प्राप्त है उसे पण्डितपण्डित कहा जाता है।

पण्डितमरण—देखो पण्डित। पंडिताण मरणं पंडितमरणम्, विरतानामित्यर्थः। (उत्तरा. चू. पृ. १२८)।

पण्डितों का—विरतों (संयतों) का—मरण पण्डित-मरण कहलाता है।

पण्यस्त्री—पण्यस्त्री तु प्रसिद्धा या वित्तार्थं सेवते नरम्। तन्नाम दारिका दासी वेश्या पत्तननायिका। (लाटीसं. २-१२९)।

जो धन के लिए पुरुष का सेवन करती है वह पण्यस्त्री के नाम से प्रसिद्ध है।

पतङ्गवीथिका—यस्यां तु त्रि-चतुरादीनि गृहाणि

विमुच्याग्रतः पर्यटति सा पतङ्गवीथिका। पतङ्गः शलभः, तस्येव या वीथिका पर्यटनमार्गः सा पतङ्गवीथिका, पतङ्गो हि गच्छन्नुत्प्लुत्योत्प्लुत्यानियतया गत्या गच्छति, एवं गोचरभूमिरपि या पतङ्गोड्डयनाकारा सा पतङ्गवीथिकेति भावः। (बृहत्क. क्षे. वृ. १६४६)।

जिस गोचरभूमि में साधु तीन-चार घरों को छोड़ कर आगे जाता है वह पतंगवीथिका गोचरभूमि कहलाती है। जैसे पतंगा उछल उछल कर अनियत गति से गमन करता है उसी प्रकार गोचरी के लिए जाते हुए अनियत गति से जाना—कभी किसी गृह में तो कभी अन्य गृह में, इस प्रकार से अनियमित प्रवेश करना; इसे पतंगवीथिका गोचरभूमि कहते हैं। यह क्षेत्राभिग्रहविषयक ऋज्वी आदि आठ गोचरभूमियों में चतुर्थ है।

पतद्ग्रह—१. परिणमयइ जीसे तं पगईइ पडिग्गहो एसो। (कर्मप्र. सं. क. २)। २. परिणमयति जिस्से तं पगतीए पडिग्गहो एसो—यस्यां प्रकृतौ जीवस्तद्भावेन परिणमयति सो प्रकृतिः पगतीए संकममाणाए पडिग्गहो वुच्चति। (कर्मप्र. चू. सं. क. २)। ३. यस्यां प्रकृतौ आधारभूतायां तत्प्रकृत्यन्तरस्थं दलिकं परिणमयति आधारभूतप्रकृतिरूपतामापादयति एषा प्रकृतिराधारभूता पतद्ग्रह इव पतद्ग्रहः, संक्रम्यमाणप्रकृत्याधार इत्यर्थः। (कर्मप्र. मलय. वृ. सं. क. २)।

१ जीव जिस प्रकृति में विवक्षित प्रकृति के प्रदेशों को तद्रूप से परिणमाता है उस प्रकृति को पतद्ग्रह प्रकृति कहते हैं।

पतनान्तराय—भूमौ मूर्च्छादिना पाते पतनाख्यो ×××। (अन. ध. ५–५४)।

आहार करते समय मूर्च्छा आदि के कारण भूमि में गिर जाने पर पतन नाम का अन्तराय होता है।

पति—पाति रक्षति तामिति पतिः। (उत्तरा. नि. शा. वृ. ५७, पृ. ३८)।

जो उसकी—भार्या (स्त्री) की—रक्षा करता है वह पति कहलाता है।

पत्तन—देखो पट्टन। १. नावा पादप्रचारेण च यत्र गमनं तत्पत्तनं नाम। (धव. पु. १३, पृ. ३३५)। २. पत्तनं जलपथयुक्तं स्थलपथयुक्तं वा, रत्नभूमिरित्यन्ये। (प्रश्नव्या. अभय. वृ. पृ. १०५)। ३. पत्तनं जलपथोपेतमेव स्थलपथोपेतमेव वा। (औपपा. अभय. वृ. ३२, पृ. ७४)। ४. पत्तनानि जल-स्थलमार्गयोरन्यतरेण मार्गेण युक्तानि। (जम्बू. वि. वृ. ८८, पृ. १११)।

१ जहां नाव के द्वारा और पादप्रचार से (पैदल) जाना होता है उसे पत्तन कहते हैं। २ जलमार्ग से अथवा स्थलमार्ग से युक्त प्रदेश को पत्तन कहते हैं। दूसरे कितने ही आचार्य रत्नों की भूमि को पत्तन कहते हैं।

पत्नी—पत्नी पाणिगृहीता स्यात् ××× ॥ (लाटीसं. २–१७८)।

जिसके पाणि (हाथ) को ग्रहण किया गया है—जिसके साथ विधिपूर्वक विवाह हुआ है—उसे पत्नी कहा जाता है।

पत्र—असिद्धावयवं वाक्यं स्वेष्टस्यार्थस्य साधकम्। स्याद्गूढपदप्रायं पत्रमाहुरनाकुलम् ॥ ××× मुख्यशब्दात्मकं वाक्यं लिप्यामारोप्यते जनैः। पत्रस्थत्वात्तु तत्पत्रमुपचारोपचारतः ॥ अथवा प्रकृतवाक्यस्य मुख्यत एव पत्रव्यपदेश इति निगदामः, पदानि त्रायन्ते गोप्यन्ते रक्ष्यन्ते परेभ्यः प्रतिवादिभ्यः स्वयं विजिगीषुणा यस्मिन् वाक्ये तत्पत्रमिति पत्रशब्दस्य निर्वचनसिद्धेः। ××× त्रायन्ते वा पदान्यस्मिन् परेभ्यो विजिगीषुणा। कुतश्चिदिति पत्रं स्याल्लोके शास्त्रे च रूढितः ॥ (पत्रप. पृ. १–२)।

जो असिद्ध अवयवों से युक्त वाक्य अपने अभीष्ट अर्थ का साधक होता है तथा जिसमें प्रायः भली भांति पदों की गूढ़ता हो वह पत्र माना जाता है।

पत्रचारण—१. अविराहिदूण जीवे तल्लीणे बहुविहाण पत्ताणं। जा उवरि वच्चदि मुणी सा सिद्धी पत्तचारणा णामा ॥ (ति. प. ४–१०४०)। २. नानावृक्ष-गुल्म-वीरुल्लतावितानननानाप्रवालतरुणपल्लवालम्बनेन पर्णसूक्ष्मजीवानविराधयन्तश्चरणोत्क्षेप-निक्षेपपटवः पत्रचारणाः। (योगशा. स्वो. विव. १–६, पृ. ४१)। ३. पत्रमस्पृश्य पत्रोपरि गमनं पत्रचारणत्वम्। (त. वृत्ति श्रुत. ३–३६)।

१ जिसके प्रभाव से मुनि पत्रगत जीवों की विराधना न करके उनके ऊपर से गमन करता है उसका नाम पत्रचारण ऋद्धि है।

पथ्य वचन—पथ्यं यदायतौ हितम्। (योगशा. स्वो. विव. १–२१, पृ. १२०)।

परिणाम में हित करने वाले वचनों को पथ्य वचन कहते हैं।

पद—१. सुम्मिङन्तं पदम्। (जैनेन्द्र. १।२।१०३)। २. पद्यते गम्यते परिच्छिद्यते इति पदम्। (धव. पु. १०, पृ. १६)। ३. वर्णसमुदायः पदम्। (त. भा. सिद्ध. वृ. ५-२४)। ४. वर्णानामन्योन्यापेक्षाणां निरपेक्षः समुदायः पदम्। (न्यायकु. ६५, पृ. ७३७)। ५. पद्यते गम्यते येनार्थः तत्पदम्। (सिद्धि-वि. वृ. ११-५, पृ. ७०३, पं. १२)। ६. वर्णानामन्योन्यापेक्षाणां निरपेक्षा संहितिः पदम्। (प्र. न. त. ४-१०); पद्यते गम्यते स्वयोग्योऽर्थोऽनेनेति पदम्। (स्या. र. ४-१०)। ७. स्वार्थप्रतिपादकानि पदानि। (उपदे. प. मु. वृ. ८-५६)। ८. पदं त्वर्थपरिसमाप्तिः पदमित्याद्युक्तिसद्भावेऽपि येन केनचिद् पदेनाष्टादशपदसहस्रादिप्रमाणा आचारादिग्रन्था गीयन्ते तदिह गृह्यते, तस्यैव द्वादशाङ्गश्रुतपरिमाणेऽधिकृतत्वाच्छ्रुतभेदानामेव चेह प्रस्तुतत्वात्तस्य च पदस्य तथाविधाम्नायाभावात् प्रमाणं न ज्ञायते, तत्रैकं पदं पदमुच्यते। (शतक. मल. हेम. वृ. ३८, पृ. ४२; कर्मवि. दे. स्वो. वृ. ७, पृ. १६)। ९. वर्णानां परस्परापेक्षाणां निरपेक्षः समुदायः पदम् अव्ययानव्ययभेदभिन्नम्। (लघीय. अभय. वृ. ६४, पृ. ८७)। १०. ××× तत्पदं यत्र नापदः। (जम्बू. च. ४-१५१)।

१ सुबन्त (सु-औ-जस् आदि विभक्तिप्रत्ययान्त) और तिङन्त (तिप्-तस्-झि आदि झि तक) शब्द को पद कहते हैं। २ वर्णों के समुदाय को पद कहा जाता है। ८ अर्थसमाप्ति को यद्यपि पद कहा जाता है, फिर भी जिस पद से अठारह हजार आदि पद प्रमाण आचारादि ग्रन्थ कहे गये हैं उसको यहां श्रुत के अधिकार में पद ग्रहण करना चाहिए। ९ पद (स्थान) वही उत्तम माना जाता है जो आपदाओं से रहित हो—ऐसा पद एक मात्र मोक्ष ही सम्भव है।

पदनिक्षेप—जहण्णुक्कस्सपदविसयणिच्छए लिवदि पादेदि त्ति पदणिक्खेवो णाम। भुजगारविसेसो पदणिक्खेवो, जहण्णुक्कस्सवड्ढि-हाणिपरूवणादो। (जयध.—कसायपा. सु. पृ. ७६ का टिप्पण)।

समुत्कीर्तना और स्वामित्व आदि अनुयोगद्वारों का जघन्य और उत्कृष्ट पदों के द्वारा निक्षेप अर्थात् निश्चय करने को पदनिक्षेप कहते हैं।

पदबद्ध—गेयपदैर्बद्धम्—विशिष्टविरचनया रचितं पदबद्धम्। (अनुयो. मल. हेम. वृ. गा. ४६, पृ. १३२)।

गाने के योग्य पदों के द्वारा जो विशिष्ट रचना की जाती है उसे पदबद्ध कहा जाता है।

पदमीमांसा- एदेसिं पदाणं (उक्कस्साणुक्कस्सादितेरसपदाणं) मीमांसा परिक्खा जत्थ कीरदि सा पदमीमांसा। (धव. पु. १०, पृ. १६); पदाणं मीमांसा परिक्खा गवेसणा पदमीमांसा। (धव. पु. १२, पृ. ३)।

उत्कृष्ट, अनुत्कृष्ट, जघन्य और अजघन्य आदि पदों का जिस अनुयोगद्वार में विचार किया जाता है उसका नाम पदमीमांसा है।

पदविग्रह—१. "पायं पदविच्छेदो समासविसयो तयत्थणियमत्थं। पदविग्गहोत्ति भण्णइ सो सुद्धपदं ण संभवदि॥" इह प्रायेण यः समासविषयः पदयोः पदानां वा छेदो अनेकार्थसम्भवे इष्टार्थनियमनाय क्रियते स पदविग्रहः। (उत्तरा. चू. पृ. १४)। २. पदपृथक्करणं पदविग्रहः। (आव. नि. मलय. वृ. १०२७, पृ. ५५६)।

१ अनेक अर्थों की सम्भावना होने पर अभीष्ट अर्थ के नियमन के लिए जो प्रायः समासविषयक दो या दो से अधिक पदों का छेद किया जाता है वह पदविग्रह कहलाता है।

पदविभागी आलोचना—पव्वज्जादी सव्वं कमेण जं जत्थ जेण भावेण। पडिसेविदं तहा तं आलोचिदो पदविभागी॥ (भ. आ. ५३५)।

प्रव्रज्या लेने के समय से लेकर आज तक जिसका जहां पर जिस भाव से सेवन किया गया है उसकी उसी भाव से क्रमशः आलोचना करने को पदविभागी आलोचना कहते हैं।

पदश्रुतज्ञान—१. तदो (अक्खरसमासादो) एगक्खरणाणे वड्ढिदे पदं णाम सुदणाणं होदि। (धव. पु. ६, पृ. २३); एगेगक्खरवड्ढिकमेण अक्खरसमासं सुदणाणं वड्ढमाणं गच्छदि जाव संखेज्जक्खराणि वड्ढिदाणि त्ति। पुणो संखेज्जक्खराणि घेत्तूण एगं पदसुदणाणं होदि। (धव. पु. १३, पृ. २६५)। २. एगक्खरादु उवरि एगेगेणक्खरेण

वड्ढंतो। संखेज्जे खलु उड्ढे पदणामं होदि सुदणाणं ॥ (गो. जी. ३३४)।

१ अक्षरसमास श्रुत के ऊपर एक अक्षरज्ञान की वृद्धि होने पर पद नाम का श्रुतज्ञान होता है।

पदश्रुतज्ञानावरणीय कर्म—पदसुदणाणस्स जमावरणं तं पदसुदणाणावरणीयं णाम। (धव. पु. १३, पृ. २७८)।

पदश्रुतज्ञान के आवारक कर्म को पदश्रुतज्ञानावरणीय कहते हैं।

पदसम—यत् गीतपदं नामिकादिकं यत्र स्वरे अनुपाति भवति तत् तत्रैव यत्र गीयते तत्पदसमम्। (अनुयो. सू. मल. हेम. वृ. गा. ५०, पृ. १३२)।

जो नामिक आदि पद जिस स्वर में उतरने वाला हो उसको उसी स्वर में जो गाया जाता है, यह पदसम कहलाता है।

पदसमास—१. एदस्स पदस्स सुदणाणस्सुवरि एगक्खरसुदणाणे वड्ढिदे पदसमासो णाम सुदणाणं होदि। एवमेगक्खरादिकमेण पदसुदणाणं वड्ढमाणं गच्छदि जाव संघाओ त्ति। (धव. पु. ६, पृ. २३); एदस्स मज्झिमपदसुदणाणस्सुवरि एगे अक्खरे वड्ढिदे पदसमासो णाम सुदणाणं होदि। पदस्स उवरि अण्णेगे पदे वड्ढिदे पदसमाससुदणाणं होदि त्ति वोत्तुं जुत्तं। पदस्सुवरि एगेगक्खरे वड्ढिदे ण पदसमाससुदणाणं होदि, अक्खरस्स पदत्ताभावादो त्ति? ण एस दोसो, पदावयवस्स अक्खरस्स वि पदव्ववएसे संते विरोहाभावादो। (धव. पु. १३, पृ. २६७)। २. द्वयादिपदसमुदायस्तु पदसमासः। (शतक. मल. हेम. वृ. ३८, पृ. ४२; कर्मवि. दे. स्वो. वृ. ७, पृ. १८)।

१ मध्यमपद श्रुतज्ञान के ऊपर एक अक्षर की वृद्धि होने पर पदसमास श्रुतज्ञान होता है। २ दो आदि पदों के समुदाय का नाम पदसमास है।

पदसमासज्ञानावरणीय कर्म—पदसमासणाणस्स जमावारयं कम्मं तं पदसमासणाणावरणीयं कम्मं। (धव. पु. १३, पृ. २७८)।

पदसमासश्रुतज्ञान के आवारक कर्म को पदसमासज्ञानावरणीय कहते हैं।

पदस्थ ध्यान—१. देवच्चणविहाणं जं कहियं देसविरयठाणम्मि। होइ पयत्थं झाणं कहियं तं वरजिणिंदेहिं ॥ एयपयमक्खरं वा जवियइ जं पंचगुरुवमंबंधं। तं पि य होइ पयत्थं झाणं कम्माण णिद्दहणं ॥ (भावसं. ६२६–२७)। २. पदान्यालम्ब्य पुण्यानि योगिभिर्यद्विधीयते। तत् पदस्थं मतं ध्यानं विचित्रनयपारगैः ॥ (ज्ञाना. ३८-१, पृ. ३८७)। ३. यानि पंचनमस्कारपदानीति मनीषिणा। पदस्थं ध्यातुकामेन तानि ध्येयानि तत्त्वतः ॥ (अमित. श्रा. १५, ३१)। ४. जं झाइज्जइ उच्चारिऊण परमेट्ठिमंतपयममलं। एयक्खरादिविविहं पयत्थझाणं मुणेयव्वं ॥ (वसु. श्रा. ४६४)। ५. णिसिऊण पंचवण्णा पंचसु कमलेसु पंचठाणेसु। झाएह जहक्कमेणं पयत्थझाणं इमं भणियं ॥ सत्तक्खरं च मंतं सत्तसु ठाणेसु णिससुसयवण्णं(?)। सिद्धसरूवं च सिरे एयं च पयत्थझाणुत्ति ॥ (ज्ञा. सा. २४–२५)। ६. यत्पदानि पवित्राणि समालम्ब्य विधीयते। तत्पदस्थं समाख्यातं ध्यानं सिद्धान्तपारगैः ॥ (योगशा. ८-१)। ७. स्वाध्याये यदि वा मंत्रे गुरु-देवस्तुतावपि। चित्तस्यैकाग्रता यत्तत्पदस्थं ध्यानमुच्यते ॥ (गु. गु. षट्. स्वो. वृ. २, पृ. १० उद्.)। ८. पंचानां सद्गुरूणां यत् पदान्यालम्ब्य चिन्तनम्। पदस्थध्यानमाम्नातं ध्यानानिध्वस्तकल्मषैः ॥ (भावसं. वाम. ६६२)। ९. महामंत्रे च मंत्रे च मालामंत्रेऽथवा स्तुतौ। स्वप्नादिलब्धमंत्रे वा पदस्थं ध्यानमुच्यते ॥ (बुद्धिसा. ११८, पृ. २४)।

१ देशविरत गुणस्थान में निर्दिष्ट देवपूजा के विधान को पदस्थ ध्यान कहा जाता है। पांच परमेष्ठियों से सम्बद्ध एक अक्षर अथवा पद का जो जाप किया जाता है, यह भी पदस्थ ध्यान कहलाता है। ६ पवित्र पदों का आलम्बन लेकर जो ध्यान किया जाता है, इसका नाम पदस्थ ध्यान है। ७ स्वाध्याय, मंत्र और गुरु या देव की स्तुति में जो चित्त की एकाग्रता होती है वह पदस्थ ध्यान कहलाता है।

पदस्फोट — स्फोटति प्रकटीभवत्यर्थोऽस्मिन्निति स्फोटश्चिदात्मा, पदार्थज्ञानावरण-वीर्यान्तरायक्षयोपशमविशिष्टः पदस्फोटः। (द्रव्यानु. डी. ४०, पृ. ९८)।

जिसमें अर्थ प्रगट होता है उस चेतन आत्मा का नाम स्फोट है। पदार्थज्ञानावरण और वीर्यान्तराय कर्म के क्षयोपशम से विशिष्ट आत्मा को पदस्फोट कहते हैं।

पदानुसारी—१. एकपदस्यार्थं श्रुत्वा उपश्रुत्यादौ अन्ते मध्ये वा शेषग्रन्थार्थावधारणं पदानुसारित्वम्। (त. वा. ३, ३६, ३, पृ. २०१; आ. क. पृ. ६३)। २. पदमनुसरति अनुकुरुते इति पदानुसारी बुद्धिः। बीजबुद्धीए बीजपदमवगंतूण एत्थ इदं एदेसिमक्खराणं लिंगं होदि त्ति ईहिदूण सयलसुदक्खर-पदाइमवगच्छंती पदाणुसारी। (धव. पु. ६, पृ. ६०)। ३. द्वादशांग-चतुर्दशपूर्वमध्ये एकं पदं प्राप्य तदनुसारेण सर्वं श्रुतं बुध्यन्ते पदानुसारिणः। (मूला. वृ. ६—६६)। ४. जो सुत्तपएण बहुं सुयमणुधावइ पयाणुसारी सो। (प्रव. सारो. १५०३)। ५. पदेन सूत्रावयवेनैकेनोपलक्षणेन तदनुकूलानि पदशतान्यनुसरन्ति —अभ्यूहयन्तीत्येवंशीलाः पदानुसारिणः। (औपपा. अभय. वृ. १५, पृ. २८)। ६. आदावन्ते चैकपदग्रहणात् समस्तग्रन्थार्थस्यावधारणं यत्र बुद्धौ सा पदानुसारिबुद्धिः। (श्रुतभ. टी. ३) ७. पदानुसारी त्वेकपदावगमात् पदान्तराणामवगन्ता। (योगशा. स्वो. विव. १—८)। ८. या पुनरेकमपि सूत्रपदमवधार्यं शेषमश्रुतमपि तदवस्थमेव श्रुतमवगाहते सा पदानुसारिणी। (प्रज्ञाव. मलय. वृ. २७३, पृ. ४२४; नन्दी. सू. मलय. वृ. १३)। ९. येषां पुनर्बुद्धिरेकमपि सूत्रपदमवधार्यं शेषमश्रुतमपि तदवस्थमेव श्रुतमवगाहते ते पदानुसारिबुद्धयः। ××× जो सुत्तपएण बहुं सुयमणुधावइ पयाणुसारी सो। (आव. नि. मलय. वृ. ७५, पृ. ८०)।

१ किसी एक पद के अर्थ को दूसरे से सुनकर आदि, अन्त अथवा मध्य में शेष समस्त ग्रन्थ के जान लेने को पदानुसारी ऋद्धि कहते हैं। ४ जो एक सूत्र-पद के द्वारा बहुत से श्रुत का अनुसरण करता है उसे पदानुसारी कहा जाता है।

पदार्थदोष—१. पदार्थदोषः यत्र वस्तुपर्यायवाचिनः पदस्यार्थान्तरपरिकल्पनाऽऽश्रीयते। (आव. नि. हरि. वृ. ८८४, पृ. ३७६)। २. पदार्थदोषो यत्र वस्तुपर्यायवाचिनः पदार्थस्यार्थान्तरपरिकल्पनाश्रयणम्, यथा द्रव्य-पर्यायवाचिनां सत्तादीनां द्रव्यादर्थान्तरपरिकल्पनमुलूकस्य। (आव. मलय. वृ. ८८४, पृ. ४८४)।

१ वस्तु के पर्यायवाची पद के अन्य अर्थ की कल्पना करना, इसे पदार्थदोष माना जाता है। यह ३२ सूत्रदोषों में ३१वां है।

पद्म—१. ××× तं पि गुणिदव्वं। चउसीदिलक्खवासे पउमं णामं समुद्दिट्ठं॥ (ति. प. ४-२९६)। २. चतुरशीतिपद्माङ्गशतसहस्राण्येकं पद्मम्। (ज्योतिष्क. मलय. वृ. ६७; जीवाजी. मलय. वृ. १७८)।

१ चौरासी लाख वर्षों से गुणित पद्मांग प्रमाण एक पद्म होता है। २ चौरासी लाख पद्मों का एक पद्म नामक संख्याप्रमाण होता है।

पद्मप्रभ — निष्पङ्कतामङ्गीकृत्य पद्मस्येव प्रभा यस्याऽसौ पद्मप्रभः, तथा पद्मशयनदोहदो मातुर्देवतया पूरित इति, पद्मवर्णश्च भगवानिति पद्मप्रभः। (योगशा. स्वो. विव. ३—११४)।

निष्पङ्कता को स्वीकार कर—पद्म के पङ्कजत्व से रहित होकर—उस पद्म की प्रभा के समान प्रभा होने से छठे तीर्थंकर का नाम पद्म प्रसिद्ध हुआ। इसके अतिरिक्त उक्त तीर्थंकर की माता को पद्म (कमल) शय्या पर सोने का जो दोहला हुआ था उसे देवता ने पूर्ण किया था, इसलिए भी उन्हें पद्मप्रभ कहा गया है

पद्ममुद्रा—पद्माकारौ करौ कृत्वा मध्येऽङ्गुष्ठौ कर्णिकाकारौ विन्यसेदिति पद्ममुद्रा। (निर्वाणक. पृ. ३२)।

कमल के आकार दोनों हाथों को करके उनके बीच में कर्णिका के आकार दोनों अंगूठों की रचना को पद्ममुद्रा कहते हैं।

पद्मलेश्या—१. चाई भद्दो चोक्खो उज्जुयकम्मो य खमइ बहुयं पि। साहु-गुरुपूयणिरओ लक्खणमेयं तु पउमस्स॥ (प्रा. पंचसं. १—१५१; धव. पु. १, पृ. ३९० उद्; गो. जी. ५१६)। २. सत्यवाक्य-क्षमोपेत-पण्डित-सात्विक-दानविशारद-चतुरर्जुगुरु-देवतापूजाकरणनिरतत्वादि पद्मलेश्यालक्षणम्। (त. वा. ४, २२, १०, पृ. २३९)। ३. कसायाणुभागफद्दयाणमुक्कस्सयमागदाणं जहण्णफद्दयप्पहुडि जाव उक्कस्सफद्दया त्ति ठइदाणं छब्भागविहत्ताणं विदियभागो मंदतरो, तदुदएण जादकसाओ पम्मलेस्सा णाम। (धव. पु. ७, पृ. १०४); अहिंसादिसु कज्जेसु जीवस्स मज्झिमुज्जमं पम्मलेस्सा कुणइ। वुत्तं च— चाई भद्दो चोक्खो उज्जुवकम्मो य खमइ बहुयं पि। साहु-गुरुपूजणरदो पम्माए परिणओ जीवो। (धव.

पु. १६, पृ. ४९२)। ४. शक्तः क्षमी सदात्यगी देवतार्चनउद्यमी। शुचिः शीलसदानन्दः पद्मलेश्यः प्ररूपितः॥ (गु. गु. षट्. स्वो. वृ. ५, पृ. २०)। १ त्यागी, भद्रपरिणामी, पवित्र, सरल व्यवहार करने वाला, क्षमाशील और साधु एवं गुरुजनों की पूजा में निरत; ये पद्मलेश्या के लक्षण हैं।

पद्माङ्ग—१. कुमुदं चउसीदिहदं पउमंगं होदि ×××। (ति. प. ४-२९६)। २. चतुरशीतिमहानलिनशतसहस्राण्येकं पद्माङ्गम्। (ज्योतिष्क. मलय. वृ. ६७; जीवाजी. मलय. वृ. १७८)। १ चौरासी से गुणित कुमुद प्रमाण एक पद्मांग होता है। २. चौरासी लाख महानलिनों का एक पद्मांग नाम का संख्याप्रमाण होता है।

पद्मासन—१. जंघाया मध्यभागे तु संश्लेषो यत्र जंघया। पद्मासनमिति प्रोक्तं तदासनविचक्षणैः॥ (योगशा. ४-१२९)। २. पद्मासनं श्रितौ पादौ जङ्घाभ्याम् ××××। (अन. ध. ८-८३)। १ जंघा के मध्य भाग में जहां जंघा से संश्लेश (सम्बन्ध) होता है, यह पद्मासन कहलाता है।

परकायक्रिया—प्रदुष्टस्य मिथ्यादृष्टेरुद्यमो यः पराभिभवात्मको वाङ्मनसनिरपेक्षः सा तु परतः कायक्रिया। (त. भा. सिद्ध वृ. ६-६)। अतिशय दुष्ट मिथ्यादृष्टि जीव का जो वचन और मन की अपेक्षा से रहित दूसरे के तिरस्कारस्वरूप प्रयत्न होता है उसे परकायक्रिया कहा जाता है।

परकायशस्त्र—परकायशस्त्रं पाषाणाग्न्यादि। (आचारा. नि. शी. वृ. १, १, ५, १५०, पृ. ५५)। वनस्पतिकाय से भिन्न पत्थर व अग्नि आदि परकायशस्त्र कहलाते हैं (द्रव्यनिक्षेपकी अपेक्षा)।

परकृतसंहरण—परकृतं चारण-विद्याधर-देवैः प्रत्यनीकतया ऽनुकम्पया चोत्क्षिप्यान्यत्र क्षेपणं संहरणम्। (त. भा. सिद्ध. वृ. १०-७, पृ. ३०६)। चारणऋद्धिधारक, विद्याधर या देवों के द्वारा शत्रुता या अनुकम्पा से प्रेरित होकर किसी के एक क्षेत्र से उठाकर अन्य क्षेत्र में छोड़ने को परकृतसंहरण कहते हैं।

परक्षेत्रसंसार—देखो क्षेत्रपरावर्त व क्षेत्रपरिवर्तन। १. सम्मूर्च्छन-गर्भोपपादजन्म-नवयोनिविकल्पाद्यालम्बनः परक्षेत्रसंसारः। (त. वा. ९, ७, ३; वा. सा. पृ. ८०)। २. परक्षेत्रपरिवर्तनमुच्यते—सूक्ष्मनिगोदः अपर्याप्तकः सर्वजघन्यावगाहनशरीरः लोकमध्याष्टप्रदेशान् स्वशरीरमध्याष्टप्रदेशान् कृत्वा उत्पन्नः क्षुद्रभवकालं जीवित्वा मृतः स एव पुनस्तेनैव अवगाहनेन द्विवारं तथा त्रिवारं तथा चतुर्वारं एवं यावत् घनाङ्गुलासंख्येयभागः तावद्वारं तत्रैवोत्पन्नः, पुनः एकैकप्रदेशाधिकभावेन सर्वलोकं स्वस्य जन्मक्षेत्रभावं नयति। तदेतत्सर्वं परक्षेत्रपरिवर्तनं भवति। (गो. जी. जी. प्र. टी. ५६०)। १ सम्मूर्च्छन, गर्भ और उपपाद इन तीन जन्मों एवं सचित्तादि नौ योनिभेदों के आलम्बन से जो जन्म-मरणरूप संसरण (परिभ्रमण) होता है उसका नाम परक्षेत्रसंसार है।

परघातनाम—देखो पराघातनाम। १. यन्निमित्तः परशस्त्रादेर्व्याघातस्तत्परघातनाम। (स. सि. ८, ११)। २. यन्निमित्तः परशस्त्राद्याघातस्तत्परघातनाम। परशब्दोऽन्यपर्यायवाची, फलकाद्यावरणसन्निधानेऽपि यस्योदयात् परप्रयुक्तशस्त्राघातो भवति तत् परघातनाम। (त. वा. ८, ११, १४)। ३. परेषां घातः परघातः, जस्स कम्मस्स उदएण परघादहेदू सरीरे पोग्गला णिप्फज्जंति तं कम्मं परघादं णाम। (धव. पु. ६, पृ. ५९); जस्स कम्मस्सुदएण सरीरं परपीडायं होदि तं परघादणामं। (धव. पु. १३, पृ. ३६४)। ४. यन्निमित्तः परशस्त्राघातनं तत्परघातनाम। (त. श्लो. ८-११)। ५. परस्य घातः परघातः, यस्य कर्मण उदयात्परघातहेतवः शरीरपुद्गलाः सर्पदंष्ट्रा-वृश्चिकपुच्छादिभवाः, परशस्त्राद्याघाता वा भवन्ति तत्परघातनाम। (मूला. वृ. १२, १९४)। ६. यत्कारणकः शर[पर] शस्त्राद्याघातस्तत्परघातनाम। (भ. आ. मूला. २१२४)। ७. परेषां घातः परघातः, यदुदयात् तीक्ष्णशृंग-नख-सर्पदाढादयो भवन्ति तत्परघातनाम। (गो. क. जी. प्र. ३३)। ८. यदुदयेन परशस्त्रादिना घातो भवति तत्परघातनाम। (त. वृत्ति श्रुत. ८-११)। १ जिसके निमित्त से दूसरे के शस्त्र आदि से घात होता है वह परघातनामकर्म कहलाता है। ३. जिस कर्म के उदय से दूसरे का घात करने वाले शरीर में पुद्गल—जैसे सर्प की डाढ़ें आदि—उत्पन्न होते हैं, उसे परघात नामकर्म कहते हैं।

परचरित्रचर—१. जो परदव्वम्मि सहं असूहं

रागेण कुणदि जदि भावं। सो सगचरित्तभट्ठो पर-चरियचरो हवदि जीवो॥ (पंचा. का. १५६)। २. यो हि मोहनीयोदयानुवृत्तिवशाद् रज्यमानोपयोगः सन् परद्रव्ये शुभमशुभं वा भावमादधाति स स्वक-चरित्रभ्रष्टः परिचरित्रचर इति उपगीयते। यतो हि स्वद्रव्ये शुद्धोपयोगवृत्तिः स्वचरितम्, परद्रव्ये सोपरागोपयोगवृत्तिः परचरितमिति। (पंचा. का. अमृत. वृ. २५६)।

१ जो जीव रागवश परद्रव्य में शुभ-अशुभ भाव को किया करता है वह अपने चरित्र से भ्रष्ट होकर परचरित्रचर कहलाता है।

परत्वापरत्व—१. परत्वापरत्वे त्रिविधे—प्रशंसाकृते क्षेत्रकृते कालकृते इति। तत्र प्रशंसाकृते परो धर्मः परं ज्ञानमपरोऽधर्मः अपरमज्ञानमिति। क्षेत्र-कृते एकदिक्कालावस्थितयोर्विप्रकृष्टः परो भवति, सन्निकृष्टोऽपरः। कालकृते द्विरष्टवर्षाद् वर्षशतिकः परो भवति, वर्षशतिकाद् द्विरष्टवर्षोऽपरो भवति। (त. भा. ५-२२)। २. अतिसमीपदेशवर्तिनि अति-वृद्धे व्रतादिगुणहीने चाण्डाले परत्वव्यवहारो वर्तते, दूरदेशवर्तिनि गर्भरूपे व्रतादिगुणसहिते च अपरत्वव्यवहारो वर्तते(?)। ते द्वे अपि परत्वापरत्वे उक्तलक्षणे कालकृते ज्ञातव्ये। (त. वृत्ति श्रुत. ५-२२)।

१ परत्व व अपरत्व तीन प्रकार के हैं—प्रशंसाकृत, क्षेत्रकृत और कालकृत। प्रशंसा की अपेक्षा धर्म व ज्ञान को पर तथा अधर्म और अज्ञान को अपर माना जाता है। क्षेत्र की एक दिशा में स्थित दूर-वर्ती को पर और निकटवर्ती को अपर कहा जाता है। काल की अपेक्षा १६ वर्ष वाले की अपेक्षा १०० वर्ष वाले में पर और १६ वर्ष वाले में अपर का व्यवहार होता है। २ अतिसमीपदेशवर्ती, अति-वृद्ध और व्रतादि गुणों से विहीन चाण्डाल में परत्व का व्यवहार होता है। दूरदेशवर्ती, शिशु और व्रतादि गुणों से सहित में अपरत्व का व्यवहार होता है। इन दोनों परत्व-अपरत्व को कालकृत जानना चाहिये।

परदारगमन—आत्मव्यतिरक्तो योऽन्यः स परस्त-स्य दाराः कलत्रं परदारास्तस्मिन् (तेषु) गमनं पर-दारगमनम्, गमनमासेवनरूपतया दृष्टव्यम्॥ (आव. हरि. वृ. अ. ६, पृ. ८३२)।

अन्य की स्त्री के सेवन का नाम परदारगमन है।

परदृष्टिप्रशंसा—देखो अन्यदृष्टिप्रशंसा। एका-न्तध्वान्तविध्वस्तवस्तुयाथात्म्यसंविदाम्। न कुर्यात् परदृष्टीनां प्रशंसां दृक्कलङ्किनीम्॥ (अन. ध. २-८३)।

एकान्तरूप अन्धकार के द्वारा जिनका वस्तुस्वरूप का यथार्थ ज्ञान—अनेकान्तात्मक तत्त्व का समीचीन बोध—लुप्त हो गया है वे परदृष्टि कहे जाते हैं। उनकी प्रशंसा का नाम परदृष्टिप्रशंसा है जो सम्यग्दर्शन को मलिन करने वाली है।

परनिन्दा—परेषां भूताभूतदूषणपुरस्सरवाक्यं पर-निन्दा। (नि. सा. वृ. ६२)।

दूसरों के विद्यमान या अविद्यमान दोषों के प्रकट करने को परनिन्दा कहते हैं।

परपरितापकारिणी क्रिया—परपरितापकारिणी पुत्र-शिष्य-कलत्रादिताडनम्। (त. भा. सिद्ध. वृ. ६-६)।

पुत्र, शिष्य और स्त्री आदि के ताड़न करने—उन्हें कष्ट पहुंचाने—को परपरितापकारिणी क्रिया कहते हैं।

परपरिवाद—१. परेषां परिवादः परपरिवादो विकत्थनम्। (स्थाना. अभय. वृ. ४६)। २. पर-परिवादः विप्रकीर्णम् परेषां गुण-दोषवचनम्। (औपपा. अभय. वृ. ३४, पृ. ७६)। ३. परपरि-वादः प्रभूतजनसमक्षं परदोषविकत्थनम्। (प्रज्ञाप. मलय. वृ. २८०, पृ. ४३८)। ४. परपरिवादः विप्रकीर्णपरकीयगुण-दोषप्रकटनम्। (कल्पसू. वि. वृ. ११८, पृ. १७४)।

२ अन्य जनों के बिखरे हुए गुण-दोषों के कहने को परपरिवाद कहते हैं।

परप्रणेय— परकोप-प्रसादानुवृत्तिः परप्रणेयः। (नीतिवा. २६-६८, पृ. ३४१)।

दूसरों के कहने से कोप या प्रसाद का अनुसरण करने वाले राजा को परप्रणेय कहते हैं।

परप्राणातिपातजननी क्रिया—परप्राणातिपात-जननी तु मोह-लोभ-क्रोधाविष्टा प्राणव्यपरोपलक्षणा क्रिया। (त. भा. सिद्ध. वृ. ६-६)।

मोह, लोभ या क्रोध के वशीभूत होकर दूसरे जीवों के प्राणों का घात करने को परप्राणातिपातजननी क्रिया कहते हैं।

परम—तत्र परमो यः खलु निखिलमलविलयवशीपलब्धविशुद्धज्ञानबलविलोकितलोकालोकः जगज्जन्तुचित्तसन्तोषकारणं पुरन्दरादिसुन्दरसुरसमूहाहृियमाणप्रातिहार्यपूजोपचारः तदनु सर्वसत्त्वस्वभाषापरिणामिवाणीविशेषापादितैककालानेकसत्त्वसंशयसन्देहापोहः स्वविहारपवनप्रसरसमुत्सारितसमस्तमहीमण्डलातिविततदुरितरजोराशिः सदाशिवादिशब्दाभिधेयो भगवानर्हन्निति, स परमः। (ध. वि. मु. वृ. १–१, पृ. १)।

जो समस्त कर्म-मल के विलीन हो जाने से प्राप्त हुए विशुद्ध केवलज्ञान के प्रभाव से लोक-अलोक को देखता है, समस्त संसारी प्राणियों के चित्त-सन्तोष का कारण है, इन्द्र आदि सुन्दर देवों के समूह द्वारा लाये गये प्रातिहार्यों से सेवित है, समस्त प्राणियों की भाषारूप परिणत होने वाली विशिष्ट वाणी के द्वारा एक ही समय में अनेक जीवों के सन्देह को दूर करता है, अपने विहाररूप वायु के प्रसार से समस्त भूमण्डलमें अत्यन्त विस्तृत पापरूप धूलि के समूह को नष्ट करता है, तथा जो सदाशिव आदि अनेक नामों से कहा जाता है; ऐसा अरहन्त देव ही परम (उत्कृष्ट आत्मा) मानने के योग्य है।

परमब्रह्म—१. अहिंसा भूतानां जगति विदितं ब्रह्म परमम्। (बृ. स्वयम्भू. ११९)। २. परमब्रह्मसंज्ञनिजशुद्धात्मभावनासमुत्पन्नसुखामृततृप्तस्य सत उर्वशी-रम्भा-तिलोत्तमाभिर्देवकन्याभिरपि यस्य ब्रह्मचर्यव्रतं न खण्डितं स परमब्रह्म भण्यते। (बृ. द्रव्यसं. टी. १४, पृ. ३७)।

१ समस्त प्राणियों की अहिंसा—हिंसा के अभाव—को परमब्रह्म कहते हैं। २ परमब्रह्म नामक अपनी शुद्ध आत्मा की भावना से उत्पन्न सुखस्वरूप अमृत से जो तृप्ति को प्राप्त है तथा जिसका ब्रह्मचर्यव्रत उर्वशी, रम्भा और तिलोत्तमादि देवकन्याओं के द्वारा भी खण्डित नहीं किया जा सका ऐसे परम पुरुष को परमब्रह्म कहते हैं।

परमभावजीव—जो खलु जीवसहावो णो अणिओ णो खयेण संभूदो। कम्माणं सो जीवो भणिओ इह परमभावेण॥ (द्रव्यस्व. नय. २१५)।

जो जीव का स्वभाव न उत्पन्न हुआ है और न कर्मों के क्षय से प्रादुर्भूत हुआ है उसे परमभाव से जीव कहा गया है।

परमभावग्राहक द्रव्यार्थिक—णिद्दह दव्वसहावं असुद्धसुद्धोपचारपरिचत्तं। सो परमभावगाही णायव्वो सिद्धिकामेण॥ (ल. न. च. २६; द्रव्यस्व. नय. ९९)।

जो अशुद्ध और शुद्ध के उपचार से रहित द्रव्य के स्वभाव को ग्रहण करता है उसे परमभावग्राहक द्रव्यार्थिकनय कहते हैं।

परमर्षि—१. परमर्षयः केवलज्ञानिनो निगद्यन्ते। (चा. सा. पृ. २२)। २. परमर्षिः जगद्वेत्ति केवलज्ञानचक्षुषा। (धर्मसं. श्रा. ९–२८६)।

१ केवलज्ञानी संयत जीवों को परमर्षि कहते हैं।

परमव्रत—ततः शुद्धोपयोगो यो मोहकर्मोदयाद्भवेत्। चारित्रापरनामैतद् व्रतं निश्चयतः परम्॥ (लाटीसं. ४–२५८)।

मोहकर्म का अभाव हो जाने पर शुद्धोपयोगरूप जो चारित्र होता है उसे निश्चय से परमव्रत जानना चाहिए।

परमसमाधि—वयणोच्चारणकिरियं परिचत्ता वीयरायभावेण। जो झायदि अप्पाणं परमसमाही हवे तस्स॥ संजम-णियम-तवेण दु धम्मज्झाणेण सुक्कझाणेण। जो झायदि अप्पाणं परमसमाही हवे तस्स॥ (नि. सा. १२२–२३)।

वचन के उच्चारण की क्रिया को छोड़कर—वचनोच्चारण के बिना—वीतरागस्वरूप से जो आत्मा का ध्यान करता है उसके परम (निर्विकल्प) समाधि होती है। संयम, नियम और तप के आश्रय से जो धर्म और शुक्ल ध्यान के द्वारा आत्मा का ध्यान करता है उसके परमसमाधि होती है।

परमसुख—आत्मोपादानसिद्धं स्वयमतिशयवद्वीतबाधं विशालं वृद्धि-ह्रासव्यपेतं विषयविरहितं निःप्रतिद्वन्द्वभावम्। अन्यद्द्रव्यानपेक्षं निरुपममममितं शाश्वतं सर्वकालम् उत्कृष्टानन्तसारं परमसुखमतस्तस्य सिद्धस्य जातम्। (सिद्धभ. ७)।

जो सुख परके सम्बन्ध से रहित होता हुआ एक आत्मारूप उपादान से उत्पन्न हुआ है, स्वयं अतिशयवान् है, बाधा से रहित है, वृद्धि-हानि से विहीन है, विषय से उत्पन्न नहीं हुआ है, प्रतिपक्ष से विरहित है, अन्य किसी भी बाह्य द्रव्य की अपेक्षा नहीं करता है, अनुपम व अपरिमित होता हुआ सदा रहने वाला है, तथा उत्कृष्ट व अनन्त प्रभाव से

मुक्त है; वही परमसुख कहलाता है और वह सिद्धात्मा के ही सम्भव है।

परमहंस—१. कर्मात्मनोर्विवेक्ता यः क्षीर-नीरसमानयोः। भवेत् परमहंसोऽसौ नाग्निवस्सर्वभक्षकः॥ (उपासका. ८७६)। २. तदेवैकदेशव्यक्तिरूपविवक्षितैकदेशशुद्धनिश्चयेन स्वशुद्धात्मसंवित्तिसमुत्पन्नसुखामृतजलसरोवरे रागादिमलरहितत्वेन परमहंसस्वरूपम्। (बृ. द्रव्यसं. टी. ५६)।

१ जैसे हंस मिले हुए क्षीर और नीर को पृथक् कर देता है उसी प्रकार जो क्षीर-नीर के समान मिले हुए कर्म और आत्मा की भिन्नता का अनुभव करता है वह परमहंस कहलाता है, किन्तु जो अग्नि के समान सर्वभक्षक हो वह परमहंस नहीं हो सकता।

परमागम—यदिदं जीवादिपदार्थस्वरूपनिरूपणं नय-प्रमाणाद्यधिगमोपायप्रापितयुक्तिबन्ध-मोक्षादिप्रतिपादनसमर्थमित्येवमादीनामतिशयज्ञानानामाकरः आर्हत आगमः रत्नानामिवोदधिः, अतोऽस्य परमागमत्वम्। (त. वा. ८, १, १६)।

नय और प्रमाण आदि जो अधिगम के उपायभूत हैं उनके आश्रय से प्राप्त युक्ति के बलसे बन्ध-मोक्षादि के प्रतिपादन में समर्थ जो जीवादि पदार्थों के स्वरूप का निरूपण है वह अतिशयित ज्ञान रूप रत्नों की खानिस्वरूप भगवान् अरहन्त के द्वारा प्रणीत है, इसीसे उसे परमागमता सिद्ध है।

परमाणु—१. ××× परमाणू चेव अविभागी। (पंचा. का. ७५; मूला. ५–३४); सव्वेसिं खंधाणं जो अंतो तं वियाण परमाणू। सो सस्सदो असद्दो एक्को अविभागी मुत्तिभवो॥ आदेसमत्तमुत्तो धादुचदुक्कस्स कारणं जो दु। सो णेओ परमाणू परिणामगुणो सयमसद्दो। (पंचा. का. ७७–७८); एयरस-वण्ण-गंधं दोफासं सद्दकारणमसद्दं। खंधंतरिदं दव्वं परमाणुं तं वियाणेहि॥ (पंचा. का. ८१; ति. प. १–९७—चतुर्थ च. 'तं परमाणुं भणंति बुधा')। २. अत्तादि अत्तमज्झं अत्तंतं णेव इंदिये गेज्झं। अविभागी जं दव्वं परमाणुं तं विआणाहि॥ (नि. सा. २६; स. सि. ५–२५ उद्.)। ३. अनादिरमध्योऽप्रदेशो हि परमाणुः। (त. भा. ५–११); उक्तं च—कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः। एकरस-गन्ध-वर्णो द्विस्पर्शः कार्यलिङ्गश्च॥ (त. भा. ५–२५ उद्.; षड्द. स. गु. बृ. ९४ उद्.)। ४. परमाणुरप्रदेशो वर्णादिगुणेषु भजनीयः। (प्रशमर. २०८)। ५. सत्थेणं सुतिक्खेणवि छेत्तुं भेत्तुं जं न किर सक्का। तं परमाणुं सिद्धा वयंति आई पमाणाणं॥ (भगवती. ६, ७, ५, पृ. ८२७; जं. दी. प. १३–१२; संग्रहणी २४५)। ६. एगरस एगवण्णे एगे गंधे तहा दुफासे वा। परमाणु ××× ॥ (उत्तरा. नि. ३३, पृ. २३)। ७. परमश्चासावणुश्च परमाणुः निरंशः। (उत्तरा. चू., पृ. २८१)। ८. ××× अविभागी होदि परमाणू॥ सत्थेण सुतिक्खेणं छेत्तुं भेत्तुं च जं किरस्सक्कं। जलयणलादिहिं णासं ण एदि सो होदि परमाणू॥ एक्करस-वण्ण-गधं दो फासा सद्दकारणमसद्दं। खंधंतरिदं दव्वं तं परमाणुं भणंति बुधा॥ अंतादिमज्झहीणं अपदेसं इंदिएहि ण हु गेज्झं। जं दव्वं अविभत्तं तं परमाणुं कहंति जिणा॥ पूरंति गलंति जदो पूरणगलणेहिं पोग्गला तेण। परमाणु च्चिय जादा इय दिट्ठं दिट्ठिवादम्हि॥ वण्ण-रस-गंध-फासे पूरण-गलणाइ सव्वकालम्हि। खंदं पि व कुणमाणा परमाणू पुग्गला तम्हा॥ आदेसमत्तमुत्तो धादुचउक्कस्स कारणं जादो। सो णेयो परमाणू परिणामगुणो य खंदस्स॥ (ति. प. १, ९५–१०१)। ९. अन्तादिमध्यहीनः अविभागोऽतीन्द्रियः एकरस-वर्ण-गन्धः द्विस्पर्शः परमाणुः। (त. वा. ३, ३८, ६)। १०. 'अपदेसं णेव इंदिए गेज्झं' इदि परमाणूणं णिरवयवत्तं परियम्मे वुत्तमिदि ×××। (धव. पु. १३, पृ. १८ उद्.); न विद्यन्ते द्वितीयादयः प्रदेशाः यस्मिन् सोऽप्रदेशः परमाणुः। (धव. पु. १४, पृ. ५४)। ११. आदि-मध्यान्त-निर्मुक्तं निर्विभागमतीन्द्रियम्। मूर्तमप्यप्रदेशं च परमाणुं प्रचक्षते॥ (ह. पु. ७–३२)। १२. अणवः कार्यलिङ्गाः स्युर्द्विस्पर्शाः परिमण्डलाः। एकवर्ण-रसा नित्याः स्युरनित्याश्च पर्ययैः॥ (म. पु. २४–१४८)। १३. आदि-मध्यान्तप्रदेशैः परिहीण एव परमाणुरिष्यते। (त. भा. सिद्ध. बृ. ५–११)। १४. ××× अविभागी होइ परमाणू॥ (भावसं. दे. ३०४)। १५. आत्मादिरात्ममध्यश्च तथात्मान्तश्च नेन्द्रियैः। गृह्यते योऽविभागी च परमाणुः स उच्यते॥ (त. सा. ३–५९)। १६. उक्तानां स्कन्धपर्यायाणां योऽन्त्यो

भेदः स परमाणुः। (पंचा. का. अमृत. वृ. ७७)। १७. ×××
परमाणुरनंशकः ॥ (योगप्रा. २-११)। १८. ××× अविभागी चेव परमाणू ॥ (गो. जी. ६०४)। १९. परमाणू अविहायउ असेसु। (जसहरच. ४-१२, पृ. ८३)। २०. अंतादि-मज्झहीणं अपदेसं णेव इंदिए गेज्झं। जं दव्वं अविभागी तं परमाणू मुणेयव्वा ॥ जस्स ण कोइ अणुदरो सो अणुओ होदि सव्वदव्वाणं। जावे परं अणुत्तं तं परमाणू मुणेयव्वा ॥ सत्थेण सुतिक्खेण य छेत्तुं भेत्तुं च जं किर ण सक्कं। तं परमाणुं सिद्धा भणंति आदिं पमाणेण। (जं. दी. प. १३, १६-१८)। २१. परमाणू अविभागी पुग्गलदव्वं जिणुद्दिट्ठं ॥ (वसु. श्रा. १७)। २२. अणुश्च पुद्गलोऽभेद्यावयवः प्रचयशक्तितः। कायश्च स्कन्धभेदोत्थश्चतुरस्रस्त्वतीन्द्रियः ॥ (आचा. सा. ३-१३)। २३. परमश्चासावात्यन्तिकोऽणुश्च सूक्ष्मः परमाणुः द्व्यणुकादिस्कन्धानां कारणभूतः। (स्थाना. अभय. वृ. ४५, पृ. २४); परमाणुः अस्कन्धपुद्गल इति। (स्थाना. अभय. वृ. १६६)। २४. अविभागिभूतं परमाणु। (गो. जी. जी. प्र. ६०४)।

१ जो समस्त स्कन्धों के अन्तिम भेदरूप होता हुआ एक, अविभागी, नित्य (अनादिनिधन) रूपादि परिणाम (मूर्ति) से उत्पन्न होने के कारण मूर्तिभव और शब्द से रहित है वह परमाणु कहलाता है।

परमात्मा—१. कम्मकलंकविमुक्को परमप्पा भण्णए देवो। (मोक्षप्रा. ५)। २. णिस्सेसदोसरहिओ केवलणाणाइपरमविभवजुदो। सो परमप्पा उच्चइ तव्विवरीओ ण परमप्पा ॥ (नि. सा. ७)। ३. ××× परमात्मातिनिर्मलः। (समाधि. ५)। ४. अप्पा लद्धउ णाणमउ, कम्मविमुक्कें जेण। मेल्लिवि सयलु वि दव्व परु, सो परु मुणहि मणेण ॥ (परमा. १-१५)। ५. मुक्तामुक्तैकरूपो यः कर्मभिः संविदादिना। अक्षयं परमात्मानं ज्ञानमूर्ति नमामि तम्। (स्वरूपसं. १)। ६. ××× परमप्पा दोसपरिचत्तो ॥ दोसा छुहाइ भणिया अट्ठारस होंति तिविहलोयम्मि। सामण्णा सयलजणे तेसिमभावेण परमप्पा ॥ (भावसं. २७२-७३)। ७. ससरीरा अरहंता केवलणाणेण मुणियसयलत्था। णाणसरीरा सिद्धा सव्वुत्तमसुक्खसंपत्ता ॥ णीसेसकम्मणासे अप्पसहावेण जा समुप्पत्ती। कम्मजभावत्तए वि य सा वि य पत्ती परा होदि ॥ (कार्तिके. १९८-९९)। ८. साकारं निर्गताकारं निष्क्रियं परमाक्षरम्। निर्विकल्पं च निष्कम्पं नित्यमानन्दमन्दिरम् ॥ विश्वरूपमविज्ञातस्वरूपं सर्ववेदितम्। कृतकृत्यं शिवं शान्तं निष्कलं करुणच्युतम् ॥ निःशेषभवसम्भूतक्लेश-द्रुमहुताशनम्। शुद्धमत्यन्तनिर्लेपं ज्ञान-राज्यप्रतिष्ठितम् ॥ विशुद्धादर्शसंक्रान्तप्रतिबिम्बसमप्रभम्। ज्योतिर्मयं महावीर्यं परिपूर्णं पुरातनम् ॥ विशुद्धाष्टगुणोपेतं निर्द्वन्द्वं निर्गतामयम्। अप्रमेयं परिच्छिन्नं विश्वतत्त्वव्यवस्थितम् ॥ यदग्राह्यं बहिर्भावैर्ग्राह्यश्चान्तर्मुखैः क्षणात्। तत्स्वभावात्मकं साक्षात् स्वरूपं परमात्मनः ॥ (ज्ञानार्णव ३१, २२-२७, पृ ३१२); निर्लेपो निष्कलः शुद्धो निष्पन्नोऽत्यन्तनिर्वृतः। निर्विकल्पश्च शुद्धात्मा परमात्मेति वर्णितः ॥ (ज्ञानार्णव ३२-८, पृ. ३१७)। ९. परमट्ठगुणेहिं जुदो अणंतगुणभायणो णिरालंबो। णिच्छेओ णिब्भेओ अणिंदिदो मुणह परमप्पा ॥ (ज्ञा. सा. ३४)। १०. संपुण्णचंदवयणो जडमउडविवज्जिओ णिराहरणो। पहरण-जुवइविमुक्को संतियरो होइ परमप्पा ॥ (धम्मर. १२२)। ११. परमात्मा सकलप्राणिभ्य उत्तम आत्मा। (समाधि टी. ६)। १२. चिद्रूपानन्दमयो निःशेषोपाधिवर्जितः शुद्धः। अत्यक्षोऽनन्तगुणः परमात्मा कीर्तितः तज्ज्ञैः ॥ (योगशा. १२-८)। १३. गतनिःशेषोपाधिः परमात्मा कीर्तितस्तज्ज्ञैः। (अध्या. सा. २०-२१)। १४. यः केवलज्ञान-दर्शनोपयुक्तः शुद्धसिद्धः स परमात्मा सयोगी केवली सिद्धश्च सः परमात्मा उच्यते। (ज्ञा. सा. टी. १३-२)। १५. परा सर्वोत्कृष्टा मा अन्तरङ्ग-बहिरङ्गलक्षणा अनन्तचतुष्टयादिसमवसरणादिरूपा लक्ष्मीर्येषां ते परमाः, ते च ते आत्मानः परमात्मानः। (कार्तिके. टी. १९२)। १६. संसारिभ्यः परो ह्यात्मा परमात्मेति भाषितः। (आप्तस्व. १८)।

२ सर्व दोषों से रहित और केवलज्ञानादिरूप परमैश्वर्य से सम्पन्न शुद्ध आत्मा को परमात्मा कहते हैं।

परमानन्द—सुस्वास्थ्यं च परमानन्दः। (ध. वि. ८-५१)।

अतिशय स्वास्थ्य को परमानन्द कहते हैं।

परमानन्ददोग्रन्थिकप्राभृत—तत्थ परमाणंददोगंथियपाहुडं जहा जिणवइणा केवलणाण-दंसणति-

(वि)लोयणेहिं पयासियासेसभुवणेण उज्झियरायदोसेण भव्वाणमणवज्जबुहायरियपणालेण पट्ठविददुवालसंगवयणकलावो तदेगदेसो वा। (जयध. पु. १, पृ. ३२५)।

केवलज्ञान और केवलदर्शनरूप नेत्रों के द्वारा जिसने समस्त लोक को प्रकाशित किया है और जो राग-द्वेष दोषों से रहित हो चुका है ऐसे जिनेन्द्र के द्वारा निर्मल बुद्धि से सम्पन्न आचार्यरूप प्रणाली के द्वारा—आचार्यपरम्परा से—जिस द्वादशांगरूप अथवा उसके एकदेशरूप वाणी को प्रस्तुत किया गया है उसे परमानन्द-दीपग्रन्थिकप्राभृत कहा जाता है।

परमार्थ काल—१. परमार्थकालः वर्तनालिङ्गः गत्यादीनां धर्मादिवत् वर्तनाया उपकारकः। स किंस्वरूप इति चेत् उच्यते—यावन्तो लोकाकाशे प्रदेशास्तावन्तः कालाणवः परस्परं प्रत्यबन्धाः एकैकस्मिन्नाकाशप्रदेशे एकैकवृत्त्या लोकव्यापिनः मुख्योपचारप्रदेशकल्पनाऽभावान्निरवयवाः। (त. वा. ५, २२, २४, पृ. ४८२)। २. परमट्ठो कालाणू लोयपदेसे हि संठिया णिच्चं। एक्केक्के एक्केक्का अपएसा रयणरासिव्व॥ (भावसं. दे. ३१०)। ३. तत्र यावन्तो लोकाकाशप्रदेशास्तावन्तः कालाणवः परस्परं प्रत्यबन्धा एकैकस्मिन्नाकाशप्रदेशे एकैकवृत्त्या लोकव्यापिनो मुख्योपचारप्रदेशकल्पनाभावान्निरवयवाः। (चा. सा. पृ. ८०)। ४. वर्तनालक्षणश्च परमार्थकालः इति। (बृ. द्रव्यसं. टी. २१)। ५. समयादिरूपसूक्ष्मव्यवहारकालस्य घटिकादिरूपस्थूलव्यवहारकालस्य च यद्युपादानकारणभूतकालस्तथापि समय-घटिकारूपेण या विवक्षिता व्यवहारकालस्य भेदकल्पना तया रहितस्त्रिकालस्थायित्वेनानाद्यनिधनो लोकाकाशप्रदेशप्रमाणकालाणुद्रव्यरूपः परमार्थकालः। (पंचा. जय. वृ. २६)।

१ वर्तना जिसका हेतु है वह परमार्थकाल कहलाता है। जिस प्रकार धर्म आदि द्रव्य गति आदि के उपकारक हैं उसी प्रकार यह वर्तना का उपकारक है। लोकाकाश में जितने प्रदेश हैं उतने कालाणु परस्पर में बन्ध रहित हैं और एक एक आकाशप्रदेश पर एक एक स्थित होते हुए लोक को व्याप्त करते हैं।

परमार्थप्रत्याख्यान— ××× ततः संसार-शरीर-भोगनिर्वेगतो निश्चयप्रत्याख्यानस्य कारणम्। पुनर्भाविकाले संभाविनां निखिलमोह-राग-द्वेषादिविविधविभावानां परिहारः परमार्थप्रत्याख्यानम्। अथवानागतकालोद्भवविविधान्तर्जल्पपरित्यागः शुद्धं निश्चयप्रत्याख्यानम्। (नि. सा. वृ. १०५)।

संसार, शरीर और भोगों से विरक्ति होना; यह निश्चय प्रत्याख्यान का कारण है। आगामी काल में उत्पन्न होने वाले समस्त राग-द्वेष-मोहादिरूप विविध विकारी भावों के परित्याग को परमार्थप्रत्याख्यान कहते हैं। अथवा भावी काल में उत्पन्न होने वाले विविध अन्तर्जल्प के परित्याग को शुद्ध निश्चय प्रत्याख्यान जानना चाहिये।

परमावगाढरुचि—१. परमावधि-केवलज्ञान-दर्शनप्रकाशितजीवाद्यर्थविषयात्मप्रसादाः परमावगाढरुचयः। (त. वा. ३, ३६, २)। २. केवलावगमालोकिताखिलार्थगता रुचिः। परमाद्यवगाढासौ श्रद्धेति परमर्षिभिः॥ (म. पु. ७४–४४६)। ३. कैवल्यालोकितार्थे रुचिरिह परमावादिगाढेति रूढा। (आत्मानु. १४)। ४. अवधि-मनःपर्यय-केवलाधिकपुरुषप्रत्ययप्ररूढं परमावगाढम्। (उपासका. पृ. ११४)। ५. परमावगाढा अवधि-मनःपर्यय-केवलाधिकपुरुषप्रत्ययप्ररूढा। (अन. ध. २–६२)।

१ परमावधि, केवलज्ञान और केवलदर्शन से प्रकाशित जीवादि पदार्थविषयक आत्मप्रसन्नता जिनको प्राप्त है वे परमावगाढरुचि या परमावगाढसम्यग्दृष्टि कहलाते हैं।

परमावती—सत्त अवंतीगंगाओ सा एगा परमावती। (भगवती. १५–८८, पृ. २०५५)।

सात अवंती गंगाओं के परिमाणवाली गंगा को एक परमावती गंगा कहते हैं।

परमावधिज्ञान—परमा ओही मज्जाया जस्स णाणस्स तं परमोहिणाणं। किं परमं? असंखेज्जलोगमेत्तसंजमवियप्पा। (धव. पु. १३, पृ. ३२३)।

जिस ज्ञान की उत्कृष्ट मर्यादा असंख्यात लोक प्रमाण संयम के विकल्प हैं वह परमावधिज्ञान कहलाता है।

परमेश्वर—महत्त्वादीश्वरत्वाच्च यो महेश्वरतां गतः। त्रैधातुकविनिर्मुक्तस्तं वन्दे परमेश्वरम्॥ (आप्तस्व. २७)।

जो महत्ता और ऐश्वर्य से युक्त होने के कारण

महेश्वरत्व को प्राप्त है वह त्रिविध कर्म-मल से रहित परमेश्वर कहलाता है।

परमेष्ठिमुद्रा—उत्तानहस्तद्वयेन वेणीबन्धं विधायाङ्गुष्ठाभ्यां कनिष्ठिके तर्जनीभ्यां च मध्यमे संगृह्यानामिके समीकुर्यादिति परमेष्ठिमुद्रा। यद्वा वामकराङ्गुलीरूर्ध्वीकृत्य मध्यमां मध्यमे कुर्यादिति द्वितीया (परमेष्ठिमुद्रा)। (निर्वाणक. पृ. ३३)।

दोनों हाथों को ऊंचा उठाकर और उन्हें वेणी सदृश बांधकर दोनों अंगूठों से दोनों कनिष्ठिकाओं को, तथा दोनों तर्जनियों से दोनों मध्यमा अंगुलियों को संगृहीत कर दोनों अनामिकाओं के समीकरण को परमेष्ठिमुद्रा कहते हैं।

परमेष्ठी—१. जो मिच्चु-जरारहिदो मद-विब्भम-सेद-खेद-परिहीणो। उप्पत्ति-रदिविहूणो सो परमेट्ठी वियाणाहि॥ (जं. दी. प. १३–८६)। २. परमे इन्द्रादीनां वन्द्ये पदे तिष्ठतीति परमेष्ठी। (रत्नक. टी. १–७)। ३. परमेष्ठी परमे इन्द्रादिवन्द्ये पदे तिष्ठतीति परमेष्ठी स्थानशीलः। (समाधि. टी. ६)। ४. परमे इन्द्र-चन्द्र-नरेन्द्रपूजिते पदे तिष्ठतीति परमेष्ठी। (चारित्रप्रा. टी. १; भावप्रा. टी. १४६)।

१ जो मृत्यु, जरा, मद, विभ्रम, स्वेद और खेद से रहित होता हुआ उत्पत्ति और रति से विहीन है उसे परमेष्ठी जानना चाहिए।

परम्परसिद्धकेवलज्ञान—१. ततो द्वितीयादिसमयेष्वनन्तामप्यनागताद्धां परम्परसिद्धकेवलज्ञानमिति। (नन्दी. हरि. वृ., पृ. ५०)। २. सिद्धत्वद्वितीयादिसमयेषु वर्तमानं परम्परसिद्धकेवलज्ञानम्। (आव. नि. मलय. वृ. ७८, पृ. ८३)।

१ सिद्ध होने के दूसरे समय से लगाकर आगे अनन्त काल तक रहने वाले सिद्ध जीवों के केवलज्ञान को परम्परसिद्धकेवलज्ञान कहते हैं।

परम्परादृष्टान्त—यः खल्वनन्तरमुक्तोऽपि परोक्षत्वादागमगम्यत्वाद्दार्ष्टान्तिकार्थसाधनायालं न भवति तत्प्रसिद्धये चाध्यक्षसिद्धो यौऽन्य उच्यते स परम्परादृष्टान्तः। (दशवै. नि. हरि. १४१)।

अव्यवहित पूर्व में कहा गया भी जो दृष्टान्त परोक्ष या आगमगम्य होने से अपने दार्ष्टान्तिक अर्थ की सिद्धि करने में समर्थ न हो तब उसकी सिद्धि के लिये जो प्रत्यक्षसिद्ध अन्य दृष्टान्त दिया जाता है उसे परम्परादृष्टान्त कहते हैं।

परम्परबन्ध—बंधविदियसमयप्पहुदि कम्मपोग्गलक्खंधाणं जीवपदेसाणं च जो बंधो सो परंपरबंधो णाम। (धव. पु. १२, पृ. ३७०)।

बन्ध के दूसरे समय से लेकर जो कर्मरूप पुद्गलस्कन्धों का और जीवप्रदेशों का बन्ध होता है उसे परम्परबन्ध कहा जाता है।

परम्परालब्धि—लब्धीनां परम्परा यस्मादागमात् प्राप्यते, यस्मिन् तत्प्राप्त्युपायो निरूप्यते वा सा परम्परालब्धिः आगमः। (धव. पु. १३, पृ. २८३)।

जिस आगम से लब्धियों की परम्परा प्राप्त की जाती है, अथवा जिसमें उनकी प्राप्ति के उपाय की प्ररूपणा की जाती है उसे परम्परालब्धि कहते हैं। यह एक आगमविशेष है।

परम्परास्थापना—उब्भट्टपरिग्गायं अन्नं लद्धं पओयणे घेत्थी। रिणभीया व अगारी दहित्ति दाहं सुए ठवणा॥ नवणीयमंथुतक्कं व जाव अत्तट्ठिया व गिह्णंति। देसूणा जाव घयं कुसणंपि य जत्तियं कालं॥ रसक्कब-पिंडगुला मच्छंडिय खंड-सक्कराणं च। होइ परंपरठवणा अन्नत्थ व जुज्जुए जत्थ॥ (पिण्डनि. २८१–८३)।

साधु के द्वारा किसी गृहिणी से दूध की याचना करने पर उसने थोड़ी देर से देने के लिए कहा। पश्चात् साधु को दूध अन्य घर से प्राप्त हो गया। उधर दूध को प्राप्त करके गृहिणी ने दूध ग्रहण करने के लिए प्रार्थना की। इस पर साधु ये कहा कि दूध मुझे प्राप्त हो गया है। यदि फिर कभी आवश्यकता हुई तो ले लूंगा। इस प्रकार साधु के कहने पर गृहिणी ने ऋण से भयभीत के समान उसका उपयोग स्वयं नहीं किया और दूसरे दिन दही देने के विचार से उसका दही बना लिया। पर साधु ने उसे नहीं लिया। इसी प्रकार आगे दही से मंथु (छांछ और मक्खन के बीच की अवस्था), मंथु से छांछ और छांछ से मक्खन बनाया गया, फिर भी अपने निमित्त स्थापित करने के कारण साधु ने उन्हें नहीं लिया। इसी प्रकार घी की याचना करने पर वह कुछ कम एक पूर्वकोटि काल प्रमाण (आयुस्थिति) स्थापित किया जा सकता है। पर साधु आजाकर जानकर उसे

नहीं ग्रहण करता। इस प्रकार से स्थापित करने पर परम्परास्थापना कहलाती है। इसी प्रकार ईख के रस से उत्तरोत्तर कक्कव, पिण्ड और गुड़ आदि को स्थापित किया जा सकता है।

परम्परोपनिधा— १. जत्थ दुगुण-चदुगुणादि-परिक्खा कीरदि सा परंपरोवणिधा। (धव. पु. ११, पृ. ३९२); जहण्णट्ठाणं पेक्खिदूण अणंत-भागब्भहियादिसरूवेण द्विदट्ठाणाणं जा थोव-बहुत्त-परूवणा सा परंपरोवणिधा। (धव. पु. १२, पृ. २१४)। २. तत्र परम्परया उपनिधा मार्गणं परम्परोपनिधा। (पंचसं. मलय. वृ. १-६)।

१. जिस अधिकार में दुगुने व चौगुने आदि की परीक्षा की जाती है उसका नाम परम्परोपनिधा है। २. उपनिधा का अर्थ मार्गणा या अन्वेषण होता है, तदनुसार परम्परा से स्थानादिकों का जहां अन्वेषण किया जाता है, ऐसे प्रकरण को परम्परोपनिधा कहा जाता है।

परलोक—१. परलोको भवान्तरलक्षणः (आव. नि. हरि. वृ. ५९६, पृ. २४१)। २. पर उत्कृष्टो वीतरागचिदानन्दैकस्वभाव आत्मा, तस्य लोकोऽवलोकनं निर्विकल्पसमाधौ वानुभवनमिति परलोकशब्दस्यार्थः, अथवा लोक्यन्ते जीवादिपदार्था यस्मिन् परमात्मस्वरूपे यस्य केवलज्ञानेन वा स भवति लोकः, परश्चासौ लोकश्च परलोकः, व्यवहारेण पुनः स्वर्गापवर्गलक्षणः परलोको भण्यते। (परमा. वृ. १-११०) ३. परलोको भवान्तरगतिरन्यजन्म। (प्रा. मी. वसु. वृ. ८)।

१ अन्य भव में जीव के जाने को परलोक कहते हैं। २ वीतराग चिदानन्दरूप अनुपम स्वभाव वाले आत्मा का नाम पर है, उसका जो निर्विकल्प समाधि में अवलोकन या अनुभवन है उसे परलोक कहा जाता है। अथवा जिस परमात्मस्वरूप में या जिसके केवलज्ञान के द्वारा जीवादि पदार्थ देखे जाते हैं उसे परलोक जानना चाहिए। व्यवहारनय से स्वर्ग-अपवर्ग आदि को परलोक कहा जाता है।

परलोकभय—१. परलोकभयं परभवात् (यत् प्राप्यते)। (आव. भा. हरि. वृ. १८४, पृ. ४८३)। २. लोकः शाश्वत एक एव सकलव्यक्तो विविक्तात्मनः, चिल्लोकं स्वयमेव केवलमयं यल्लोकयत्येकः। लोकोत्थं न तवापरस्तव परस्तस्यास्ति तदभीः कुतो, निःशंकं सततं स्वयं स सहजं ज्ञानं सदा विन्दति॥ (समय. क. १४९)। ३. विजातीयातिर्यग्देवादेः सकाशान्मनुष्यादीनां यद् भयं तत्परलोकभयम्। (ललितवि. मुं. प., पृ. ३८)। ४. यत् परभवादेवाप्यते, यथा मनुष्यस्य तिरश्चः, तिरश्चो मनुष्यात् तत्परलोकभयम्। (आव. भा. मलय. वृ. १८५, पृ. ५७३)। ५. परलोकभयम्—एवंविधदुर्धरानुष्ठानाद्विशिष्टं फलं परलोके भविष्यति न वा। (रत्नक. टी. ५—८)। ६. नर-तिर्यग्भ्यां देवस्य, देव-तिर्यग्भ्यां नरस्य, देव-नराभ्यां तिरश्चः, देवान्नारकस्य च यद् भयं तत्परलोकभयम्। (गु. गु. षट्. स्वो. वृ. श्लो. ६, पृ. २५)। ७. मनुष्यस्य देवादेर्भयं परलोकभयम्। (कल्पसू. वि. वृ. १५, पृ. ३०)। ८. परलोकः परत्रात्मा भाविजन्मान्तरांशभाक्। ततः कम्प इव त्रासो भीतिः परलोकतोऽस्ति सा॥ भद्रं चेज्जन्म स्वर्लोके माभून्मे जन्म दुर्गतौ। इत्याद्याकुलितं चेतः साध्वसं पारलौकिकम्॥ (पञ्चाध्यायी २, ५१६—१७; लाटीसं. ४—४० व ४१)।

१ परभव के आश्रय से जो भय होता है उसका नाम परलोकभय है। २. लोक शाश्वत व एक ही है, जो सब को प्रगट है। शुद्ध चेतन आत्मा के केवलज्ञानस्वरूप लोक का स्वयं अकेला अवलोकन करता है। उस को छोड़कर दूसरा और कोई तेरा लोक है ही नहीं, तब भला उसका भय कहां से हो सकता है? नहीं हो सकता। इस प्रकार यहां निश्चयनय का आश्रय लेने वाले के लिए परलोक भय का निषेध किया गया है। ३ विजातीय तिर्यंच व देव आदि से मनुष्यों आदि को जो भय होता है वह परलोकभय कहलाता है। ५ इस प्रकारके दुर्धर अनुष्ठान का परलोक में कुछ विशेष फल होगा कि नहीं, इस प्रकार के भय को परलोकभय कहा जाता है।

परलोकसंवेजनीकथा—परलोगसंवेदणी जहा—इस्सा-विसाद-मद-कोह-माण-लोभादिएहिं दोसेहिं। देवावि समभिभूया तेसु वि कत्तो सुहं अत्थि॥ इट्ठजणविप्पओगो चेव चयं चेव देवलोगाउ। एतारिसाणि सग्गे देवा वि दुहाणि पावंति॥ जइ देवेसु एयारिसाइं दुक्खाइं पाविज्जंति, णरग-तिरिएसु पुण [illegible] ? (दशवै. चू. प. १०८)।

देव भी जब ईर्ष्या, विषाद, मद, क्रोध, मान और लोभादि दोषों से अभिभूत हैं; तब भला उनके सुख कहां से हो सकता है ? इष्ट जन का वियोग और देवलोक से च्युत होना, इस प्रकार के दुःखों को देव भी स्वर्ग में प्राप्त करते हैं। जब देवों में इस प्रकार के दुःख पाये जाते हैं तब मनुष्यों और तिर्यंचों का तो कहना ही क्या है, इस प्रकार की संवेगजनक कथा परलोकसंवेजनी कथा कहलाती है।

परलोकाशंसाप्रयोग—एवं परलोकाशंसाप्रयोगः, परलोको देवलोकः (तस्मिन्नाशंसाभिलाषः, तस्याः प्रयोगः)। (आ. प्र. टी. २०८)।

परभव में देवलोक के पाने की इच्छा से व्रत-तप आदि के करने को परलोकाशंसाप्रयोग कहते हैं।

परवाद—मस्करी-कणभक्षाक्षपाद-कपिल-सौद्धोदनि-चार्वाक-जैमिनिप्रभृतयस्तद्दर्शनानि च पर्युद्यन्ते दूष्यन्ते अनेनेति परवादो सिद्धान्तः। (धव. पु. १३, पृ. २७८)।

जिस सिद्धान्त में मस्करी, कणभक्ष(कणाद), अक्षपाद, कपिल, शौद्धोदनिक (बुद्ध), चार्वाक और जैमिनि आदि एवं उनके सिद्धान्त को दूषित किया जाता है उसका नाम परवाद है।

परविवाहकरण—१. कन्यादानं विवाहः, परस्य विवाहः परविवाहः, परविवाहस्य करणं परविवाहकरणम्। (स. सि. ७–२८)। २. **सद्वेद्य-चारित्रमोहोदयाद् विवहनं विवाहः**। सद्वेद्यस्य चारित्रमोहस्य चोदयाद्विवहनं कन्यावरणं विवाह इत्याख्यायते। परविवाहस्य करणं परविवाहकरणम्। (त. वा. ७, २८, १; चा. सा. पृ. ६)। ३. परविवाहकरणमितीह स्वापत्यव्यतिरिक्तमपत्यं परशब्देनोच्यते, तस्य कन्याफललिप्सया स्नेहबन्धेन वा विवाहकरणमिति। (आव. हरि. वृ. अ. ६, पृ. ८२५)। ४. परविवाहकरणमन्यापत्यस्य कन्याफललिप्सया स्नेहसम्बन्धेन वा विवाहकरणम्, स्वापत्येष्वपि संख्याभिग्रहो न्याय्य इति। (आ. प्र. टी. २७३)। ५. परेषां स्वापत्यव्यतिरिक्तानां जनानां विवाहकरणं कन्याफललिप्सया स्नेहसम्बन्धादिना वा परिणयविधानं परविवाहकरणम्। इह च स्वापत्येष्वपि संख्याभिग्रहो न्याय्यः। (ध. बि. मु. वृ. ३–२६)। ६. परविवाहकरणं स्वापत्यव्यतिरिक्तानां कन्याफललिप्सया स्नेहसम्बन्धादिना वा परिणयविधानम्। (सा. ध. स्वो. टी. ४–५८)। ७. कन्यादानं विवाहः, परस्य स्वपुत्रादिकादन्यस्य विवाहः परविवाहः, परविवाहस्य करणं परविवाहकरणम्। (त. वृत्ति श्रुत. ७–२८)।

१ कन्यादान का नाम विवाह है, दूसरे के विवाह के करने को परविवाहकरण कहा जाता है। ३ पर शब्द से यहां अपनी सन्तान को छोड़कर अन्य की सन्तान को ग्रहण किया गया है, कन्यादान के फल की इच्छा से, अथवा स्नेह के सम्बन्ध से अन्य के पुत्र-पुत्री के विवाह करने को परविवाहकरण कहते हैं। यह ब्रह्मचर्याणुव्रत का एक अतिचार है।

परविस्मापक—सुरजालमाइएहिं तु विम्हयं कुणइ तव्विहज्जणस्स। तेसु न विम्हयइ सयं आहट्ट-कुहेडएहिं च॥ (बृहत्क. १३०१)।

इन्द्रजाल, दृष्टी और वक्रोक्ति इत्यादि के द्वारा जो वैसे (मूर्ख) जनों को आश्चर्यचकित करता है, परन्तु स्वयं विस्मय को प्राप्त नहीं होता है, उसे परविस्मापक कहा जाता है।

परव्यपदेश—१. अन्यदातृदेयार्पणं परव्यपदेशः। (स. सि. ७–३६)। २. **अन्यदातृदेयार्पणं परव्यपदेशः**। अन्यत्र दातारः सन्ति, दीयमानोऽप्यन्यस्येति वा ऽर्पणं परव्यपदेश इति प्रतिपाद्यते। (त. वा. ७, ३६, ३)। ३. परव्यपदेश इति आत्मव्यतिरिक्तो योऽन्यः स परस्तद्व्यपदेश इति समासः, साधोः पौषधोपवासपारणकाले भिक्षायै समुपस्थितस्य प्रकटमन्नादि पश्यतः श्रावकोऽभिधत्ते परकीयमिदमिति नात्मीयमतो न ददामि, किंचिद्याचितो वाभिधत्ते विद्यमान एवाऽमुकस्येदमस्ति, तत्र गत्वा मार्गय तद्यूयमिति। (आ. प्र. टी. ३२७)। ४. अयमत्र दाता दीयमानोऽप्ययमस्येति समर्पणं परव्यपदेशः। (चा. सा. पृ. १४)। ५. परस्य आत्मव्यतिरिक्तस्य व्यपदेशः परव्यपदेशः, परकीयमिदमन्नादिकमित्येवमदित्सावतः साधुसमक्षं भणनं परव्यपदेशः। (ध. बि. मु. वृ. ३-३४)। ६. परव्यपदेशः परस्यान्यस्य सम्बन्धीदं गुड-खण्डादीति विशेषेणापदेशो व्याजादि वायमत्र दाता दीयमानोऽप्ययमस्येति समर्पणं चतुर्थः। (सा. ध. स्वो. टी. ५-५४)। ७. अपरदातुर्देयस्यार्पणम् मम कार्यं वर्तते, त्वं देहीति परव्यपदेशः, परस्य व्यपदेशः कथनं परव्यपदेशः। अथवा परेऽत्र दातारो वर्तन्ते, नाहमत्र दायको वर्ते इति

परव्यपदेशः। अथवा परस्येदं भक्ताद्यासं देयम्, न मया इदमीदृशं वा देयमिति परव्यपदेशः। (त. वृत्ति श्रुत. ७-३६)। ८. आस्माकीनं सुसिद्धान्नं त्वं प्रयच्छेति योजनम्। दोषः परोपदेशस्य करणाख्यो व्रतात्मनः॥ (लाटीसं. ६-२२६)।

१ अन्य दाता की देय वस्तु का देना, इसका नाम परव्यपदेश है। २ दाता दूसरे स्थान पर हैं, दी जाने वाली यह भोज्य वस्तु भी अन्य की है, इस प्रकार कहते हुए देना; यह परव्यपदेश नाम का अतिथिसंविभागव्रत का अतिचार है। ३ पौषधोपवास की पारणा के समय भिक्षा के निमित्त उपस्थित हुए साधु को, जो प्रत्यक्ष में अन्न आदि को देख रहा है, श्रावक जो यह कहता है कि यह वस्तु दूसरे की है, मेरी नहीं है; इसलिए नहीं देता हूं। अथवा कुछ याचना करने पर यह कहता है कि यह अमुक की वस्तु है, अतएव आप वहां जाकर लीजिए, यह परव्यपदेश नाम से प्रसिद्ध अतिथिसंविभागव्रत का अतिचार है।

परशरीरसंवेजनी कथा—एवं परसरीरसंवेयणी वि—परसरीरं एरिसं चेव असुई, अहवा परस्स सरीरं वण्णेमाणो सोयारस्स संवेगमुप्पाएइ। (दशवै. नि. हरि. वृ. १६६, पृ. ११२)।

दूसरे का शरीर ऐसा ही (अपने शरीर समान ही) अपवित्र है, अथवा पर के शरीर का वर्णन करने वाला उपदेशक चूंकि श्रोता के संवेग को उत्पन्न करता है, इसलिए इस प्रकार की चर्चा को परशरीरसंवेजनी कथा कहते हैं।

परशुमुद्रा—पताकावत् हस्तं प्रसार्य अङ्गुष्ठयोजनेन परशुमुद्रा। यद्वा पताकाकारं दक्षिणकरं संहताङ्गुलिं कृत्वा तर्जन्यङ्गुष्ठाक्रमणेन परशुमुद्रा द्वितीया। (निर्वाणक. पृ. ३२)।

पताका (ध्वजा) के समान दाहिने हाथ को पसार कर तर्जनी से अंगूठे के मिलाने को परशुमुद्रा कहते हैं।

परसमय—१. जीवो सहावणियदो अणियदगुणपज्जओध परसमओ। (पंचा. का. १५५)। २. पुग्गलकम्मुवदेसट्ठिदं च तं जाण परसमयं। (समयप्रा. २)। ३. संसारिणो हि जीवस्य ज्ञानदर्शनावस्थितत्वात् स्वभावनियतस्याप्यनादिमोहनीयोदयानुवृत्तिरूपत्वेनोपरक्तोपयोगस्य सतः समुपात्तभावस्वरूप्यत्वादनियतगुणपर्यायत्वं परसमयः, परचरितमिति यावत्। (पंचा. का. अमृत. वृ. १५५)।

१ जीव यद्यपि ज्ञान-दर्शनरूप स्वभाव में नियत है—अवस्थित है, फिर भी मोहनीय के उदय से विभाव में उपयोगयुक्त होकर प्राप्त परस्वरूप होने से जो अनियत गुण-पर्यायों—कर्मजनित रागादिभावों—को अपना मानता है, इसी का नाम परसमय है।

परसमयरत—१. अण्णाणादो णाणी जदि मण्णदि सुद्धसंपओगादो। हवदि त्ति दुक्खमोक्खं परसमयरदो हवदि जीवो॥ (पंचा. का. १६५)। २. अर्हदादिषु भगवत्सु सिद्धिमाद्यनीभूतेषु भक्तिबलानुरञ्जिता चित्तवृत्तिरत्र शुद्धसम्प्रयोगः। अथ खल्वज्ञानलवावेशाद्यदि यावज्ज्ञानवानपि ततः शुद्धसम्प्रयोगान्मोक्षो भवतीत्यभिप्रायेण खिद्यमानस्तत्र प्रवर्तते तदा तावत् सोऽपि रागलवसद्भावात् परसमयरत इत्युपगीयते। अथ न किं पुनर्निरङ्कुशरागकलिकलङ्कितान्तरङ्गवृत्तिरितरो जन इति। (पञ्चा. का. अमृत. वृ. १६५)।

१ ज्ञानी होकर भी जो किंचित् अज्ञान के वश जब तक यह मानता है कि शुद्ध सम्प्रयोग से—अरहन्त आदि में भक्तिवश अनुरागयुक्त हुए चित्त के व्यापार से—दुःख से छुटकारा (मुक्ति) होता है, तब तक अज्ञान का लेश बना रहने से उसे परसमयरत जानना चाहिए।

परसमयवक्तव्यता—परसमयो मिच्छत्तं जम्हि पाहुडे अणियोगे वा वण्णिज्जदि परूविज्जदि पण्णाविज्जदि तं पाहुडमणियोगो वा परसमयवत्तव्वं, तस्स भावो परसमयवत्तव्वदा णाम। (धव. पु. १, पृ. ८२)।

परसमय का अर्थ मिथ्यात्व है, जिस प्राभृत अथवा अनुयोग में उक्त परसमय का वर्णन या प्रज्ञापन किया जाता है उस प्राभृत या अनुयोग का नाम परसमयवक्तव्य है, उसके भाव को परसमयवक्तव्यता कहा जाता है।

परसंग्रह—अशेषविशेषेष्वौदासीन्यं भजमानः शुद्धद्रव्यं सन्मात्रमभिमन्यमानः परसंग्रहः। (प्र. न. त. ७-१५; स्याद्वादमं. ३१७; नयप्र., पृ. १०२; जैनत., पृ. १२७)।

समस्त विशेषोंमें उदासीनता को स्वीकार करता हुआ

जो शुद्ध सन्मात्र द्रव्य को ग्रहण करता है उसे परसंग्रह नय कहते हैं।

परसंग्रहाभास—सत्ताद्वैतं स्वीकुर्वाणः सकलविशेषान् निराचक्षाणस्तदाभासः। (नयप्र. पृ. १०२)। सर्व विशेषों का निराकरण करके केवल सत्ताद्वैत को ही विषय करने वाले नय को परसंग्रहनयाभास कहते हैं।

परस्परपरिहारलक्षणविरोध—परस्परपरिहारस्थितिलक्षणस्तु विरोधः सहैकत्राम्रफलादौ रूप-रसयोरिवानयोः सम्भवतोरेव स्यान्न त्वसम्भवतोः सम्भवदसम्भवतोर्वा। (प्रमेयक. ४–१०, पृ. ५३३)। एक आम्रफल आदि में रूप और रस के समान जो सम्भव हों उनमें परस्परपरिहारस्थितिलक्षण विरोध हो सकता है, असम्भव अथवा सम्भव-असम्भव में वह नहीं होता है।

परम्पराश्रयचक्रक—यदि स्वपक्षे प्रत्यक्षवृत्या तत्र व्यापकानुपलब्धिर्निर्णीयेत्, विपक्षव्यावृत्या पक्षे प्रत्यक्षवृत्तिः, पक्षे प्रत्यक्षवृत्त्या च विपक्षव्यावृत्तिरिति परस्पराश्रयं चक्रकम्। (सिद्धिवि. वृ. ६–२२, पृ. ४०८, पं. ७–६)। यदि अपने पक्ष (अक्षणिक) में प्रत्यक्षवृत्ति से व्यापक (क्रम-अक्रम) की अनुपलब्धि का, विपक्षव्यावृत्ति से पक्ष में प्रत्यक्षवृत्तिका और पक्ष में प्रत्यक्षवृत्ति से विपक्षव्यावृत्ति का निर्णय होता है तो इस प्रकार से परस्पराश्रय चक्रकदोष होने वाला है।

परंज्योति—परं निवारण परमातिशयप्राप्तं ज्योतिर्ज्ञानं यस्यासौ (परंज्योतिः) (रत्नक. १–७)। परं अर्थात् अतिशय को प्राप्त निवारण ज्ञान से युक्त आप्त को परंज्योति कहा जाता है।

पराघात—देखो परघातनाम। १. परत्रास-प्रतिघातादिजनकं पराघातनाम। (त. भा. ८–१२)। २. पराघातनाम यदुदयात् परानाहन्ति। (आ प्र. टी. २१)। ३. यस्य कर्मण उदयात् कश्चिद्दर्शनमात्रेणैवौजस्वी वाक्सौष्ठवेन वाऽन्यसभामप्यभिगतः सभ्यानामपि त्रासमापादयति, आकर्षणं परप्रतिघातं वा करोति तत्पराघातनाम। (त. भा. हरि. वृ. ८–१२)। ४. यस्य कर्मण उदयात् कश्चिद्दर्शनमात्रेणैवौजस्वी वाक्सौष्ठवेनान्यां सभामप्यभिगतः सभ्यानामपि त्रासमापादयति परप्रतिभाप्रतिघातं वा करोति तत्पराघातनाम। (त. भा. सिद्ध. वृ. ८–१२, पृ. १५७)। ५. स्वशरीर-बलप्रतापादिभिः परस्याभिभवनं पराघातः। (पंचसं. स्वो. वृ. ३–६)। ६. तय-विस-दंतविसाई अंगावयवो य जो उ अन्नेसिं। जीवाण कुणइ घायं सो परघायस्स उ विवागो॥ (कर्मवि. ग. १२०)। ७. यतोऽङ्गावयव एव विषात्मको दंष्ट्रा-त्वगादिः परेषामुपघातको भवति तत्पराघातनाम। (समवा. अभय. वृ. ४२)। ८. यदुदयाद् दुःप्रधृष्यतया शरीराकृतिः परानाहन्त्यभिभवति तत्पराघातनाम। (शतक. मल. हेम. वृ. ३८, पृ. ५१)। ९. यदुदयात् पुनरोजस्वी दर्शनमात्रेण वाक्सौष्ठवेन वा महानृपसभामपि गतः सभ्यानामपि त्रासमापादयति प्रतिवादिनश्च प्रतिभाविघातं करोति तत्पराघातनाम। (प्रज्ञाप. मलय. वृ. २९३, पृ. ४७३; धर्मसं. मलय. वृ. ६१८; सप्तति. मलय. वृ. ६; पंचसं. मलय. वृ. ३–७, पृ. ११६; कर्मप्र. यशो. वृ. १, पृ. ७)। १०. यदुदयात् परानाहन्ति दुष्प्रधृष्यतया शरीराकृतेरभिभवति तत्पराघातनाम। (कर्मस्त. गो. वृ. १०, पृ. २०)। ११. यदुदयादोजस्वी दर्शनमात्रेण वाक्सौष्ठवेन वा नृपसभामपि गतः सभ्यानामपि क्षोभमापादयति प्रतिपक्षप्रतिघातं च विधत्ते तत्पराघातनाम। (प्रव. सारो. वृ. १२५१)। १२. परानाहन्ति पराघातनाम, यस्य कर्मण उदये आत्मावयवैः परं हन्ति। (कर्मवि. पू. व्या. ७२, पृ. ३३)। १३. यदुदयात् परेषां दुष्प्रधर्षः महौजस्वी दर्शनमात्रेण वाक्सौष्ठवेन वा महाभूपसभामपि गतः सभ्यानामपि क्षोभमुत्पादयति प्रतिपक्षप्रतिभाप्रतिघातं च करोति तत्पराघातनाम। (कर्मवि. दे. स्वो. वृ. ४३, पृ. ५३)। १ जो दूसरों को कष्ट देनेवाला या उनका घात आदि करने वाला है उसे पराघातनामकर्म कहते हैं। २ जिसके उदय से कोई दर्शन मात्र से ही ओजस्वी (दीप्तिमान्) होता है अथवा सभामें वचनचातुर्य से सभ्य जनोंको भी दुःख देता है, आकर्षण या दूसरों का प्रतिघात करता है उसे पराघात नामकर्म कहते हैं।

पराङ्गनात्याग—मातृवत्परनारीणां परित्यागस्त्रिशुद्धितः। स स्यात् पराङ्गनात्यागो गृहिणां शुद्धचेतसाम्॥ (भावसं. वाम. ४५५)। माता के समान परस्त्रियों के सेवन करने का मन,

वचन व काय से जो परित्याग किया जाता है वह परांगनात्यागव्रत कहलाता है।

पराजय—असिद्धिः पराजयः। (प्रमाणमी. २, १, ३४)।

वादी अथवा प्रतिवादी के अपने पक्ष की सिद्धि नहीं कर सकने का नाम पराजय है।

परात्मा—देखो परमात्मा। परात्मा संसारिजीवेभ्यः उत्कृष्ट आत्मा। (समाधित. टी. ६)।

संसारी जीवों से उत्कृष्ट आत्मा को परात्मा या परमात्मा कहा जाता है।

परानवकाङ्क्षक्रिया—तथा चानाद्रियमाणः परमपि नावकाङ्क्षतीति परानवकाङ्क्षक्रिया। (त. भा. सिद्ध. वृ. ६-६)।

अनादरको प्राप्त होकर जो दूसरे को भी नहीं चाहता है, इसका नाम परानवकाङ्क्षक्रिया।

परा प्राप्ति—णीसेसकम्मणासे अप्पसहावेण जा समुप्पत्ती। कम्मजभावखए वि य सा वि य पत्ती परा होदि। (कार्तिके. १९९)।

सब कर्मों के नष्ट हो जाने पर जो शुद्ध आत्मस्वभाव की प्राप्ति होती है उसे परा प्राप्ति कहते हैं। अथवा कर्मजनित औदयिकादि भावों का अभाव हो जाने पर जो प्राप्ति होती है उसे भी परा प्राप्ति कहा जाता है।

परार्थ (श्रुत)—परं पुनः शब्दप्रयोगरूपं परविप्रतिपत्तिनिराकरणफलत्वात् परार्थम्। (अन. ध. स्वो. टी. ३-५)।

श्रुत शब्दप्रयोग का फल दूसरों के विरोध को दूर करना है वह परार्थश्रुत कहलाता है। इसे द्रव्यश्रुत भी कहा जाता है।

परार्थ (गुण)—परार्थाः स्वात्मसम्बन्धिगुणाः शेषाः सुखादयः। (लाटीसं. ३-५३)।

ज्ञान के अतिरिक्त जो शेष सुखादि गुण हैं वे परार्थ गुण माने जाते हैं।

परार्थ करण—विहितानुष्ठानपरस्य तत्त्वतो योगशुद्धिसचिवस्य। भिक्षाटनादिसर्वं परार्थकरणं यतेर्ज्ञेयम्॥ (षोडशक. १३-५, पृ. ८७)।

आगमोक्त अनुष्ठान का यथार्थतः पालन करते हुए जो साधु मन, वचन व काय की शुद्धि से सहित है उसके भिक्षा के लिये विचरण आदि सबको परार्थकरण—दाता के पुण्यबन्ध का कारण होने से परोपकरण—जानना चाहिए।

परार्थप्रत्यक्ष—प्रत्यक्षपरिच्छिन्नार्थाभिधायि वचनं परार्थप्रत्यक्षं परप्रत्यक्षहेतुत्वात्। (प्र. न. त. ३-२४)।

प्रत्यक्ष से जाने हुए पदार्थ के प्रतिपादन करनेवाले वचन को परके प्रत्यक्ष में कारण होने से परार्थ प्रत्यक्ष कहा जाता है।

परार्थाधिगम—परार्थाधिगमः शब्दरूपः। (सप्तभं. पू. १)

शब्दरूप ज्ञान को परार्थाधिगम कहते हैं।

परार्थानुमान—१. स्वनिश्चयवदन्येषां निश्चयोत्पादनं बुधैः। परार्थं मानमाख्यातं वाक्यं तदुपचारतः॥ साध्याविनाभुवो हेतोर्वचो यत्प्रतिपादकम्। परार्थमनुमानं तत्पक्षादिवचनात्मकम्॥ (न्यायाव. १० व १३)। २. तत्-(स्वार्थानुमान-) प्रतिपादकं वचो हेतुः, परार्थमित्यर्थः। (नन्दी. हरि. वृ., पृ. ६२)। ३. परार्थं तु तदर्थपरामर्शिवचनाज्जातम्। तद्वचनमपि तद्धेतुत्वात्। (परीक्षा. ३, ५०-५१)। ४. पक्ष-हेतुवचनात्मकं परार्थमनुमानमुपचारात्। (प्र. न. त. ३-२३)। ५. तत्प्रतिपादकं वचो हेतुः परार्थम्। (उपदे. मु. वृ. ४८)। ६. यथोक्तसाधनाभिधानजः परार्थम्। (प्रमाणमी. २, २, १)। ७. परोपदेशमपेक्ष्य साधनात्साध्यविज्ञानं तत्परार्थानुमानम्। प्रतिज्ञा-हेतुरूपपरोपदेशवशाच्छ्रोतुरुत्पन्नं साधनात्साध्यविज्ञानं परार्थानुमानमित्यर्थः। (न्यायदी., पृ. ७५)। ८. यल्लक्षणो मतो हेतुः स्वार्थसंवित्तये परम्। वाचाभिधीयमानस्तु परार्थं सानुमोच्यते॥ (प्रमाल. ५५)। ९. पक्ष-हेतुवचनात्मकं परार्थमनुमानमुपचारात्। (षड्द. स. गुण. वृ. ५५, पृ. २१०)।

१ अपने निश्चय के समान अन्य जनों के लिए निश्चय के उत्पादक वाक्य को उपचार से परार्थानुमान कहा जाता है। साध्य के अविनाभावी हेतु के प्रतिपादक वचन को परार्थानुमान कहते हैं जो पक्ष आदि के वचनस्वरूप है।

परावर्त—१. परावर्तोऽनन्तोत्सर्पिण्यवसर्पिण्यात्मकः। स च द्रव्यादिभेदभिन्नः प्रवचनादवसेयः। (आव. नि. हरि. वृ. ६६३)। २. परावर्तः पुद्गलपरावर्तः, स

धानन्तोत्सर्पिण्यवसर्पिणीप्रमाणः, ते अनन्ताः अतीतः कालः अनन्ता एवानागतः कालः। (आव. भा. मलय. वृ. २००, पृ. ५९३)।

१ परावर्त अनन्त उत्सर्पिणी और अवसर्पिणी प्रमाण है जो द्रव्य-क्षेत्रादि के भेद से अनेक प्रकार का है।

परावर्त दोष—वीहीकूरादीहिं य सालीकूरादियं तु जं गहिदं। दातुमिति संजदाणं परियट्टं होदि णायव्वं॥ (मूला. ६–१८)।

साधुओं को देने के लिए अपने व्रीहि धान के भात आदि को दूसरे के लिए देकर बदले में शालि धान के भात आदि का लेना और साधुओं को देना, यह संयतों (साधुओं) को परावर्त दोष का जनक होता है।

परावर्तन—ग्रन्थस्य पुनः पुनरभ्यसनं परावर्तनम्। (अनुयो. हरि. वृ. पृ. १०)।

ग्रन्थ के पुनः पुनः अभ्यास करने को परावर्तन कहते हैं।

परावर्तमान प्रकृति— १. विणिवारिय जा गच्छइ बंधं उदयं च अन्नपगईए। सा हु परियत्तमाणी ×××॥ (पंचसं. च. ३–४४)। २. विनिवार्य या गच्छति बन्धमुदयं वा अन्यप्रकृतेः, सा हु परावर्तमाना ××× विनिवार्य विनिवर्त्यान्यस्याः प्रकृतेर्या स्वतो बन्धमुदयमुभयं वा याति सा परावर्तमाना। (पंचसं. च. स्वो. वृ. ३–४४)। ३. या प्रकृतिरन्यस्याः प्रकृतेबन्धमुदयं वा निवार्य स्वयं बन्धमुदयं वा गच्छति सा हु निश्चितं परावर्तमाना। (पंचसं. मलय. वृ. ३–४४)। ४. याः प्रकृतयोऽन्यस्याः प्रकृतेर्बन्धमुदयमुभयं वा विनिवार्य स्वकीयं बन्धमुदयमुभयं वा दर्शयन्ति ताः परावर्तमानाः। ××× यत् प्रत्यपादि— विणिवारिय जा गच्छइ बंधं उदयं च अन्नपगईए। सा हु परियत्तमाणी अणिवारंती अपरियत्ता॥ (शतक. दे. स्वो. वृ. १, पृ. २)।

१ जो प्रकृति अन्य प्रकृति के बन्ध या उदय को रोक करके स्वयं ही बन्ध या उदय को प्राप्त होती है उसे परावर्तमान प्रकृति कहते हैं।

परावर्तित—देखो परावर्तदोष। यत्पुनः परावर्त्य गृही यतिभ्यो दत्ते तत् प्रा(परा)वर्तितम्। (गु. गु. षट्. स्वो. वृ. २०, पृ. ४८)।

गृहस्थ जो किसी एक भोज्य वस्तु से दूसरी को परिवर्तित कर साधुओं के लिए देता है, इससे परावर्तित नाम का दोष उत्पन्न होता है।

परिकर्म—१. परिकर्म्म द्रव्यस्य गुणविशेषपरिणामकरणम्। (आव. नि. हरि. वृ. ७६, पृ. ५४; व्यव. भा. मलय. वृ. १, पृ. १; आव. नि. मलय. वृ. ७६, पृ. ६०)। २. परिकर्म नाम योग्यतापादनम्, तद्धेतुः शास्त्रमपि परिकर्म। (नन्दी. चू. मलय. वृ. ५६)। ३. ततः परितः सर्वतः कर्माणि गणितकरणसूत्राणि यस्मिन् तत्परिकर्म। (गो. जी. मं. प्र. टी. ३६१)। ४. तत्रावस्थितस्यैव द्रव्यस्य गुणविशेषापादनं परिकर्म। (जम्बूद्वी. शा. वृ. पृ. ५)।

१ द्रव्य के गुणविशेष का जो परिणमन किया जाता है, इसका नाम परिकर्म है। २ योग्यता को उत्पन्न करना, इसे व इसके कारणभूत शास्त्र को भी परिकर्म कहा जाता है। ३ जिस ग्रन्थ में गणितविषयक करणसूत्र उपलब्ध होते हैं वह परिकर्म कहलाता है।

परिकर्मकालोपक्रम—कालस्योपक्रमः परिकर्मणि चन्द्रोपरागादेर्यथावस्थितमर्यादेव परिज्ञानकरणम्। (व्यव. मलय. वृ. १, पृ. २)।

चन्द्रग्रहण आदि के नियत काल से पहले ही जान लेने को परिकर्मविषयक कालोपक्रम कहते हैं।

परिकर्मक्षेत्रोपक्रम—तत्र परिकर्मणि क्षेत्रोपक्रमो नावा समुद्रस्योल्लंघनं हल-कुलिकादिभिर्वा इक्ष्वादिक्षेत्रस्य परिकर्मणा। (आव. नि. मलय. वृ. ७६, पृ. ६१)।

नावसे जो समुद्र का उल्लंघन किया जाता है इसे परिकर्मविषयक क्षेत्रोपक्रम कहते हैं। अथवा हल व कुलिक आदि से जो ईख आदि के खेत का परिकर्म (संस्कार) किया जाता है, इसे परिकर्मक्षेत्रोपक्रम जानना चाहिये।

परिकर्ममिश्रद्रव्योपक्रम—१. मिश्रद्रव्योपक्रमः परिकर्मणि कटकादिभूषितपुरुषादिद्रव्यस्य गुणविशेषकरणम्। (व्यव. मलय. वृ. १, पृ. २)। २. मिश्रद्रव्योपक्रमः परिकर्मणि कटकादिविभूषितपुरुषादिद्रव्यस्य शिक्षापादनम्। (आव. नि. मलय. वृ ७६, पृ. ६१)।

१ कटक आदि आभूषणों से विभूषित पुरुष के गुणविशेष के करने को परिकर्मविषयक मिश्रद्रव्योपक्रम कहते हैं।

परिकर्मसचित्तचतुष्पदद्रव्योपक्रम—१. तस्मिन् (परिकर्मणि) सचित्तचतुष्पदद्रव्योपक्रमो यथा हस्त्यादेः शिक्षापादनम्। (व्यव. मलय. वृ. १, पृ. २)। २. तथा चतुष्पदानां हस्त्यादीनां शिक्षागुणविशेषकरणं चतुष्पदोपक्रमः। (आव. नि. मलय. वृ. ७६, पृ. ६१)।

१ हाथी आदि चौपाये जानवरोंके लिए शिक्षा प्रदान करने को परिकर्मसचित्तचतुष्पदद्रव्योपक्रम कहते हैं।

परिकर्मसचित्तद्विपदद्रव्योपक्रम—१. द्रव्यस्य गुणविशेषपरिणामकरणं परिकर्म, सचित्तद्विपदद्रव्योपक्रमो यथा पुरुषस्य वर्णादिकरणम्। (व्यव. मलय. वृ. १, पृ. १)। २. तत्र परिकर्मणि द्विपदोपक्रमो यथा पुरुषस्य वर्णादिकरणमथवा कर्ण-स्कन्धवर्द्धनादि। (आव. नि. मलय. वृ. ७६, पृ. ६१)।

१ पुरुष के वर्ण आदि के करने को परिकर्मसचित्तद्विपदद्रव्योपक्रम कहते हैं।

परिकर्मसचित्तापदद्रव्योपक्रम—१. सचित्तापदद्रव्योपक्रमो यथा वृक्षादेर्वृक्षायुर्वेदोपदेशात् वृद्धयादिगुणकरणम्। (व्यव. मलय. वृ. १, पृ. २)। २. अपदानां वृक्षादीनां वृक्षायुर्वेदोपदेशाद्वार्द्धक्यादिगुणापादनमपदोपक्रमः। (आव. नि. मलय. वृ. ७६, पृ. ६१)।

१ वृक्ष आदि विषयक आयुर्वेद के उपदेशानुसार उनकी वृद्धि आदि गुणों के करने को परिकर्मसचित्त-अपदद्रव्योपक्रम कहते हैं।

परिकर्माचित्तद्रव्योपक्रम—१. अचित्तद्रव्योपक्रमः परिकर्मणि यथा पद्मरागमणेः क्षार-मृत्-पुटपाकादिना नैर्मल्यापादनम्। (व्यव. मलय. वृ., पृ. २)। २. अचित्तद्रव्योपक्रमः परिकर्मणि यथा पद्मरागमणेः क्षार-मृत्पुटपाकादिना वैमल्यापादनम्। (आव. नि. मलय. वृ. ७६, पृ. ६१)।

पद्मरागमणि आदि अचेतन पदार्थों के क्षार (राख) व मिट्टी आदि के द्वारा निर्मल करने को परिकर्माचित्तद्रव्योपक्रम कहते हैं।

परिखा—१. परिखा व्यञ्जनमध्यावस्थितान्नम्। (भ. आ. २२०)। २. परिखा उपरि विशाला अधः सङ्कुचिता। (जीवाजी. मलय. वृ. ११७; जम्बूद्वी. शा. वृ. १२)। ३. परिखा व्यञ्जनमध्यस्थितकूरम्। (भ. आ. मूला. २२०)।

१ व्यंजनों के मध्य में स्थित अन्न को परिखा कहते हैं। २ जो ऊपर विस्तृत और नीचे संकुचित होती है वह परिखा कहलाती है। इसका निर्माण दुर्ग के सब ओर सुरक्षा के लिए कराया जाता है।

परिगृहीता—१. या एकपुरुषभर्तृका सा परिगृहीता। (स. सि. ७–२८; त. वा. ७, २८, २)। २. एकपुरुषभर्तृका या स्त्री भवति सधवा विधवा वा सा परिगृहीता संबद्धा। (त. वृत्ति श्रुत. ७, २८)।

१ जिस स्त्री का स्वामी एक पुरुष होता है उसे परिगृहीता कहते हैं।

परिग्रह—१. मूर्च्छा परिग्रहः। (त. सू. ७–१७; श्वे. त. सू. ७–१२)। २. ममेदंबुद्धिलक्षणः परिग्रहः। (स. सि. ६–१५)। ३. चेतनावत्स्वचेतनेषु च बाह्याभ्यन्तरेषु द्रव्येषु मूर्च्छा परिग्रहः। (त. भा. ७–१२)। ४. लोभकषायोदयान्मूर्च्छा परिग्रहः। कषायवेदनीयस्य उदयान्मूर्च्छा संकल्पः परिग्रह इत्यालोभख्यायते। (त. वा. ४, २१, ३); ममेदमिति संकल्पः परिग्रहः। ममेदं वस्तु, अहमस्य स्वामीत्यात्मात्मीयाभिमानः संकल्पः परिग्रह इत्युच्यते। (त. वा. ६, १५, ३)। ५. मूर्च्छालक्षणा परिग्रहसंज्ञा। (त. भा. हरि. व सिद्ध. वृ. २–२५); सचित्ताचित्त-मिश्रेषु द्रव्यादिषु शास्त्रानुमतेषु ममत्वं परिग्रहः। (त. भा. हरि. व सिद्ध. वृ. ७–१)। ६. मुच्छा परिग्गहो त्ति य × × × ॥ (जयध. १, पृ. १०५ उद्.)। ७. गवाश्व-मणि-मुक्तादौ चेतनाचेतने धने। बाह्येऽबाह्ये च रागादौ हेयो मूर्च्छापरिग्रहः। (ह. पु. ५८–१३३)। ८. चेतनाचेतनवस्तुस्पर्शिनो मूर्च्छाविशेषाः परिग्रहाः। (त. भा. सिद्ध. वृ. ७–७)। ९. ममेदंभावो मोहोदयजः परिग्रहः। (भ. आ. विजयो. ५७)। १०. ममेदमिति संकल्परूपा मूर्च्छा परिग्रहः। (त. सा. ४, ७७)। ११. या मूर्च्छा नामेदं विज्ञातव्यः परिग्रहो होषः। मोहोदयादुदीर्णो मूर्च्छा तु ममत्वपरिणामः॥ (पु. सि. १११)। १२. ममेदमिति संकल्पो बाह्याभ्यन्तरवस्तुषु। परिग्रहो मतस्तत्र कुर्याच्चेतोनिकुञ्चनम्॥ (उपासका. ४३२)। १३. परिग्रहः पापादानोपकरणकांक्षा। (मूला. वृ. ११–६)। १४. परिग्रहः स्वस्वामिभावेन मूर्च्छा, सा च प्राणिनामतिलोभात् सकलवस्तुविषयापि प्रादुर्भवति। (प्रज्ञाप.

मलय. वृ. २८०, पृ. ४३८); परिग्रहो धर्मोपकरण-वर्ज्यवस्तुस्वीकारः धर्मोपकरणमूर्च्छा च। (प्रज्ञाप. मलय. वृ. २८४, पृ. ४४६)। १५. ममेदमिति संकल्पश्चिदचिन्मिश्रवस्तुषु। ग्रन्थः ×××॥ (सा. ध. ४–५९)। १६. लोभकषायस्योदयेन विषयेष्वासंगः परिग्रहः। (त. वृत्ति श्रुत. ४–२१); परिगृह्यते इति परिग्रहः ममेदम् इति बुद्धिलक्षणः। (त. वृत्ति श्रुत. ६–१५); परि समन्ताद् गृह्यते परिग्रहो मनोमूर्च्छालिक्षणः ग्रहणेच्छालक्षणः परिग्रह उच्यते। (त. वृत्ति श्रुत. ७–१); मूर्च्छनं मूर्च्छा, परिगृह्यते परिग्रहः, या मूर्च्छा सा परिग्रह इत्युच्यते। (त. वृत्ति श्रुत. ७–१७)। १७. परि समन्ताद् ग्रहः ग्रहणरूपः परिग्रहः। तत्र द्रव्यतः धन-धान्यादि, भावतः परवस्त्विच्छापरिणामः। (ज्ञा. सा. वृ. २५, पृ. ८४)। १८. सर्वभावेषु मूर्च्छा-लक्षणः परिग्रहः। (शास्त्रवा. टी. ३, पृ. ५)।

२ 'यह मेरा है' इस प्रकार की जो ममत्वबुद्धि होती है उसे परिग्रह कहा जाता है। ३ चेतन-अचेतन बाह्य और अभ्यन्तर द्रव्यों में होने वाली ममत्व-बुद्धि का नाम परिग्रह है। १४ धर्मोपकरणों को छोड़कर अन्य वस्तुओं को स्वीकार करना तथा धर्मोपकरणों से ममत्वभाव रखना, यह परिग्रह का लक्षण है।

परिग्रहक्रिया—देखो पारिग्राहिकी क्रिया। बहु-पायार्जन-रक्षण-मूर्च्छालक्षणा परिग्रहक्रिया। (त. भा. सिद्ध. वृ. ६–६)।

विविध उपायों से भोगोपभोग की सामग्री के उपार्जन करने, उसका रक्षण करने और उसमें मूर्च्छा रखने को परिग्रहक्रिया कहते हैं।

परिग्रहत्याग प्रतिमा—१. बाह्येषु दशसु वस्तुषु ममत्वमुत्सृज्य निर्ममत्वरतः। स्वस्थः सन्तोषपरः परिचित्तपरिग्रहाद्विरतः॥ (रत्नक. ५–२४)। २. जो परिवज्जइ गंथं अब्भंतर-बाहिरं च साणंदो। पावं ति मण्णमाणो णिग्गंथो सो हवे णाणी॥ (कार्तिके. ३८६)। ३. परिग्रहविनिवृत्तः— क्रोधादिकषायाणामार्त-रौद्रयोर्हिंसादिपंचपापानां भयस्य च जन्मभूमिः दूरोत्सारितधर्म्य-शुक्लः परिग्रह इति मत्वा दशविधबाह्यपरिग्रहाद्विनिवृत्तः स्वच्छः सन्तोषपरो भवति। (चा. सा. पृ. १९)। ४. यो रक्षणोपार्जन-नश्वरत्वैर्ददाति दुःखानि दुरुत्तराणि। विमुच्यते येन परिग्रहोऽसौ गीतोऽपसङ्गैरपरिग्रहोऽसौ॥ (अमित. श्रा. ७–७५)। ५. मोत्तूण वत्थ-मेत्तं परिग्गहं जो विवज्जए सेसं। तत्थ वि मुच्छं ण करेइ जाणइ सो सावओ णवमो। (वसु. श्रा. २९९)। ६. दशधा ग्रन्थमुत्सृज्य निर्ममत्वं भजन् सदा। सन्तोषामृतसन्तृप्तः स स्यात्परिग्रहोज्झितः॥ (भावसं. वाम. ५४१)। ७. योऽष्टव्रतवृद्धो ग्रन्थान् मुञ्चतीमे न मेऽहकम्। नैतेषामिति बुद्धया स परिग्रहविरक्तधीः॥ (धर्मसं. श्रा. ८–३९)।

१ जो क्षेत्र-वास्तु आदि दश प्रकार के बाह्य परिग्रह में ममता को छोड़कर निर्मम होता हुआ स्वस्थ होकर सन्तोष को धारण करता है वह परिग्रह से रहित—नौवीं प्रतिमा का धारक—होता है।

परिग्रहत्यागमहाव्रत—१. अहावरे पंचमे भंते महव्वए परिग्गहाओ वेरमणं—सव्वं भंते परिग्गहं पच्चक्खामि, से अप्पं वा बहुं वा अणुं वा थूलं वा चित्तमंतं वा अचित्तमंतं वा नेव सयं परिग्गहं परिगिण्हिज्जा नेवऽन्नेहिं परिग्गहं परिगिण्हाविज्जा परिग्गहं परिगिण्हंते वि अन्ने न समणुजाणिज्जा जावज्जीवाए तिविहं तिविहेणं मणेणं वायाए काएणं न करेमि न कारवेमि करंतंपि अन्नं न समणुजाणामि, तस्स भंते पडिक्कमामि निंदामि गरिहामि अप्पाणं वोसिरामि। पंचमे भंते महव्वए उवट्ठिओमि सव्वाओ परिग्गहाओ वेरमणं। (दशवै. सू. ४–७, पृ. १४८–४९; पाक्षिकसू. पृ. २६)। २. सव्वेसिं गंथाणं तागो णिरवेक्ख भावणापुव्वं। पंचमवदमिदि भणिदं चारित्तभरं वहंतस्स॥ (नि. सा. ६०)। ३. ××× पंचम संगम्मि विरई य॥ (चा. प्रा. २९)। ४. जीवणिबद्धाबद्धा परिग्गहा जीवसंभवा चेव। तेसिं सक्कच्चागो इयरम्हि य णिम्ममोऽसंगो॥ (मूला. १–९); गामं णगरं रण्णं थूलं सच्चित्त बहु सपडिक्खं। अब्भंतरं बाहिरत्थं तिविहेण परिग्गहं वज्जे॥ (मूला. ५–९६)। ५. अब्भंतर-बाहिरए सव्वे गंथे तुमं विवज्जेहि। कद-कारिदाणुमोदेहिं काय-मण-वयणजोगेहिं॥ (भ. आ. ११९७)। ६. बाह्याभ्यन्तरवर्तिभ्यः सर्वेभ्यो विरतिर्यतः। स्वपरिग्रहदोषेभ्यः पंचमं तु महाव्रतम्॥ (ह. पु. २–१२१)। ७. पंचमगो गामादिसु अप्प-बहुविवज्जणेमेव। (धर्मसं. ८६०)। ८. बाह्यमाभ्यन्तरं संगं कृत-कारित-मोदनैः। विमुंचस्व मदा

साधो मनोवाक्कायकर्मभिः ॥ (अ. श्रा. अमित. व. ११५४)। ६. दश ग्रन्था मता बाह्या अन्तरङ्गाश्चतुर्दश। तान् मुक्त्वा भव निःसंगो भावशुद्धया मुहुर्मुने ॥ (ज्ञाना. १६-३, पृ. १७६)। १०. एतस्मान्मनसः कृत-कारितानुमोदितेन, वचसः कृत-कारितानुमोदितेन, कायस्य कृत-कारितानुमोदितेन च विरतिरपरिग्रहलक्षणं व्रतम्। (चा. सा. ४३)। ११. चेतनेतरबाह्यान्तरंगसंगविवर्जनम्। ज्ञान-संयमसंगो वा निर्ममत्वमसंगता ॥ (आचा. सा. १-२०); या मूर्च्छाच्छेदिनी संगे चेतोवृत्तिरसंगता। यया साऽऽत्यन्तिकी मुक्ति-श्रीरुपैति यतिं स्वयम् ॥ (आचा. सा. ५-६४)।

१ पांचवें महाव्रत में परिग्रह से विरत होना पड़ता है—मैं अल्प व बहुत, अणु व स्थूल तथा सचेतन व अचेतन सब प्रकार के परिग्रह को न स्वयं ग्रहण करूंगा, न दूसरों को ग्रहण कराऊंगा और उसे ग्रहण करते हुए दूसरों का अनुमोदन भी नहीं करूंगा। मैं मन, वचन एवं काय तीन प्रकार से न स्वयं करता हूं, न कराता हूं, और न करते हुए अन्य की अनुमोदना करता हूं। उसके लिये मैं निन्दा व गर्हा करता हूं तथा उसका परित्याग करता हूं। इस प्रकार के नियमपूर्वक पूर्ण रूप से परिग्रह का त्याग करना, यह पांचवां महाव्रत है। २ क्षेत्र, वास्तु, हिरण्य व सुवर्णादि दश प्रकार के बाह्य परिग्रह तथा मिथ्यात्व आदि चौदह प्रकार के अन्तरंग परिग्रह इस प्रकार समस्त परिग्रह के त्याग करने को परिग्रहत्याग महाव्रत कहते हैं।

परिग्रहपरिमाणाणुव्रत—१. ×××परिग्रहारंभपरिमाणं ॥ (चा. प्रा. २३)। २. धन-धान्यादिग्रन्थं परिमाय ततोऽधिकेषु निःस्पृहता। परिमितपरिग्रहः स्यादिच्छापरिमाणनामापि ॥ (रत्न.क. ३-१५)। ३. धन-धान्य-क्षेत्रादीनामिच्छावशात् कृतपरिच्छेदो गृहीति पञ्चममणुव्रतम्। (त. सि. ७-२०; चा. सा. पृ. ७)। ४. परिच्छिन्नधन-धान्य-क्षेत्राद्यवधिर्गृही। धन-धान्य-क्षेत्रादीनाम् इच्छावशात् कृतपरिच्छेदः गृहीति पञ्चममणुव्रतम्। (त. वा. ७, २०, ५)। ५. परिच्छिन्नधन-धान्य-क्षेत्राद्यवधिर्गृही प्रत्येतव्यः। (त. श्लो. ७-२०)। ६. अनन्तायाश्च गर्द्धायाः विरतिः। (पद्मच. १४-१८५)। ७. स्वर्ण-दास-गृह-क्षेत्रप्रभृतेः परिमाणतः। बुद्धयेच्छापरिमाणाख्यं पंचमं तदणुव्रतम् ॥ (ह. पु. ५८-१४२)। ८. योऽपि न शक्यस्त्यक्तुं धन-धान्य-मनुष्य-वास्तु-वित्तादिः। सोऽपि तनूकरणीयो निवृत्तिरूपं यतस्तत्त्वम् ॥ (पु. सि. १२८)। ९. जो लोहं णिहणित्ता संतोस-रसायणेण संतुट्ठो। णिहणदि तिण्हा दुट्ठा मण्णंतो विणस्सरं सव्वं ॥ जो परिमाणं कुव्वदि धण-धण्ण-सुवण्ण-खित्तमाईणं। उवओगं जाणित्ता अणुव्वदं पंचमं तस्स ॥ (कार्तिके. ३३९-४०)। १०. वास्तु क्षेत्रं धान्यं दासी दासश्चतुष्पदं भाण्डम्। परिमेयं कर्तव्यं सर्वं सन्तोषकुशलेन ॥ (अमित. श्रा. ६-७३)। ११. सद्म-स्वर्ण-धरा-धान्य-धेनु-भृत्यादिवस्तुनः। या गृहीतिः प्रमाणेन पंचमं तदणुव्रतम् ॥ (सुभा. सं. ७८७)। १२. जं परिमाणं कीरइ धण-धण्ण-हिरण्ण-कंचणाईणं। तं जाण पंचमवयं णिद्दिट्ठमुवासयज्झयणे ॥ (वसु. श्रा. २१३)। १३. ममेदमिति संकल्पश्चिदचिन्मिश्रवस्तुषु। ग्रन्थस्तत्कर्शनात्तेषां कर्शनं तत्प्रमाव्रतम् ॥ (सा. ध. ४-५९)। १४. हिंसानृतवचःस्तेय-स्त्रीमैथुन-परिग्रहात्। देशतो विरतिर्जैया पञ्चधाणुव्रतस्थितिः ॥ (धर्मश. २१, १४२)। १५. चेतनेतरवस्तूनां यत्प्रमाणं निजेच्छया। कुर्यात् परिग्रहत्यागं स्थूलं तत्पंचमं व्रतम् ॥ (धर्मसं. श्रा. ६-७२)। १६. धन-धान्यादिवस्तूनां संख्यानं मुह्यतां विना। तदणुव्रतमित्याहुः पंचमं गृहमेधिनाम् ॥ (भावसं. वाम. ४५६)। १७. दासी-दास-रथान्येषां स्वर्णानां योषितां तथा। परिमाणव्रतं ग्राह्यं पंचमं तदणुव्रतम् ॥ (पु. उपासका. २७)। १८. तत्र हिंसानृत-स्तेयाब्रह्म-कृत्स्नपरिग्रहात्। देशतो विरतिः प्रोक्तं गृहस्थानामणुव्रतम् ॥ (पंचाध्या. २-७२०)। १९. मुनिभिः सर्वतस्त्याज्यं तृणमात्रपरिग्रहम्। तत्संख्या गृहिभिः कार्या त्रसहिंसादिहानये ॥ (लाटीसं. ६-८३)। २०. धण-धण्ण-दुपय-चउप्पय-खेत्तण्णछादियाण दव्वाणं। जं किज्जइ परिमाणं पंचमयं अणुव्वय होई। (धर्मर. १४७)।

१ परिग्रह और आरम्भ का प्रमाण करना, यह परिग्रहपरिमाण नामक पांचवां अणुव्रत है। २ धन व धान्य आदि दस प्रकार के बाहिरी परिग्रह का परिमाण करके उससे अधिक में इच्छा न रखने को परिग्रहपरिमाणाणुव्रत कहते हैं। इसका दूसरा नाम इच्छापरिमाण भी है।

परिग्रहपरिमाणाणुव्रतातिचार—१. क्षेत्रवास्तु-हिरण्यसुवर्ण-दासीदास-कुप्यप्रमाणातिक्रमाः । (त. सू. ७–२९) । २. अतिवाहनातिसंग्रह-विस्मय-लोभाति-भारवहनानि । परिमितपरिग्रहस्य च विक्षेपाः पंच लक्ष्यन्ते ॥ (रत्नक. ३–१६) । ३. तयाणंतरं च णं इच्छापरिमाणस्स समणोवासएणं पंच अइयारा जाणियव्वा, ण समायरियव्वा । तं जहा—खेत्त-वत्थुपमाणाइक्कमे हिरण्ण-सुवण्णपमाणाइक्कमे दुपय-चउप्पयपमाणाइक्कमे धण-धन्नपमाणाइक्कमे कुविय-पमाणाइक्कमे । (उवासगद. १–४९, पृ. १०) । ४. भेएण खित्त-वत्थू-हिरण्णमाईसु होइ नायव्वं । दुपयाईसु य सम्मं वज्जणमेयस्स पुव्वुत्तं ॥ (श्रा. प्र. २७६) । ५. खेत्ताइ-हिरण्णाई-धणाइ-दुपयाइ-कुप्य-माणकमे । जोयणपमाणबंधणकारणभावेहिं णो कुणइ ॥ (पंचाश. १–१८) । ६. वास्तुक्षेत्राष्टापद-हिरण्य-धनधान्य-दासदासीनाम् । कुप्यस्य भेदयोरपि परिमाणातिक्रमाः पञ्च ॥ (पु. सि. १८७) । ७. हिरण्य-सुवर्णयोः क्षेत्र-वास्तुनोः धन-धान्ययोः । दासी-दासस्य कुप्यस्य मानाधिक्यानि पञ्च ते ॥ (त. सा. ४–९०) । ८. परिग्रहविरमणव्रतस्य पञ्चातिक्रमा भवन्ति—क्षेत्रवास्तु-हिरण्यसुवर्ण-धनधान्य-दासीदास-कुप्यमिति । (आ. सा. पृ. ७) । ९. कृतप्रमाणाल्लोभेन धनादि.कसंग्रहः । पञ्चमाणुव्रतज्यानि करोति गृहमेधिनाम् ॥ (उपासका. ४४४) । १०. धन-धान्यस्य कुप्यस्य गवादेः क्षेत्र-वास्तुनः । हिरण्य-हेम्नश्च संख्यातिक्रमोऽत्र परिग्रहे ॥ (योगशा. ३–९५) । ११. वास्तु-क्षेत्रे योगाद् धन-धान्ये बन्धनात् कनक-रूप्ये । दानात् कुप्ये भावान्न गवादौ गर्भतो मितिमतीयात् ॥ (सा. ध. ६-६४) । १ क्षेत्र-वास्तु (खेत व गृह आदि), चांदी-सोना, धन-धान्य, (पशु व गेहूं आदि अन्न), दासी-दास और कुप्य (सूती व रेशमी वस्त्र आदि); इनका जो प्रमाण किया गया है उसका उल्लंघन करना ये पृथक् पृथक् परिग्रहपरिमाणव्रत के पांच अतिचार होते हैं । २ अतिवाहन, अतिसंग्रह, विस्मय, लोभ और अतिभारवहन ये पांच परिग्रहपरिमाणाणुव्रत के अतिचार हैं ।

परिग्रहसंज्ञा—१. उवयरणदंसणेण य तस्सुवओगेण मुच्छियाए य । लोहस्सुदीरणाए परिग्गहे जायदे सण्णा ॥ (गो. जी. १३७) । २. परिग्रहसंज्ञा—परिग्रहाभिलाषस्तीव्रलोभोदयप्रभव आत्मपरिणामः । इयमपि चतुर्भिः स्थानैरुत्पद्यते । तद्यथा— अविमुक्तयाए १ लोहोदएणं २ मईए ३ तदट्ठोवओगेणं ४ । (आव. सू. हरि. वृ. पृ. ५८०) । ३. परिग्रहसंज्ञा चारित्रमोहोदयजनिता परिग्रहाभिलाष इति । (स्थाना. अभय. वृ. ४, ४, ३५६, पृ. २७७) । ४. परिग्रहसंज्ञा लोभविपाकोदयसमुत्थ-मूर्च्छापरिणामरूपा । (जीवाजी. मलय. वृ. १३) । ५. स्यात् परिग्रहसंज्ञा च लोभोदयसमुद्भवा । अनाभोगाऽव्यक्तरूपा × × × ॥ (लोकप्र. ३–४४६) ।

१ विषयभोग की सामग्री के देखने से, उधर उपयोग के जानेसे, आसक्ति से और लोभ कषाय की उदीरणा से ममत्वबुद्धिपूर्वक जो परिग्रहविषयक अभिलाषा होती है उसका नाम परिग्रहसंज्ञा है ।

परिग्रहानन्दी रौद्रध्यान— १. सद्दाइविसयसाहण-धणसारक्खणपरायणमणिट्ठं । सव्वाभिसंकणपरोव-घायकलुसाउलं चित्तं ॥ (ध्यानश. २२) । २. बह्वा-रम्भ-परिग्रहेषु नियतं रक्षार्थमभ्युद्यते, यत्संकल्पपर-म्परां वितनुते प्राणीह रौद्राशयः । यच्चालम्ब्य महत्त्व-मुन्नतमना राजेत्यहं मन्यते, तत्तुर्यं प्रवदन्ति निर्मल-धियो रौद्रं भवाशंसिनाम् ॥ (ज्ञाना. २६–२९, पृ. २६७) । ३. षड्विधे जीवनारणारम्भे कृताभिप्राय-श्चतुर्थं रौद्रम् । (मूला. वृ. ५–१९९) । ४. × × × स्वं संरक्ष्य विपक्षदूरमुदिता तोषोग्रता या तु सं—रक्षानन्दमपि स्ववस्तुनिखिलं निर्वैरि कुर्वे इति ॥ (आचा. सा. १०–२१) ।

१ शब्दादि विषयों के साधनभूत धन के संरक्षण में तत्पर रहने से जो कलुषित चित्त होता है वह विषयसंरक्षणानुबन्धी रौद्रध्यान कहलाता है । इसे परिग्रहानन्दी रौद्रध्यान भी कहा जाता है । इस ध्यान में 'कौन कब क्या करेगा' इस प्रकार की आशंका सभी के प्रति बनी रहती है, जिससे वह सभी के घात में व्याकुलचित्त रहता है । ३ छह प्रकार के जीवघातविषयक आरम्भ के अभिप्राय को चौथा रौद्रध्यान कहते हैं ।

परिचित—यत्र यत्र प्रश्नः क्रियते तत्र तत्र आशु-तमवृत्तिः परिचितम्, क्रमेणोत्क्रमेणानुभयेन च भा-वागमाम्भोधौ मत्स्यवच्चटुलतमवृत्तिर्जीवो भावागम-श्च परिचितम् । (धव. पु. ९, पृ. २५२) ।

जिस जिस विषय में प्रश्न किया जाता है उस उस विषय से सम्बद्ध भावागमरूप समुद्र में मछली के समान जिसकी चंचलतापूर्ण प्रवृत्ति शीघ्रतापूर्वक क्रम से, अक्रम से या अनुभयरूप से हुआ करती है उस जीव को और भावागम को भी परिचित कहा जाता है। यह आगम के नौ अर्थाधिकारों में तीसरा है।

परिचितसूत्रता—परिचितसूत्रता उत्क्रम-क्रमवाचनादिभिः स्थिरसूत्रता। (उत्तरा. नि. शा. वृ. ५८, पृ. ३६)।

अक्रम या क्रम से प्रवृत्त वाचना आदि से सूत्र में स्थिरता का रहना, इसका नाम स्थिरसूत्रता है। यह चार प्रकार की श्रुत-सम्पत् में से एक है।

परिजित—देखो परिचित। अइदुरियाए गईए पडिक्खलणेण विणा आइद्धकुलालचक्कं व सगविसए परिब्भमणक्खमो कदिअणियोगो परिजिदं णाम। (धव. पु. ६, पृ. २६८)।

अतिशय शीघ्रगति से स्खलन के विना जो कुम्हार के द्वारा प्रेरित चाक के समान अपने विषय में शीघ्र परिभ्रमण में समर्थ कृतिअनुयोग (विवक्षित अनुयोग) है उसका नाम परिजित है।

परिज्ञा—परिः समन्ताज्ज्ञानं पापपरित्यागेन परिज्ञासामायिकमिति। (आव. हरि. वृ. पृ. ८३४)।

परि अर्थात् सब ओर से पाप के परित्याग स्वरूप से जो ज्ञान होता है उसका नाम परिज्ञासामायिक है।

परिज्ञातकर्म मुनि—जस्सेते लोगंसि कम्म-समारम्भा परिण्णाया भवंति से हु मुणी परिण्णायकम्मेत्ति वेमि। (आचारा. सू. १, १, १, १३, पृ. २५)।

जिस मुमुक्षु मुनि के कर्मसमारम्भ—क्रियाविशेष अथवा ज्ञानावरणादि आठ प्रकार के कर्म के उपादानहेतु—बन्ध के हेतुरूप से ज्ञात है वह परिज्ञातकर्मा मुनि कहलाता है। मुनि का निरुक्तार्थ है जगत् की त्रैकालिक अवस्था का जानने वाला।

परिणाम—१. तद्भावः परिणामः। (त. सू. ५, ४१)। २. द्रव्यात्मलाभमात्रहेतुकः परिणामः। (स. सि. २–१); धर्मादीनि द्रव्याणि येनात्मना भवन्ति स तद्भावस्तत्त्वं परिणाम इति आख्यायते। (स. सि. ५–४२)। ३. धर्मादीनां द्रव्याणां यथोक्तानां च गुणानां स्वभावः स्वतत्त्वं परिणामः। (त. भा. ५–४१)। ४. द्रव्यात्मलाभमात्रहेतुकः परिणामः। यस्य भावस्य द्रव्यात्मलाभमात्रमेव हेतुर्भवति नान्यन्निमित्तमस्ति स परिणाम इति परिभाष्यते। (त. वा. २, १, ५); द्रव्यस्य स्वजात्यपरित्यागेन प्रयोगविस्रसालक्षणो विकारः परिणामः। द्रव्यस्य चेतनस्येतरस्य वा द्रव्यार्थिकनयस्य अविवक्षातो न्यग्भूतां स्वां द्रव्यजातिमजहतः पर्यायार्थिकनयार्पणात् प्राधान्यं बिभ्रता केनचित् पर्यायेण प्रादुर्भावः पूर्वपर्यायनिवृत्तिपूर्वको विकारः प्रयोग-विस्रसालक्षणः परिणाम इति प्रतिपत्तव्यः। (त. वा. ५, २२, १०); धर्मादीनां येनात्मना भवनं स तद्भावः परिणामः। धर्मादीनि द्रव्याणि येनात्मना भवन्ति स तद्भावः, तत्त्वं परिणाम इत्याख्यायते। (त. वा. ५, ४२, १)। ५. परिणामः अध्यवसायविशेषः। (आव. नि. हरि. वृ. ८२३); परिः समन्तान्नमनं परिणामः सुदीर्घकालपूर्वापरार्थविलोकनादिजन्य आत्मधर्म इत्यर्थः। (आव. नि. हरि. वृ. ६३८)। ६. परिणमनं परिणामः अपरित्यक्तपूर्वावस्थस्यैव तद्भावगमनमिति भावार्थः। उक्तं च—परिणामो ह्यर्थान्तरगमनं न तु सर्वथा व्यवस्थानम्। न च सर्वथा विनाशः परिणामस्तद्विदामिष्टः॥ (अनुयो. हरि. वृ. उद्. पृ. ६४)। ७. को परिणामो? मिच्छत्तासंजम-कसायादी। (धव. पु. १५, पृ. १७२)। ८. द्रव्यस्य स्वजात्यपरित्यागेन परिस्पन्देतरप्रयोगजपर्यायस्वभावः परिणामः। तद्यथा—अङ्कुरावस्थस्य वनस्पतेर्मूलकाण्ड-त्वक्-पत्र-स्कन्ध-शाखा-विटप-पुष्प-फलसद्भावलक्षणः परिणामः। (त. भा. सिद्ध. वृ. ५–२२); अथवा कैश्चित् परिणामलक्षणमुक्तम्—अवस्थितस्य द्रव्यस्य धर्मान्तरनिवृत्तिर्धर्मान्तरप्रादुर्भावश्च परिणामः। (त. भा. सिद्ध. वृ. ५–४१)। ९. स्वजातेरविरोधेन विकारो यो हि वस्तुनः। परिणामः स निर्दिष्टोऽपरिस्पन्दात्मको जिनैः॥ (त. सा. ३, ४६)। १०. द्रव्यात्मलाभहेतुकः परिणामः। (पंचा. का. अमृत. वृ. ५६)। ११. परीति सर्वप्रकारं नमनं जीवानामजीवानां च जीवत्वादिस्वरूपानुभवनं प्रति प्रह्वीभवनं परिणामः। (उत्तरा. नि. शा. वृ. ४८, पृ. ३३; बृहत्क्षे. वे. स्वो. वृ. ६४)। १२. परिणामः अवस्थातोऽवस्थान्तरगमनम्। (स्थाना. अभय. वृ. ४, १, २६५)। १३. परिणामः-अवस्थातोऽवस्थान्तरगमनानि। (समवा. अभय. वृ. १४०)।

१४. परिणामः कारणस्यान्यथाभावः वाग्गोचरातीतः। (आ. मी. वसु. वृ. ७१)। १५. परि समन्तादमनं यथावस्थितवस्त्वनुसारितया गमनं परिणामः। (आव. नि. मलय. वृ. ६३८, पृ. ५१६); परिणमनं परिणामः—कथञ्चित् पूर्वरूपापरित्यागेनोत्तररूपापत्तिः। उक्तं च—नार्थान्तरगमो यस्मात् सर्वथैव न चागमः। परिणामः प्रमासिद्धः इष्टश्च खलु पण्डितैः॥ (आव. नि. मलय. वृ. १०४०, पृ. ५७६); द्रव्यपरिणतिस्वभावः सर्वः परिणामः। (आव. भा. मलय. वृ. १८६, पृ. ५७८)। १६. परिणमनं परिणामः, कथञ्चिदवस्थितस्य वस्तुनः पूर्वावस्थापरित्यागेनोत्तरावस्थागमनम्। (पञ्चास्. मलय. वृ. २–३, पृ. ४५)। १७. परिणामः स्वकार्यपर्यालोचनम्। (अन. ध. स्वो. टी. ८–६८; भ. आ. मूला. ६५)। १८. परिणामो द्रव्यस्य स्वजात्यपरित्यागेन परिस्पन्देतरप्रयोगजपर्यायस्वभावः परिणामः। (बृद्र. स. वृ. ४६, पृ. १६४)। १६. द्रव्याणां या परिणतिः प्रयोग-विस्रसादिजा। नवत्व-जीर्णताद्या च परिणामः स कीर्तितः॥ (लोकप्र. २८–८)। २०. द्रव्यस्य स्वभावान्तरनिवृत्तिः स्वभावान्तरोत्पत्तिश्च अपरिस्पन्दात्मकः पर्यायः परिणामः। (त. वृत्ति श्रुत. ५–२२)। २१. परिणामस्तु सत एव प्रदेशपरिणामादिनाऽन्यथाभावः। (अष्टस. यशो. वृ. पृ. १५७)।

२ जिसका कारण द्रव्य का आत्मलाभ मात्र है उसे परिणाम कहते हैं। धर्म आदि द्रव्य जिस स्वरूप से हैं उसका नाम तद्भाव है, यही तद्भाव परिणाम का लक्षण है। ३ धर्म आदि द्रव्यों और गुणों का जो स्वभाव या निज तत्त्व है उसे परिणाम कहा जाता है। ५ अन्यथाभावविशेष का नाम परिणाम है। १७ अपने कार्य का जो पर्यालोचन किया जाता है उसे परिणाम जानना चाहिए (यह भक्तप्रत्याख्यान मरण को स्वीकार करनेवाले क्षपक के अर्हादि लिंगों में से एक है)।

परिणामक साधु—जो दव्व-खेत्तकय-काल-भावओ जं जहा जिणक्खायं। तं तह सद्दहमाणं जाणसु परिणामयं साधु॥ (बृहत्क. ७६३)।

द्रव्य, क्षेत्र, काल और भाव की अपेक्षा जिनेन्द्र देव के द्वारा साधु के लिये जो कल्प्य-अकल्प्य (योग्य-अयोग्य) का कथन किया गया है उसका या उसी प्रकार से—उत्सर्ग-अपवाद के अनुसार—जो श्रद्धान करता है उसे परिणामक साधु जानना चाहिए।

परिणामतः आत्त पुद्गल—मिच्छत्तादिपरिणामेहि जे अप्पणो कदा ते परिणामदो अत्ता पोग्गला। (धव. पु. १६, पृ. ५१५)।

मिथ्यात्वादि परिणामों के द्वारा जो पुद्गल अपने किये गये हैं—जिन्हें ग्रहण किया गया है—वे परिणामतः आत्त पुद्गल कहलाते हैं।

परिणामयोगस्थान—१. पज्जत्तपढमसमयप्पहुडि उवरि सव्वत्थ परिणामजोगो चेव। (धव. पु. १०, पृ. ४२१)। २. परिणामजोगठाणा सरीरपज्जत्तगा दु चरिमो त्ति। (गो. क. २२०)।

१ पर्याप्त होने के प्रथम समय से लेकर आगे सर्वत्र परिणामयोग ही हुआ करता है।

परिणामविशुद्धप्रत्याख्यान—१. रागेण व दोसेण व सगपरिणामेण दूसिदं जं तु। तं पुण पच्चक्खाणं भावविशुद्धं तु णादव्वं॥ (मूला. ७–१४६)। २. रागपरिणामेन द्वेषपरिणामेन च न दूषितं न प्रतिहतं विपरिणामेन यत्प्रत्याख्यानं तत्पुनः प्रत्याख्यानं भावविशुद्धं तु ज्ञातव्यं। सम्यग्दर्शनादियुक्तस्य निःकांक्षस्य वीतरागस्य समभावयुक्तस्याहिंसादिव्रतसहितशुद्धभावस्य प्रत्याख्यानं परिणामशुद्धं भवेदिति। (मूला. वृ. ७–१४६)।

जो प्रत्याख्यान राग और द्वेषरूप चित्तवृत्ति से दूषित न हो उसे भावविशुद्ध या परिणामविशुद्ध प्रत्याख्यान जानना चाहिए।

परिणामानित्यता—तत्र परिणामानित्यता नाम मृत्पिण्डो हि विस्रसा-प्रयोगाभ्यामनुक्रमयमवस्थान्तरं प्रागवस्थाप्रच्युत्या समश्नुते। (त. भा. सिद्ध. वृ. ५–४)।

स्वभाव अथवा प्रयोग के वश मिट्टी का पिण्ड जो प्रत्येक समय में पूर्व पूर्व अवस्था को छोड़कर अन्य अन्य अवस्था को प्राप्त होता है, यही परिणामानित्यता है।

परितापन—१. संतावजणणं परिदावणं णाम। (धव. पु. १३, पृ. ४६)। २. प्राणिनः सन्तापकरणं परितापनं व्याख्यायते। (भ.आरा. टी. ६६)।

१ प्राणि के लिए सन्ताप पहुंचाने का नाम परितापन है।

परितापनिकी—परितापनं परितापः, पीडाकरणमित्यर्थः, तस्मिन् भवा तेन वा निर्वृत्ता, परितापनयेन वा परितापनिकी। (प्रज्ञाप. मलय. वृ. २७६, पृ. ४३५); परितापनिकी नाम ऋङ्गादिप्रहारतेन पीडाकरणम्। (प्रज्ञाप. मलय. वृ. २८१, पृ. ४४८)।

कष्ट आदि के घातसे दूसरों के लिए पीडा पहुंचाना, यह परितापनिकी क्रिया कहलाती है।

परित्यजन दोष—देखो छोटितदोष। १. बहुपरिसाडणमुज्झिअ आहारो परिगलंत दिज्जंतं। छंडिय भुंजणमहवा छंडियदोषो हवे णेओ॥ (मूला. ६, ५६)। २. छोडितं परित्यजनं भुंजानस्यास्थिरपात्रेणाहारस्य परिशातनं गलनं परित्यजनं यत्क्रियते तत्परित्यजनतानामाशातदोषः। (मूला. वृ. ६-४६)।

१ बहुत अन्न गिराकर भोजन करना, अथवा देते समय गिरते हुए को छोड़कर भोजन करना; यह परित्यजन नाम का दोष माना जाता है। इसे छोटित और त्यक्त दोष भी कहा जाता है।

परिदेवन—१. संक्लेशपरिणामावलम्बनं गुणस्मरणानुकीर्तनपूर्वकं स्व-परानुग्रहाभिलाषविषयमनुकम्पाप्रचुरं रोदनं परिदेवनम्। (त. सि. ६-११)। २. संक्लेशप्रधानं स्वपरानुग्रहाभिलाषविषयमनुकम्पाप्रायं परिदेवनम्। संक्लेशपरिणामालम्बनं स्व-परानुग्रहविषयम् अनुकम्पाप्रचुरं परिदेवनमिति परिभाष्यते। (त. वा. ६, ११, ६)। ३. परिदेवनं मुहुर्मुहुर्नष्टचित्ततयैव सभ्रान्ताद्विकपनम्। (त. भा. हरि. वृ. ६-१३)। ४. संक्लेशश्च[प्र]धानं स्व-परानुग्रहणं हा नाथेत्यनुकम्पाप्रायं परिदेवनम्, तच्चासद्वेद्योदये मोहोदये च सति बोद्धव्यम्। (त. श्लो. ६-११)। ५. संक्लेशप्रधानः स्व-परानुग्रहनाथनमनुकम्पाप्रायं परिदेवनम्। (त. भा. सिद्ध. वृ. ६-१३)। ६. परिदेव्यते परिदेवनं संक्लेशपरिणामविहितावलम्बनं स्व-परोपकारकांक्षालिंगं अनुकम्पाभूयिष्ठं रोदनमित्यर्थः। (त. वृत्ति श्रुत. ६-११)।

१ संक्लेश परिणाम के आश्रय से अपने व दूसरे के अनुग्रह से सम्बद्ध जो गुणों का स्मरण करते हुए रुदन किया जाता है, जिसे देखकर सुनने वाले का चित्त दयार्द्र हो उठता है, उसे परिदेवन कहते हैं।

परिधि—१. समवट्टवासवग्गे दहगुणिदे करणिपरिमओ होदि। (ति. प. १-११७)। २. विक्खंभवग्गदहगुणकरणी वट्टस्स परिहु[रि]ओ होदि। (ध. पु. ४, पृ. २०६ उद्.; त्रि. सा. ६६); व्यासं षोडशगुणितं षोडशसहितं त्रि-रूप-रूपैर्भक्तम्। व्यासत्रिगुणितसहितं सूक्ष्मादपि तद् भवेत् सूक्ष्मम्॥ (ध. पु. ४, पृ. ४२ उद्.)। ३. वासो तिगुणो परिही ×××। (त्रि. सा. १७)।

१ समान गोल क्षेत्र के विस्तार का वर्ग करके उसे दस से गुणित करने पर जो प्राप्त हो उसका वर्गमूल निकालने पर परिधि का प्रमाण प्राप्त होता है। २ विस्तार को सोलह से गुणा करके उसमें सोलह जोड़ दे, तत्पश्चात् उसे तीन, छह और एक (११३) अर्थात् एक सौ तेरह से भाजित करके लब्ध में तिगुने विस्तार को जोड़ देने पर सूक्ष्म से भी सूक्ष्म परिधि का प्रमाण प्राप्त होता है।

परिनिर्वाप्यवाचना—परीति सर्वप्रकारं निर्वापयतो निरो निर्दग्धादिषु भूशार्थस्यापि दर्शनात् भृशं गमयतः—पूर्वदत्तालापकादि सर्वात्मना स्वात्मनि परिणमयतः शिष्यस्य सूत्रगताशेषविशेषग्रहणकालं प्रतीक्ष्य शक्त्यनुरूपप्रदानेन प्रयोजकत्वमनुभूय परिनिर्वाप्य वाचना—सूत्रप्रदानं परिनिर्वाप्यवाचना। (उत्तरा. नि. शा. वृ. ५८, पृ. ३६)।

पूर्व में प्रदान किये गये आलाप आदि को जो सब प्रकार से अपने में परिणत कर रहा है—उसे पूर्णतया हृदयंगम करता है—ऐसे शिष्य को सूत्रगत समस्त विशेषताओं के ग्रहण योग्य काल की प्रतीक्षा करके शक्ति के अनुरूप सूत्र के प्रदान करने को परिनिर्वाप्यवाचना कहा जाता है।

परिनिर्वृत—परिनिर्वृतः कर्मकृतविकारविरहात् स्वस्थीभूतः। (स्थाना. अभय. वृ. ३-५३)।

कर्मकृत रागादि विकारों (दोषों) को दूर कर जो सर्वथा स्वस्थ हो चुका है—केवलज्ञानादिरूप आत्मस्वरूप में स्थित होता हुआ सिद्धि को प्राप्त कर चुका है—वह परिनिर्वृत (सिद्ध) कहलाता है।

परिनिर्वृत्ति (परं निर्वाण)—भवबन्धनमुक्तस्य या ऽवस्था परमात्मनः। परिनिर्वृतिरिष्टा सा परं निर्वाणमिष्यते॥ (स. पु. ३२-२०६)।

संसाररूप बन्धन से मुक्त हुए जीव की जो उत्कृष्ट

अवस्था होती है उसे परिनिर्वृति कहते हैं। इसे परंनिर्वाण भी कहा जाता है।

परिपिण्डित—देखो परिपीडित। १. यत्र संपिण्डितान् एकत्र मिलितानाचार्यादीनेकवन्दनकेनैव वन्दते, न पृथक् पृथक्, तत्परिपिण्डितं वन्दनकमुच्यते। अथवा वचनानि सूत्रोच्चारणगर्भाणि, करणानि कर-चरणादीनि, संपिण्डितानि अव्यवच्छिन्नानि, वचनकरणानि यस्य स तथा। उर्वोरुपरि हस्तौ व्यवस्थाप्य संपिण्डितकर-चरणौ अव्यक्तसूत्रोच्चारणपुरस्सरं यत्र वन्दते तद्वा परिपिण्डितमिति भावः। (आव. हृ. वृ. मल. हेम. टि. पृ. ८८; प्रव. सारो. वृ. १५७)। २. संपिंडिए व वंदइ परिपिंडियवयणकरणओ वावि। (प्रव. सारो. १५७)। ३. परिपिण्डितं प्रभूतानां युगपद्वन्दनम्, यद्वा कुक्षेरुपरि हस्तौ व्यवस्थाप्य परिपिण्डितकर-चरणस्याऽव्यक्तसूत्रोच्चारणपुरस्सरं वन्दनम्। (योगशा. स्वो. विव. ३-१३०)।

१ एक स्थान पर सम्मिलित हुए अनेक आचार्यादिकों की पृथक्-पृथक् वन्दना न करके एक ही वन्दना के रूप से वन्दना करने को परिपिण्डित-वन्दनक कहते हैं। अथवा जांघों के ऊपर दोनों हाथ रख करके हाथ-पैरों को संकुचित कर अव्यक्त सूत्रोच्चारणपूर्वक वन्दना करने को परिपिण्डितवन्दनक कहते हैं। यह वन्दना के ३२ दोषों में चौथा है।

परिपीडित दोष—१. परिपीडितं कर-जानुप्रदेशैः परिपीडय संस्पर्श्य यः करोति वन्दनां तस्य परिपीडितदोषः। (मूला. वृ. ७-१०६)। २. हस्ताभ्यां जानुनो स्वस्य संस्पर्शः परिपीडितम्। (अन. ध. स्वो. टी. ८-९९)।

२ दोनों हाथों से अपने जानु (घुटने) का स्पर्श करते हुए वन्दना करने को परिपीडित दोष कहते हैं। यह कृतिकर्म के ३२ दोषों में चौथा है।

परिपूणक समान शिष्य—१. परिपूणगम्मि य गुणा गलंति दोसा य चिट्ठंति॥ (विशेषा. १४६३; नन्दी. हरि. वृ. पृ. २२, ११ उद्.)। २. परिपूणको नाम सुघरीचिटिकाविरचितो नीडविशेषः, तेन च किल घृतं गाल्यते, ततस्तत्र कचवरमवतिष्ठते, घृतं तु गलित्वाऽधः पतति, एवं परिपूणकसदृशः शिष्योऽप्युपचारात् परिपूणकः। तत्र हि श्रुतसम्बन्धिनो गुणा सर्वेऽपि घृतवद् गलन्ति, दोषास्तु घृतगतकचवरवदवतिष्ठन्ते, श्रुतस्य दोषानेव गृह्णाति, गुणांस्तु सर्वथा परिहरति असौ, अतोऽयोग्य इति भावः। (नन्दी. हरि. वृ. पृ. १०५)। ३. परिपूणको नाम घृत-क्षीरगालनं सुगृहाभिधचटकाकुलायो वा, तेन ह्याभीर्यो घृतं गालयन्ति, ततो यथा स परिपूणकः कचवरं धारयति घृतमुञ्झति तथा शिष्योऽपि यो व्याख्या-वाचनादो दोषानभिगृह्णाति गुणांस्तु मुञ्चति स परिपूणकसमानः। × × ×। आह च चूर्णिकृत्—वक्खाणाइसु दोसं हियय्यंमि ठवेइ मुयइ गुणजालं। सो सीसो अ अजोग्गो भणितो परिपूणगसमानो॥१॥ (आव. नि. मलय. वृ. १३६, पृ. १४३)।

३ परिपूणक का अर्थ घी की छलनी अथवा सुघरी नामक पक्षी का घोंसला होता है। जिस प्रकार ग्वालिनियां परिपूणक से जब घी को छानती हैं तब घी निकल जाता है और कचरा उसके भीतर रह जाता है, उसी प्रकार जो शिष्य परिपूणक के समान व्याख्या व वाचना आदि में दोषों को ग्रहण करता है और गुणों को छोड़ देता है उसे परिपूणक समान शिष्य कहा जाता है।

परिपूर्णेन्द्रियता—परिपूर्णेन्द्रियता अनुपहतचक्षुरादिकरणता। (उत्तरा. नि. शा. वृ. ५८)।

चक्षु आदि इन्द्रियों की अविनाशिता—उनके विषयग्रहणसामर्थ्य—को परिपूर्णेन्द्रियता कहते हैं।

परिभाषा—१. परिभाषणं परिभाषा—कोपाविष्करणेन मा यास्यसीत्यपराधिनोऽभिधानम्। (आव. भा. हरि. वृ. ३, पृ. ११४)। २. इयमत्र भावना—कोपाविष्करणे नरे इतः स्थानान्मा यासीरित्येयं यत् परिभाषणम्। (आव. नि. मलय. वृ. १६६)।

१ क्रोध को प्रगट करके नहीं जाओगे, अर्थात् अब आगे क्रोध नहीं करना, इस प्रकार अपराधी से कहना, यह भरत की चार दण्डनीतियों में प्रथम परिभाषा नाम की दण्डनीति रही है।

परिभोग—देखो उपभोग। १. आच्छादन-प्रावरणालंकार-शयनाशन-गृह-यान-वाहनादिः। (त. सि. ७-२१)। २. परित्यज्य भुज्यत इति परिभोगः। सकृद् भुक्त्वा परित्यज्य पुनरपि भुज्यते इति परिभोग इत्युच्यते—आच्छादन-प्रावरणालङ्कार-शयनासन-गृह-यान-वाहनादिः। (त. वा. ७, २१, १०)। ३. परिभुज्यत इति परिभोगो वस्त्रादि, पुनः पुनः

भुज्यत इति भावः। परिशब्दस्याभ्यावृत्त्यर्थत्वात्। ×××
बहिर्भोगो वा परिभोगः, परिशब्दस्य बहिर्भावाधिकत्वात्। (आ. अ. टी. २८४)। ४. पुनः पुनः परिभुज्यत इति परिभोगः स्त्री-वस्त्राभरणादिः। (धव. पु. ६, पृ. ७८)। ५. अशन-पान-गन्ध-माल्यादि सकृद् भुक्त्वा पुनरपि भुज्यत इति परिभोगः। (आ. सा. पृ. १२)। ६. भूषादिः परिभोगः स्यात् पौनःपुन्येन सेवनात्। (उपासका. ७५६)। ७. मुहुर्यो भुज्यते लोके परिभोगः स उच्यते। (धर्मसं. ७–१७)। ८. आच्छादन-प्रावरण-भूषण-शय्यासन-गृह-यान-वाहन-वनितादिकः परिभोग उच्यते। (त. वृत्ति श्रुत. ७–२१)। ९. परिभोगः समाख्यातो भुज्यते यत्पुनः पुनः। यथा योषिदलंकार-वस्त्रागार-गजादिकम्॥ (लाटीसं. ६–१४७)।

२ जिसे एक बार भोगकर छोड़ दिया जाता है तथा फिर से भी भोगा जाता है वह परिभोग कहलाता है—जैसे आच्छादन, वस्त्र, आभूषण, शयन, आसन, घर, सवारी और वाहन आदि।

परिभोगान्तराय—जस्स कम्मस्स उदएण परिभोगस्स विग्घं होदि तं परिभोगंतराइयं॥ (धव. पु. ६, पृ. ७८)।

जिस कर्म के उदय से परिभोग में विघ्न होता है वह परिभोगान्तराय कहलाता है।

परिमर्शन—१. समस्तशरीरस्य हस्तेन स्पर्शनं परिमर्शनम्। (भ. आ. विजयो. ६४९)। २. परिमर्शनं सर्वगात्रस्पर्शनम्। (भ. आ. मूला. ६४९)।

१ हाथ से समस्त शरीर के स्पर्श करने को परिमर्शन कहते हैं।

परिमितकाल सामायिक—स्वाध्यायादौ सामायिकग्रहणं परिमितकालम्। (त. वृत्ति श्रुत. ९, १८)।

स्वाध्याय आदि में जो सामायिक ग्रहण की जाती है वह परिमितकाल सामायिक कहलाती है।

परिवर्तदोष—देखो परिवर्तित। १. मद्गेये वेश्मनि तिष्ठन्तु भवान्, युष्मदीयं तावद् गृहं यतिभ्यः प्रयच्छेति गृहीतं परियट्टमित्युच्यते। (भ. आ. विजयो. २३०; कार्तिके. टी. ४४८–४९)। २. व्रीहिकूरादिभिः शालिकूरादेः परिवर्तनम्। यद्दास्यामीति यतये परिवर्तः प्रकीर्तितः॥ (आचा. सा. ८–३१)। ३. व्रीह्यन्नादेन शाल्यन्नाद्युपात्तं परिवर्तितम्। (अन. ध. ५–१४)। ४. मद्गृहे तिष्ठतु भवान्, स्वगृहं यतिभ्यः प्रयच्छेति गृहीतं परियट्टम्। (भ. आ. मूला. २३०)। ५. कस्यचिद् गृहस्थस्य व्रीहीन् दत्त्वा शालयो गृह्यन्ते, अथवा निजं कूरं दत्त्वा परकूरो गृह्यते, निजाभ्यूषान् दत्त्वा परेषामभ्यूषा गृह्यन्ते, एवं यत् परिवर्त्यंते यतिभ्यो दीयते दास्यते वा स परिवर्तः कथ्यते। (भावप्रा. टी. ९६, पृ. २५०)।

१ आप मेरे घर में रहें और अपना घर साधुओं के रहने के लिए देवें। इस प्रकार कह कर साधु के लिए जो निवासस्थान ग्रहण किया जाता है वह परिवर्त नामक दोष से दूषित होता है। २ व्रीहि आदि से शालि धान के भात आदि को बदल कर साधु के लिये देना, वह परिवर्त नामक एक उत्पादन दोष है।

परिवर्तन—१. परियट्टणं णाम परियट्टणंति वा अब्भसणंति वा गुणणंति वा एगट्ठा। (दशवै. चू. पृ. २८)। २. अविस्सरणट्ठं पुणो पुणो भावागम-परिमलणं परियट्टणं णाम। (धव. पु. ९, पृ. २६२); अवगयत्थस्स हियएण पुणो पुणो परिमलणं परियट्टणं णाम। (धव. पु. १४, पृ. ९)। ३. पूर्वाधीतस्य सूत्रादेरविस्मरणहेतवे। निर्जरार्थं च योऽभ्यासः स भवेत् परिवर्तना॥ (लोकप्र. ३०–६८)।

१ परिवर्तन, अभ्यसन और गुणन ये समानार्थक शब्द हैं। २ पठित भावागम का विस्मरण न हो, इसके लिये जो उसका बार बार परिशीलन किया जाता है इसे परिवर्तन कहते हैं।

परिवर्तना—देखो परिवर्तन।

परिवर्तमान परिणाम—जत्थ पुण ट्ठाइदूण परिणामंतरं गंतूण एग-दोआदिसमएहि आगमणं संभवदि ते परिणामा परियत्तमाणा णाम। (धव. पु. १२, पृ. २७)।

जिस परिणाम पर स्थित होकर दूसरे परिणाम को प्राप्त होते हुए एक-दो आदि समयों में पुनः उसी परिणाम को प्राप्त होना संभव है, ऐसे परिणामों को परिवर्तमान परिणाम कहते हैं।

परिवर्तित—देखो परिवर्त। १. यच्छाल्योदनादि कोद्रवादिना प्रातिवेशिकगृहे परिवर्त्य ददाति तत्परिवर्तितम्। (आचारा. सू. शी. वृ. २, १, २६६, पृ. ३१७)। २. स्वद्रव्यमर्पयित्वा परद्रव्यं तत्सदृशं

गृहीत्वा यद्दीयते तत्परिवर्तितम्। (योगशा. स्वो. विव. १-३८)।

१ शालि धान के भात आदि को पड़ोसी के घर में कोदों (एक क्षुद्र धान्य) आदि से बदल कर देने पर परिवर्तित दोष होता है।

परिवाद—परिवादो मिथ्योपदेशोऽभ्युदय-निःश्रेयसार्थेषु क्रियाविशेषेष्वन्यस्यान्यथा प्रवर्तनम्। (रत्न-क. टी. ३-१०)।

स्वर्ग-मोक्ष की साधनभूत विशेष क्रियाओं के विषय में मिथ्या उपदेश देकर दूसरे को विपरीत प्रवर्तना, इसका नाम परिवाद है। यह सत्याणुव्रत का एक अतीचार है।

परिव्राजक—परि समन्तात् पापवर्जनेन व्रजति गच्छतीति परिव्राजकः। (दशवै. हरि. वृ. पृ. ८४)।

जो 'परि' अर्थात् सब ओर पापों के परित्याग के साथ 'व्रजति' अर्थात् जाता है—प्रवृत्ति करता है—उसे परिव्राजक कहते हैं। यह परिव्राजक की सार्थक संज्ञा है।

परिशातनाकृति—तेसिं चेव अप्पिदसरीरपोग्गलक्खंधाणं संचएण विणा जा णिज्जरा सा परिसादणा कदी णाम। (ध. पु. ९, पृ. ३२७)।

विवक्षित औदारिकादि शरीररूप पुद्गलस्कन्धों की संचय के बिना जो निर्जरा होती है उसे परिशातना कृति कहते हैं।

परिषह, परीषह—१. त एते बाह्याभ्यन्तरद्रव्यपरिणामाः शारीर-मानसप्रकृष्टपीडाहेतवः क्षुधादयो द्वाविंशतिः परीषहाः प्रत्येतव्याः। (त. वा. ९, ९, १)। २. परीति समन्तात् स्वहेतुभिरुदीरिता मार्गाच्यवननिर्जरार्थं साध्वादिभिः सह्यन्त इति परीषहाः। (उत्तरा. शा. वृ. २, पृ. ७२ उत्थानिका)। ३. परीषहाः क्षुत्तृट्शीतोष्णादयः। (मूला. वृ. ५, १९८)। ४. शारीर-मानसोत्कृष्टबाधाहेतून् क्षुदादिकान्। प्राहुरन्तर्बहिर्द्रव्यपरिणामान् परीषहान्॥ (अन. ध. ६-८४)। ५. एते(क्षुदादयः) सर्वे वेदनाविशेषाः द्वाविंशतिपरीषहाः मुमुक्षुणा सहनीयाः। (त. वृत्ति श्रुत. ९-९)।

१ शारीरिक एवं मानसिक उत्कृष्ट पीडा की हेतुभूत जो बाह्य व अभ्यन्तर परिणाम स्वरूप क्षुधादि हैं उन्हें परीषह कहा जाता है। ये संख्या में बाईस* हैं।

परिष्ठापनासंयम—भक्त-पानादिकमनेषणीयं वस्त्र-पात्रादिकं चानुपकारकं संसक्तं वा निर्जन्तुके स्थण्डिले परिष्ठापयतः परिष्ठापनासंयमः। (योगशा. स्वो. विव. ४-९३)।

नहीं ग्रहण करने के योग्य अन्न-पानादि को एवं शरीर के लिए अनुपयोगी अथवा सम्बद्ध ऐसे वस्त्र-पात्रादि को जन्तु रहित शुद्ध भूमि पर रखना, इसे परिष्ठापनासंयम कहते हैं।

परिहरण—वंतुग्गारसरिच्छं कम्मं सोउमवि कोविओ भीओ। परिहरइ साहि य सुद्धा णिहिअविहीए य परिहरणा॥ (पिण्डनि. १९७)।

जो आधाकर्म वान्ति या विष्ठा के समान है उसे सुनकर विद्वान् भयभीत होता हुआ जो विधि या अविधि के साथ उसका परित्याग करता है, यह उक्त आधाकर्म का परिहरण है।

परिहार—देखो भिक्ष। १. पक्ष-मासादिविभागेन दूरतः परिवर्जनं परिहारः। (स. सि. ९-२२; त. श्लो. ९-२२; मूला. वृ. ११-१६)। २. परिहारो मासिकादिः। (त. भा. ९-२२)। ३. पक्ष-मासादिविभागेन दूरतः परिवर्जनं परिहारः। पक्ष-मासादिविभागेन संसर्गमन्तरेण दूरतः परिवर्जनं परिहार इत्यवधियते। (त. वा. ९, २२, ९)। ४. परिह्रियते अस्मिन् सति वन्दनालापान्नपानप्रदानादिक्रियया साधुभिरिति परिहारः। स च मासादिकः षण्मासान्तः। (त. भा. सिद्ध. वृ. ९-२२)। ५. परिहारस्तु मासादिविभागेन विवर्जनम्। (त. सा. ७-२६)। ६. विधिवद् दूरतस्त्यजनं परिहारो निजगणानुपस्थानम्। सपरगणोपस्थानं पारञ्चिकमित्ययं त्रिविधः॥ (अन. ध. ७-४६)। ७. पक्ष-मासादिभेदेन दूरतः परिवर्जनम्। (प्रायश्चित्तस. टी. ७-२१)। ८. दिवसादिविभागेनैव दूरतः परिवर्जनं परिहारः। (भावप्रा. टी. ७८)। ९. दिवस-पक्ष-मासादिविभागेन दूरतः परिवर्जनं परिहारो नाम प्रायश्चित्तम्। (त. वृत्ति श्रुत. ९-२२)।

१ अपराधी साधु को पक्ष-मास आदि के लिए संघ से दूर करने—उससे कुछ सम्बन्ध न रखने—को परिहार प्रायश्चित्त कहते हैं। ४ जिस प्रायश्चित्त में साधु जन अपराधी साधु का वन्दना, सम्भाषण और अन्न-पानप्रदानादि क्रिया से परिहार कर देते हैं—उससे वन्दना व सम्भाषण आदि नहीं किया करते*—

यह परिहार प्रायश्चित्त कहलाता है। यह कम से कम एक मास और अधिक से अधिक छह मास तक होता है।

परिहारविशुद्धि—१. परिहरणं परिहारः प्राणिवधान्निवृत्तिः, तेन विशिष्टा शुद्धिर्यस्मिंस्तत्परिहारविशुद्धिचारित्रम्। (त. सि. ९–१८)। २. पंचसमिदो तिगुत्तो परिहरइ सदा वि जो हु सावज्जं। पंचजमेयजमो वा परिहारयसंजदो साहू। (प्रा. पंचसं. १–१११; ध. पु. १, पृ. ३७२ उद्.; गो. जी. ४७२)। ३. परिहरतु विसुद्धं तु पंचजामं अणुत्तरं धम्मं। तिविहेण फासयंतो परिहारियसंजतो स खलु॥ (व्याख्याप्र. २५, ७, ३, पृ. २८४८)। ४. परिहारेण विशिष्टा शुद्धिर्यस्मिंस्तत्परिहारविशुद्धिचारित्रम्। परिहरणं परिहारः प्राणिवधान्निवृत्तिः, तेन विशिष्टा शुद्धिर्यस्मिंस्तत् परिहारविशुद्धिचारित्रं प्रत्येतव्यम्। (त. वा. ९, १८, ८)। ५. परिहारः तपोविशेषः, तेन विशुद्धं परिहारविशुद्धम्, परिहारो वा विशेषेण शुद्धो यत्र तत्परिहारविशुद्धम्। (अनुयो. हरि. वृ. पृ. १०४)। ६. परिहरणं परिहारः तपोविशेषः, तेन विशुद्धिर्यस्मिंस्तत्परिहारविशुद्धिकम्। (आव. नि. हरि. व मलय. वृ. ११४)। ७. परिहारप्रधानः शुद्धिसंयतः परिहारविशुद्धिसंयतः। त्रिंशद् वर्षाणि यथेच्छया भोगमनुभूय सामान्यरूपेण विशेषरूपेण वा संयममादाय द्रव्यक्षेत्र-काल-भावगतपरिमितापरिमितप्रत्याख्यानप्रतिपादकप्रत्याख्यानपूर्वमहार्णवं सम्यगधिगम्य व्यपगतसकलसंशयस्तपोविशेषात् समुत्पन्नपरिहारर्द्धिस्तीर्थकरपादमूले परिहारशुद्धिसंयममादत्ते। एवमादाय स्थान-गमन-चङ्क्रमणाक्षन-पानासनादिषु व्यापारेष्वशेषप्राणिपरिहरणदक्षः परिहारशुद्धिसंयतो नाम। (ध. पु. १, पृ. ३७०–३७१); सव्वसुही होदूण तीसं वस्साणि गमिय तदो वासपुधत्तेण तित्थयरपादमूले पच्चक्खाणणामधेयपुव्वं पढिदूण पुणो पच्छा परिहारसुद्धिसंजमं पडिवज्जिय ×××। (ध. पु. ७, पृ. १६७)। ८. परिहारस्तपोविशेषस्तेन विशुद्धं परिहारविशुद्धिकम्। (त. भा. सिद्ध. वृ. ९–१८)। ९. विशिष्टपरिहारेण प्राणिघातस्य यत्र हि। शुद्धिर्भवति चारित्रं परिहारविशुद्धि तत्॥ (त. सा. ६–४७)। १०. प्राणिवधान्निवृत्तिः परिहारेण विशुद्धिर्यस्मिन तत्परिहारविशुद्धिचारित्रम्। (भा. सा. पृ. ३७)। ११. सावद्यपरिहारेण प्राप्यते यः समाहितैः। व्रत-गुप्ति-समित्याढ्यैः स परीहारसंयमः॥ (पंचसं. अमित. १–२४१)। १२. मिथ्यात्व-रागादिविकल्पमलानां प्रत्याख्यानेन परिहारेण विशेषेण स्वात्मनः शुद्धिर्निर्मल्यं परिहारविशुद्धिश्चारित्रम्। (बृ. द्रव्यसं. टी. ३५)। १३. परिहारेण दोषाणां शुद्धिर्यस्मिन् स संयमः। परिहारविशुद्धिः स्याद् ऋद्धिरीदृग्विधस्य सा॥ (आचा. सा. ५–१४२)। १४. परिहारः प्राणिवधान्निवृत्तिः, तेन विशिष्टा शुद्धिर्यत्र तत्परिहारविशुद्धिसंयमं चारित्रम्। (प्रा. चारित्रभ. टी. ३, पृ. १९४)। १५. परिहरणं परिहारः—विशिष्टतपोरूपस्तेन विशुद्धिरस्मिन्निति परिहारविशुद्धिकम्। (उत्तरा. ने. वृ. २८–३२; बृहत्ती. मलय. वृ. १५; पंचसं. मलय. वृ. १–८, पृ. ११; भगवती. दा. वृ. ८–२, पृ. १२०)। १६. परिहरणं परिहारः प्राणिवधान्निवृत्तिः, तेन विशिष्टा शुद्धिर्यस्मिन् स परिहारविशुद्धिः। (गो. जी. जी. प्र. ४७३)। १७. परिहरइ जो विसुद्धं पंचज्जामं अणुत्तरं धम्मं। तिविहेणं फासंतो परिहारियसंजओ स खलु॥ (गु. गु. षट्. स्वो. वृ. ३, पृ.१३ उद्.)। १८. परिहरणं परिहारः प्राणिवधनिवृत्तिरित्यर्थः, परिहारेण विशिष्टा शुद्धिः कर्ममलकलंकप्रक्षालनं यस्मिन् चारित्रे तत्परिहारविशुद्धिचारित्रम्। (त. वृत्ति श्रुत. ९, १८)।

१ प्राणिघात के परिहार से जो विशिष्ट शुद्धियुक्त संयम होता है उसे परिहारविशुद्धिसंयम कहते हैं। २ जो साधु पांच समितियों व तीन गुप्तियों से युक्त होता हुआ सदा पाप का परित्याग करता है तथा पांच यमरूप भेद संयम अथवा एक ही सामायिकरूप अभेदसंयम से विभूषित होता है उसे परिहारविशुद्धिसंयत कहा जाता है। ३ जो परिहारपूर्वक अनुपम पांच यमरूप धर्म का मन-वचन-काय से स्पर्श करता है—परिपालन करता है—वह पारिहारिकसंयत कहलाता है।

परिहारिक संयत, परिहारियसंयत— देखो परिहारविशुद्धि।

परीक्षण—परीक्षणं परीक्षा गण-परिचारकादिगोचरा। (अन. ध. स्वो. टी. ७–९८)।

परीक्षण से परीक्षा का अभिप्राय है। यह भक्त-

प्रत्याख्यान के अन्तर्गत अर्हदादि लिंगों में से एक है।

परीक्षा—१. उद्दिष्टस्य लक्षितस्य च यथावल्लक्षणमुपपद्यते न वा इति प्रमाणतोऽर्थावधारणं परीक्षा। (न्यायकु. १-३, पृ. २१)। २. प्रमाणबलात्तल्लक्षणविप्रतिपत्तिपक्षनिरासः परीक्षा। (लघीय. अभय. वृ. पृ. ६)। ३. विरुद्धनानायुक्तिप्राबल्य-दौर्बल्यावधारणाय प्रवर्तमानो विचारः परीक्षा। (न्यायदी. पृ. ८)।

१ उद्दिष्ट और लक्ष्यभूत वस्तु का लक्षण यथार्थ में घटित होता है या नहीं; इस प्रकार प्रमाण से उसकी यथार्थता का विचार करना, इसका नाम परीक्षा है।

परीतसंसार (संसारपरीत)—१. जिणवयणे अणुरत्ता गुरुवयणं जे करंति भावेण। असबलअसंकिलिट्ठा ते होंति परित्तसंसारा॥ (मूला. २, ७२)। २. संसारपरित्तेणं, पुच्छा। गोयमा! जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं अणंतं कालं जाव अवड्ढं पोग्गलपरियट्टं देसूणं। (प्रज्ञाप. १८, ३४७)। ३. यस्तु सम्यक्त्वादिना कृतपरिमितसंसारः स संसारपरीतः। ××× संसारपरीतो जघन्यतोऽन्तर्मुहूर्तम्, तत ऊर्ध्वमन्तकृत्केवलित्वयोगेन मुक्तिभावात्। उत्कर्षतो अनन्तकालम्। तमेव निरूपयति—'अणंताओ' इत्यादि प्राग्वत्, तत ऊर्ध्वमवश्यं मुक्तिगमनात्। (प्रज्ञाप. मलय. वृ. १८-३४७)। ४. परीतीकृतसंसारा नाम स्तोकावशेषसंसाराः। (आव. नि. मलय. वृ. १५, पृ. ४२)। ५. परीतः परिमितः संसारो यस्यासौ परीतसंसारिकः। (बृहत्क. क्षे. वृ. ७१४)।

१ जो जिनेन्द्रदेव के वचनों में अनुरक्त होकर भक्तिपूर्वक गुरु की आज्ञा का पालन करते हैं तथा जो मिथ्यात्व से विरहित होते हुए संक्लेशपरिणाम से भी रहित हैं वे परीतसंसारी परिमितसंसार वाले—होते हैं। ३ जिसने सम्यक्त्व आदि के द्वारा अपने संसार को परिमित कर दिया है, वह संसारपरीत या परीतसंसारी हो जाता है। वह जघन्य से अन्तर्मुहूर्त काल और उत्कर्ष से अनन्त काल—कुछ कम अपार्ध पुद्गलपरिवर्तकाल—तक ही संसार में रहता है—तत्पश्चात् नियम से मुक्त हो जाता है।

परीतसंसारिक—देखो परीतसंसार।

परीतानन्त—जं तं परित्ताणंतयं तं तिविहं—जहण्णपरित्ताणंतयं अजहण्णमणुक्कसपरित्ताणंतयं उक्कस्सपरित्ताणंतयं चेदि। ××× जं तं जहण्णपरित्ताणंतयं तं विरलेदूण एक्केक्कस्स रूवस्स जहण्णपरित्ताणंतयं दादूण अण्णोण्णब्भत्थे कदे उक्कस्सपरित्ताणंतयं अदिच्छिदूण जहण्णजुत्ताणंतयं गंतूण पडिदं। एवदिओ अभवसिद्धियरासी। तदो एगरूवे अवणीदे जादं उक्कस्सपरित्ताणंतयं। (ति. प. ४, पृ. १८२-८३)।

परीतानन्त जघन्य, अजघन्य-अनुत्कृष्ट और उत्कृष्ट के भेद से तीन प्रकार का है। जघन्य परीतानन्त का विरलन कर एक एक अंक के प्रति जघन्य परीतानन्त को देकर परस्पर गुणा करने पर जघन्य युक्तानन्त होता है। उसमें एक अंक कम कर देने पर उत्कृष्ट परीतानन्त होता है। अभव्य जीवराशि जघन्य युक्तानन्त प्रमाण है।

परीवर्त—परीवर्तः आम्नायः परिपाटिगणस्वाध्यायः। (प्रायश्चित्तस. टी. ७-२३)।

उच्चारण की शुद्धिपूर्वक आचार्य-परम्परागत परिपाटी के अनुसार स्वाध्याय करने को परीवर्त या आम्नाय नामक स्वाध्याय कहते हैं।

परीषहजय—तेषां क्षुधादिवेदनानां तीव्रोदयेऽपि सुख-दुःख-जीवित-मरण-लाभालाभ-निन्दा-प्रशंसादिसमतारूपपरमसामायिकेन नवतरशुभाशुभकर्मसंवरणचिरन्तनशुभाशुभकर्मनिर्जरणसमर्थेनायं निजपरमात्मभावनासंजातनिर्विकारनित्यानन्दलक्षणसुखामृतसंवित्तेरचलनं स परीषहजयः। (बृ. द्रव्यसं. टी. ३५)।

भूख प्यास आदि की तीव्र वेदना के उदित होने पर भी सुख-दुःख, जीवन-मरण, लाभ-अलाभ और निन्दा-प्रशंसा आदि में अतिशय समभावी बनकर नवीन कर्मों का संवर और पुरातन कर्मों की निर्जरा करते हुए निजात्मस्वरूप की भावनाजनित निर्विकार नित्यानन्दस्वरूप स्वानुभूति से चलायमान नहीं होने को परीषहजय कहते हैं।

परुष—परुषं रूक्षं स्नेहरहितं (निष्ठुरं) परपीडाकारि। (त. भा. सिद्ध. वृ. ६-६, पृ. १६६)।

जो वचन रूखा व स्नेह से रहित (निष्ठुर) होता हुआ दूसरे जीवों को कष्ट पहुंचाने वाला हो उसे परुष वचन कहा जाता है।

परुषदोष—खड्डे थेरे सेढे असंबुड्ढे दट्ठ कुणड वा

परस्सं। अयकारेण भणेज्जो भणिज्ज वा तेहिं परुसेण। (भ. आ. ३८८)।

स्वगण में रहते हुए आचार्य के द्वारा क्षुद्र, स्थविर (वृद्ध), मार्ग से अनभिज्ञ और संयम से हीन साधुओं को देखकर ममत्वबुद्धि से कठोर वचन बोला जा सकता है तथा वे भी कठोर वचन का व्यवहार कर सकते हैं। इस प्रकार अपने संघ में रहते हुए आचार्य के समाधि का विरोधी यह पक्षपातदोष सम्भव है, इसलिए आचार्य आराधना के लिए स्वगण को छोड़कर परगण में जाना ठीक मानते हैं।

परोक्ष—१. जं परदो विण्णाणं तं तु परोक्खं ति भणिदमट्ठेसु। (प्रव. सा. १–५८)। २. आद्ये परोक्षम्। (त. सू. १–११)। ३. कुतोऽस्य परोक्षत्वम्? परायत्तत्वात्। ××× अतः पराणि इन्द्रियाणि मनश्च प्रकाशोपदेशादि च बाह्यनिमित्तं प्रतीत्य तदावरणकर्मक्षयोपशमापेक्षस्यात्मनो मतिश्रुतम् उत्पद्यमानं परोक्षमित्याख्यायते। (स. सि. १–११)। ४. परतो पुण अक्खस्सा वट्टंतं होइ पारुक्खं॥ (बृहत्क. २५); जं परतो आयत्तं तं परोक्खं हवइ सव्वं॥ (बृहत्क. २९)। ५. अक्खस्स पोग्गलकया जं दव्विन्दिय-मणा परा तेणं। तेहिंतो जं नाणं परोक्खमिह तमणुमाणं वा॥ (विशेषा. ९०)। ६. अक्खा इंदिय-मणा परा, तेसु जं णाणं तं परोक्खं, मति-श्रुते परोक्षमात्मनः परनिमित्तत्वात् अनुमानवत्। (नन्दी. चू. पृ. २२-२३)। ७. उपात्तानुपात्तपराधान्याद्वगमः परोक्षम्। उपत्तानुपात्तानीन्द्रियाणि मनश्च, अनुपात्तं प्रकाशोपदेशादि परः (धव. 'परः' नास्ति), तत्प्राधान्यादवगमः परोक्षम्। यथा गतिशक्त्युपेतस्यापि स्वयमेव गन्तुमसमर्थस्य यष्ट्यालम्बनप्राधान्यं गमनं तथा मति-श्रुतावरणक्षयोपशमे सति ज्ञस्वभावस्यात्मनः स्वयमेवार्थानुपलब्धुमसमर्थस्य पूर्वोक्तप्रत्ययप्रधानं ज्ञानं परायत्तत्वात्तदुभयं (धव. 'तदुभयं' नास्ति) परोक्षमित्युच्यते। (त. भा. १, ११, ६; धव. पु. ९, पृ. १४३-४४)। ८. परोक्षं शेषविज्ञानम् ××× ॥ (लघीय. ३); इतरस्य (अविशदनिर्भासिनः) ज्ञानस्य परोक्षता। (लघीय. स्वो. विवृ. ३)। ९. परोक्षं प्रत्यभिज्ञादि ××× ॥ (प्रमाणसं. २); व्यपेक्षातः तद्विधिकरणादि परापेक्षं परोक्षम्। (प्रमाणसं. स्वो. विव. ८७)। १०. परोक्षं पुद्गलमयेभ्य इन्द्रिय-मनोभ्यो यज्ज्ञानं रूपादिपदार्थपरिच्छेदनम्। (विशेषा. बृ. ९०, पृ. ४१)। ११. परैः इन्द्रियैरक्षा—सम्बन्धनं यस्य ज्ञानस्य तत्परोक्षम् इन्द्रियादिनिमित्तमित्यादिः। (त. भा. हरि. वृ. १–१०); इन्द्रिय-मनोनिमित्तं विज्ञानं परोक्षम्। (त. भा. हरि. वृ. १–११)। १२. अक्षस्य आत्मनः द्रव्येन्द्रियाणि द्रव्यमनश्च पुद्गलमयत्वात् पराणि वर्तन्ते, पृथगित्यर्थः, तेभ्योऽक्षस्य यत् ज्ञानमुत्पद्यते तत्परोक्षम्, परनिमित्तत्वाद् धूमादिज्ञानवत्, अथवा परैरक्षा—सम्बन्धनं विषयविषयीभावलक्षणमस्येति परोक्षम्। (नन्दी. हरि. वृ. पृ. २७)। १३. ××× इतरज्ज्ञेयं परोक्षं ग्रहणेक्षया॥ (बृहद्द्र. ५६, पृ. २२३)। १४. ×× × पराणीन्द्रियाणि आलोकादिश्च, परेषामायत्तं ज्ञानं परोक्षम्। (धव. पु. १३, पृ. २१२)। १५. अक्षेभ्यो हि परावृत्तं परोक्षं श्रुतमिष्यते। (त. श्लो. १, ११, ७)। १६. परोक्षस्यावैशद्यं स्वरूपम्। (अष्टस. १५, पृ. १३२)। १७. परोक्षमविशदज्ञानात्मकम्। (प्रमाणप. पृ. ६९)। १८. पराणि च निर्माणाङ्गोपाङ्गोदयनिवृत्त्युपकरणरूपाणीन्द्रियाणि, मनश्च मनोवर्गणापरिणतिरूपं द्रव्येन्द्रियं परम्, तेभ्यो यदुपजायते ज्ञानं तन्निमित्तजं तत्परोक्षमुच्यते धूमादग्निज्ञानवत्। (त. भा. सिद्ध. वृ. १–६)। १९. समुपात्तानुपात्तस्य प्राधान्येन परस्य यत्। पदार्थानां परिज्ञानं तत् परोक्षमुदाहृतम्। (त. सा. १–१६)। २०. यत्तु खलु परद्रव्यभूतादन्तःकरणादिन्द्रियात् परोपदेशादुपलब्धेः संस्कारादालोकादेर्वा निमित्ततामुपगतात् स्वविषयमुपगतस्यार्थस्य परिच्छेदनं तत् परतः प्रादुर्भवत् परोक्षमित्यालक्ष्यते। (प्रव. सा, अमृत. १–५८)। २१. तस्मादन्तरङ्गमलविश्लेषविशेषोदयनिबन्धनः कश्चिदस्पष्टत्वापरनामा स्वानुभववेद्यः प्रतिभासविशेष एव, तस्य परोक्षत्वम्। (प्रमाणनि. पृ. ३३)। २२. प्रतिपादितविशदस्वरूपविज्ञानाद्यदन्यदविशदस्वरूपं विज्ञानं तत्परोक्षम्। (प्र. क. मा. ३–१)। २३. अविशदमविसंवादि ज्ञानं परोक्षम्। (सन्मति. अभय. वृ. २–१, पृ. ५६५; बृहद्द्र. स. वृ. ५५, पृ. २०६)। २४. परेभ्यः—अक्षापेक्षया पुद्गलमयत्वेन द्रव्येन्द्रिय-मनोभ्योऽक्षस्य जीवस्य यत्तत्परोक्षं निरुक्तवशादिति। आह च—अक्खस्स पोग्गलकया जं दव्विंदिय-मणा परा तेण। तेहिंतो जं नाणं परोक्खमिह तमणुमाणं व॥

(स्थाना. अभय. वृ. २, १, ७१)। २५. अस्पष्टं परोक्षम् ×××। (प्र. न. त. ३-१)। २६. इन्द्रिय-मन परोपदेशावलोकादिनिमित्तसमुत्तार्थं च ज्ञानावरणीयक्षयोपशमजनितार्थग्रहणशक्तिरूपाया उपलब्धेरर्थविधारणरूपसंस्काराच्चान्तरंगकारणभूतात् सकाशादुत्पद्यते यद्विज्ञानं तत्पराधीनत्वात्परोक्षमित्युच्यते। (प्रव. सा. अय. वृ. १-५८)। २७. अक्षेभ्यः परतो वर्तते इति परेणेन्द्रियादिना योक्ष्यत इति परोक्षम्। (प्रमाणमी. स्वो. वृ, १, १, १०); अविशदः परोक्षम्। (प्रमाणमी. १, २, १)। २८. द्रव्येन्द्रिय-मनांसि पुद्गलमयत्वात्परााणि, तेभ्यः पुनरक्षस्य वर्तमानं ज्ञानं भवति परोक्षम्। किमुक्तं भवति? यदिन्द्रियद्वारेण मनोद्वारेण वा ऽऽत्मनो ज्ञानमुपजायते तत्परोक्षम्। ××× यदि वा परैर्द्रव्येन्द्रिय-मनोभिरक्षसम्बन्धो यस्मिंस्तत्परोक्षमिति व्युत्पत्तिः। (बृहत्क. मलय. वृ. २५)। २९. 'अशूङ् व्याप्तौ' अश्नुते—ज्ञानात्मना सर्वानर्थान् व्याप्नोतीत्यक्ष, यदि वा 'अशू भोजने' अश्नाति—सर्वानर्थान् यथायोगं भुङ्क्ते पालयति वेत्यक्षो जीवः, उभयत्रापि 'मावावद्यमिकमिहनिकव्यशी' त्यादिना उणादिकसप्रत्ययः, अक्षस्य—आत्मनो द्रव्येन्द्रियाणि द्रव्यमनश्च पुद्गलमयत्वात् पराणि वर्तन्ते, पृथग्वर्तन्त इति भावः, तेभ्यो यदक्षस्य ज्ञानमुदयते तत्परोक्षम्, 'पृषोदरादयः' इति रूपनिष्पत्तिः, अथवा परैः इन्द्रियादिभिः सह उक्षा सम्बन्धो विषय-विषयिभावलक्षणो यस्मिन् ज्ञाने, न तु साक्षादात्मना, तत्परोक्षं धूमादग्निज्ञानवत्। ××× उक्तं च—अक्खस्स पोग्गलमया जं दव्वेंदियमणा परा होंति। तेहिंतो जं नाणं परोक्खमिह तमणुमाणं व॥ (आव. नि. मलय. वृ. १, पृ. १३)। ३०. उपात्तानुपात्तपरप्रत्ययापेक्ष परोक्षम्। (गो. जी. मं. प्र. व जी प्र. टी. ३६९)। ३१. शेषमवितथं ज्ञानं स्मृति-प्रत्यभिज्ञान-तर्कानुमानागमभेदभिन्नं परोक्षम्। (लघीय. अभय. वृ, पृ. १२)। ३२. अविशदप्रतिभासं परोक्षम्। (न्यायदी. पृ. ५१)। ३३. अक्षाणां परम्—अक्षव्यापारनिरपेक्षं मनोव्यापारेणासाक्षादर्थपरिच्छेदकं परोक्षमिति परशब्दसमानार्थेन 'परस्' शब्देन सिद्धम्। (बृहद्र. त. गु. वृ. ५५, पृ. २०४-५)। ३४. ××× मति-श्रुतज्ञानावरणक्षयोपशमश्च परमुच्यते, तत्परं बाह्यनिमित्तमपेक्ष्य अक्षस्यात्मनः उत्पद्यते यत् ज्ञानद्वयं तत्परोक्षम्। (त. वृत्ति श्रुत. ११-१)। ३५. ज्ञानस्यापि परोक्षस्यावैशद्यस्वरूपम्। (त. वृत्ति. पृ. ४७)। ३६. अक्षेभ्योऽक्षाद्वा परतो वर्तत इति परोक्षम्, अस्पष्टं ज्ञानमित्यर्थः। (जैनत. पृ. ११४)।

१ जो पर से—इन्द्रिय, मन, परोपदेश एवं प्रकाश आदि के निमित्त से—पदार्थ का ज्ञान होता है उसे परोक्ष कहा जाता है। ४ अक्ष अर्थात् जीव के जो पर से—इन्द्रिय व मन के द्वारा—वर्तमान ज्ञान उत्पन्न होता है वह परोक्ष कहलाता है। ५ अक्ष (जीव) की द्रव्य इन्द्रियां व मन चूंकि पुद्गलकृत हैं, अतएव वे पर हैं—उनसे भिन्न हैं, उनसे जो ज्ञान होता है वह परोक्ष कहलाता है। जैसे—अनुमान ज्ञान।

परोक्ष-उपचारविनय—१. परोक्षेष्वप्याचार्यादिष्वंजलिक्रिया-गुणसंकीर्तनानुस्मरणाज्ञानुष्ठायित्वादिः काय-वाङ्मनोभिरवगन्तव्यः, राग-प्रहसन-विस्मरणैरपि न कस्यापि पृष्ठमांसभक्षणं करणीयमेवमादिः परोक्षोपचारविनयः प्रत्येतव्यः। (आ. सा. पृ. ६५-६६)। २. ××× गुरुणा विणा वि आणाए। अणुवट्टिज्जए जं तं परोक्खविणओ त्ति विण्णेओ॥ (वसु. श्रा. ३३१)। ३. ज्ञान-विज्ञान-सत्कीर्तिनंतिराज्ञानुवर्तनम्। परोक्षे गणनाथानां परोक्षप्रश्रयः परः॥ (आचा. सा. ६-८२)।

१ परोक्ष में अर्थात् आचार्यादि के सम्मुख न होने पर भी काय, वचन व मन से क्रमशः उन्हें हाथ जोड़ नमस्कार करने, गुणगान करने और उनकी आज्ञानुसार चलने को परोक्ष उपचारविनय कहते हैं।

परोक्षदृष्टि—पुव्वुत्तसयलदव्वं णाणागुण-पज्जएण संजुत्तं। जो ण य पेच्छदि सम्मं परोक्खदिट्ठी हवे तस्स॥ (नि. सा. १६७)।

जो अनेक गुणों और पर्यायों से संयुक्त मूर्त-अमूर्त एवं चेतन-अचेतन सब द्रव्यों को भले प्रकार (अथवा एक साथ) नहीं देखता है उसे परोक्षदृष्टि जानना चाहिए।

परोक्षाभास—वैशद्येऽपि परोक्षं तदाभासं मीमांसकस्य करणज्ञानवत्। (परीक्षा. ६-७)।

विशद प्रतिभास के होने पर भी उसे परोक्ष जानना

इसे परोक्षज्ञान कहा जाता है। जैसे—धूमादिक के द्वारा करणज्ञान।

परोपरोधाकरण—१. परेषामुपरोधाकरणम्। (त. सि. ७–६; त. वा. ७–६)। २. स्वामित्वेन वसत्यादि परैः स्यादुपरुन्धितम्। परोपरोधाकरणमाहुः सूत्रविशारदाः॥ तत्स्वामिनमनापृच्छ्य स्थातव्यं न गृहिव्रतैः। स्थातव्यं च तमापृच्छ्य दीयमानं तदाज्ञया॥ (लाटीसं. ६, ४१–४२)।

१ दूसरों के ठहरने में बाधक न होना, अथवा दूसरों से ठहरने का आग्रह न करना, यह परोपरोधाकरण नाम की अचौर्यव्रत की भावना है। २ जो वसति (स्थान) आदि स्वामीरूप से दूसरों के द्वारा रोकी गई है, अणुव्रती श्रावक वहां स्वामी से पूछ कर ठहर सकते हैं, उसकी आज्ञा के बिना वहां न ठहरना, यह परोपरोधाकरण भावना है।

पर्यङ्कासन— १. स्याज्जंघयोरधोभागे पादोपरि कृते सति। पर्यंको नाभिगोत्तानदक्षिणोत्तरपाणिकः॥ (योगशा. ४–१२५)। २. वामान्तर्गुल्फवामस्य गुल्फो बाह्यः स्थितस्तयोः। पादयोरुरुमूलस्थं पल्यङ्के पाणियुग्मकम्॥ गुल्फस्थोत्तानवामस्थोत्तानावामकरः समः। पल्यङ्केऽऽसने स्याच्चेत् कायोत्सर्गः सुसौष्ठवः॥ (आचा. सा. ६, ८५–८६)। ३. ×××उत्तराधरे। ते पर्यङ्कासनं ××××॥ (अन. ध. ८–८३)। ४. अन्तर्दक्षिणजंघोर्वोर्विमार्ष्टि यत्र निक्षिपेत्। दक्षिणं वामजंघोर्वोस्तत्पर्यंकासनं मतम्। (चैत्यवन्दन भा. वृ. १२ उद्.)।

१ दोनों जांघों के नीचे के भाग को पांवों के ऊपर करके नाभि के पास वाम हथेली के ऊपर दक्षिण हथेली के रखने पर पर्यंकासन होता है।

पर्याप्त, पर्याप्तक—१. षड्भिराहारादिपर्याप्तिभिर्ये पर्याप्तास्ते पर्याप्तकाः। (आव. नि. हरि. वृ. १५)। २. पर्याप्तकर्मोदयवन्तः पर्याप्ताः। (धव. पु. १, पृ. २५३–५४); पर्याप्तनामकर्मोदय-जनितशक्त्याविर्भावितवृत्तयः पर्याप्ताः। (धव. पु. १, पृ. २६७); पज्जत्तणामकम्मोदयवंतो जीवा पज्जत्ता। (धव. पु. ३, पृ. ३३१); पज्जत्तणामकम्मोदयं पडुच्च पज्जत्ता। (धव. पु. ६, पृ. ४१६)। ३. स्वजात्युचितपर्याप्तिलब्धियोग्याः पर्याप्तकाः। (पंचसं. स्वो. वृ. १–६)। ४. पर्याप्तनामकर्मोदयतः पर्याप्ताः ये (पृथिव्यादयः) हि यतस्ताः स्वपर्याप्तीः पूरयन्तीति। एताः (आहारादयः) पर्याप्तयः पर्याप्तनामकर्मोदयेन निर्मीयन्ते, तद् येषामस्ति ते पर्याप्तकाः। (स्थाना. अभय. वृ. २, १, ७३)। ५. पर्याप्तयो विद्यन्ते येषां ते पर्याप्ताः। (पंचसं. मलय. वृ. १–५; कर्मवि. दे. स्वो. वृ. ४८; बृहच्छति दे. स्वो. वृ. २, पृ. ११७)। ६. शरीरपर्याप्त्या पर्याप्ताः, मतान्तरेण सर्वस्वयोग्यपर्याप्तिपर्याप्ताः। (बृहत्सं. मलय. वृ. २००)। ७. पर्याप्तनामकर्मण उदये सति जीवः निज-निजपर्याप्तिभिः स्व-स्वयोग्यपर्याप्तिभिः, निष्ठितः निष्पन्नः पर्याप्तो भवति। शरीरपर्याप्तिनिष्पत्तिसमयादारभ्य इन्द्रियानपान-भाषा-मनःपर्याप्तीनां निष्पत्यभावेऽपि जीवः पर्याप्तक एव। (गो. जी. जी. प्र. १२१)। ८. पर्याप्तयः स्वयोग्या यैः सकलाः साधिताः सुखम्। पर्याप्तनामकर्मानुभावात् पर्याप्तकास्तु ते॥ (लोकप्र. ३–८)।

१ जो जीव आहारादि छह पर्याप्तियों से परिपूर्ण हो चुके हैं वे पर्याप्त या पर्याप्तक कहलाते हैं। २ जो पर्याप्तनामकर्म के उदय से युक्त हैं उन्हें पर्याप्त कहा जाता है। ३ जो अपनी जाति के योग्य पर्याप्तियों की प्राप्ति के योग्य हैं उन्हें पर्याप्तक जानना चाहिए।

पर्याप्तनाम, पर्याप्तकनाम— देखो पर्याप्तिनाम। १. पर्याप्तकनाम यदुदयादिन्द्रियादिनिष्पत्तिर्भवति। (श्रा. प्र. टी. २२)। २. जस्स कम्मस्स उदएण जीवो पज्जत्तो होदि तस्स कम्मस्स पज्जत्तेत्ति सण्णा। (धव. पु. ६, पृ. ६२); जस्स कम्मस्सुदएण जीवा पज्जत्ता होंति तं कम्मं पज्जत्तं णाम। (धव. पु. १३, पृ. ३६५)। ३. एता यथास्वमेकेन्द्रियविकलेन्द्रिय-संज्ञिपंचेन्द्रियाणां चतुष्पंच-षट्संख्याः पर्याप्तयो यस्योदयाद् भवन्ति तत्पर्याप्तकं नाम। तद्विपाकवेद्यं कर्मापि पर्याप्तकनाम। (अतक. मल. हेम. वृ. ३८, पृ. ५०; कर्मस्त. गो. वृ. ६–१०, पृ. ८७)। ४. यदुदये जीवः स्वपर्याप्तिभिः पर्याप्तः परिपूर्णो भवति तत्पर्याप्तनाम। (कर्मवि. ग. पू. आ. ७३)। ५. पर्याप्तकनाम यदुदयात् सर्वपर्याप्तिनिष्पत्तिर्भवति। (कर्मस्त. मलय. वृ. ३१६)। ६. पर्याप्तकनाम यदुदयात् स्वयोग्यपर्याप्तिनिर्वर्तनसमर्थो

भवति। (प्रज्ञाप. मलय. वृ. २१–२६३, पृ. ४७४; पंचसं. मलय. वृ. ३–८; सप्ततिः. मलय. वृ. ६; प्रव. सारो. वृ. १२७२; कर्मप्र. बंधो. वृ. १, पृ. ७)। ७. यदुदयात् स्वपर्याप्तियुक्ता भवन्ति जीवास्तत्पर्याप्तनाम। (कर्मवि. दे. स्वो. वृ. ४८)।

१ जिसके उदय से इन्द्रिय आदि की उत्पत्ति होती है उसे पर्याप्तक नामकर्म कहते हैं। २ जिस कर्म के उदय से जीव पर्याप्त होता है वह पर्याप्त नामकर्म कहलाता है। ३ जिसके उदय से एकेन्द्रिय, विकलेन्द्रिय और संज्ञी पंचेन्द्रिय जीवों के यथायोग्य चार, पांच और छह पर्याप्तियां होती हैं उसे पर्याप्तक नामकर्म कहा जाता है।

पर्याप्ता भाषा—१. पर्याप्ता या एकपक्षे निक्षिप्यते सत्या वा मृषा वेति तद्व्यवहारसाधनी। (शब्दकल्प. नि. हरि. वृ. ७–२७८, पृ. २१०)। २. अवहारेउं सक्कइ पज्जत्त ×××। (भावार. १६, पृ. ७); तत्रावधारयितुं शक्यते या सा पर्याप्ता ××× तदुक्तं वाक्यशुद्धिचूर्णौ—पज्जत्तिगा णाम जा अवहारेतुं सक्कइ जहा सच्चा मोसा वा एसा पज्जत्तिगा। (भावार. टी. १६, पृ. ७)।

१ जिस भाषा का निक्षेप सत्य या असत्य में से किसी एक पक्ष में किया जाता है, व्यवहार की साधनभूत उस भाषा को पर्याप्ता भाषा कहते हैं।

पर्याप्ति—१. पर्याप्तिः क्रियापरिसमाप्तिः आत्मनः। (त. भा. ८–१२)। २. इह पर्याप्तिनाम शक्तिः, सा च पुद्गलद्रव्योपचयादुत्पद्यते। ××× तत्र पर्याप्तिः क्रियापरिसमाप्तिः। (नन्दी. हरि. वृ. पृ. ४३)। ३. आहार-शरीरेन्द्रियानापान-भाषा-मनःशक्तीनां निष्पत्तेः कारणं पर्याप्तिः। (धव. पु. १, पृ. २५६); अथवा जीवनहेतुत्वं तत्स्वमनपेक्ष्य शक्तिनिष्पत्तिमात्रं पर्याप्तिरुच्यते। (धव. पु. १, पृ. २५७)। ४. पर्याप्तिः पुद्गलरूपात्मनः कर्तुः करणविशेषः। (त. भा. सिद्ध. वृ. ८–१२)। ५. आहार-सरीरिंदिय-णिस्सासुस्सास-भास-मणसाणं। परिणइ-वावारेसु य जाओ छच्चेव सत्तीओ॥ तस्सेव कारणाणं पुग्गलखंधाण जा हु णिप्पत्ती। सा पज्जत्ती भण्णदि छब्भेया जिणवरिंदेहि॥ (कार्तिके. १३४-३५)। ६. यतो हि शरीरेन्द्रियादिनिष्पत्तिः सा पर्याप्तिः। (न्यायकु. ७६, पृ. ८५२)। ७. पर्याप्तीराहारादिकारणसम्पूर्णताः। (मूला. वृ. १२-१); पर्याप्तयः आहारादिकारणनिष्पत्तयः। (मूला. वृ. १२-२); पर्याप्तयः सम्पूर्णताहेतवः। (मूला. वृ. १२-४)। ८. इह च पर्याप्तिर्नाम शक्तिः सामर्थ्यविशेषः, सा च पुद्गलद्रव्योपचयाद् वर्तते। (स्थाना. अभय. वृ. २, १, ७१)। ९. आहार-सरीरिंदिय-उस्सास-चउ-मणोऽभिनिव्वित्ती। होइ जओ दलियाओ करणं पइ सा उ पज्जत्ती॥ (संग्रहणी. २६९)। १०. पर्याप्तिराहारादिपुद्गलदलिकग्रहण-परिणमनहेतुः पुद्गलोपचयजः शक्तिविशेषः। (कर्मस्त. गो. वृ. १०, पृ. ८७)। ११. पर्याप्तिः स्वविषयग्रहणसामर्थ्यलक्षणा। (आव. नि. मलय. वृ. ८३१ [अन्यदीया १९ प्र.] पृ. ४५१)। १२. पर्याप्तिर्नामाहारादिपुद्गलग्रहण-परिणमनहेतुरात्मनः शक्तिविशेषः। स च पुद्गलोपचयादुपजायते। किमुक्तं भवति? उत्पत्तिदेशमागतेन प्रथमं ये गृहीताः पुद्गलास्तेषां तथाऽन्येषामपि प्रतिसमयं गृह्यमाणानां तत्संपर्कतस्तद्रूपतया जातानां यः शक्तिविशेषः आहारादिपुद्गलखल-रसरूपतापादनहेतुः। यथोदरान्तर्गतानां पुद्गलविशेषाणामाहारपुद्गलखल-रसरूपतापरिणमनहेतुः। (प्रज्ञाप. मलय. वृ. १–१२; जीवाजी. मलय. वृ. १–१२; पंचसं. मलय. वृ. १-५)। १३. पर्याप्तिर्नाम पुद्गलोपचयजः पुद्गलग्रहण-परिणमनहेतुः शक्तिविशेषः। (षडशी. मलय. वृ. ३, कर्मवि. दे. स्वो. वृ. ४८, पृ. ५५; षडशी. दे. स्वो. वृ. २)। १४. पर्याप्तिराहारादिपुद्गलग्रहण-परिणमनहेतुरात्मनः शक्तिविशेषः। (सप्ततिः. मलय. वृ. ६; प्रव. सारो. वृ. १३१७; संग्रहणी. दे. वृ. २६८; विचा. स. वृ. ४३, पृ. ६)। १५. पर्याप्ता व्यपदिश्यन्ते याभिः पर्याप्तयस्तु ताः। (लोकप्र. ३-७); याऽऽहारादिपुद्गलानामादान-परिणामयोः। जन्तोः पर्याप्तिनामोत्था शक्तिः पर्याप्तिरत्र सा॥ (लोकप्र. ३–१५)।

१ अपनी क्रिया की समाप्ति का नाम पर्याप्ति है। २ पर्याप्ति उस शक्ति का नाम है जो पुद्गलद्रव्य के उपचय से उत्पन्न होती है। ३ आहार, शरीर, इन्द्रिय, आनपान, भाषा और मन की शक्तियों की उत्पत्ति का जो कारण है उसे पर्याप्ति कहते हैं। अथवा इन्द्रियादि में स्थित जीवनहेतुता की अपेक्षा न करके शक्ति की निष्पत्तिमात्र को पर्याप्ति जानना चाहिए।

पर्याप्तिनामकर्म—देखो पर्याप्तिनाम। १. यदुदयादाहारादिपर्याप्तिनिर्वृत्तिः तत्पर्याप्तिनाम। (त. सि. ८-११; त. श्लो. ८-११; मूला. वृ. १२-१६५)। २. पर्याप्तिनिर्वर्तकं पर्याप्तिनाम। (त. भा. ८, १२)। ३. यदुदयादाहारादिपर्याप्तिनिर्वृत्तिस्तत्पर्याप्तिनाम। यस्योदयात् आहारादिपर्याप्तिभिरात्मा अन्तर्मुहूर्तं पर्याप्तिं प्राप्नोति तत्पर्याप्तिनाम। (त. वा. ८, ११, ३१)। ४. पर्याप्तिः पुद्गलरूपा आत्मनः कर्तुः करणविशेषः येन कर्मविशेषेणाहारादिग्रहणसामर्थ्यमात्मनो निष्पद्यते, तच्च करणं यैः पुद्गलैर्निर्वर्त्यते ते पुद्गला आत्मनात्तास्तथाविधपरिणतिभाजः पर्याप्तिशब्देनोच्यन्ते। (त. भा. हरि. व सिद्ध. वृ. ८-१२)। ५. एयासिं (पज्जत्तीणं) निप्फत्ती उदएणं जस्स होइ कम्मस्स। तं पज्जत्तं नामं इयरुदये नत्थि निप्फत्ती॥ (कर्मवि. ग. १३७)। ६. षड्विधपर्याप्तिहेतुर्यत्कर्म तत्पर्याप्तिनाम। (मूला. वृ. १२-१६६)। ७. पर्याप्तकनाम—यदुदयवशात् स्वयोग्यपर्याप्तिनिर्वर्तनसमर्थो भवति तत्पर्याप्तिनाम—आहारादिपुद्गलग्रहण-परिणमनहेतुरात्मनः शक्तिविशेषः। (प्रज्ञाप. मलय. वृ. २३-२६३, पृ. ४७४)। ८. आहारादिपर्याप्तिनिर्वर्तकं पर्याप्तास्यं नामकर्म। (भ. आ. मूला. २१२१)।

१ जिस कर्म के उदय से आहारादि पर्याप्तियों की रचना होती है उसे पर्याप्तिनामकर्म कहते हैं। २ पर्याप्तियों के उत्पादक कर्म को पर्याप्तिनामकर्म कहा जाता है।

पर्याय—१. भावान्तरं संज्ञान्तरं च पर्यायः। (त. भा. ५-३७)। २. तस्य (द्रव्यस्य) मिथो भवनं प्रति विरोध्यविरोधिनां धर्माणामुपात्तानुपात्तहेतुकानां शब्दान्तरात्मलाभनिमित्तत्वादर्पितव्यवहारविषयोऽवस्थाविशेषः पर्यायः। (त. वा. १, २६, ४); परि समन्तादायः पर्यायः। (त. वा. १, ३३, १)। ३. क्रमवर्तिनः पर्यायाः। (आव. नि. हरि. व मलय. वृ. ६७८)। ४. परि भेदमेति गच्छतीति पर्यायः। (धव. पु. १, पृ. ८४); जं पुण कमेण उप्पादट्ठिदि-भंगिल्लं सो पज्जाओ। (धव. पु. ४, पृ. ३३७)। ५. परि भेदं ऋजुसूत्रवचनविच्छेदम् एति गच्छतीति पर्यायः। (जयध. १, पृ. २१७)। ६. उत्पाद-विनाशलक्षणः पर्यायः। (त. भा. सिद्ध. वृ. ५-३०); पर्यायो भेदो विनाशलक्षणः ×××

पर्यायो हि विनाशपर्यायः, यथा प्राप्तपर्यायो देवदत्त इति। (त. भा. सिद्ध. वृ. ५-३१, पृ. ४०१); अनुगपदवस्थायिनः पर्यायः, वस्तुतः पर्याया गुणा इत्यैकात्म्यम्। (त. भा. सिद्ध. वृ. ५-३७)। ७. ××× विसेसरूवो हवेइ पज्जाओ। (कार्तिके. २४०)। ८. अनेकान्तात्मकस्य वस्तुनो ××× व्यतिरेकिणः पर्यायाः। (पंचा. का. अमृत. वृ. १०)। ९. गुणविकाराः पर्यायाः। (आलापप. पृ. १३४); क्रमवर्तिनः पर्यायाः। (आलापप. पृ. १४०); स्वभाव-विभावरूपतया याति पर्येति परिणमतीति पर्याय इति पर्यायस्य व्युत्पत्तिः। (आलापप. पृ. १४०-४१)। १०. पर्यायाः क्रमभाविनः सुख-दुःखादयः (जीवस्य), शिथकादयश्च (पुद्गलस्य)। (सिद्धिवि. वृ. ३-२०, पृ. २१३, पं. १); भेदात्मकाः पर्यायाः ××× पर्यायाः परिणामाः। (सिद्धिवि. वि. १०-१, पृ. ६६२)। ११. एकस्मिन् द्रव्ये क्रमभाविनः परिणामाः पर्याया आत्मनि हर्ष-विषादादिवत्। (परीक्षा. ४-८)। १२. क्रमभुवो विवर्ताः पर्यायाः। (न्यायकु. १-५, पृ. ११७)। १३. पर्यायाश्च क्रमभाविनः चेतनस्य सुख-दुःखादयः, अचेतनस्य कोश-कुशूलादयः। (न्यायवि. वि. १-११५, पृ. ४२८)। १४. ××× तद्विशेषास्तु पर्यायाः। (आचा. सा. ३-८); एकस्य वस्तुनो भावाः पर्यायाः क्रमभाविनः। तोष-रोषादयो भावा जीवे वा क्रमभाविनः॥ (आचा. सा. ४-६)। १५. पर्यायस्तु क्रमभावी, यथा तत्रैव सुख-दुःखादिः। (प्र. न. त. ५-८)। १६. पर्याया मृदादेरन्वयिनो द्रव्यस्य क्रमेण प्रतिक्षणभवनादिक्रियाभिसम्बन्धाः। (धर्मसं. मलय. वृ. ३३८)। १७. ये तु क्रमवृत्तयः सुख-दुःख-हर्ष-विषादादयः ते पर्यायाः। (रत्नाकरा. ५-८, पृ. ८२); पर्येत्युत्पाद-विनाशौ प्राप्नोतीति पर्यायः। (रत्नाकरा. ७-५)। १८. पर्यायः स्वाभाविक औपाधिको वा फलानां पाकपरिणामः। (बृहत्क. क्षे. वृ. ८३६)। १९. स्वभाव-विभावपर्यायरूपतया परि समन्तात् परिप्राप्नुवन्ति परिगच्छन्ति ये ते पर्यायाः। (त. वृत्ति श्रुत. ५-३८)। २०. क्रमवर्तिनो ह्यनित्या अथ च व्यतिरेकिणश्च पर्यायाः। उत्पाद-व्यय-रूपा अपि च ध्रौव्यात्मकाः कथंचिच्च॥ (पंचाध्या. १-१६५); अंशाः पर्याया इति ××× । (पंचाध्या. १-५१६)। २१. ××× पर्यायो नयगो-

चरः। (प्रमाल. ३९५)। २२. गुणविकाराः पर्यायाः। (नयप्र. पृ. ९८); पर्येति उत्पादमुत्पत्ति विपत्तिं च प्राप्नोतीति पर्यायः। ××× क्रमभाविनः पर्यायास्त्वात्मनः यथा सुख-दुःख-शोक-हर्षादयः। (नयप्र. पृ. ९९)। २३. क्रमभावी यथावद्द्रव्यभावी पर्यायः। ××× पर्यायः क्रमभावी। (द्रव्यानु. त. पृ. १२)।

१ इन्द्रत्व व शक्रत्वादि क्रियारूप भावान्तरों तथा इन्द्र व शक्र आदि संज्ञान्तरों को पर्याय कहा जाता है। २ उपात्तहेतुक—द्रव्य-क्षेत्रादि के निमित्त से होने वाले औदयिकादि भाव—तथा अनुपात्तहेतुक—स्वाभाविक चैतन्य आदि—जो धर्म एक साथ रहने में विरोधी भी हैं व अविरोधी भी हैं, उनकी विवक्षित व्यवहार की विषयभूत—व्यवहार, ऋजुसूत्र, शब्द, समभिरूढ और एवंभूत इन नयों स्वरूप—अवस्थाविशेष को पर्याय कहते हैं।

पर्यायच्छेद—तवभूमिमदिक्कंतो मूलट्ठाणं च जो ण संपत्तो। से परियायच्छेदो पायच्छित्तं समुद्दिट्ठं॥ (छेदपिण्ड २४३)।

तपोभूमि को छोड़ता हुआ जो मूल स्थान को प्राप्त नहीं होता है—पुनः दीक्षा को नहीं ग्रहण कर लेता है—उसको पर्यायच्छेद प्रायश्चित्त निर्दिष्ट किया गया है।

पर्यायज्ञान—१. खरणाभावा अक्खरं केवलणाणं, तस्स अणंतिमभागो पज्जाओ णाम मदिणाणं। तं च केवलणाणं व णिरावरणमक्खरं च। एदम्हादो सुहुमणिगोदलद्धिअक्खरादो जमुप्पज्जइ सुदणाणं तं पि पज्जाओ उच्चदि। (धव. पु. ६, पृ. २१-२२); लद्धिअक्खरे सव्वजीवरासिणा भागे हिदे लद्धं सव्वजीवरासीदो अणंतगुणं णाणाविभागपडिच्छेदेहि होदि। एदम्हि पक्खेवे लद्धिअक्खरम्हि पडिरासिदम्हि पक्खित्ते पज्जयणाणपमाणमुप्पज्जदि। (धव. पु. १३, पु. २६३)। २. पर्यायो ज्ञानस्यांशोऽविभागपलिच्छेद इत्यनर्थान्तरम्, (कर्मवि. 'शो विभागः पलिच्छेद इति पर्यायः') तत्रैको ज्ञानांशः पर्यायः, अनेके तु ज्ञानांशाः पर्यायसमासः। एतदुक्तं भवति—लब्ध्यपर्याप्तस्य सूक्ष्मनिगोदजीवस्य यत्सर्वजघन्यं श्रुतज्ञानमात्रं तस्मादन्यत्र जीवान्तरे य एकः श्रुतज्ञानांशोऽविभागपलिच्छेदरूपो वर्तते स पर्यायः। (शतक. मल. हेम. वृ. ३८, पृ. ४२; कर्मवि. वे. स्वो. वृ. ७)। ३. तत्र पर्यायो लब्ध्यपर्याप्तसूक्ष्मनिगोतस्य प्रथमसमयजातस्य प्रवृत्तं सर्वजघन्यं ज्ञानम्, तद्धि लब्ध्यक्षराभिधानमक्षरश्रुतानन्तपरिमाणत्वात् सर्वज्ञानेभ्यो जघन्यं नित्योद्घाटं निरावरणं च। न हि तावतस्तस्य कदाचनाप्यभावो भवत्यात्मनोऽप्यभावप्रसङ्गादुपयोगलक्षणत्वात्तस्य। (प्रज्ञा. म. ६-६)।

१ केवलज्ञान के समान निरावरण और अविनश्वर ऐसे सूक्ष्म निगोदजीव के लब्ध्यक्षररूप सर्वजघन्य मतिज्ञान से जो श्रुतज्ञान उत्पन्न होता है वह भी उक्त मतिज्ञान के समान पर्यायज्ञान कहलाता है। २ पर्याय, ज्ञान का अंश और अविभागप्रतिच्छेद ये समानार्थक हैं। सूक्ष्म निगोद लब्ध्यपर्याप्त जीव के जो सबसे जघन्य श्रुतज्ञान मात्र होता है उसकी अपेक्षा दूसरे जीव में जो एक अविभागप्रतिच्छेदरूप श्रुतज्ञान का अंश होता है उसे पर्यायज्ञान कहा जाता है।

पर्यायज्ञानावरणीय—पज्जयसण्णिदस्स णाणस्स जमावरणं तं पज्जयणाणावरणीयं। (धव. पु. १३, पृ. २७७)।

१ जो कर्म पर्याय नामक ज्ञान को आच्छादित करता है उसे पर्यायज्ञानावरणीय कहते हैं।

पर्यायलोक—१. दव्वगुण-खेत्तपज्जय भावाणुभावो य भावपरिणामो। जाण चउव्विहमेयं पज्जयलोगं समासेण॥ (मूला. ७-५४)। २. दव्वगुणखित्तपज्जवभवाणुभावे अ भावपरिणामे। जाण चउव्विहमेअं पज्जवलोगं समासेण॥ वण्ण-रस-गंध-संठाण-फास-ठाण-गइ-वण्णभेए अ। परिणामे ए बहुविहे पज्जवलोगं विआणाहि। (आव. भा. २०२-३, पृ. ४९६ हरि. वृ.)।

१ द्रव्यगुण, क्षेत्रपर्याय, भावानुभाव (भवानुभाव) और भावपरिणाम; इस प्रकार से पर्यायलोक संक्षेप में चार प्रकार का है। इनमें ज्ञान-दर्शन आदि तथा कृष्ण-नीलादि द्रव्यगुण अनेक हैं, सातवीं पृथिवी के प्रदेश व पूर्वापर विदेहादि को क्षेत्रपर्याय जानना चाहिए, आयु के जघन्य, मध्यम और उत्कृष्ट विकल्परूप भवानुभव है; जो भाव (परिणाम) कर्म के उपार्जन व उसकी निर्जरा का कारण होता है उसे भावपरिणाम कहा गया है। २ द्रव्य के गुणों—जैसे रूपादि, क्षेत्र की पर्यायों—

जैसे अगुरुलघु और भरतक्षेत्रादि भेद, नारक आदि भव के तीव्रतमादि दुःखों और जीवाजीवादि सम्बन्धी परिणामों रूप चार प्रकार का पर्यायलोक जानना चाहिए। इनमें से द्रव्य के गुण वर्ण, रस, गन्ध, संस्थान, स्पर्श, स्थान, गति व वर्णभेद (कृष्णादि) आदि हैं। परिणाम (चतुर्थ भेद) बहुत प्रकार के हैं। इन्हें पर्यायलोक जानना चाहिए।

पर्यायसमास—१. तदो (पज्जयणाणादो) अणंतभागब्भहियं सुदणाणं पज्जयसमासो उच्चइ। अणंतभागवड्ढी असंखेज्जभागवड्ढी संखेज्जभागवड्ढी संखेज्जगुणवड्ढी असंखेज्जगुणवड्ढी अणंतगुणवड्ढि त्ति एसा एक्का छवड्ढी। एरिसाओ असंखेज्जलोगमेत्तीओ छवड्ढीओ गंतूण पज्जयसमाससुदणाणस्स अपच्छिमो वियप्पो होदि। (धव. पु. ६, पृ. २२); पुणो पज्जयणाणे सव्वजीवरासिणा भागे हिदे जं भागलद्धं तम्मि तत्थेव पज्जयणाणे पडिरासिदे पक्खित्ते पज्जयसमासणाणमुप्पज्जदि। पुणो एदस्सुवरि भाववड्ढाणकमेण अणंतभागवड्ढि-असंखेज्जभागवड्ढि-संखेज्जभागवड्ढि-संखेज्जगुणवड्ढि-असंखेज्जगुणवड्ढि-अणंतगुणवड्ढिकमेण पज्जयसमासणाणट्ठाणाणि णिरंतरं गच्छंति जाव असंखेज्जलोगमेत्तपज्जयसमासणाणट्ठाणाणं दुचरिमट्ठाणे त्ति। पुणो एदस्सुवरि एगपक्खेवे वड्ढिदे चरिमं पज्जयसमासणाणट्ठाणं होदि। ××× णाणाविभागपडिच्छेदपक्खेवो पज्जओ णाम। तस्स समासो जेसु णाणट्ठाणेसु अत्थि तेसिं णाणट्ठाणाणं पज्जयसमासो त्ति सण्णा। (धव. पु. १३, पृ. २६३–६४)। २. अनेके तु ज्ञानांशाः पर्यायसमासः। ××× ये बुद्ध्यादयः [द्वयादयः] श्रुतज्ञानाविभागपलिच्छेदा नानाजीवेषु वृद्धा लभ्यन्ते ते समुदिताः पर्यायसमासः। (शतक. मल. हेम. वृ. ३८, पृ. ४२; कर्मवि. दे. स्वो. वृ. ७)। ३. तदेव ज्ञानमनन्तासंख्येय-संख्येयभागवृद्ध्या संख्येयासंख्येयानन्तगुणवृद्धया च वर्द्धमानमसंख्येयलोकपरिमाणं प्रागक्षरश्रुतज्ञानात् पर्यायसमासोऽभिधीयते। (अन. ध. स्वो. टी. १–६)।

१ पर्यायज्ञान की अपेक्षा अनन्तवें भाग से अधिक श्रुत ज्ञान पर्यायसमास कहलाता है। अनन्तभागवृद्धि, असंख्यातभागवृद्धि, संख्यातभागवृद्धि, संख्यातगुणवृद्धि असंख्यातगुणवृद्धि और अनन्तगुणवृद्धि ये छह वृद्धियां हैं। ऐसी छह वृद्धियों के असंख्यात लोक प्रमाण हो जाने पर उक्त पर्यायसमास ज्ञान का अन्तिम विकल्प होता है। २ सूक्ष्म निगोदजीव के सर्वजघन्य श्रुतज्ञान के आगे उसके जो दो आदि अविभागप्रतिच्छेद नाना जीवों में वृद्धिगत पाये जाते हैं वे सब पर्यायसमासज्ञान कहलाते हैं।

पर्यायसमासज्ञानावरणीय—पज्जयसमाससण्णिदस्स जमावरणं तं पज्जयसमासणाणावरणीयं। (धव. पु. १३, पृ. २७७)।

जो कर्म पर्यायसमास श्रुतज्ञान को आवृत करता है उसका नाम पर्यायसमासज्ञानावरणीय है।

पर्यायस्थविर—१, पर्यायस्थविरो यस्य दीक्षितस्य विंशत्यादीनि वर्षाणि। (योगशा. स्वो. विव. ४, ९०)। २. विंशतिवर्षपर्यायः पर्यायस्थविरः। (व्यव. भा. मलय. वृ. १०–४६)।

१ जिसे दीक्षा लिये हुए २० आदि वर्ष हो गये हैं उस साधु को पर्यायस्थविर कहते हैं।

पर्यायाम—१. ××× अविपक्करसं तु पलियामं॥ (बृहत्क. ८४०)। २. पर्यायः स्वाभाविक औपाधिको वा फलानां पाकपरिणामः, तस्मिन् प्राप्तेऽपि यदामं तत् पर्यायामम्। (बृहत्क. क्षे. वृ. ८३९); पर्यायामं पुनरविपक्वरसं फलादिकमुच्यते। (बृहत्क. क्षे. वृ. ८४०)।

२ फलों के स्वाभाविक अथवा औपाधिक (पाल में रखने रूप) पाकपरिणाम का नाम पर्याय है, उसके प्राप्त होने पर भी जो फल कच्चा बना रहता है उसे पर्यायाम कहा जाता है।

पर्यायार्थिक—देखो पर्यायास्तिक। १. पर्यायोऽर्थः प्रयोजनमस्येत्यसौ पर्यायार्थिकः। (स. सि. १–६)। २. पर्याय एवास्ति इति मतिरस्य जन्मादिभावविकारमात्रमेव भवनं न ततोऽन्यद् द्रव्यमस्ति, तद्व्यतिरेकेणानुपलब्धेरिति पर्यायास्तिकः। अथवा ××× पर्याय एवार्थो ऽस्य रूपाद्युत्क्षेपणादिलक्षणो न ततोऽन्यद् द्रव्यमिति पर्यायार्थिकः। अथवा ××× परि समन्तादायः पर्यायः, पर्याय एवार्थः कार्यमस्य न द्रव्यमतीतानागतयोर्विनष्टानुत्पन्नत्वेन व्यवहाराभावात् स एवैकः कार्य-कारणव्यपदेशभागिति पर्यायार्थिकः। अथवा ××× पर्यायोऽर्थः प्रयोजनमस्य वाग्विज्ञानव्यावृत्तिनिबन्धनव्यवहारप्रसिद्धेरिति पर्यायार्थिकः। (त. वा. १, ३३, १)। ३. परि भेदमेति गच्छतीति पर्यायः, पर्याय एवार्थः प्रयोजन-

मस्येति पर्यायार्थिकः। (ध्व. पु. १, पृ. ८४); ऋजुसूत्रवचनविच्छेदो मूलाधारो येषां नयानां ते पर्यायार्थिकाः। ××× ऋजुसूत्रवचनविच्छेदादारभ्य आ एकसमयाद् वस्तुस्थित्यध्यवसायिनः पर्यायार्थिका इति यावत्। (ध्व. पु. १, पृ. ८५); एष एव सदादिरविभागप्रतिच्छेदनपर्यन्तः संग्रहप्रस्तारः क्षणिकत्वेन विवक्षितः वाचकभेदेन च भेदमापन्नः विशेषप्रस्तारः पर्यायः, पर्यायः अर्थः प्रयोजनमस्येति पर्यायार्थिकः। (ध्व. पु. ६, पृ. १७०)। ४. जो साहेदि विसेसे बहुविहसामण्णसंजुदे सव्वे। साहणलिंगवसादो पज्जयविसओ णओ होदि। (कार्तिके. २७०)। ५. पर्याय एवार्थः प्रयोजनमस्येति पर्यायार्थिकः। (आलाप. पृ. १४५)। ६. व्यावृत्तिश्च विशेषश्च पर्यायश्चैकवाचकाः। पर्यायविषयो यस्तु स पर्यायार्थिको मतः॥ (त. सा. १–४०)। ७. तौ (द्रव्य-पर्यायौ) एव अर्थौ, तौ यथासंख्येन विद्येते ययोः तौ तथोक्तौ (द्रव्य-पर्यायार्थिकौ)। (न्यायकु. ६७, पृ. ७८५)। ८. पर्याय एवार्थो यस्यास्त्यसौ पर्यायार्थिकः। (प्र. क. मा. ६–७४, पृ. ६७६)। ९. पर्यायो विशेषो भेदो व्यतिरेकोऽपवादोऽर्थो विषयो येषां ते पर्यायार्थिका इति निरुक्तेः। (लघीय. अभय. वृ. पृ. ५१)। १०. पर्येत्युत्पाद-विनाशौ प्राप्नोतीति पर्यायः, स एवार्थः, सोऽस्ति यस्यासौ पर्यायार्थिकः। (रत्नाकरा. ७–५)। ११. पर्यायः विशेषः अपवादो व्यावृत्तिरिति यावत्, पर्यायो अर्थो विषयो यस्य स पर्यायार्थिकः। (त. वृत्ति श्रुत. १–३३)। १२. अंशाः पर्याया इति तन्मध्ये यो विवक्षितोंऽशः सः। अर्थो यस्येति मतः पर्यायार्थिकनयस्त्वनेकश्च॥ (पंचाध्या. १–५१६)। १३. प्राधान्येन पर्यायमात्रग्राही पर्यायार्थिकः। (जैनत. पृ. १२७)। १४. पर्यायमात्रग्राही पर्यायार्थिकः, अयं ह्युत्पाद-विनाश-पर्यायमात्राभ्युपगमप्रवणः। (नयर. पृ. ८०)।

१ जिस नय का प्रयोजन पर्याय है अर्थात् जो पर्याय को विषय करता है उसे पर्यायार्थिक नय कहते हैं। ३ ऋजुसूत्र नय के वचन के विच्छेद से लेकर एक समय पर्यन्त वस्तु की स्थिति का निश्चय कराने वाले नय पर्यायार्थिकनय कहलाते हैं।

पर्यायास्तिक—देखो पर्यायार्थिक। १. पर्याय एवास्ति इति मतिरस्य जन्मादिभावविकारमात्रमेव भवनं न ततोऽन्यद् द्रव्यमस्ति, तद्व्यतिरेकेणानुपलब्धेरिति पर्यायास्तिकः। (त. भा. १, ३३, १)। २. परि समन्तात् भवनम् भवः—पर्यवो विशेषः तज्ज्ञाता वक्ता वा, नयनं नयः नीतिः पर्यवनयः। अत्र छन्दभंगभयात् 'पर्यायास्तिक' इति वक्तव्ये पर्यवनयः इत्युक्तम्। तेनात्रापि पर्याय एव 'अस्ति' इति मतिरस्येति द्रव्यास्तिकवत् व्युत्पत्तिर्द्रष्टव्या। (सन्मति. अभय. वृ. ३, पृ. २७१)।

१ जिस नय की दृष्टि में केवल पर्याय ही है उसे पर्यायास्तिक नय कहा जाता है। कारण यह कि जन्मादिरूप पदार्थके विकार को छोड़कर उससे भिन्न द्रव्य है ही नहीं। २ पर्याय का जो ज्ञाता अथवा प्ररूपक है उसे पर्यायास्तिक नय कहते हैं।

पर्युषणकल्प—१. पज्जोसवणाकप्पोऽपेवं पुरिमेयराइभेएणं। उक्कोसेयरभेओ सो णवरं होइ विण्णेओ। चाउम्मासुक्कोसो सत्तरि राइंदिया जहण्णो उ। थेराण जिणाणं पुण णियमा उक्कोसओ चेव। (पंचाश. १७, ८३२–३३)। २. पज्जो समणकप्पो नाम दशमः। वर्षाकालस्य चतुर्षु मासेषु एकत्रैवावस्थानं भ्रमणत्यागः। स्थावर-जंगमजीवाकुला हि तदा क्षितिः, तदा भ्रमणे महान्संयमः, वृष्ट्या शीतवातपातेन वात्मविराधना। पतेद् वाप्यादिषु स्थाणु-कण्टकादिभिर्वा प्रच्छन्नैर्जलेन कर्दमेन वा बाध्यते इति विंशत्यधिकं दिवसशतमेकत्रावस्थानमित्ययमुत्सर्गः। कारणापेक्षया तु हीनाधिकं वावस्थानम्, संयतानाम्, आषाढशुद्धदशम्यां स्थितानामुपरिष्टाच्च कार्तिकपौर्णमास्यास्त्रिंशद्दिवसावस्थानं वृष्टिबहुलतां श्रुतग्रहणं शक्त्यभावं वैयावृत्यकरणं प्रयोजनमुद्दिश्य अवस्थानमेकत्रेति उत्कृष्टः कालः। मायां दुर्भिक्षे ग्राम-जनपदचलने वा गच्छनाशनिमित्ते समुपस्थिते देशान्तरं याति, अवस्थाने सति रत्नत्रयविराधना भविष्यतीति पौर्णमास्यामाषाढधामतिक्रान्तायां प्रतिपदादिषु दिनेषु याति यावच्च त्यक्ता विंशतिदिवसा, एतदपेक्ष्य हीनता कालस्य। एष दशमः स्थितिकल्पः। (भ. आ. विजयो. व मूला. ४२१, पृ. ६१६)।

२ वर्षाकाल के चार मासों में अन्यत्र गमन न करके एक ही स्थान में रहना, यह पर्युषण नाम का दसवां स्थितिकल्प है। अन्यत्र गमन न करने का कारण यह है कि वर्षाकाल में पृथिवी स्थावर और त्रस जीवों से व्याप्त हो जाती है, जिससे अन्यत्र जाने में प्राणिविघात होने के कारण महान् असंयम होने

जाता है, वृष्टि के साथ ठण्डी वायु के चलने से आत्मा की विराधना सम्भव है, बावड़ी आदि में पतन भी हो सकता है, जल और कीचड़ से आच्छादित ठूंठ और कांटों आदि की बाधा भी हो सकती है। इसलिए वर्षाकाल में सामान्य से एक सौ बीस (१२०) दिन एक ही स्थान पर रहने का विधान है। यह उत्सर्ग-मार्ग है। अपवाद रूप में अन्यान्य कारणों के उपस्थित होने पर उसमें हीनाधिकता भी सम्भव है। यथा—विशेष कारणवश आषाढ़ की पौर्णमासी में स्थित हुए साधु कार्तिक मास की पौर्णमासी के आगे भी तीस दिन तक एक ही स्थान में रह सकते हैं, वृष्टि की अधिकता, आगम के अभ्यास, शक्ति के अभाव और वैयावृत्य करने के प्रयोजन से अधिक भी रहा जा सकता है। यह उत्कृष्ट काल है। गच्छ के विनाश के कारणभूत मारी (प्लेग आदि संक्रामक रोग), दुर्भिक्ष, गांव व जनपद के चलने तथा गच्छनाश के अन्य कारण के उपस्थित होने पर बीच में भी देशान्तर चले जाने का विधान है। कारण यह है कि ऐसे कारणों के उपस्थित होने पर वहां रहने में रत्नत्रय की विराधना हो सकती है। पौर्णमासी के बीत जाने पर प्रतिपदा आदि दिनों में गमन किया जा सकता है।

पर्व (तिथिविशेष)—१. पर्वाणि चाष्टम्यादितिथयः पूरणात्पर्व धर्मोपचयहेतुत्वादिति। ×××आहारादिनिवृत्तिनिमित्तं धर्मपूरणं पर्वेति भावना। (भा. प्र. टी. ३२१)। २. अट्ठमी चउद्दसी पुण्णिमा य तह मावसा हवई पव्वं। मासम्मि पव्वछक्कं तिन्नि य पव्वाइं पक्खम्मि॥ (पाइयसद्दमहण्णवो—'पव्व' शब्द)।

१ 'पूरणात् पर्व' इस निरुक्ति के अनुसार धर्मसंचय की कारणभूत अष्टमी आदि विशेष तिथियों को पर्व कहते हैं। २ अष्टमी, चतुर्दशी पूर्णिमा और अमावस्या ये पर्व माने गये हैं, जो मास में छह और पक्ष में तीन होते हैं।

पर्व (कालमान)—१. पुणो एदाणि (७०५६०००००००००) एगपुव्ववस्साणि ट्ठवेदूण लक्खगुणिदेण चउरासीदिवग्गेण गुणिदे पव्वं होदि। (धव. पु. १३, पृ. ३००)। २. पूर्वाङ्गं तु [तदभ्यस्तमशीत्या चतुरग्रया॥ तत्तद्गुणं च पूर्वाङ्गं पूर्वं भवति निश्चितम्। पू[प]र्वाङ्गं तद्गुणं तच्च पूर्व-[पर्व] संज्ञं तु तद्गुणम्॥ (ह. पु. ७, २४–२५)। ३. पूर्वं चतुरशीतिघ्नं पूर्वाङ्गं[पर्वाङ्गं] परिभाष्यते। पूर्वाङ्गताडितं तत्तु पर्वाङ्गं पर्वमिष्यते॥ (म. पु. ३–२१६)। ४. पूर्वं चतुरशीतिघ्नं पर्वाङ्गं परिभाष्यते। पूर्वाङ्गताडितं तत्तु पर्वाङ्गं पर्वमिष्यते॥ (लोकवि. ५–१२८)।

१ एक पूर्व वर्षों (७०५६०००००००००) को एक लाख से गुणित चौरासी के वर्ग से गुणा करने पर पर्व का प्रमाण होता है। २ पर्वांग को पूर्वांग से गुणित करने पर पर्व का प्रमाण प्राप्त होता है।

पर्वतराजिसदृश क्रोध—तत्र पर्वतराजिसदृशो नाम। यथा प्रयोग-विस्रसा-मिश्रकाणामन्यतमेन हेतुना पर्वतराजिरुत्पन्ना नैव कदाचिदपि संरोहति, एवमिष्टवियोजनानिष्टयोजनाभिलषितालाभादीनामन्यतमेन हेतुना यस्योत्पन्नः क्रोधः आ मरणान्न व्ययं गच्छति जात्यन्तरानुबन्धी निरनुनयस्तीव्रानुशयोऽप्रत्यवमर्शश्च भवति सः पर्वतराजिसदृशः। (त. भा. ८–१०, पृ. १४४)।

जिस प्रकार पुरुष के प्रयत्न, स्वभाव और उभय इनमें से किसी एक कारण से उत्पन्न हुई पर्वत की रेखा कभी नहीं भरती इसी प्रकार इष्टवियोग, अनिष्टसंयोग और अभिलषित की अप्राप्ति आदि में से किसी एक निमित्त से जिसके क्रोध उत्पन्न हुआ है उसके वह मरण पर्यन्त नहीं छूटता, प्रत्युत परभव में भी साथ जाता है। इस प्रकार का जो क्रोध जन्मान्तर से सम्बन्ध रखता हुआ अनुनय और पश्चात्ताप से रहित होता है उसे पर्वतराजिसदृश कहा जाता है।

पर्वराहु—१. पुह पुह ससिबिंबाणि छम्मासेसु च पुण्णिमंतम्मि। छादंति पव्वराहू णियमेण गदिविसेसेहिं॥ (ति. प. ७–२१६)। २. तत्थ णं जे से पव्वराहू से जहण्णेणं छण्हं मासाणं, उक्कोसेणं बायालीसाए मासाणं चंदस्स अडतालीसाए संवच्छराणं सूरस्स। (सूर्यप्र. २०–१०५, पृ. २८८)। ३. यस्तु पर्वणि—पौर्णमास्यां अमावस्यायां वा यथाक्रमं चन्द्रस्य सूर्यस्य वा उपरागं करोति स पर्वराहुः। ××× तत्र योऽसौ पर्वराहुः स जघन्येन षण्णां मासानामुपरि चन्द्रस्य सूर्यस्य चोपरागं करोति, उत्कर्षतो द्वाचत्वारिंशतो मासानामुपरि चन्द्रस्य

अष्टाचत्वारिंशतः संवत्सराणांमुपरि सूर्यस्य । (सूर्यप्र. मलय. वृ. २०–१०४, पृ. २९०)।

१ पर्वराहु वे हैं जो छह मासों में पूर्णिमा के अन्त में अपनी गतिविशेष से चन्द्रबिम्बों को आच्छादित किया करते हैं। २ पर्वराहु वे हैं जो जघन्य से छह मासों में चन्द्र व सूर्य को तथा उत्कर्ष से ब्यालीस मासों में चन्द्र को व अड़तालीस वर्षों में—सूर्य को आच्छादित किया करते हैं।

पल—१. करिसा चत्तारि पलम् ×××। (ज्योतिष्क. १९)। २. चत्वारः कंसाः पलम्। (त. भा. ३, ३८, ३१)। ३. चत्वारः कर्षाः पलम्। (ज्योतिष्क. मलय. वृ. १९)। ४. चतुःकर्ष पलं ×××। (लोकप्र. २८–२५७)। ५. पले च दश गद्याणाः ×××। (कल्पसू. वि. वृ. ६, पृ. २१)।

१ चार कर्षों का एक पल होता है। ५ दस गद्याणों का एक पल होता है।

पलित—असंख्येययुगात्मकं पलितम्। (आव. नि. हरि. वृ. ६६३)।

असंख्यात युग प्रमाण काल को पलित या पल्य कहते हैं।

पल्य—१. प्रमाणांगुलपरिमितयोजनविष्कम्भायामावगाहानि त्रीणि पल्यानि, कुशूला इत्यर्थः। (स. सि. ३–३८; त. वा. ३, ३८, ७)। २. योजनविस्तीर्णं योजनोच्छ्रायं वृत्तं पल्यम्। (त. भा. ४–१५)। ३. विष्कम्भमानं खलु योजनं स्यात् परिक्षिपन्तं त्रिगुणाधिकं च। उत्सेधतो योजनमेव यस्य तत्पल्यमाहुर्गणितप्रधानाः॥ (वरांगच. २७–१६)। ४. तत्रायाम-विष्कम्भाभ्यामवगाहेन चोत्सेधाङ्गुलप्रमितयोजनप्रमाणः पल्यः। (बृहत्सं. मलय. वृ. ४)।

१ प्रमाणांगुल के प्रमाण से एक योजन विस्तार, आयाम और अवगाह (गहराई) वाले गोल गड्ढे को पल्य कहा जाता है। २ एक योजन विस्तृत और एक योजन ऊंचे गोल गड्ढे का नाम पल्य है।

पल्यङ्कासन—देखो पर्यंकासन।

पल्योपम—१. जं जोयणवित्थिण्णं ओगाढं जोयणं तु बालस्स। एगदिणजायगस्स उ भरियं बालग्गकोडीणं॥ वाससए वाससए एक्केक्के अवहियम्मि जो कालो। कालेण तेण एवं हवइ य पलिओवमं एक्कं॥ (पउमच. २०, ६५–६६)। २. ततो (व्यवहारपल्यात्) वर्षशते वर्षशते गते एकैकलोमापकर्षणविधिना यावता कालेन तद् रिक्तं भवेत् तावान् कालो व्यवहारपल्योपमाख्यः। तैरेव लोमच्छेदैः प्रत्येकमसंख्येयवर्षकोटीसमयमात्रछिन्नैस्तत्पूर्णमुद्धारपल्यम्। ततः समये समये एकैकस्मिन् रोमच्छेदेऽपकृष्यमाणे यावता कालेन तद् रिक्तं भवति तावान् काल उद्धारपल्योपमाख्यः। ××× पुनरुद्धारपल्योपमरोमच्छेदैर्वर्षशतसमयमात्रछिन्नैः पूर्णमद्धापल्यम्। ततः समये समये एकैकस्मिन् रोमच्छेदेऽपकृष्यमाणे यावता कालेन तद् रिक्तं भवति तावान् कालोऽद्धापल्योपमाख्यः। (स. सि. ३–३८; त. वा. ३, ३८, ८)। ३. योजनविस्तीर्णं योजनोच्छ्रायं वृत्तं पल्यमेकरात्राद्युत्कृष्टसप्तरात्रजातानामङ्गुलोम्नां गाढं पूर्णं स्याद्, वर्षशताद्वर्षशतादेकैकस्मिन्नुद्धियमाणे यावता कालेन तद्रिक्तं स्यादेतत्पल्योपमम्। (त. भा. ४–१५, पृ. २९४)। ४. जं जोयणवित्थिण्णं तं तिउणं परिरएण सविसेसं। तं चेव य उव्विद्धं (ज्योतिष्क. व त्रि. सा. 'तं जोयणमुव्विद्धं') पल्लं पलिओवमं नाम॥ (जीवस. ११८; ज्योतिष्क. ७८; त्रि. सा. ९५; बृहत्सं. मलय. वृ. ४ उद्.)। ५. उवमाणं—जं कालप्पमाणं ण सक्कइ घेत्तुं तं उवमियं भवति, धण्णपल्ल इव तेण उवमा जस्स तं पल्लोवमं भण्णति। (अनुयो. चू. पृ. ५७)। ६. धान्यपल्यवत्पल्यः, तेनोपमा यस्मिंस्तत् पल्योपमम्। (अनुयो. हरि. वृ. पृ. ८४)। ७. असंखेज्जेहि वस्सेहि पलिदोवमं होदि। (धव. पु. १३, पृ. ३००)। ८. एकाहिकं सप्तदिनानि यावज्जातस्य रोम्णां खलु बर्करस्य। अनेककल्पप्रतिखण्डितानां निरन्तरं तिन्दुसमं प्रपूर्णम्॥ पूर्णे तथा वर्षशते च तस्मादेकैकमुद्धृत्य हि लोमखण्डम्। निष्ठां प्रयाते खलु रोमराशौ पल्योपमं तं प्रवदन्ति कालम्॥ (वरांगच. २७, १७–१८)। ९. तस्स (महाजोयणस्स) पमाणे खम्मइ खाणी, परिवट्टुलिय सपरियर तिउणी। कत्तरियहि अविहायहि सुहुमूहं, सा पूरिज्जइ सिसुअविरोमहुं॥ होउ पहुच्चइ लेक्खें म गणहिं संवच्छरसइ एक्कु जि अवणहिं। जइयहुं रोमराशि सा खिज्जइ तइयहुं पलिओवमुं धुव पज्जइ॥ (म. पु. पुष्प. १, २–७, पृ. २४)। १०. पल्येन योजनप्रमाणायाम-विष्कम्भावगाहेनोपमा यस्मिन् कालप्रमाणे तत्पल्योपमम्। (बृहत्सं. मलय. वृ. ४)। ११. तत्र

धान्यपल्यवत् पल्यस्तेनोपमा यस्य कालप्रमाणस्य तत्पल्योपमम्। (संग्रहणी दे. वृ. ४)।

१ एक योजन विस्तीर्ण व गहरे गड्ढे को एक दिन के उत्पन्न बालक के बालाग्रकोटियों से भरकर सौ सौ वर्ष में एक एक बालाग्र के निकालने में जो काल लगता है उतने काल से एक पल्योपम होता है। २ व्यवहार, उद्धार और अद्धा के भेद से पल्योपम तीन प्रकार का है। उनमें एक दिन से लेकर सात दिन तक के मेढ़ेके बालाग्रों से—जिनका दूसरा खण्ड न हो सके—भरे गये गड्ढे को व्यवहार-पल्य कहा जाता है। सौ सौ वर्षों के बीतने पर इन बालाग्रों में से एक एक रोमखण्ड को निकाला जाय। इस विधि से जितने समय में वह गड्ढा खाली होता है उतने समय का नाम व्यवहारपल्योपम होता है। उक्त रोमखण्डों में से प्रत्येक को असंख्यात करोड़ वर्षों के समयों का जितना प्रमाण हो उतने प्रमाण से खण्डित करके उनसे उक्त गड्ढे को भरना चाहिये, इस प्रकार उसे उद्धारपल्य नाम से कहा जाता है। इसमें से एक एक रोमखण्ड को एक एक समय में निकालने पर वह जितने समय में खाली होता है उतने समय को उद्धारपल्योपम कहा जाता है। पश्चात् उद्धारपल्य के रोमखण्डों में से प्रत्येक को सौ वर्ष के समयों से खण्डित करके उनसे उक्त गड्ढे के भरने पर उसका नाम अद्धापल्य होता है। उसमें से एक एक समय में एक एक रोमखण्ड के निकालने पर जितने समय में वह खाली होता है उतने समय का नाम अद्धापल्योपम होता है। ३ एक योजन विस्तीर्ण और एक योजन ऊंचे गोल गड्ढे को पल्य कहा जाता है। इसको एक व अधिक से अधिक सात दिन के उत्पन्न हुए बच्चों के शरीर के रोमों से सघन रूप में भर कर उसमें से सौ सौ वर्षों में एक एक रोम के निकालने पर जितने काल में वह खाली हो जाता है उतने काल को पल्योपम नाम से कहा जाता है।

पल्लक—पल्लको नाम लाटदेशे धान्याधारविशेषः। (प्रज्ञाप. मलय. वृ. ३३–३१६)।

लाट देश में धान्य रखने के कोठे को पल्लक कहते हैं।

पवन—उष्ण-शीतश्च कृष्णश्च बहुस्तिर्यगनारतम्। षडङ्गुलप्रमाणं च वायुः पवनसंज्ञितः॥ (योगशा. ५–५०)।

जिसका स्पर्श उष्ण-शीत हो, वर्ण कृष्ण हो और जो छह अंगुल प्रमाण हो, ऐसी निरन्तर तिरछी बहने वाली वायु को पवन कहते हैं।

पशु—सरोमन्थाः पशवः। (धव. पु. १३, पृ. ३६१)।

जो तिर्यंच प्राणी रोमन्थ सहित होते हैं—घास आदि को खाकर पश्चात् चर्वण करते हैं—वे पशु कहलाते हैं।

पश्चात्संस्तव—१. पच्छा संथुदिदोसो दाणं गहिदूण तं पुणो कित्ति। विक्खादो दाणवदी तुज्झ जसो विस्सुदो वेंति॥ (मूला. ५–३७)। २. माय-पिइ-पुव्वसंथव सासू-सुसराइयाण पच्छाउ। गिहिसंथव-संबंधं करेइ पुव्वं च पच्छा वा॥ (पिंडनि. ४८५); गुणसंथवेण पच्छा संतासंतेण जो थुणिज्जहि। दायारं दिन्नंमी सो पच्छासंथवो होइ॥ (पिण्डनि. ४६२)। ३. वसनोत्तरकालं च गच्छन् प्रशंसां करोति पुनरपि वसतिं लप्स्ये इति, एवमुत्पादिता (वसतिः) संस्तव-(पश्चात्संस्तव-) दोषदुष्टा। (भ. आ. विजयो. २३०)। ४. पश्चात्संस्तुतिदोषो दानमाहारादिकं गृहीत्वा ततः पुनः पश्चादेवं कीर्तिं ब्रूते—विख्यातस्त्वं दानपतिस्त्वं तव यशो विश्रुतमिति ब्रूते यस्तस्य पश्चात्संस्तुतिदोषः, कार्पण्यादिदर्शनात्। (मूला. वृ. ६–३७)। ५. दाता ख्यातस्त्वमित्याद्यैर्यद्गेहानन्दनन्दनम्। पूर्वं पश्चात् भुक्तेस्तत् पूर्वं पश्चात्संस्तवद्वयम्॥ (आचा. सा. ८–४१)। ६. स्तुत्वा दानपतिं दानं स्मरयित्वा च गृह्णतः। गृहीत्वा स्तुवतश्च स्तः प्राक्पश्चात्संस्तवौ क्रमात्॥ (अन. ध. ५–२४)। ७. वसनोत्तरकालं गच्छन् पुनरपि वसतिं लप्स्य इति यत्प्रशंसति सा पश्चात्संस्तवदुष्टा॥ (भ. आ. मूला. २३०)। ८. भुक्तेः पश्चात् स्तवनविधानं पश्चात्स्तुतिः। (भावप्रा. टी. ६६)।

१ दान को ग्रहण करके पश्चात् 'आप प्रसिद्ध हैं, दानपति हैं, आपकी कीर्ति फैली हुई है; इस प्रकार से जो दाता की प्रशंसा की जाती है, वह पश्चात्संस्तुति (संस्तव) नामक एक उत्पादनदोष है। २ भिक्षा के लिये प्रविष्ट होता हुआ साधु गृहस्थों के साथ जो माता-पिता आदि के रूप से पूर्वसंस्तव-

सम्बन्ध (परिचयघटन) को करता है, इसे पूर्व-संस्तव कहा जाता है तथा उन्हीं के साथ पश्चात्-कालभावी सास-ससुर आदि के रूप से जो संस्तव-सम्बन्ध करता है, यह पश्चात्संस्तव कहलाता है। इस प्रकार भोजन आदि के देने पर जो साधु सत्य या असत्य गुणों के कीर्तन से दाता की प्रशंसा करता है, इसे पश्चात्संस्तव कहा जाता है (इसे यहां ४८४-९३ गाथाओं द्वारा स्पष्ट किया गया है)। ३ रहने के पश्चात् जाते समय पुनः वसति की प्राप्ति की इच्छा से जो प्रशंसा की जाती है, इसमें साधु पश्चात्संस्तव दोष का भागी होता है।

पश्चात्संस्तुति—देखो पश्चात्संस्तव।

पश्चादानुपूर्वी उपक्रम—जं उवरीदो हेट्ठा परिवाडीए उच्चदि सा पच्छाणुपुव्वी। तिस्से उदाहरणं—एस करेमि य पणमं जिणवरवसहस्स वड्ढमाणस्स। सेसाणं च जिणाणं सिवसुहकंखाविलोमेण॥ (धव. पु. १, पृ. ७३); विलोमेण परूवणा पच्छाणुपुव्वी णाम। (धव. पु. ९, पृ. १३५)।

जो प्ररूपणा ऊपर से नीचे की परिपाटी से अर्थात् विपरीत क्रम से की जाती है, इसे पश्चादानुपूर्वी उपक्रम कहा जाता है। जैसे—मैं मोक्षसुख की इच्छा से वर्धमान जिनेन्द्र को तथा शेष जिनेन्द्रों को भी नमस्कार करता हूं, यह प्ररूपणा।

पश्चिमदिशा—जत्तो अ अत्थमेइ उ अवरदिसा सा उ णायव्वा। (आचारा. नि. ४७)।

जिस दिशा में सूर्य अस्त होता है उसे पश्चिम दिशा जानना चाहिए।

पाक्षिक श्रावक—१. ×××तत्र पाक्षिकः। तद्धर्मगृह्यः ××× ॥ (सा. ध. १-२०); को-ऽसौ पाक्षिकः, किंरूपः? तद्धर्मगृह्यः—तस्य श्रावकस्य, धर्मं एकदेशहिंसादिविरतिरूपं व्रतम्, गृह्यं पक्षः प्रतिज्ञाविषयो यस्यासौ प्रारब्धदेशसंयमः, श्रावकधर्मस्वीकारपर इत्यर्थः। (सा. ध. स्वो. टी. १-२०)। २. सम्यग्दृष्टिः सातिचारमूलाणुव्रतपालकः। अर्चादिनिरतस्वग्रपदं कांक्षीह पाक्षिकः॥ (धर्मसं. श्रा. ५-४)।

१ जिसने श्रावक के एकदेशहिंसादिविरतिरूप व्रत को प्रतिज्ञा का विषय बना लिया है—उसके पालन करने में जो उद्यत हुआ है—उसे पाक्षिक श्रावक कहा जाता है।

पाक्षिकापाक्षिक—पाक्षिकापाक्षिकः यस्य एकस्मिन् पक्षे कामोदयः, न द्वितीये। (आ. वि. भू. ७५)।

मास के दो पक्षों में से जिसके एक पक्ष में काम-भाव उदित होता है, पर दूसरे पक्ष में वह उदित नहीं होता, ऐसे व्यक्ति को पाक्षिकापाक्षिक कहते हैं।

पाखण्डिमूढता—१. सग्रन्थारम्भहिंसानां संसारावर्तवर्तिनाम्। पाखण्डिनां पुरस्कारो ज्ञेयं पाखण्डिमोहनम्॥ (रत्नक. १-२४)। २. पाखण्डिमूढता दण्ड-पात्रामत्रादिसंगिषु। सन्मतिः स्वागमाभास-भ्रान्तस्वान्तान्यलिंगिषु॥ (श्रावा. सा. ३-४७)। ३. दृष्ट्वा मंत्रादिसामर्थ्यं पापिपाषण्डिचारिणाम्। उपास्तिः क्रियते तेषां सा स्यात् पाषण्डिमूढता॥ (भावसं. वाम. ४०६)। ४. सग्रन्था हिंसनारम्भ-कृतो ये भवदयगाः। तेषां भक्त्या परीष्टिर्यत् बोध्या पाखण्डमूढता॥ (धर्मसं. श्रा. ४-४२)। ५. बाह्याभ्यन्तरपरिग्रहवतां पाषण्डिनां कुगुरूणां नमस्कारादिकरणं [पाषण्डिमूढम्]। (कार्तिके. टी. ३२६)।

१ जो परिग्रह और आरम्भ से सहित होकर संसार में परिभ्रमण कराने वाले विवाहादि कार्यों में तत्पर रहते हैं ऐसे ढोंगी साधुओं का आदर-सत्कार करना, इसे पाखण्डिमूढता कहा जाता है। ३ पापी पाखण्डियों की मंत्रादिविषयक शक्ति को देखकर उनकी जो उपासना की जाती है, वह पाखण्डि-मूढता कहलाती है।

पाटकनिवसनपरिमाण—देखो नियंसण।

पाटच्चर—पाटच्चरश्चौरो वन्दिकारो वा। (नीतिवा. १४-१६)।

चोर अथवा वन्दिकार को पाटच्चर कहा जाता है।

पाठ—पठनं पाठः, पठ्यते वा तदिति पाठः, पठ्यते वा ऽनेनास्मादस्मिन्निति वा अभिधेयमिति पाठः, व्यक्तीक्रियत इति भावार्थः। (आव. नि. हरि. वृ. १३०)।

पठन मात्र क्रिया को अथवा जो कुछ पढ़ा जाता है, जिसके द्वारा पढ़ा जाता है, अथवा जिससे या जिसमें अभिधेय—प्ररूपणीय अर्थ को—स्पष्ट किया जाता है उसका नाम पाठ है। यह प्रवचन का समानार्थक नामान्तर है।

पाठक परमेष्ठी—देखो उपाध्याय। अज्झावय-गुणजुत्तो वम्मोवदेसयारि चरियट्ठो। णिस्सेसागम-कुसलो परमेट्ठी पाठओ झाओ ॥ (भावसं. दे. ३७८)।

जो अध्यापक के गुणों से युक्त होकर धर्मोपदेश को किया करता है तथा अपने अनुष्ठान में स्थित है—मुनिधर्म का पालन करता है, उसे पाठक (उपाध्याय) परमेष्ठी कहा जाता है।

पाडगणियंसण—देखो नियंसण।

पाणिजन्तुवध— ××× पाणिजन्तुवधः करे। स्वयमेत्य मृते जीवे ××× ॥ (अन. ध. ५, ५०)।

आहार ग्रहण करते समय हाथ के ऊपर स्वयं आकर किसी जीव के मर जाने पर पाणिजन्तुवध नाम का अन्तराय होता है।

पाणिपिण्डपतन— ××× ग्रासमात्रपातेऽश्नतः करात् ॥ स्यात् पाणिपिण्डपतनं ××× । (अन. ध. ५, ४९–५०)।

भोजन करते समय हाथ से ग्रास मात्र के गिर जाने पर पाणिपिण्डपतन नाम का अन्तराय होता है।

पाणिमुक्ता गति—१. पाणिमुक्तेव पाणिमुक्ता। कः उपमार्थः। यथा पाणिना तिर्यक् प्रक्षिप्तस्य द्रव्यस्य गतिरेकविग्रहा तथा संसारिणामेकविग्रहा गतिः पाणिमुक्ता द्वैसमयिकी। (त. वा. २, २८, ४)। २. यथा पाणिना तिर्यक् प्रक्षिप्तस्य द्रव्यस्य गतिरेकविग्रहा गतिः तथा संसारिणामेकविग्रहा गतिः पाणिमुक्ता द्वैसमयिकी। (धव. पु. १, पृ. २९९–३००); पाणिमुहा एयविग्गहा। (धव. पु. ४. पृ. २९)।

१ जिस प्रकार हाथ के द्वारा तिरछे फेंके गये द्रव्य की गति एक विग्रह वाली होती है, उसी प्रकार संसारी प्राणियों की जो एक विग्रह वाली गति होती है वह पाणिमुक्ता गति कहलाती है।

पाण्डित्य—पाण्डित्यं हि पदार्थानां गुण-दोषविनिश्चयः। (अमृच. ४–२०)।

पुद्गलपरावर्त—१. पुद्गलपरावर्तो नाम त्रैलोक्यगतपुद्गलानामौदारिकादिप्रकारेण ग्रहणम्। (आ. प्र. टी. ७२)। २. यदौदारिक-वैक्रिय-तैजस-भाषानापान-मनःकर्मसप्तकेन संसारोदरविवरवर्तिनः पुद्गलाः आत्मसात्परिणामिता भवन्ति तदा पुद्गलपरावर्त इति। (आचारा. शी. वृ. २, ३, ७८)।

३. ओसप्पिणी अणंता पोग्गलपरियट्टओ मुणेयव्वो। ते ऽणंता तीयद्धा अणागयद्धा अणंतगुणा। (प्रव. सारो. १६२)। ४. पुद्गलानां परमाणूनामौदारिकादिरूपतया विवक्षितैकशरीररूपतया वा सामस्त्येन परावर्तः परिणमनं यावति काले स तावान् कालः पुद्गलपरावर्तः। (पंचसं. मलय. वृ. २–३८, पृ. ७४)। ५. पुद्गलानां चतुर्दशरज्वात्मकलोकवर्तिसमस्तपरमाणूनां परावर्त औदारिकादिशरीरतया गृहीत्वा मोचनं यस्मिन् कालविशेषे स पुद्गलपरावर्तः। (शतक. दे. स्वो. वृ. ८६)।

१ तीनों लोकों में स्थित समस्त पुद्गलों को औदारिकादि शरीररूप से ग्रहण कर लेने का नाम पुद्गलपरावर्त है। २ जब संसार के मध्यगत समस्त पुद्गल औदारिक, वैक्रियिक, तैजस, भाषा, आनपान, मन और कर्म इन सात के रूप में आत्मसात् करके परिणमा लिए जाते हैं तब पुद्गलपरावर्त पूरा होता है।

पुद्गलपरिवर्तसंसार—सव्वे वि पोग्गला खलु एगे मुत्तुज्झिया हु जीवेण। असयं अणंतखुत्तो पुग्गलपरियट्टसंसारे॥ (द्वादशानु. २५; स. सि. २–१०, उद्.; धव. पु. ४, पृ. ३२६, उद्.)।

जीव ने पुद्गलपरिवर्तरूप संसार में सभी पुद्गलों को निरन्तर अनन्त बार भोगकर छोड़ा है।

पुद्गलप्रक्षेप—देखो पुद्गलक्षेप।

पुद्गलबन्ध—१. फासेहि पोग्गलाणं बंधो × × ×। (प्रव. सा. २–८५)। २. दो-तिण्णिआदिपोग्गलाणं जो समवाओ सो पोग्गलबंधो णाम। × × × जेण णिद्ध-लुक्खादिगुणेण पोग्गलाणं बंधो होदि सो पोग्गलबंधो णाम। (धव. पु. १३, पृ. ३४७)। ३. यस्तावदत्र कर्मणां स्निग्ध-रूक्षत्वस्पर्शविशेषैरेकत्वपरिणामः स केवलपुद्गलबन्धः। (प्रव. सा. अमृत. वृ. २–८५)। ४. मृत्पिण्डादिरूपेण योऽसौ बहुधा बन्धः स केवलपुद्गलबन्धः। (कार्तिके. टी. २०६)।

२ दो-तीन आदि पुद्गलों का जो समवाय होता है उसका नाम पुद्गलबन्ध है। जिस स्निग्ध व रूक्ष आदि गुण से पुद्गलों का बन्ध होता है उसे पुद्गलबन्ध कहा जाता है। ३ कर्मों का जो स्निग्ध और रूक्ष स्पर्शविशेषों के आश्रय से एकतारूप परिणमन होता है उसे केवल पुद्गलबन्ध जानना चाहिए।

पुद्गलयुति—वाएण हिंडिज्जमाणपण्णाणं व एक्कम्हि देसे पोग्गलाणं मेलणं पोग्गलजुदी णाम। (धव. पु. १३, पृ. ३४८)।

वायु से घूमने वाले वस्त्रों के समान जो पुद्गलों का एक स्थान में मिलाप होता है, इसे पुद्गलयुति कहा जाता है।

पुद्गलविपाक—पुद्गलेषु पुद्गलविषये विपाकः फलदानाभिमुख्यं पुद्गलविपाकः। (पंचसं. मलय. वृ. ३–२४, पृ. १२८)।

पुद्गलों के विषय में फल देने की अभिमुखता को पुद्गलविपाक कहते हैं।

पुद्गलविपाकिनी प्रकृति—१. आयावं संठाणं संघयण-सरीर-अंग-उज्जोयं। नामधुवोदय-उव-घायं पत्तेय-साहारं॥ उदइयभावा पोग्गलविवागिणो × × ×॥ (पंचसं. ३, २३–२४, पृ. १२८); आतपं संस्थानानि संहनन-शरीराङ्गोद्योतं नामध्रुवोदयोपघात-पराघातं प्रत्येक-साधारणम्। औदयिकभावाः पुद्गलविपाकिन्यः। (पंचसं. स्वो. वृ. ३–२४); कर्मपुद्गलद्रव्योदये यासामकर्मपुद्गलास्तथाविधपरिणामाः तद्भावे तद्भावमुपेत्योपचयहेतुत्वेन वर्तन्ते ताः पुद्गलविपाकिन्यः। (पंचसं. स्वो. वृ. ३–४६, पृ. १४३)। २. पुद्गलेषु पुद्गलविषये विपाकः फलदानाभिमुख्यं पुद्गलविपाकः, स विद्यते यासां ताः पुद्गलविपाकिन्यः। (पंचसं. मलय. वृ. ३–२४, पृ. १२८)। ३. पुद्गले पुद्गलविषये विपाकः फलदानाभिमुख्यं यासां ताः पुद्गलविपाकिन्यः। (कर्मप्र. यशो. वृ. १, पृ. १२)।

१ आतप, छह संस्थान, छह संहनन, औदारिक आदि तीन शरीर, तीन अंगोपांग, उद्योत, ध्रुवोदयी नामप्रकृतियां—निर्माण, स्थिर, अस्थिर, तैजस व कार्मण शरीर, वर्ण, गन्ध, रस, स्पर्श, अगुरुलघु, शुभ और अशुभ ये बारह; उपघात, पराघात, प्रत्येक और साधारण इन छत्तीस प्रकृतियों का विपाक चूंकि पुद्गल के विषय में है, अतएव वे पुद्गलविपाकिनी प्रकृतियां कहलाती हैं।

पुद्गलानुभाग—जर-कुट्ठक्खयादिविणासणं तदुप्पायणं च पोग्गलाणुभागो। जोणिपाहुडे भणिदमंततंतससत्तीओ पोग्गलाणुभागो त्ति घेत्तव्वो। (धव. पु. १३, पृ. ३४६)।

ज्वर, कोढ और क्षय आदि रोगों को नष्ट करना और उत्पन्न करना; यह पुद्गलानुभाग—पुद्गलों का सामर्थ्य है। योनिप्राभृत में निर्दिष्ट शंख-शंख शक्तियों को पुद्गलानुभाग जानना चाहिए।

पुनरुक्त—१. शब्दार्थयोः पुनर्वचनं पुनरुक्तम्। (आव. नि. हरि. वृ. ८८१, पृ. ३७५)। २. शब्दार्थयोः पुनर्वचनं पौनरुक्त्यमन्यत्रानुवादात्, अर्थादापन्नस्य स्वशब्देन पुनर्वचनं च। (आव. नि. मलय. वृ. ८८१, पृ. ४८३)।

१ शब्द व अर्थ के फिर से कहने का नाम पुनरुक्त है।

पुमान्—देखो पुरुष। १. प्रसूते स्वान् पर्यायान् इति पुमान्। (लघीय. स्वो. वि. ५–४७)। २. पुंवेदोदयात् सूते जनयत्यपत्यमिति पुमान्। (त. वि. २–५२; त. वा. २, ५२, १)। ३. प्रसूते जनयति स्वानात्मीयान् पर्यायानिति पुमान्। (न्यायकु. ५–४७, पृ. ६४८)। ४. कुरुते पुरुकर्माणि गर्भं रोपयते स्त्रियाम्। यतो भजति रामस्यं ज्ञेयः सद्भिस्ततः पुमान्। (पंचसं. अमित. १–२००)।

१ जो अपनी पर्यायों को—अपने जैसी सन्तान को—उत्पन्न करता है वह पुमान् (पुरुष) कहलाता है।

पुरतः अन्तगत अवधिज्ञान—१. पुरओ अंतगयं—से जहानामए केइ पुरिसे उक्कं वा चडुलिअं वा अलायं वा मणिं वा पईवं वा जोइं वा पुरओ काउं पणुल्लेमाणे २ गच्छेज्जा, से तं पुरओ अंतगयं। (नन्दी. सू. १०, पृ. ८२)। २. अयमत्र भावार्थः—स हि गच्छन् उल्काभ्यः सकासात् पुरत एव पश्यति, नान्यत्र; एवं यतोऽवधिज्ञानाद् विविधक्षयोपशमनिमित्तत्वात् देशपुरत एव पश्यति नान्यत्र; तत् पुरतोऽन्तगतमभिधीयते, इत्येतावतांशेन दृष्टान्त इत्येवं सर्वत्र योज्यम्। (नन्दी. हरि. वृ. पृ. ३२)। ३. यथा कश्चित् पुरुषो हस्तगृहीतया दीपिकया पुरतः प्रेर्यमाणया पुरत एव पश्यति, नान्यत्र; एवं येनावधिना तथाविधक्षयोपशमभावतः पुरत एव संख्येयान्यसंख्येयानि वा योजनानि पश्यति नान्यत्र सोऽवधिः पुरतोऽन्तगत इत्यभिधीयते। ××× उक्तं च नन्दध्ययनचूर्णौ—पुरतो गएणं पुरतो चेव संखेज्जाणि वा असंखेज्जाणि वा जोयणाइं जाणइ पासइ। (प्रज्ञाप. मलय. वृ. ३१७, पृ. ५३७)।

१ जिस प्रकार कोई पुरुष उल्का (दीपिका), चटुलिका (अग्र में जलती हुई घास की पूलिका), अलात (उल्मुक), मणि, प्रदीप अथवा ज्योति को आगे करके प्रेरणा करता हुआ आगे ही देखकर जाता है, इसी प्रकार जिस अवधिज्ञान से आगे के देश को ही देखता-जानता है उसे पुरतः अन्तगत अवधिज्ञान कहते हैं।

पुरस्कार—पुरस्कारः सद्भूतगुणोत्कीर्तनं वन्दनाभ्युत्थानासनप्रदानादिव्यवहारश्च। (आव. सू. हरि. वृ. पृ. ६५८; त. भा. सिद्ध. वृ. ९–९; पंचसं. मलय. वृ. ४–२३, पृ. १९०)।

विद्यमान समीचीन गुणों की प्रशंसा करना तथा वन्दना करना, उठ कर खड़े हो जाना और आसन देना; इत्यादि व्यवहार का नाम पुरस्कार है।

पुराख्यान—भरतादिषु वर्षेषु राजधानीप्ररूपणम्। पुराख्यानमितीष्टं तत् पुरातनविदां मते॥ (म. पु. ४–६)।

भरत आदि क्षेत्रों में राजधानी का वर्णन करना, इसे पुराख्यान कहा जाता है।

पुराण—१. त्रिषष्टिशलाकापुरुषाश्रिता कथा पुराणम्। (रत्नक. टी. २–२)। २. पुराणं पुराभवमष्टाभिधेयं त्रिषष्टिशलाकापुरुषकथाशास्त्रम्। यदार्षम्—लोको देशः पुरं राज्यं तीर्थं दानं तपोद्वयम्। पुराणस्याष्टधाख्येयं गतयः फलमित्यपि॥ (अन. ध. स्वो. टी. ३–९)।

१ त्रेसठ शलाकापुरुषों के आश्रित कथा का नाम पुराण है। २ उक्त शलाकापुरुषों के आश्रित कथाशास्त्र में इन आठ का वर्णन होना चाहिए—लोक, देश, पुर, राज्य, तीर्थ, दान, दोनों तप और गतिरूप फल।

पुराणस्कन्ध—त्रयः षष्टिरिहार्थाधिकाराः प्रोक्ताः महर्षिभिः। कथापुरुषसंख्यायास्तत्प्रमाणानतिक्रमात्॥ त्रिषष्ट्यवयवः सोऽयं पुराणस्कन्ध इष्यते। (म. पु. २, १२५–२६)।

महर्षियों ने पुराण में कथापुरुषसंख्या के अनुसार—यहां वर्णनीय शलाकापुरुषों की तिरेसठ संख्या के अनुसार—तिरेसठ अर्थाधिकारों का निर्देश किया है। इसीलिए वह पुराणस्कन्ध तिरेसठ अवयवों वाला—तिरेसठ अधिकारों से युक्त—माना जाता है।

पुरुष—देखो पुमान्। १. पूर्णः सुख-दुःखानामिति पुरुषः, पुरि शयनाद्वा पुरुष इति। (आव. नि. हरि.

वृ. ६७)। २. पुरुगुणेषु पुरुभोगेषु च शेते स्वपितीति पुरुषः। सुषुप्तपुरुषवदनुगतगुणोऽप्राप्तभोगश्च यदुदयाज्जीवो भवति स पुरुषः, अङ्गनाभिलाष इति यावत्। पुरुगुणं कर्म शेते करोतीति वा पुरुषः। ×××उक्तं च—पुरुगुणभोगे सेदे करेदि लोगम्मि पुरुगुणं कम्मं। पुरु उत्तमो य जम्हा तम्हा सो वण्णिदो पुरिसो॥ (धव. पु. १, पृ. ३४१); पुरुकर्मणि शेते, प्रमादयतीति पुरुषः। (धव. पु. ६, पृ. ४६)। ३. पुरौ प्रकृष्टे कर्मणि शेते प्रमादयति तानि करोतीति वा पुरुषः। (मूला. वृ. १२–१९२)। ४. पुरि शरीरे शयनात् पुरुषाः विशिष्टकर्मोदयाद्विशिष्टसंस्थानवत्शरीरवासिनः। (योगशा. स्वो. विव. ३–१२३, पृ. २१८)। ५. यस्मात् कारणात् लोके यो जीवः पुरुगुणे सम्यग्ज्ञानाद्यधिकगुणसमूहे शेते स्वामित्वेन प्रवर्तते, पुरुभोगे नरेन्द्र-नागेन्द्र-देवेन्द्राद्यधिकभोगचये भोक्तृत्वेन प्रवर्तते च। पुरुगुणवत् कर्म धर्मार्थ-काम-मोक्षलक्षणपुरुषार्थसाधनमनुष्ठानं शेते करोति च, पुरौ उत्तमे परमेष्ठिपदे च शेते तिष्ठति च, तस्मात् कारणात् स जीव पुरुष इति वर्णितः। (गो. जी. म. प्र. २७३)।

१ जो सुख-दुःखोंसे पूर्ण होता है, अथवा जो पुर् अर्थात् शरीर में सोता है वह पुरुष कहलाता है। २ जो महान् गुणों और भोगों के विषय में सोता है उसे पुरुष कहा जाता है। अभिप्राय यह है कि जिसके उदय से जीव सोते हुए पुरुष के समान गुणों से अनुगत रहता है—उनका सदुपयोग नहीं कर पाता है—और भोगों की प्राप्ति से रहित होता है उसे पुरुष कहते हैं। तात्पर्य यह कि जो स्त्रीविषयक इच्छा करता है उसे पुरुष जानना चाहिए।

पुरुषकार—देखो पुरुषार्थ।

पुरुषज्ञान—पुरुषज्ञानम्—किमयं प्रतिवादी पुरुषः सांख्यः सौगतोऽन्यो वा तथा प्रतिभादिमानितरो वेति परिभावनम्। (उत्तरा. नि. शा: वृ. ५८)।

यह प्रतिवादी पुरुष क्या सांख्य है, बौद्ध है या अन्य किसी मत का अनुयायी है तथा प्रतिभावान् है या नहीं—इत्यादि रूप से पुरुष की विशेषताओं के जानने को पुरुषज्ञान कहते हैं।

पुरुषलिंग—देखो पुमान् व पुंवेद।

पुरुषलिङ्गसिद्धकेवलज्ञान—पुरुषलिङ्गे सिद्धानां केवलज्ञानं पुरुषलिङ्गसिद्धकेवलज्ञानम्। (आव. नि. मलय. वृ. ७८, पृ. ८५)।

पुरुषलिङ्ग के रहते सिद्ध हुए जीवों के केवलज्ञान को पुरुषलिङ्गसिद्धकेवलज्ञान कहते हैं।

पुरुषवेद—देखो पुमान्। १. पुरुषस्य पुरुषवेदोदयात् स्त्र्यभिलाषः। (क. प्र. टी. १८)। २. जेसिं (कम्मक्खंधाणं) उदएण महेलियाए उवरि आकंखा उप्पज्जइ तेसिं पुरिसवेदो त्ति सण्णा। (धव. पु. ६, पृ. ४७); पुरिसवेदोदएण पुरिसवेदो। (धव. पु. ७, पृ. ७९); जस्स कम्मस्स उदएण मणुस्सस्स इत्थीसु महिलासो उप्पज्जदि तं कम्मं पुरिसवेदो णाम। (धव. पु. १३, पृ. ३६१)। ३. इत्थीए पुण उवरिं अस्सिहू उदएण रागमुप्पज्जे। सो तणदाहसमाणो होइ विवागो पुरिसवेए॥ (कर्मवि. ग. ५२)। ४. यदुदये पुंसः श्लेष्मोदयादम्लाभिलाषवत् स्त्रियामभिलाषो भवति स तृणाग्निज्वालासमानः पुंवेदः। (शतक. मल. हेम. वृ. ३८; कर्मस्त. गो. वृ. १०, पृ. ८४)। ५. पुरुषस्य वेदः पुरुषवेदः, पुरुषस्य स्त्रियं प्रत्यभिलाष इत्यर्थः, तद्विपाकवेद्यं कर्मापि पुरुषवेदः। (प्रज्ञाप. मलय. वृ. २९३)। ६. पुंसः स्त्रियामभिलाषः पुंवेदः। (जीवाजी. मलय. वृ. १३; पंचसं. मलय. वृ. १–८, पृ. ११)। ७. यदुदयाच्च पुंसः स्त्रियामभिलाषः श्लेष्मोदये अम्लद्रव्याभिलाषवत्, स तृणज्वालासमानः पुवेदः। (धर्मसं. मलय. वृ. ६१५)। ८. यदुदयवशात् पुंसः स्त्रियामभिलाषः, श्लेष्मोदयादम्लाभिलाषवत्, स पुरुषवेदः। (पंचसं. मलय. वृ. ३–५, पृ. ११३; कर्मप्र. यशो. वृ. १, पृ. ५)। ९. यत्पुनः पुंसः श्लेष्मोदयादम्लाभिलाषवत् स्त्रियामभिलाषो भवति स पुंवेदः॥ (बृहत्क. मलय. वृ. ८३१)।

१ पुरुषवेद के उदय से पुरुष के स्त्रीविषयक अभिलाषा होती है। २ जिन पुद्गल कर्मस्कन्धों के उदय से महिला (स्त्री) के ऊपर आकांक्षा उत्पन्न होती है उनका नाम पुरुषवेद है।

पुरुषवेदोत्कृष्टप्रदेशसत्कर्मस्वामी—यो गुणितकर्मांशः क्षपकः स्त्रीवेदं सर्वसंक्रमेण पुरुवेदे संक्रमयति, स पुरुषवेदस्योत्कृष्टसत्कर्मस्वामी। (पंचसं. च. स्वो. व मलय. वृ. ५–१५९)।

जो गुणितकर्मांशिक क्षपक स्त्रीवेद को सर्वसंक्रमण के द्वारा पुरुषवेद में संक्रमित करता है वह पुरुषवेद के उत्कृष्ट प्रदेशसत्कर्म का स्वामी होता है।

पुरुषार्थ—१. ×××विवरीयं तु पुरुषकारो मुणेयव्वो ॥ (उपदे. प. ३५०); अहवप्पकम्महेऊ ववसाओ होइ पुरिसगारो त्ति । (उपदे. प. ३५१) । २. विपरीतं तु यदनुद्यमं बहुना प्रयासेन परिणमति पुनस्तत्पुरुषकारो मुणितव्यः । अथवा ××× अल्पं तुच्छं कर्म दैवं पुरुषकारापेक्षया हेतुर्निमित्तं फलसिद्धौ यत्र स तथाविधो व्यवसायः पुरुषप्रयत्नो भवति पुरुषाकार इति । (उपदे. प. मु. वृ. ३५०, ३५१) ।

१ दैव से विपरीत—जिसमें बहुत प्रयत्न के द्वारा कर्म सातावेदनीय आदिरूप परिणत होता है उसे—पुरुषकार या पुरुषार्थ जानना चाहिए । अथवा फल की सिद्धि में जहां पुरुषप्रयत्न की अपेक्षा दैव की सहायता अल्प रहती है उसका नाम पुरुषार्थ समझना चाहिए ।

पुरुषार्थसिद्ध्युपाय—विपरीताभिनिवेशं निरस्य सम्यग्व्यवस्य निजतत्त्वम् । यत्तस्मादविचलनं स एव पुरुषार्थसिद्ध्युपायोऽयम् ॥ (पु. सि. १५) ।

विपरीत अभिप्राय को नष्ट करके आत्मस्वरूप का यथार्थ निश्चय करना और उससे विचलित नहीं होना, यही पुरुषार्थसिद्धि का उपाय है ।

पुरुषोत्तम—सर्वोत्तमगुणैर्युक्तं प्राप्तं सर्वोत्तमं पदम् । सर्वभूतहितो यस्मात्तेनाऽसौ पुरुषोत्तमः ॥ (आप्तस्व. ३४) ।

समस्त प्राणियों के हित का अभिलाषी होते हुए जिसने अनेक सर्वोत्कृष्ट गुणों से युक्त उत्तम पद (कैवल्य अवस्था) को प्राप्त कर लिया है उसे पुरुषोत्तम समझना चाहिए ।

पुरोहित—१. पुरोहितमुदितोदितकुलशीलं षडंगवेदे दैवे निमित्ते दण्डनीत्यामभिविनीतमापदां दैवीनां मानुषीणां च प्रतिकर्तारं कुर्वीत । (नीतिवा. ११–१, पृ. १६०) । २. पुरोहितः शान्तिकर्म्मकारी । (स्थाना. अभय. वृ. २४८; व्यव. मलय. वृ. (पी.) द्वि. वि. ३३, पृ. १२) ।

१ जिसका कुल-शील उत्तम हो तथा जो षडंग वेद, दैव (ज्योतिषशास्त्र), निमित्तशास्त्र और दण्डनीति में पारंगत होता हुआ दैविक एवं मनुष्यनिर्मित आपत्तियों का प्रतीकार करने वाला हो वह पुरोहित कहलाता है । राजा को ऐसे पुरोहित के लिए पात्र में रखना चाहिए । २ शान्तिजनक अनुष्ठान का कराने वाला पुरोहित कहलाता है ।

पुलवि—१. आवासब्भंतरे संट्ठिदाओ कच्छउडंडरक्खारंतोट्ठियपिसिविडाहि समाणाओ पुलवियाओ णाम । (धव. पु. १४, पु. ८६) । २. जंबूदीवं भरहो कोसल-साकेद-तग्घराइं वा । खंधंडर-आवासा-पुलवि-सरीराणि दिट्ठंता ॥ (गो. जी. १९४) ।

१ कच्छ उडंडर वक्षार (?) के भीतर पिसिविडों (?) के समान जो आवासों के भीतर निगोदजीवस्थान हैं उनका नाम पुलवि है । २ जिस प्रकार जम्बूद्वीप में भरतक्षेत्र, उसमें कोशलदेश, उसमें साकेत नगरी और उसमें घर हैं उसी प्रकार स्कन्ध, उनके भीतर अण्डर, उनके भीतर आवास, उनके भीतर पुलवि और उनके भीतर निगोदजीवों के शरीर होते हैं ।

पुलाक—१. उत्तरगुणभावनापेतमनसो व्रतेष्वपि क्वचित् कदाचित्पूर्णतामपरिप्राप्नुवन्तोऽविशुद्धपुलाकसादृश्यात् पुलाका इत्युच्यन्ते । (त. सि. ९–४६; आ. सा. पृ. ४५)। २. सततमप्रतिपातिनो जिनोक्तादागमान्निर्ग्रन्थपुलाकाः । (त. भा. ९–४८; ×× × पञ्चानां मूलगुणानां रात्रिभोजनविरतिषष्ठानां पराभियोगाद् बलात्कारेणान्यतमं प्रतिसेवमानः पुलाको भवति, मैथुनमित्येके । (त. भा. ९–४९, पृ. २८७)। ३. अपरिपूर्णव्रता उत्तरगुणहीना पुलाकाः । उत्तरगुणभावनापेतमनसो व्रतेष्वपि क्वचित् कदाचित् परिपूर्णतामपरिप्राप्नुवन्तः अविशुद्धपुलाकसादृश्यात् पुलाकव्यपदेशमर्हन्ति । (त. वा. ९, ४६, १) । ४. पुलाका भावनाहीना ये गुणेषूत्तरेषु ते । न्यूनाः क्वचित् कदाचिच्च पुलाकाभा व्रतेष्वपि ॥ (ह. पु. ६४–५९) । ५. अपरिपूर्णव्रता उत्तरगुणहीनाः पुलाकाः ईषद्विशुद्धिपुलाकसादृश्यात् । (त. श्लो. ९-४६)। ६. पुलाको निःसार इति प्रख्यं लोके । पलञ्जिस्तम्बुलकणशून्या पुलाकः । एवं निर्ग्रन्थोऽपि लब्धिमुत्पन्नां तपःश्रुताभ्यां हेतुभ्यामुपजीवन् सकलसंयमगलनात् पञ्जलिरूपं निःसारमात्मानं करोति । ज्ञानदर्शन-चरणानि च सारः तदपगमान्निःसारः । जिनप्रणीतादागमाद्धेतुतः सदैवाप्रतिपातिनः, आगमाच्च सम्यग्दर्शनमूलज्ञान-चरणे निर्वाणहेतू इत्यस्मादपरिभ्रष्टाः श्रद्दधाना ज्ञानानुसारेण क्रियानुष्ठायिनो लब्धिममुपजीवन्तो निर्ग्रन्थाः पुलाका भवन्ति । उप-

जीवन्तश्च निःसारतामात्मनः कुर्वन्तीति ग्राह्यम्। सततमप्रमादिन इत्यपरे पठन्ति। जिनोक्ताद्वागमाद्धेतुभूतान्मुक्तिसाधनेषु न प्रमाद्यन्ति जातुचिदिति। (त. भा. सिद्ध. वृ. ९–४८); ×××तदेवमन्यतमं मूलगुणं प्रतिसेवमानः पुलाको भवति। (त. भा. सिद्ध. वृ. ९–४९)। ७. पुलाकशब्देनासारं निःसारं धान्यं तण्डुलकणशून्यं पलञ्जिरूपं भण्यते, तेन पुलाकेन समं सदृशं यस्य साधोश्चरणं चारित्रं भवति स पुलाकः, पुलाक इव पुलाक इति कृत्वा। अयमर्थः—तपःश्रुतहेतुकायाः सङ्घादिप्रयोजने सबलवाहनस्य चक्रवर्त्यादेरपि चूर्णने समर्थाया लब्धेरुपजीवनेन ज्ञानाद्यतिचारासेवनेन वा सकलसंयमसारगलनात् पलञ्जिवन्निःसारो यः स पुलाकः। (प्रव. सारो. वृ. ७२३)। ८. उत्तरगुणभावनारहिताः क्वचित् कदाचित् कथंचिद् व्रतेष्वपि परिपूर्णत्वमलभमाना अविशुद्धपुलाकसदृशत्वात् पुलाकाः। (त. वृत्ति श्रुत. ९–४६)।

१ जिन मुनियों का मन उत्तरगुणों की भावनाओं में संलग्न नहीं है और जो व्रतों में भी कहीं व किसी समय परिपूर्णता से रहित होते हैं उन मुनियों को कण से रहित—निरुपयोगी—अशुद्ध धान्य के समान निःसार होने से पुलाक कहा जाता है। २ जो जिनप्रणीत आगम से तो पतित नहीं है—उस पर श्रद्धा रखता है, पर अहिंसादि पांच मूलगुण और छठा रात्रिभोजन व्रत इनमें से किसी एक व्रत का दूसरे की प्रेरणा से पालन करता है वह पुलाक मुनि कहलाता है।

पुल्लिङ्ग—देखो पुरुषलिङ्ग।

पुल्लिङ्गसिद्ध—पुल्लिङ्गे शरीरनिर्वृत्तिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते पुल्लिङ्गसिद्धाः। (प्रज्ञाप. मलय. वृ. ७, पृ. २२)।

जो शरीर की रचनारूप पुल्लिंग में—पुरुषशरीर में—अवस्थित रहते हुए मुक्ति को प्राप्त हुए हैं वे पुल्लिंगसिद्ध कहलाते हैं।

पुष्टि—पुष्टिः पुण्योपचयः ×××। (षोडश. ३–४)।

पुण्य के संचय को पुष्टि कहते हैं।

पुष्पचारण—१. अविराहिदूण जीवे तल्लीणे बहुविहाण पुप्फाणं। उवरिम्मि जं पसप्पदि सा रिद्धी पुप्फचारणा णाम॥ (ति. प. ४, १०३९)। २. नानाद्रुम-लता-गुल्म-पुष्पाण्युपादाय पुष्पसूक्ष्मजीवाविराधयन्तः कुसुमतलदलावलम्बनसङ्क्रमतयः (प्रव. 'कुसुमदलपटलमवलम्बमानाः') पुष्पचारणाः। (योगशा. स्वो. विव. १–९, पृ. ४१; प्रव. सारो. वृ. ६०१, पृ. १६८)। ३. पुष्पमस्पृश्य पुष्पोपरि गमनं पुष्पचारणत्वम्। (त. वृत्ति श्रुत. ३, ३६)।

१ जिस ऋद्धि के प्रभाव से साधु बहुत प्रकार के पुष्पों में स्थित जीवों की विराधना न करके उनके ऊपर से चलते हैं उसे पुष्पचारण ऋद्धि कहते हैं।

पुष्पदन्त—पुष्पकलिकामनोहरदन्तत्वात् पुष्पदन्त इति। (योगशा. स्वो. विव. ३–१२४)।

पुष्प-कलिका के समान मनोहर दांतों के धारक नौवें तीर्थंकर को पुष्पदन्त कहते हैं।

पुष्पदन्त कुम्भ—ह्रस्वोष्ठः पुष्पवन्तः। (निर्वाणक. पृ. ८)।

जिस घड़े का मुख छोटा हो वह पुष्पवन्त नामक कुम्भ कहलाता है। आचार्य के अभिषेक के समय मण्डल पर लिखे जाने वाले १६ कुम्भों में वह बारहवां है।

पुष्पोपहित—१. पुप्फोवहिदं च व्यञ्जनमध्ये पुष्पवलिरिव अवस्थितसिक्थम्। (भ. आ. विजयो. २२०)। २. पुप्पोपहितं पुष्पप्रकरवद्व्यञ्जनमध्यप्रकीर्णसिक्थम्। (भ. आ. मूला. २२०)।

पुष्पसमूह के समान व्यंजनों के मध्य में स्थित सिक्थ (धान्यकण) को पुष्पोपहित कहा जाता है।

पुंवेद—देखो पुरुषवेद। १. यस्योदयात् पौंस्नान् भावानास्कन्दति स पुंवेदः। (स. सि. ८–९; त. वा. ८, ९, ४)। २. पुरुषवेदमोहोदयात् अनेकाकारासु स्त्रीष्वभिलाषः आम्रफलाभिलाषः इवोद्रिक्तश्लेष्मणः, तथा सङ्कल्पजास्त्वपीत्यादि। (त. भा. सिद्ध. वृ. ८, १०, पृ. १४२)। ३. येषामुदयेन पुद्गलस्कन्धानां वनितायामाकांक्षा जायते तेषां पुंवेद इति संज्ञा। (मूला. वृ. १२–१९२)। ४. पुंवेदं पुंभावापत्तिनिमित्तं पुंवेदाख्यं नोकषायवेदनीयम्। (भ. आ. मूला. २०९७)। ५. यदुदयात् पुंस्त्वपरिणामान् प्राप्नोति स पुंवेदः। (त. वृत्ति श्रुत. ८–९)।

१ जिसके उदय से जीव पुरुष के भावों को प्राप्त करता है उसे पुंवेद कहते हैं। २ पुरुषवेदमोहनीय के उदय से अनेक आकार वाली स्त्रियों के विषय

में इस प्रकार अभि लाषा होती है जिस प्रकार कि कफ के उद्रेक से आम फल की अभिलाषा हुआ करती है। उक्त पुंवेद के उदय से संकल्पजात स्त्रियों के विषय में भी अभिलाषा होती है।

पूजक—१. भव्यात्मा पूजकः शान्तो वेश्यादिव्यसनोज्झितः। ब्राह्मणः क्षत्रियो वैश्यः स शूद्रो वा सुशीलवान् ॥ (भावसं. वाम. ४६५)। २. नित्यपूजाविधायी यः पूजकः स हि कथ्यते। द्वितीयः पूजकाचार्यः प्रतिष्ठादिविधानकृत् ॥ ब्राह्मणादिचतुर्वर्ण्य आद्यः शीलव्रतान्वितः। सत्य-शौच-दृढाचारो हिंसाद्यव्रतदूरगः ॥ जात्या कुलेन पूतात्मा शुचिर्बन्धु-सुहृज्जनैः। गुरूपदिष्टमंत्रेण युक्तः स्यादेष पूजकः ॥ (धर्मसं. श्रा. ९, १४२–४४)।

१ जो भव्य जीव शान्त—क्रोधादि कषायों से रहित—होकर वेश्यादि व्यसनों का त्याग कर चुका है वह पूजक—पूजा का अधिकारी होता है। वह ब्राह्मण, क्षत्रिय, वैश्य अथवा उत्तम शीलवान् शूद्र होना चाहिए।

पूजकाचार्य (प्रतिष्ठाचार्य)—इदानीं पूजकाचार्यलक्षणं प्रतिपाद्यते। ब्राह्मणः क्षत्रियो वैश्यो नानालक्षणलक्षितः ॥ कुल-जात्यादिसंशुद्धः सद्दृष्टिर्देशसंयमी। वेत्ता जिनागमस्याऽनालस्यः श्रुतबहुश्रुतः ॥ ऋजुर्वाग्मी प्रसन्नोऽपि गम्भीरो विनयान्वितः। शौचाऽऽचमनसोत्साहो दानवान् कर्मकर्मठः ॥ साङ्गोपाङ्गयुतः शुद्धो लक्ष्य-लक्षणवित् सुधीः। स्वदारी ब्रह्मचारी वा नीरोगः सत्क्रियारतः ॥ वारिमंत्रव्रतस्नातः प्रोषधव्रतधारकः। महाभिमानी मौनी च त्रिसन्ध्यं देववन्दकः ॥ श्रावकाचारपूतात्मा दीक्षाशिक्षागुणान्वितः। क्रियाषोडशभिः पूतो ब्रह्मसूत्रादिसंस्कृतः। न हीनाङ्गो नाधिकाङ्गो न प्रलम्बो न वामनः ॥ न कुरूपी न मूढात्मा न वृद्धो नातिबालकः ॥ न क्रोधादिकषायाढ्यो नार्थार्थी व्यसनी न च। न [ना]न्यास्त्रयो न तावाद्यौ श्रावकेषु न संयमी ॥ ईदृग्दोषभृदाचार्यः प्रतिष्ठां कुरुतेऽत्र चेत्। तदा राष्ट्रं पुरं राज्यं राजादिः प्रलयं व्रजेत् ॥ कर्ता फलं न चाप्नोति नैव कारयिता ध्रुवम्। ततस्तल्लक्षणश्रेष्ठः पूजकाचार्य इष्यते ॥ (धर्मसं. श्रा. ९–१४५ से १५४)।

जो ब्राह्मण, क्षत्रिय, अथवा वैश्य होकर अनेक लक्षणों से युक्त हो; कुल व जाति आदि से शुद्ध हो, सम्यग्दृष्टि होकर देशव्रती हो, जिनागम का ज्ञाता हो, आलस्य से रहित हो, बहुत श्रुत को सुन चुका हो, सरल हो, वक्ता हो, प्रसन्न होता हुआ भी गम्भीर हो, विनयशील हो; शौच व आचमन में उत्साहसहित हो, दाता हो, क्रियाशील हो, अंग-उपांगों से युक्त हो; लक्ष्य-लक्षण का जानकार हो, विवेकी हो, स्वदारसन्तोषी या ब्रह्मचारी हो, नीरोग हो, सदाचारी हो; जलस्नान से युक्त होकर मंत्र का ज्ञाता व व्रत से सहित हो; प्रोषधव्रत का धारी हो, महा अभिमानी हो—स्वाभिमानी होकर दैन्यभाव से दूर रहने वाला हो, मौन रखता हो, तीनों सन्ध्याओं में देववन्दना करने वाला हो, श्रावक के आचार का परिपालक हो, दीक्षा-शिक्षागुण से युक्त हो, सोलह क्रियाओं से पवित्र हो, ब्रह्मसूत्र (यज्ञोपवीत) आदि संस्कारों से सहित हो, न हीनांग हो और न अधिक अंग वाला हो; न लम्बा हो, न बौना हो; न कुरूप हो, न मूर्ख हो, न बुड्ढा हो, न बालक हो, क्रोधादिकषायों वाला न हो, धनार्थी न हो, व्यसनी न हो, ग्यारह श्रावकों में न अन्तिम तीन—परिग्रहत्याग प्रतिमाधारी आदि—हों, न आदि के दो (दर्शनिक व व्रती) हों; तथा संयमी (मुनि) न हो। यदि आचार्य उक्त दोषों (हीनांगादि) से दूषित होता है तो राष्ट्र, नगर, राज्य व राजा आदि का नाश हो सकता है; तथा वैसा होने पर न कर्ता ही फल को पाता है और न कराने वाला भी, इसी कारण पूजक आचार्य उपर्युक्त लक्षणों से श्रेष्ठ माना जाता है।

पूजन—देखो पूजा।

पूजा— १. पूजा च द्रव्य-भावसंकोचः, तत्र कर-शिरःपादादिसन्यासो द्रव्यसंकोचः, भावसंकोचस्तु विशुद्धस्य मनसो नियोग इति। (ललितवि. पृ. ९); पूजनं गन्ध-माल्यादिभिः समभ्यर्चनम्। (ललितवि. पृ. ७७)। २. वस्त्र-माल्यादिजन्या पूजा। (आव. नि. हरि. वृ. ९२१, पृ. ४०६)। ३. स्नान-विलेपन-सुसुगन्धिपुष्प-धूपादिभिः शुभैः कान्तम्। विभवानुसारतो यत् काले नियतं विधानेन ॥ अनुपकृतपरहितरतः शिवदस्त्रिदशेशपूजितो भगवान्। पूज्यो हितकामानामिति भक्त्या पूजनं पूजा ॥ (षोडसक. १–२)। ४. एदाहि (चरु-बलि-पुप्फ-फल-गंध-धूव-दीवादीहि) सह अइंदयय-कप्परुक्ख-महामह-सव्वदोभद्दादिमहिमाविहाणं पूजा णाम। (धव. पु.

८, पृ. ६२)। ५. पूजा च सेवाऽञ्जस्थानवान्युत्थानादिलक्षणा। (योगशा. स्वो. विव. १–५४)। १ द्रव्य और भाव के संकोच का नाम पूजा है। उसमें हाथ, शिर और पांवों आदि के संकोच को द्रव्यसंकोच और निर्मल मन के नियमन को भावसंकोच कहा जाता है। ४ चरु, बलि, पुष्प, फल, गन्ध, धूप और दीप आदि के द्वारा इन्द्रध्वज, कल्पतरु, महामह और सर्वतोभद्र आदि के माहात्म्य के विधान का नाम पूजा है।

पूज्य—१. पूज्यः शतेन्द्रवन्द्यार्हन्निर्दोषः केवली जिनः। (भावसं. वाम. ४६४)। २. पूज्योऽर्हन् केवलज्ञान-दृग्वीर्य-सुखधारकः। निःस्वेदत्वादिनैर्मल्यमुख्यकैः संयुतो गुणैः॥ (धर्मसं. श्रा. ६–३४)। २ अनन्तज्ञान, अनन्तदर्शन, अनन्तवीर्य और अनन्तसुख के धारक होकर जो निःस्वेदत्व आदि गुणों से युक्त हैं वे अरहन्त भगवान् पूज्य हैं—पूजा के योग्य हैं।

पूति, पूतिक—१. अप्पासुएण मिस्सं पासुयदव्वं तु पूदिकम्मं तं। (मूला. ६–६)। २. पूतिकर्म—संभाव्यमानाधाकर्मावयवसंमिश्रलक्षणम्। (दशवै. चू. हरि. वृ. ५–५५, पृ. १७४)। ३. आत्मनो गृहार्थमानीतैः काष्ठादिभिः सह बहुभिः श्रमणार्थमानीयाल्पेन मिश्रिता यत्र गृहे तत्पूतिकमित्युच्यते। (भ. आ. विजयो. २३०; भ. आ. मूला. २३०; कार्तिके. टी. ४४८–४६, पृ. ३३७)। ४. यदाधाकर्माऽवयवसंमिश्रं तत्पूतीकर्म। (आचारा. शी. वृ. २, १, २६६, पृ. ३४७)। ५. प्रासुकमप्यप्रासुकेन सचित्तादिना मिश्रं यदाहारादिकं पूतिदोषः। (मूला. वृ. ६–६)। ६. पूति प्रासुकपात्रादि मिश्रमप्रासुकेन यत्। मिश्रसंगे हि पाखण्डियतिभ्यो यद्वितीर्यते॥ (आचा. सा. ८–२५)। ७. आधाकर्मिकावयवसंमिश्रं शुद्धमपि यत्तत् पूतिकर्म शुचिद्रव्यमिवाशुचिद्रव्यसम्मिश्रम्। (योगशा. स्वो. १–३८)। ८. पूति प्रासु यदप्रासु मिश्रं योज्यमिदं कृतम्। नेदं वा यावदार्थेभ्यो नादायि च कल्पितम्॥ (अन. ध. ५–६)। ६. यदुद्गमकोटिदोषदुष्टसङ्गात् शुद्धमपि अपवित्रं तत्पूतिकर्म। (गु. गु. षट्. स्वो. वृ. २०, पृ. ४८)। १०. यत्प्रासुकं पात्रं कांस्यपात्रादिकं मिथ्यादृष्टिप्रातिवेशैर्मिथ्यागुर्वर्थं दत्तं तत्पात्रस्थमन्नादिकं महामुनीनामयोग्यं पूत्युच्यते। (भावप्रा. टी. ६६)।

१ अप्रासुक (सचित्त) से मिश्रित प्रासुक द्रव्य (भोज्य पदार्थ) पूतिदोष से दूषित होता है। २ यदि आधाकर्म के अवयव से मिश्रित होने की सम्भावना हो तो दिया जाने वाला वैसा अन्नादि पूतिकर्म दोष से दुष्ट होने के कारण साधुओं के लिए अग्राह्य होता है। ३ अपने गृहनिर्माण के लिए लाये गये बहुत से काष्ठ आदि के साथ साधु के लिए लाये गये काष्ठादि को मिलाकर जो घर निर्मित किया जाता है वह पूतिक दोष से युक्त होता है।

पूतिकर्मिका—पूतिकर्मिका आधाकर्मिकसुधादिना पूरितच्छिद्रा। (बृहत्क. क्षे. वृ. १७५३)। आधाकर्मयुक्त सल्लेवी आदि के द्वारा जिस सौवीरिणी (कांजी या अम्लिनी) के छेद भरे गये हैं वह पूतिकर्मिका कहलाती है।

पूरक—१. द्वादशान्तात् समाकृष्य यः समीरः प्रपूर्यते। स पूरक इति ज्ञेयो वायुविज्ञानकोविदैः॥ (ज्ञानार्णव २६–४)। २. समाकृष्य यदापानात् पूरणं स तु पूरकः। (योगशा. ५–७)। ३. द्वादशाङ्गुलपर्यन्तं समाकृष्य समीरणम्। पूरयत्यतियत्नेन पूरकध्यानयोगतः। (भावसं. वाम. ६६७)। ३ वायु को बारह अंगुल पर्यन्त खींचकर जो पूर्ण किया जाता है उसे पूरक प्राणायाम कहते हैं।

पूरिम—तलावालि-जिणहराहिट्ठाणादिदव्वं पूरणकिरियाणिप्फण्णं पूरिमं णाम। (धव. पु. ६, पृ. २७३)। पूरणक्रिया से सिद्ध तालाब के बांध और जिनालय के अधिष्ठान (नीव) आदि द्रव्य को पूरिम कहा जाता है।

पूर्णगेय—यत् स्वर-कलाभिः पूर्णं गीयते तत् पूर्णम्। (रायप. मलय. वृ. पृ. १३१; जम्बूद्वी. शा. वृ. ६, पृ. ४०)। जो स्वर-कलाओं से परिपूर्ण गान गाया जाता है उसे पूर्णगेय कहते हैं।

पूर्व—१. चउरासीतिपुव्वंगसयसहस्साइं से एगे पुव्वे। (भगवती. ६, ७, ४, पृ. ८२६; जम्बूद्वी. १८, पृ. ८६; अनुयो. सू. १३७, पृ. १७६)। २. पुव्वस्स दु परिमाणं सदरिं खलु कोडिसदसहस्साइं। छप्पण्णं च सहस्सा बोद्धव्वा वस्सकोडीणं॥ (स. सि. ३–३१, उद्.; धव. पु. १३, पृ. ३०० उद्.; जं. दी. प. १३–१२)। ३. पूर्वाङ्गशतसहस्रं

चतुरशीतिगुणितं पूर्वम्। (त. भा. ४–१५)। ४. पुव्वस्स उ परिमाणं सयरिं खलु हुंति कोडिसक्खाओ। छप्पण्णं च सहस्सा बोधव्वा वासकोडीणं॥ (बृहत्सं. ३१६, पृ. १२२; प्रव. सारो. १३८७; संग्रहणी २१८)। ५. पुव्वंगसयसहस्सा चुलसीइगुणं हवइ पुव्वं। पुव्वस्स उ परिमाणं सयरी खलु होंति सयसहस्साइं (जीवस. 'होंति कोडिलक्खाओ') छप्पण्णं च सहस्सा बोद्धव्वा वासकोडीणं॥ (ज्योतिष्क. ६२–६३; जीवस. ११२–१३)। ६. चतुरशीतिपूर्वाङ्गशतसहस्राणि पूर्वम्। (त. वा. ३, ३८, ८, पृ. २०६)। ७. तं एगं पुव्वंगं चुलसीए सतसहस्सेहिं गुणितं एगं पुव्वं भवति। (अनुयो. हरि. वृ. पृ. ५४)। ८. सत्तरिकोडिलक्ख-छप्पण्णसहस्सकोडिवरिसेहि पुव्वं होदि। (धव. पु. १३, पृ. ३००)। ९. तत्तद्गुणं च पूर्वांगं पूर्वं भवति निश्चितम्। (ह. पु. ७–२५)। १०. पूर्वाङ्गलक्षाः चतुरशीतिगुणिताः पूर्वम्। (त. भा. सिद्ध. वृ. ४, १५)। ११. पुव्वंगसदसहस्सा चुलसीदिगुणं हवे पुव्वं। (जं. दी. प. १३–११)। १२. पूर्वांगं चतुरशीतिगुणितं पूर्वं भवति, पूर्वस्य तु प्रमाणं सप्ततिकोटीशतसहस्राणि कोटीनां तु षट्पंचाशतसहस्राणि चेति। (मूला. वृ. १२–६९)। १३. वरिसाणं लक्खेहिं चुलसीसंखेहिं होइ पुव्वंगं। एयं चिय एयगुणं जायइ पुव्वं तयं तु इमं॥ (प्रव. सारो. १३८६)। १४. चतुरशीतिः पूर्वाङ्गलक्षाणि पूर्वम्। (ज्योतिष्क. मलय. वृ. ६१)। १५. पूर्वस्य परिमाणं वर्षकोटीनां सप्ततिः कोटिलक्षाः षट्पञ्चाशत्सहस्राणि, ७०५६०००००००००० पूर्वाङ्गं च पूर्वाङ्गेन गुणितं पूर्वं भवति। (बृहत्सं. मलय. वृ. ३१६, पृ. १२२)। १६. चतुरशीतिः पूर्वाङ्गशतसहस्राणि एकं पूर्वम्। (जीवाजी. मलय. वृ. २–१७८)। १७. पूर्वाङ्गं चतुरशीतिवर्षलक्षैर्गुणितं पूर्वं भवति। (बृहच्छीति दे. स्वो. वृ. ६९)। १८. पूर्वाङ्गलक्षैश्चतुरशीत्या पूर्वं प्रकीर्तितम्॥ पूर्वं च वर्षकोटीनां लक्षाणि किल सप्ततिः। षट्पञ्चाशत्सहस्राणि निर्दिष्टानि जिनेश्वरैः॥ (लोकप्र. २९, ४–५)।

१ चौरासी लाख पूर्वाङ्गों का एक पूर्व होता है। २ सत्तर लाख करोड़ और छप्पन हजार करोड़ (७०५६०००००००००) वर्ष प्रमाण एक पूर्व होता है।

पूर्वकृत, पूर्वगत—देखो पूर्वश्रुत। १. पुव्वगयं पंचाणउदिकोडि-पण्णासलक्ख-पंचपदेहि ९५५०००००५ उप्पाय-वय-धुवत्तादीणं वण्णणं कुणइ। (धव. पु. १, पृ. ११२–१३; पूर्वकृते पञ्चनवतिकोटि-पञ्चाशच्छतसहस्र-पञ्चपदे ९५५०००००५ उत्पाद-व्यय-ध्रौव्यादयो निरूप्यन्ते। (धव. पु. ९, पृ. २०९)। २. पुव्वगयं उप्पाय-वय-धुवत्तादीणं णाणाविहपत्थाणं वण्णणं कुणइ। (जयध. १, पृ. १३८)। ३. पूर्वमुत्पादादि प्रतीतम्। (शतक. मल. हेम. वृ. ३८)। ४. पूर्वमुत्पादपूर्वादि पूर्वोक्तस्वरूपम्। (कर्मवि. दे. स्वो. वृ. ७)। ५. पञ्चनवतिकोटि-पञ्चाशल्लक्ष-पञ्चपदपरिमाणं निखिलार्थानामुत्पाद-व्यय-ध्रौव्याद्यभिधायकं पूर्वगतम् ९५५०००००५। (श्रुतभ. टी. ९, पृ. १७४)।

१ जिस श्रुत में उत्पाद, व्यय और ध्रौव्य आदि की प्ररूपणा की जाती है उसे पूर्वगत श्रुत कहा जाता है। यह दृष्टिवाद के पांच भेदों में चौथा है। इसमें ९५५०००००५ पद होते हैं।

पूर्वदिशा—जस्स जओ आइच्चो उदेइ सा तस्स होइ पुव्वदिसा। (आचा. नि. ४७, पृ. १३)।

जिस दिशा से सूर्य का उदय होता है उसे पूर्वदिशा कहते हैं।

पूर्व-पश्चात्संस्तवपिण्ड—पूर्वसंस्तवं जननी-जनकादिद्वारेण पश्चात्संस्तवं श्वश्रू-श्वशुरादिद्वारेणात्मपरिचयानुरूपं सम्बन्धं भिक्षार्थं घटयतः पूर्व-पश्चात्संस्तवपिण्डः। (ओघनि. स्वो. विव. १–३८)।

माता-पितादि के सम्बन्ध के बतलाने को पूर्वसंस्तव और सास-ससुर के सम्बन्ध के बतलाने को पश्चात्संस्तव कहते हैं। इन दोनों प्रकार के सम्बन्धों को बतलाते हुए भिक्षा के ग्रहण करने से क्रमशः पूर्व-पश्चात्-संस्तवपिण्ड नामका दोष होता है।

पूर्वरतानुस्मरण—१. पूर्वं च तत् रतं च पूर्वरतं पूर्वकालभुक्तभोगः, तस्य अनुस्मरणमनुचिन्तनं पूर्वरतानुस्मरणम्। (त. वृत्ति श्रुत. ७–७)। २. रतं मोहोदयात् पूर्वं सार्द्धमन्याङ्गनादिभिः। तत्स्मरणमतीचारं पूर्वरतानुस्मरणम्॥ (लाटीसं. ६–६६)।

१ पूर्वकाल में भोगे हुए भोगों का स्मरण करना, इसका नाम पूर्वरतानुस्मरण है, वह ब्रह्मचर्यव्रत की

पाँच भावनाओं में से एक है।

पूर्वविदेह—मेरोः सकलात् पूर्वं क्षेत्रं पूर्वविदेहः। (त. वृत्ति श्रुत. ३-१०)।

मेरु पर्वत से पूर्व की ओर जो क्षेत्र है वह पूर्वविदेह कहलाता है।

पूर्वश्रुतज्ञान—एदस्स (वत्थुसमासस्स) उवरि एगक्खरे वड्ढिदे पुव्वं णाम सुदणाणं होदि। (धव. पु. ६, पृ. २५); पुणो एदस्स (वत्थुसमाससुदणाणस्स) उवरि एगक्खरे वड्ढिदे पुव्वसुदणाणं होदि। ×× × पुव्वगयस्स जे उप्पादपुव्वादिचोद्दसअहियारा तेसिं पुध पुध पुव्वसुदणाणमिदि सण्णा। (धव. पु. १३, पृ. २७१)।

वस्तुसमास श्रुतज्ञान के ऊपर एक अक्षर की वृद्धि के होने पर पूर्व नाम का श्रुतज्ञान होता है।

पूर्वश्रुतप्रत्याख्यान—तत्र पूर्वश्रुतप्रत्याख्यानं प्रत्याख्यानसंज्ञितं पूर्वम्। (आव. नि. मलय. वृ. १०५४; पृ. ५७६)।

प्रत्याख्यान नामक पूर्व को पूर्वश्रुतप्रत्याख्यान कहा जाता है।

पूर्वश्रुतावरणीय — पुव्वसुदणाणस्स जमावारयं कम्मं तं पुव्वावरणीयं। (धव. पु. १३, पृ. २७६)।

पूर्व श्रुत के आवारक कर्म को पूर्वश्रुतावरणीय कर्म कहते हैं।

पूर्वसमासश्रुतज्ञान—१. तस्स (पुव्वसुदणाणस्स) उवरि एगक्खरे वड्ढिदे पुव्वसमासो होदि। एवं पुव्वसमासो गच्छदि जाव लोगबिंदुसारचरिमक्खरं त्ति। (धव. पु. ६, पृ. २५); उप्पादपुव्वसुदणाणस्सुवरि एगक्खरे वड्ढिदे पुव्वसमाससुदणाणं होदि। एवमेगेगक्खरुत्तरवड्ढीए पुव्वसमाससुदणाणं वड्ढमाणं गच्छदि जाव अंगपविट्ठंगबाहिरसगलसुदणाणक्खराणि सव्वाणि वड्ढिदाणि त्ति। (धव. पु. १३, पृ. २७१)। २. तद्द्वयादिसंयोगस्तु पूर्वसमासः। (तत्त्वार्थ. भाष्य. हे. वृ. ३८; कर्मवि. दे. स्वो. वृ. ७)।

१ पूर्व श्रुतज्ञान के ऊपर एक अक्षर की वृद्धि के होने पर पूर्वसमासश्रुतज्ञान होता है। २ दो पूर्व आदि के संयोग का नाम पूर्वसमास है।

पूर्वसमासावरणीयकर्म — पुव्वसमाससुदणाणस्स ×××जमावारयं कम्मं तं पुव्वसमासावरणीयं। (धव. पु. १३, पृ. २७६)।

जो पूर्वसमास श्रुत को आच्छादित करता है उसे पूर्वसमासावरणीय कहते हैं।

पूर्वसंस्तव—१. दायगपुरओ किसी तं दाणवदी जसोधरो वेत्ति। पुव्वीसंथुदिदोसा किस्सरिदे बोधणं चावि॥ (मूला. ६-३६)। २. माय-पिइ पुव्वसंथव ××× । गुणसंथवेण पुव्वि संतासंतेण जो थुणिज्जाहि। दायारमदिन्नंमी सो पुव्विसंथवो हवइ॥ एसो सो जस्स गुणा वियरंति अवारिया दसदिसासु। इहरा कहासु सुणिमो पच्चक्खं अज्ज दिट्ठोऽसि॥ (पिण्डनि. ८५ व ९०-९१)। ३. गच्छतामागच्छतां च यतीनां भवदीयमेव गृहमाश्रयः इतीयं वार्ता दूरादेवास्माभिः श्रुतेति पूर्वं स्तुत्वा या लब्धा सा पूर्वसंस्तवदोषदुष्टा। (भ. आ. विजयो. व मूला. २३०)। ४. ददातीति दायको दानपतिः, तस्य पुरतः कीर्तिं ख्यातं भूते। कथम्? त्वं दानपतिर्यशोधरः, त्वदीयकीर्तिर्विश्रुता लोके, यद्दातुरग्रतो दानग्रहणात् प्रागेव भूते तस्य पूर्वसंस्तुतिदोषो नाम जायते। विस्मृतस्य च दानसम्बोधनम्—त्वं पूर्वं महादानपतिरिदानीं किमिति कृत्वा विस्मृत इति सम्बोधनं करोति यस्तस्यापि पूर्वसंस्तुतिदोषो भवतीति। (मूला. वृ. ६-३६)। ५. दाता ख्यातस्त्वमित्याद्यैर्यद् गेहानन्दनन्दनम्। पूर्वं पश्चाच्च भुक्तेस्तत् पूर्वं पश्चात् स्तवद्वयम्॥ (आचा. सा. ८-४१)। ६. स्तुत्वा दानपतिं दानं स्मरयित्वा च गृह्णतः। गृहीत्वा स्तुवतश्च स्तः प्राक्-पश्चात्संस्तवौ क्रमात्। (अन. ध. ५-२४)। ७. अहो जिनदत्त, त्वं जगति विख्यातो दाता वर्तसे इत्यादिभिर्वचनैर्गृहस्थस्यानन्दजननं भुक्तेः पूर्वं तत्पूर्वस्तवनम्। (भावप्रा. टी. ९९)।

१ तुम दानपति हो व तुम्हारी कीर्ति दान के विषय में फैली हुई है, अथवा तुम प्रसिद्ध दाता रहे हो, इस समय तुम उसे कैसे भूल गये हो, इत्यादि प्रकार से स्तुति करना व विस्मृत होने पर उसे पुनः सम्बोधित करना; यह पूर्वसंस्तुति दोष कहलाता है। यह साधु के आहारविषयक सोलह उत्पादन दोषों में है। २ दान ग्रहण करते समय माता-पिता आदि के रूप से परिचय देना, यह पूर्वसंस्तव दोष है; कारण यह कि माता-पिता आदि पूर्वकालभावी हैं। यह सम्बन्धसंस्तव है। वचनसंस्तव इस प्रकार है—दाता से भोजन आदि के ग्रहण करने पर सत्य या असत्य रूप उदारता आदि गुणों की प्रशंसाविषयक वचनसमूह के

द्वारा दाता की स्तुति करने पर पूर्वसंस्तव नामक उत्पादन दोष होता है।

पूर्वसंस्तुति—देखो पूर्वसंस्तव।

पूर्वाङ्ग—१. वर्षशतसहस्रं चतुरशीतिगुणितं पूर्वाङ्गम्। (त. भा. ४–१५)। २. चउरासीइं वाससयसहस्साणि से एगे पुव्वंगे। (भगवती. ६, ७, ४, पृ. ८२६; जम्बूद्वी. १८, पृ. ८९; अनुयो. सू. १३७, पृ. १७९)। ३. वाससहस्साइं चुलसीइगुणाइं होज्ज पुव्वंगं॥ (ज्योतिष्क. ६२)। ४. वाससयसहस्सं पुण चुलसीइगुणं हवेज्ज पुव्वंगं। (जीवस. ११२)। ५. लक्ष्या ह्यशीति स्वधिका चतुर्भिः पूर्वाङ्गमेकं मुनिभिः प्रदिष्टम्॥ (वराङ्ग. २७–८)। ६. चतुरशीतिवर्षशतसहस्राणि पूर्वाङ्गम्। (त. वा. ३, ३८, ७)। ७. पुव्वंगे परिमाणं पचसुण्णं चउरासी य। (अनुयो. हरि. वृ. पृ. ५४ उद्.)। ८. ज्ञेयं वर्षसहस्रं तु तच्चापि दशसंगुणम्। पूर्वाङ्गं तु तदभ्यस्तमशीत्या चतुरग्रया। (म. पु. ७–२४)। ९. चउरासीलक्खेहिं पुव्वंगउ। (म. पु. पुष्प. २–६, पृ. २३)। १०. तच्चतुरशीतिगुणितमेकं पूर्वाङ्गम्। (त. भा. सिद्ध. वृ. ४–१५)। ११. वाससदसहस्साणि चुलसीदिगुणं हवेज्ज पुव्वंगं। (जं. दी. प. १३–११)। १२. वरिसाणं लक्खेहिं चुलसीसंखेहिं होइ पुव्वंगं। (प्रव. सारो. १३८६)। १३. वर्षलक्षं चतुरशीतिरूपगुणितं पूर्वांगं भवति। (मूला. वृ. १२–६९)। १४. पूर्वाङ्गं चतुरशीतिवर्षलक्षाणि। (बृहत्सं. मलय. वृ. ३१६)। १५. चतुरशीतिर्वर्षलक्षाण्येकं पूर्वाङ्गम्। (ज्योतिष्क. मलय. वृ. ६१; जीवाजी. मलय. वृ. २–१७८)। १६. चतुरशीत्या च वर्षलक्षैः पूर्वाङ्गं भवति। (बडशी. दे. स्वो. वृ. ६९)। १७. वर्षलक्षाणि चतुरशीतिः पूर्वाङ्गमुच्यते। (लोकप्र. २९–४)।

१ चौरासी लाख वर्ष का एक पूर्वाङ्ग होता है।

पूर्वातिपूर्वश्रुतज्ञान—बहुषु पूर्वेषु वस्तुषु इदं श्रुतज्ञानं अतीव पूर्वमिति पूर्वातिपूर्वं श्रुतज्ञानम्। (धव. पु. १३, पृ. २८९)।

बहुत पूर्व वस्तुओं में यह श्रुतज्ञान अत्यन्त प्राचीन है, इसीलिए यह पूर्वातिपूर्व श्रुतज्ञान कहलाता है। यह श्रुत के ४१ पर्याय नामों में से एक है।

पूर्वानुज्ञा—इह योऽवग्रहः पुरातनसाधुभिरनुज्ञापितः सः यत् पाश्चात्यैरेवमेव परिभुज्यते न भूयोऽनुज्ञाप्यते सा पूर्वानुज्ञा। यथा—चिरन्तनसाधुभिर्देवेन्द्रो यदवग्रहमनुज्ञापितः सैव पूर्वानुज्ञा साम्प्रतसाधूनामप्यनुवर्तते, न पुनर्भूयोऽप्यनुज्ञाप्यते। (बृहत्क. क्षे. पृ. ६७०)।

इन्द्रादि पांच प्रकार के अवग्रह में जिस अवग्रह की प्राचीन साधुओं ने अनुज्ञा दी है उसका जो उत्तरकालीन साधुओं के द्वारा फिर से अनुज्ञा न लेकर उसी प्रकार से उपभोग किया जाता है, वह पूर्वानुज्ञा कहलाती है। जैसे—प्राचीन साधुओं ने देवेन्द्र के लिए जिस अवग्रह की अनुज्ञा दी है वही वर्तमान साधुओं की भी अनुज्ञा है, वे फिर से उसे अनुज्ञा नहीं देते।

पूर्वानुपूर्वी—१. जं मूलादो परिवाडीए उच्चदे सा पुव्वाणुपुव्वी। (धव. पु. १, पृ. ७३); उद्दिट्ठकमेण अत्थाहियारपरूवणा पुव्वाणुपुव्वी णाम। (धव. पु. ९, पृ. १३५)। २. जं जेण कमेण सुत्तकारेहि ठइदमुप्पण्णं वा तस्स तेण कमेण गणणा पुव्वाणुपुव्वी णाम। (जयध. पु. १, पृ. २८)।

१ मूल से—उद्देश के अनुसार—जो क्रम से प्ररूपणा की जाती है उसे पूर्वानुपूर्वी कहते हैं।

पृच्छना—देखो प्रच्छना। १. पुच्छणा सुत्तस्स अत्थस्स वा भवति। (दशवै. चू. पृ. २८)। २. संशयच्छेदाय निश्चितबलाधानाय वा परानुयोगः पृच्छनम्। आत्मोन्नति-परातिसन्धानोपहास-संघर्ष-प्रहसनादिवर्जितः संशयच्छेदाय निश्चितबलाधानाय वा ग्रन्थस्यार्थस्य तदुभयस्य वा परं प्रत्यनुयोगः पृच्छनमिति भाष्यते। (त. वा. ९, २५, २)। ३. तत्थ आगमे अमुणिदत्थपुच्छा वा उवजोगो (आगमे अमुणिदत्थपुच्छा पुच्छणा णाम)। (धव. पु. ९, पृ. २६२); अणिच्छिदट्ठाणं पण्हवावारो पुच्छणं णाम। (धव. पु. १४, पृ. ९)। ४. संशयच्छेदाय निश्चितबलाधानाय वा परानुयोगः पृच्छना। (त. श्लो. ९–२५)। ५. आत्मोन्नतिप्रकटनार्थं पराभिसन्धानार्थमुपहास-संघर्ष-ग्रहसनादिवर्जितः संशयच्छेदाय निश्चितबलाधानाय वा ग्रन्थस्यार्थस्य तदुभयस्य परं प्रति पर्यनुयोगः पृच्छना। (चा. सा. पृ. ६७)। ६. पृच्छना प्रश्नः अनुयोगः, शास्त्रस्यार्थं जानन्नपि गुरुं पृच्छति। किमर्थम्? सन्देहविनाशाय। निश्चितोऽप्यर्थः किमर्थं पृच्छयते? बलाधाननिमित्तं ग्रन्थार्थप्रबलतानिमित्तम्, सा पृच्छना। (त. वृत्ति श्रुत.

६–२५)। ७. सूत्रादौ शङ्किते प्रश्नो गुरूणां पृच्छना मता। (लोकप्र. ३०–६७)।

१ सूत्र या अर्थ के विषय में पूछना, इसका नाम पृच्छना है। २ आगमप्रकरपित अर्थ के अज्ञात (अनिश्चित) होने पर उसके विषय में जो प्रश्न किया जाता है, इसे पृच्छना कहा जाता है। यह आगमाधिकारविषयक उभयोग का एक भेद है।

पृच्छनी भाषा—पृच्छनी अविज्ञातस्य सन्दिग्धस्य कस्यचिदर्थस्य परिज्ञानाय तद्विदः पार्श्वे चोदना। (प्रज्ञाप. मलय. वृ. ११–१६५, पृ. २५६)।

अज्ञात अथवा सन्दिग्ध किसी पदार्थ के परिज्ञानार्थ तद्विषयक अज्ञान को दूर करनेवाले किसी विद्वान् के पास में जिस भाषा में पूछा जाता है वह पृच्छनी भाषा कहलाती है।

पृच्छाविधि—द्रव्य-गुण-पर्याय-विधि-निषेधविषय-प्रश्नः पृच्छा, तस्याः क्रमः अक्रमप्रायश्चित्तं च विधीयते अस्मिन्निति पृच्छाविधिः श्रुतम्। अथवा पृष्टोऽर्थः पृच्छा, सा विधीयते निरूप्यतेऽस्मिन्निति पृच्छाविधिः श्रुतम्। (धव. पु. १३, पृ. २८५)।

द्रव्य, गुण, पर्याय, विधि और निषेधविषयक प्रश्न का नाम पृच्छा है। उसके क्रम, अक्रम और अक्रमप्रायश्चित्त का जिस श्रुत में विधान किया जाता है उसे नाम से पृच्छाविधि कहा जाता है। अथवा पूछे गये अर्थ का नाम पृच्छा है, उसका जिस श्रुत में निरूपण किया जाता है उसे पृच्छाविधि समझना चाहिए।

पृच्छाविधिविशेष—विधानं विधिः, पृच्छायाः विधिः पृच्छाविधिः। स विशिष्यतेऽनेनेति पृच्छाविधिविशेषः। अर्हदाचार्योपाध्याय-साधवोऽनेन प्रकारेण पृष्टव्याः, प्रश्नभङ्गाश्च इयन्त एवेति यतः सिद्धान्ते निरूप्यन्ते ततस्तस्य पृच्छाविधिविशेष इति संज्ञेत्युक्तं भवति। (धव. पु. १३, पृ. २८५)।

अरहन्त, आचार्य, उपाध्याय और साधु से इस प्रकार से प्रश्न करना चाहिए तथा प्रश्न के भंग इतने हैं, इस प्रकार जिस श्रुत में प्रश्न की विधि का विशेष रूप से निरूपण किया जाता है उसे नाम से पृच्छाविधिविशेष कहा जाता है।

पृथक्त्व—पुधत्तमिति तिण्हं (कोडीणं) उवरि नवण्हं (कोडीणं) हेट्ठदो जा संखा सा घेत्तव्वा। (धव. पु. ३, पृ. ८६)।

तीन से आगे और नौ से पूर्व की जो संख्या ४-५ आदि है वह संख्या पृथक्त्व के अन्तर्गत मानी जाती है।

पृथक्त्वविक्रिया—पृथक्त्वविक्रिया स्वशरीरावन्यत्वेन प्रासाद-मण्डपादिविक्रिया। (त. वा. २, ४७, ४)।

अपने शरीर से भिन्न जो भवन एवं मण्डप आदि रूप विविध क्रिया की जाती है उसका नाम पृथक्त्वविक्रिया है।

पृथक्त्ववितर्कवीचारशुक्लध्यान—१. दव्वाइं अणेयाइं तीहिं वि जोगेहिं जेण ज्झायंति। उवसंतमोहणिज्जा तेण पुधत्तं त्ति तं भणिया॥ जम्हा सुदं वितक्कं जम्हा पुव्वगदअत्थकुसलो य। ज्झायदि ज्झाणं एदं सवितक्कं तेण तं झाणं॥ अत्थाण वंजणाण य जोगाण य संकमो हु वीचारो। तस्स य भावेण तयं सुत्ते उत्तं सवीचारं॥ (भ. आ. १८८०–८२; धव. पु. १३, पृ. ७८ उद्.)। २. द्रव्यपरमाणुं भावपरमाणुं वा ध्यायन्नाहितवितर्कसामर्थ्यः अर्थ-व्यञ्जने काय-वचसी च पृथक्त्वेन संक्रामता मनसाऽपर्याप्तबालोत्साहवदव्यवस्थितेनानिश्चितेनापि शस्त्रेण चिरात्तरुं छिन्दन्निव मोहप्रकृतीरुपशमयन् क्षपयंश्च पृथक्त्ववितर्कवीचारध्यानभाग्भवति। (त. सि. ९–४४)। ३. तत्थ पुहुत्तवितक्कं सविचारि णाम—पृथग्भावः पृथक्त्वम्, तिहि वि जोगेसु पवत्तइत्ति वुत्तं भवइ, अहवा पुहुत्तं णाम वित्थारो भण्णइ, सुयणाणोवउत्तो अणेगेहिं परियाएहिं झायइत्ति वुत्तं भवइ, वियक्को सुतं, विचारो णाम अत्थ-वंजण-जोगाण संकमणं, सह विचारेण सविचारं, अत्थ-वंजण-जोगाणं जत्थ संकमण तं सवियारं भण्णइ, तं च झायमाणो चोद्दसपुव्वी सुयनाणोवउत्तो अत्थओ अत्थंतरं गच्छइ, वंजणाओ वंजणंतरं, वंजणं अक्खरं भण्णइ, जोगाउ जोगंतरं, जोगो मण-वयण-कायजोगो भण्णइ। भणियं च—सुयनाणे उवउत्तो अत्थंमि य वंजणंमि सविचारं। झायइ चोद्दसपुव्वी पढमं झाणं सरागो उ॥ अत्थसंकमणं चेव तहा वंजणसंकमं। जोगसंकमणं चेव पढमे झाणे णिगच्छइ॥ (दशवै. चू. पृ. ३४–३५)। ४. एकाग्रमना उपशान्तराग-द्वेष-मोहो नैपुण्यान्निगृहीतशरीरक्रियो मन्दोच्छ्वासनिःश्वासः सुनिश्चिताभिनिवेशः क्षमावान् बाह्याभ्यन्तरान् द्रव्य-पर्यायान् ध्यायन्नाहितवितर्कसामर्थ्यः अर्थ-व्यञ्जने काय-वचसी च

पृथक्त्वेन संक्रामता मनसाऽपर्याप्तबालोत्साहवदव्यवस्थितेनानिशितेनापि शस्त्रेण चिरात्तरुं छिन्दन्निव मोहप्रकृतीरुपशमयन् क्षपयंश्च पृथक्त्ववितर्कवीचारध्यानम् भवति । पुनर्वीर्यविशेषहानेर्योगाद् योगान्तरं व्यञ्जनाद् व्यञ्जनान्तरमर्थादर्थान्तरमाश्रयन् ध्यानविभूतमोहरजाः ध्यानयोगान्निवर्तते इति । उक्तं पृथक्त्ववितर्कवीचारम् । (त. वा. ९–४४) । ५. पृथक्त्वं भेदः, वितर्कः श्रुतं द्वादशांगम्, वीचारः संक्रान्तिः अर्थ-व्यञ्जन-योगेषु पृथक्त्वेन भेदेन वितर्कस्य श्रुतस्य वीचारः संक्रान्तिः यस्मिन् ध्याने तत् पृथक्त्ववितर्कवीचारम् । (जय. धु. १३, पृ. ७७) । ६. पृथक्त्वेन भेदेन वितर्कस्य श्रुतस्य द्वादशाङ्गादेर्वीचारो ऽर्थ-व्यञ्जन-योगेषु सङ्क्रान्तिर्यस्मिन् ध्याने तत् पृथक्त्ववितर्कवीचारं ध्यानम् । (जयध. १, पृ. ३४४) । ७. द्रव्याद् द्रव्यान्तरं याति पर्यायं चान्यपर्ययात् । व्यञ्जनाद् व्यञ्जनं योगाद्योगान्तरमुपैति यत् ॥ शुक्लं तत् प्रथमं शुक्लतरलेश्याबलाश्रयम् । (ह. पु. ५६, ६२–६३) । ८. पृथक्त्वेन वितर्कस्य वीचारो यत्र तद्विदुः । सवितर्कं सवीचारं पृथक्त्वादिपदाह्वयम् ॥ पृथक्त्वं विद्धि नानात्वं वितर्कः श्रुतमुच्यते । अर्थ-व्यञ्जन-योगानां वीचारः संक्रमो मतः ॥ अर्थादर्थान्तरं गच्छन् व्यञ्जनाद् व्यञ्जनान्तरम् । योगाद् योगान्तरं गच्छन ध्यायतीदं वशी मुनिः ॥ त्रियोगः पूर्वविद् यस्माद् ध्यायत्येनन्मुनीश्वरः । सवितर्कं सवीचारमतः स्याच्छुक्लमादिमम् ॥ (म. पु. २१, १७० व १७२–७४) । ९. कृतगुप्त्याद्यनुष्ठानो यतिर्वीर्यातिशायनः । अर्थ-व्यञ्जन-योगेषु संक्रान्तौ पृथगुद्यतः ॥ तदोपशमनान्मोहप्रकृतीः क्षपयन्नपि । यथापरिचयं ध्यायेत् क्वचिद्वस्तुनि सक्रियः ॥ सवितर्कं सवीचारं पृथक्त्वेनादिमं मुनिः । ध्यानं प्रक्रमते ध्यातुं पूर्वदेही निराकुलः । (त. श्लो. ९, ४४, ३–५) । १०. द्रव्याण्यनेकभेदानि योगैर्ध्यायति यत् त्रिभिः । क्षान्तमोहस्ततो ह्येतत् पृथक्त्वमिति कीर्तितम् ॥ श्रुतं यतो वितर्कः स्याद्यतः पूर्वार्थशिक्षितः । पृथक्त्वं ध्यायति ध्यानं सवितर्कं ततो हि तत् । अर्थ-व्यजन-योगानां वीचारः संक्रमो मतः । वीचारस्य हि सद्भावात् सवीचारमिदं भवेत् ॥ (त. सा. ७, ४५–४७) । ११. पज्जायं च गुणं वा जम्हा दव्वाण मुणइ भेएण । तम्हा पुहुत्तणामं भणियं झाणं मुणिदेहिं ॥ भणियं सुयं वियक्कं वट्टइ सह तेण तं खु अणवरयं । तम्हा तस्स वियक्कं सवियारं पुण भणिस्सामो ॥ जोएहि तीहि वियरइ अक्खर-अत्थेसु तेण सवियारं । पढमं सुक्कज्झाणं अतिक्खपरसोवमं भणियं ॥ (भावसं. दे. ६४४ से ६४६) । १२. पृथक्त्वेन वितर्कस्य वीचारो यत्र विद्यते । सवितर्कं सवीचारं सपृथक्त्वं तदिष्यते ॥ (ज्ञानार्णव ४२-१३, पृ. ४३३)। १३. पृथक्त्वम् नानात्वम्, वितर्को द्वादशांगश्रुतज्ञानम्, वीचारोऽर्थ-व्यञ्जन-योगसंक्रान्तिः, व्यञ्जनमभिधानम्, तद्विषयोऽर्थः, मनोवाक्कायलक्षणो योगः, अन्ये[न्यो]ऽन्यतः परिवर्तनं संक्रान्तिः, पृथक्त्वेन वितर्कस्यार्थ-व्यञ्जन-योगेषु संक्रान्तिर्वी[र्वी]चारो यस्मिन्नस्तीति तत्पृथक्त्ववितर्कवीचारं प्रथमं शुक्लम् । (चा. सा. पृ. ९१) । १४. द्रव्य-गुण-पर्यायाणां भिन्नत्वं पृथक्त्वं भण्यते, स्वशुद्धात्मानुभूतिलक्षणं भावश्रुतं तद्वाचकमन्तर्जल्पवचनं वा वितर्को भण्यते, अनीहितवृत्त्यार्थान्तरपरिणमनं वीचारो भण्यते । अत्रायमर्थः—यद्यपि ध्याता पुरुषः स्वशुद्धात्मसंवेदनं विहाय बहिश्चिन्तां न करोति तथापि यावतांशेन स्वरूपे स्थिरत्वं नास्ति तावतांशेनानीहितवृत्त्या विकल्पाः स्फुरन्ति, तेन कारणेन पृथक्त्ववितर्कवीचारं ध्यानं भण्यते । (बृ. द्रव्यसं. टी. ४८, पृ. १७८) । १५. पृथक्त्वेन एकद्रव्याश्रितानामुत्पादादिपर्यायाणां भेदेन, वितर्को विकल्पः पूर्वगतश्रुतालम्बनो नानानयानुसरणलक्षणो यत्र तत् पृथक्त्ववितर्कम्, तथा विचारः अर्थाद् व्यञ्जने व्यञ्जनादर्थे मनःप्रभृतियोगानां चायस्मादन्यतरस्मिन् विचरणम्, सह विचारेण यत् तत् सविचारि । (औपपा. अभय. वृ. पृ. ४४) । १६. एकत्र पर्यायाणां विविधनयानुसरणं श्रुतद्रव्ये । अर्थ-व्यञ्जन-योगान्तरेषु संक्रमणयुक्तमाद्यं तत् ॥ (योगशा ११–६) । १७. द्रव्याण्यनेकभेदभिन्नानि त्रिभिर्योगैर्यतो ध्यायति ततः पृथक्त्वमित्युच्यते । वितर्कः श्रुतम्, यस्माद्वितर्केण श्रुतेन सह वर्तते यस्माच्च नव-दश-चतुर्दशपूर्वधरैरारभ्यते तस्मात् सवितर्कं तत् । विचारोऽर्थ-व्यञ्जन-योगसंक्रमणः । ××× अस्य त्रिप्रकारस्य (पृथक्त्व-वितर्क-विचाररूपस्य) ध्यानस्योपशान्तकषायः स्वामी । (मूला. वृ. ५–२०७) । १८. आद्यं शुक्लमनेकधा स्वविषये वृत्त्या पृथक्त्वेन यत्, सर्वद्रव्यगतश्रुतस्य परमस्यास्मिन् वितर्कस्य यः । संचारोऽर्थ-वचस्त्रियोग-

ग्रहणे वीचार एवो भवेत्, ध्यानं सार्थकनामधाम तदिदं स्यादिष्टसंपत्प्रदम् ॥ (आचा. सा. १०-४८)। ११. द्रव्यात् पर्यायार्थे पर्यायाच्च द्रव्यार्थे संक्रमणं अर्थसंक्रान्तिः, श्रुतस्विच्छ्रुतवचनाच्छब्दान्तरे संक्रमणं व्यञ्जनसंक्रान्तिः, कायवर्गणाजनितकायपरिस्पन्दाद्योगान्तरे स्ववर्गणाजनितपरिस्पन्दाच्चाद्योगान्तरात् काययोगे संक्रमणं योगसंक्रान्तिः सविचार इत्याख्यायते, विविधचरणस्य विचारत्वात्। तदनेन प्रथमशुक्लध्यानं पृथक्त्ववितर्कमुक्तं भवति। द्रव्य-पर्याययोः पृथक्त्वेन भेदेन वितर्को विचारश्चास्मिन्निति व्याख्यानात् सविचारं तदिति संप्रतिपत्तेः। ××× तत्र ध्याता तत्त्वार्थज्ञः कृतगुप्त्यादिपरिकर्माऽविर्भूतवितर्कसामर्थ्यः पृथक्त्वेनार्थ-व्यञ्जन-योगसंक्रमणात् संयतमना मोहप्रकृतीरुपशमयन् क्षपयन् वा ध्येये द्रव्यपरमाणौ। भावपरमाणौ वा पृथक्त्ववितर्कविचारं ध्यानमारभते (त.शुक्लको. वृ. ९-४४)। २०. गुप्त्यादिषु कृतपरिकर्मा विहिताभ्यासः सन् परद्रव्यपरमाणुं द्रव्यस्य सूक्ष्मत्वं भावपरमाणुं पर्यायस्य सूक्ष्मत्वं वा ध्यायन् सन् समारोपितवितर्कसामर्थ्यः सन्नर्थ-व्यञ्जने काय-वचसी च पृथक्त्वेन संक्रमता मनसा असमर्थशिशुशमवत् प्रौढार्थकवद्व्यवस्थितेन प्रतीक्ष्णेन कुठारादिना शस्त्रेण विराद् वृक्षं छिन्दन्निव मोहप्रकृतीरुपशमयन् क्षपयंश्च मुनिः पृथक्त्ववितर्कवीचारध्यानं भजते। (त. वृत्ति श्रुत. ९-४४)। २१. उत्पादादिपर्यायाणामेकद्रव्यवर्तिनाम्। विस्तारेण पृथग्भेदैर्वितर्को यद्विकल्पनम् ॥ नानानयानुसरणात्मकात्पूर्वगतश्रुतात्। तत्र ध्याने तत्पृथक्त्ववितर्कमिति वर्णितम् ॥ अत्र च व्यञ्जनाद् अर्थे तथार्थाद् व्यञ्जनेऽसकृत्। विचारोऽस्ति विचरणं सविचारं तदीरितम् ॥ मनःप्रभृतियोगानामेकस्मादपरत्र च। विचारोऽस्ति विचरणं सविचारं ततोऽप्यदः ॥ एवं च—यत् पृथक्त्ववितर्कद्वयं सविचारं भवेद्विह। तत् स्यादुभयधर्माढ्यं शुक्लध्यानं किलादिमम् ॥ (लोकप्र. ३०, ४८०-८४, पृ. ४४२)।

१ पृथक्त्ववितर्क-वीचार शुक्लध्यान का ध्याता उपशान्तमोह—ग्यारहवें गुणस्थानवर्ती संयत—अनेक द्रव्यों का तीनों ही योगों के आश्रय से ध्यान करता है। इसीलिए इस ध्यान का उल्लेख पृथक्त्व शब्द के द्वारा किया जाता है। वह चूंकि पूर्वगत श्रुत के अर्थ में कुशल—पूर्वों का ज्ञाता श्रुतकेवली—होता है, इसलिए श्रुत का बोधक होने से उस ध्यान को सवितर्क शब्द से कहा जाता है। तथा वह ध्यान अर्थ, व्यञ्जन और योगों के परस्पर परिवर्तनरूप वीचार से सहित होता है, इसी से उसे सविचार भी कहा गया है। ३ तीनों योगों में प्रवृत्त होना, इसका नाम पृथक्त्व है, अथवा पृथक्त्व नाम विस्तार का जानना चाहिए, इस ध्यान का ध्याता श्रुतज्ञान में उपयुक्त होता हुआ अनेक पर्यायों के आश्रय से ध्यान करता है; यह पृथक्त्व का अभिप्राय समझना चाहिए। वितर्क का अर्थ श्रुत और वीचार का अर्थ है अर्थ, व्यञ्जन (श्रुतवाक्य) एवं योगों का संक्रमण। इसका ध्याता श्रुतज्ञान में उपयुक्त चतुर्दशपूर्वविद् होता है, इससे उसे सवितर्क कहा गया है। वह एक अर्थ से दूसरे अर्थ को, एक व्यञ्जन से दूसरे व्यञ्जन को, तथा एक योग से दूसरे योग को प्राप्त होता है; इसीलिए उसे अर्थ, व्यञ्जन योगों के संक्रमणरूप वीचार से सहित होने के कारण सविचार कहा गया है। इस प्रकार से उक्त ध्यान पृथक्त्ववितर्क-सविचारी कहलाता है।

पृथग्विमात्रा— पृथग्विमात्रा हास्येन प्रारब्धाः प्रद्वेषेण निष्ठाङ्गता। (जीतक. चू. वि. व्या. ५-२१, पृ. ३९)।

जो उपसर्ग हास्य से प्रारब्ध होकर द्वेष से समाप्त होते हैं वे पृथग्विमात्रा कहलाते हैं।

पृथिवी—१. पुढवी चित्तमंतमक्खाया अणेगजीवा पुढोसत्ता अन्नत्थ सत्थपरिणएणं। (दशवै. सू. ४–१, पृ. १३६)। २. तत्र अचेतना वैश्रसिकपरिणामनिर्वृत्ता काठिन्य-(त. वा. 'काठिन्यादि'-) गुणात्मिका पृथिवी। (स. सि. २–१३; त. वा. २, १३, १)। ३. पृथिवी काठिन्यादिलक्षणा प्रतीता। (दशवै. सू. हरि. वृ. ४–१, पृ. १३८)। ४. तत्राध्वादिस्थिता धूलिः पृथिवी। (त. वृत्ति श्रुत. २–१३)।

१ अपना अपना पृथक् अस्तित्व रखने वाले अनेक जीवों से युक्त पृथिवी चित्तवती—चेतना से युक्त (सजीव), अथवा चित्तमात्रा—अल्पचेतना वाली—कही गई है। विशेष इतना जानना चाहिए कि शस्त्रपरिणत पृथिवी चित्तवती (सजीव) नहीं है। शस्त्र द्रव्यशस्त्र आदि (जैसे—शस्त्र, अग्नि, विष, क्षार और नमक आदि) के भेदसे अनेक प्रकार का है। २ स्वाभाविक परिणाम से निर्मित जो

अचेतन और कठिन भूमि है वह पृथिवी कहलाती है।

पृथिवीकाय— १. कायः शरीरम्, पृथिवीकाय-जीवपरित्यक्तः पृथिवीकायः। (स. सि. २–१३; त. वा. २–१३)। २. इष्टकादिः पृथिवीकायः, पृथिवीकायिकजीवपरिङ्गृहीतत्वात् इष्टकादिः पृथिवी-कायः कथ्यते मृतमनुष्यादिकायवत्। (त. वृत्ति श्रुत. २–१३)।

१ काय का अर्थ शरीर है, पृथिवीकायिक जीव के द्वारा जो शरीर छोड़ा जा चुका है उसे पृथिवीकाय कहा जाता है।

पृथिवीकायिक—१. कायाणुवादेण पुढविकाइओ णाम कधं भवदि ? पुढविकाइयणामाए उदएण। (षट्खं. २, १, १८–१९—धव. पु. ७, पृ. ७०)। २. पृथिवी कायोऽस्यास्तीति पृथिवीकायिकः। (स. सि. २–१३; त. वा. २–१३)। ३. सैव (पृथिवी एव) कायः शरीरं येषां ते पृथिवीकायाः, पृथिवी-काया एव पृथिवीकायिकाः। स्वार्थिकष्ठक्। (द्रव्यसं. सू. हरि. वृ. ४–१, पृ. १३८)। ४. पुढविकाइय-णामकम्मोदयवंतो जीवा पुढविकाइया त्ति वुच्चंति। (धव. पु. ३, पृ. ३३०)। ५. पृथिवी कायो विद्यते यस्य स पृथिवीकायिकः। (त. वृत्ति श्रुत. २–१३)।

१ जो जीव पृथिवीकायिक नामकर्म के उदय से युक्त होते हुए पृथिवी को शरीररूप से ग्रहण किये हुए हैं वे पृथिवीकायिक कहलाते हैं।

पृथिवीजीव — १. समवाप्तपृथिवीनामकर्मोदयः कार्मणकाययोगस्थो यो न तावत् पृथिवीं कायत्वेन गृह्णाति सः पृथिवीजीवः। (स. सि. २–१३; त. वा. २–१३)। २. पृथिवीं कायत्वेन यो गृहीष्यति प्राप्तपृथिवीनामकर्मोदयः कार्मणकाययोगस्थः स पृथिवीजीवः। (त. वृत्ति श्रुत. २–१३)।

१ जो जीव पृथिवीकाय नामकर्म के उदय से युक्त होकर कार्मण काययोग में स्थित होता हुआ—विग्रह-गति में वर्तमान होता हुआ—पृथिवी को शरीररूप से ग्रहण नहीं करता है—आगे ग्रहण करने वाला है—उसे पृथिवीजीव कहते हैं।

पृथिवीमण्डल—देखो भौममण्डल। शिलिबीज-समाकान्तं हुतहेमसमप्रभम्। स्याद्वज्रलाञ्छनोपेतं चतुरस्रं वरपुरम्॥ (ज्ञानार्णव २९-१९, पृ. २८८)। जो पृथिवी बीजाक्षर से युक्त होकर विघटने (नष्ट होने) वाले सुवर्ण के समान कान्तिवाला, वज्रचिह्न से संयुक्त और आकार में चौकोण होता है वह वरपुर या पृथिवीमण्डल कहलाता है।

पृथिवीराजिसदृश क्रोध— देखो भूमिराजिसदृश क्रोध।

पृथ्वी—देखो पृथिवी। वर्णाश्रमवती धान्य-हिरण्य-पशु-कुप्यवृष्टिप्रदानफला च पृथ्वी। (नीतिवा. ५–५)।

जो ब्राह्मणादि वर्णों एवं ब्रह्मचारी आदि आश्रमों से युक्त होती हुई धान्य (अन्न), हिरण्य (सुवर्ण आदि), पशु और कुप्य—सुवर्ण-चांदीभिन्न; इनका वर्षण करती है—उन्हें प्रदान करती है—वह पृथ्वी कहलाती है। इसका पालन राजा किया करता है।

